SARASVATĪBHAVANA-GRANTHAMĀLĀ

[Vol. 128]

TATTVAMUKTĀKALĀPA

[Part—1]

OF

ŚRĪMADVENKATANĀTHA MAHĀDEŚIKA

With Three Commentaries

SARVĀRTHASIDDHI

BY

SRIMADVENKATANĀTHA

ĀNANDADĀYINĪ

BY

NRSIMHADEVA

&

AKSARĀRTHA

BY

DEVANĀTHATĀTĀCĀRYA

EDITED BY

DR. N. R. ŚRĪKRSNATĀTĀCĀRYA

Reader

Dept. in "NYĀYA" Philosophy

Śrī Sadāśiva Kendrīya Sanskrit Vidyāpītha

PURI



VARANASI

1990

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

□

Published by—
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi–221 002.

□

Available at—
Sales Department
Sampurnanand Sanskrit University
Varanasi–221 002.

□

First Edition, 1000 Copies
Price Rs. 120·00

□

Printed by—
VIJAYA PRESS,
Sarasauli,
Varanasi.

सरस्वतीभवन-ग्रन्थमाला

[१२८]

श्रीमद्वेङ्कटनाथमहादेशिकप्रणीतः

तत्त्वमुक्ताकलापः

[प्रथमो भागः]

श्रीमद्वेङ्कटनाथकृतया

स्वोपज्ञसर्वार्थसिद्धिव्याख्यया

नृसिंहदेवकृतया

आनन्ददायिनीव्याख्यया

देवनाथतातार्यकृतया

अक्षरार्थव्याख्यया च

संवलितः

सम्पादकः

डॉ० ना० रा० श्रीकृष्णतातार्यः

उपार्यः,

न्यायविभागस्य

श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठे

जगन्नाथपुर्य्याम्

वाराणस्याम्

२०४७ तमे वैक्रमाब्दे १९१२ तमे शकाब्दे १९९० तमे ख्रीस्ताब्दे

अनुसन्धान-प्रकाशन-पर्यवेक्षकः —
निदेशकः, अनुसन्धान-संस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी।

□

प्रकाशकः—
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी–२२१ ००२.

□

प्राप्तिस्थानम्—
विक्रय-विभागः,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी–२२१ ००२.

□

प्रथमं संस्करणम्, १००० प्रतिरूपाणि
मूल्यम् —१२०=०० रूप्यकाणि

□

मुद्रकः—
विजय प्रेस,
सरसौली,
वाराणसी

प्ररोचना

विद्वद्वरैः **श्रीकृष्णतातार्चार्यै**र्विशिष्टाद्वैतवेदान्तनये अर्जितयशस्कैः श्रीमद्वेङ्कटनाथ-महादेशिकप्रणीतस्तत्त्वमुक्ताकलापग्रन्थः, ग्रन्थकृत्कृतस्वोपज्ञसर्वार्थसिद्धि–नृसिंहदेवकृत–आनन्ददायिनी–देवनाथतातार्चार्यकृत–अक्षरार्थटीकात्रयसंवलितो महता परिश्रमेण सम्पादितः, विवेचनपूर्णया प्रस्तावनया विभूषितश्चेति महते परितोषाय। अस्य ग्रन्थस्य प्रथमो भागोऽधुना प्रकाश्यतामानीयते। वेङ्कटनाथमहादेशिकानां काव्ये, दर्शने, नाट्ये सर्वत्रैव तुल्य उत्कर्षो दरीदृश्यते। विशिष्टाद्वैतनयस्य संस्थापने, दृढीकरणे तेषां समस्तं जीवनमर्पितमासीत्। वैदुष्यस्य वैदग्ध्यस्य च एतादृक् सङ्गमोऽतीव दुर्लभः। इतोऽपि दुर्लभो लोकभाषाग्रथितभक्तिवाङ्मयस्यावगाहनम्, संस्कृतभाषया तद्गततत्त्वस्य स्फुटीकरणञ्च। तत्त्वमुक्ताकलापग्रन्थस्य विशेषेण प्रौढं तर्कसङ्गुफनम्। अस्य ग्रन्थस्य भाषा छन्दोमयी, संश्लिष्टा, गभीरा च। टीकात्रयसाहाय्येनैवास्य विवृतिः सम्भवति।

श्रीमत्तातार्चार्यैरनेन सम्पादनेन वेदान्तनयानुरागिणां जनानां कृते महदुपकृतम्। अस्य ग्रन्थस्य प्रथमे भागे जडद्रव्यसरः, जीवसर इति प्रकरणद्वयं निष्पन्नम्। द्वितीये भागे नायकबुद्धयद्रव्याणां विवेचनं प्रस्तोष्यते।

प्रस्तावनायां विशदतया श्रीतातार्चार्यैः प्रतिपाद्यविषयः संगृहीतः, तदतीव सुव्यवस्थितः। मन्ये, अयं ग्रन्थो विद्वद्भिर्बहोःकालात् प्रतीक्ष्यमाणः प्रकाश्यतामानीयते। सर्वेषां विदुषां परितोषाय भवत्वयं ग्रन्थ इति।

काश्याम्
आषाढकृष्णैकादश्याम्
२०४७ वैक्रमाब्दे
(१९।६।१९९० ख्रैस्ताब्दे)

विद्यानिवासमिश्रः
कुलपतिः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

॥ श्रीमते श्रीनिवासपरब्रह्मणे नमः ॥

॥ श्रीमते निगमान्तमहागुरवे नमः ॥

प्रस्तावना

श्रियः पतिं प्रणम्याथ निगमान्तमहागुरुम् ।
आचार्यं देवनाथं च भक्त्याऽहं भावयेऽनिशम् ॥

अथेदानीं समेषां विदुषां महतो हर्षस्य विषयः; यत्किल सर्वतन्त्रस्वतन्त्रैः श्रीमद्वेङ्कटनाथमहादेशिकैरनुगृहीतं तत्त्वमुक्ताकलापग्रन्थरत्नं आनन्ददायिनीव्याख्यासनाथीकृतस्वोपज्ञसर्वार्थसिद्धिविभूषितं, अक्षरार्थव्याख्यासहितं च संमुद्रय प्रकाशनेनास्मन्नयननसुलभतामाप्नोति ।

तत्र तत्त्वमुक्ताकलापाख्यो मूलग्रन्थः स्रग्धरावृत्तगुम्भितः ५०० पद्यमयस्सूत्रवत् रामानुजसिद्धान्तसंमतसकलवेदान्तार्थसंग्राहकः; तस्य सर्वार्थसिद्धिनामकः स्वोपज्ञवृत्तिग्रन्थो दर्शनान्तरोक्ततत्तद्युक्तिप्रमाणादिविवेचनपूर्वकं तदीयसिद्धान्तखण्डनमुखेन स्वमतसंरक्षणाय निर्धारणाय च प्रगल्भते । तथा चाहुः —

सर्वार्थसिद्धिश्शतदूषणी च
द्वे खेटशस्त्रे विबुधाग्रगाणाम् ।
एकेन तत्र क्रियते स्वरक्षा
प्रत्यर्थिभङ्गः कलहेऽन्यतस्स्यात् ॥ इति ।

सर्वार्थसिद्धेरप्यतीव गहनतया तत्र बौद्धादिमतान्तरनिरसनावसरे सम्यगर्थावबोधनाय प्रतिपादनावश्यकतां पर्यालोच्य श्रीमन्नृसिंहराजेन पण्डितवर्येण आनन्ददायिनी नाम्नी तद्व्याख्या रचिता ।

सूत्रतुल्यस्य तत्त्वमुक्ताकलापस्य श्लोकरूपस्य मूलग्रन्थमात्रस्यार्थमधिजिगांसूनां अक्लेशेनावगत्यर्थं अय्या श्रीदेवनाथतातयार्यमहादेशिकैः अक्षरार्थाभिधाना मूलव्याख्या प्रणीता ।

एवं निरुक्तानेकव्याख्यासहितस्य तत्त्वमुक्ताकलापस्य विपुलकायतया खण्डशस्तस्य मुद्रणं चिकीर्षितम् । अधुना तत्र जडद्रव्य—जीवसरद्वयात्मकः प्रथमखण्डः सम्मुद्रय प्रकाश्यते ।

ग्रन्थप्रतिपाद्यविषयसंग्रहः

अस्मिन् तत्त्वमुक्ताकलापग्रन्थे बौद्धाद्यनेकमतान्तरस्थैः प्रतिपादितप्रमाणप्रमेयस्वरूपादिविषये शतशः अनुपपत्त्युद्भावनपूर्वकं श्रीभगवद्रामानुजाभिमतं प्रमाणप्रमेयतत्त्वं प्रत्यपादयन् श्रीमद्वेंकटनाथार्यः। अत्र च पञ्चभिः सराभिख्यैर्भागैः यथाक्रमं जडद्रव्य-जीव-नायक-बुद्धि-अद्रव्याणां स्वरूपादिकं निर्णीतम्। तेषु आद्यसरे जडद्रव्यसरे प्रकृतिकालयोः स्वरूपं मतान्तरविवेचनपूर्वकं प्रतिपाद्यते। अव्यक्तपरिणामभूतान्येव पृथिव्यादिद्रव्याणि इति वेदान्तिनां सिद्धान्तः। तदिह पृथिव्यादिद्रव्यविषये सत्कार्यवादविषये (जगत्सृष्टिविषये) च नैयायिकैः सांख्यैश्च प्रतिपादितां प्रक्रियामनूद्य सोपपत्ति स्वमतं स्थाप्यते। बौद्धैः धर्मधर्मिभावानङ्गीकारेण रूपाद्यद्रव्यातिरिक्तद्रव्यं नाभ्युपगम्यते। अतः सर्वप्रथमं तन्मतं निरस्यते। यतो हि प्रत्यक्षादिप्रमाणसिद्धस्य धर्मधर्मिभावस्यापह्नवः सर्वथा साहसमात्रमेव। सर्वस्यापि पदार्थतत्त्वस्य तद्घटितत्वात्।

बौद्धास्तु (वैभाषिकाः) रूपरसगन्धस्पर्शशब्दपञ्चकव्यतिरेकेण धर्मिद्रव्यं किंचिन्नास्ति। नीलो घटः, मधुरं जलं, सुगन्धि पुष्पं इत्यादिप्रत्यक्षेषु चक्षुरादितत्तदिन्द्रियैः रूपरसादिगुणा एव विषयत्वेन गृह्यन्ते, न तदाश्रयत्वेन घटादिद्रव्याणि इति प्रतिपादयन्ति।

अत्रेदं समाहितं ग्रन्थकर्त्रा—योऽहं घटमद्राक्षं सोऽहमिदानीं स्पृशामीति दृढतरप्रत्यभिज्ञया रूपाद्यतिरिक्तस्य घटरूपाश्रयस्यैव विषयीकरणात् तत्सिद्धिः (धर्मिद्रव्यसिद्धिः)। यद्यत्र रूपमात्रं स्पर्शमात्रं वा विषयः इत्यभ्युपगम्येत तदा द्वीन्द्रियग्रहणानुपपत्तिः। रूपं तु चक्षुरिन्द्रियेणैव गृह्यते एवं स्पर्शः त्वगिन्द्रियेणैवेति सर्वानुभवसिद्धम्। तथा च रूपादौ उभयेन्द्रियग्राह्यत्वस्य सर्वथाऽसंभवात् तदतिरिक्तस्य घटाद्याश्रयस्य सिद्धिः अवश्यमभ्युपगन्तव्येति।

न चास्तु द्रव्यसिद्धिः, किन्तु तदपि द्रव्यं सधर्मकमेवेत्यङ्गीक्रियेत तदा द्रव्यवृत्तिधर्मोऽपि सधर्मकः, सोऽपि तथेत्यनवस्था स्यात्। अथ अनवस्थापरिहाराय निर्धर्मक एवेत्यभिधीयते तदा "अन्तस्तद्धर्मोपदेशा"दित्यादिना प्रतिपादितं सधर्मकत्वं असङ्गतं स्यादिति धर्मधर्मिभावानुपपत्तिरिति वाच्यम्। धर्मिवृत्तिधर्मस्य स्वपरनिर्वाहकत्वाभ्युपगमेन प्रथमपक्षे न कोऽपि दोषः। अयमत्र भावः—यथा ज्ञानस्य परप्रकाशकस्य स्वप्रकाशः इतरानधीनः, यथा च रूपस्य द्रव्यादौ चाक्षुषत्वापादकस्य स्वचाक्षुषत्वमनन्याधीनं एवं गोशब्दस्य व्यक्तिवृत्तौ गोत्वं निमित्तं गोत्वे तु स्वत एव व्यवहारः बुद्धिर्वा भवति न निमित्तान्तरमपेक्षते एवं नात्र धर्मेऽपि अनवस्थापादकधर्मान्तरं स्वीक्रियते।

नन्वेवं निरुक्तरीत्या धर्मधर्मिभावसिद्धावपि धर्मस्य धर्मिणि वृत्त्यनुपपत्त्या न भवदुक्तं सङ्गच्छते। तथा हि—योऽयं रूपादिः गोत्वं वा धर्मतयेष्टः स किं तादृशधर्मविशिष्टे वर्तते तच्छून्ये वा ? तत्र विशेषणविशिष्टस्यैव विशिष्टशब्दार्थत्वेन स्वविशिष्टे धर्मो वर्तत इति अभ्युपगम्यते चेत्, तदा विशेषणे सत्त्वमन्तरा विशिष्टवृत्तित्वस्यानुपप-

न्नत्वेन विशेषणरूपधर्मस्य स्वस्मिन्नपि सत्त्वापत्त्या स्वस्य धर्मस्य स्वाधारत्वप्रसङ्ग इति आत्माश्रयदोषः प्रथमपक्षे। स्वशून्ये वर्तत इति द्वितीयपक्षे व्याघातः। कोह्यनुन्मत्तः स्वशून्ये स्वयं वर्तत इति ब्रूयात्। यतो हि सर्वेषां धर्माणां स्वाश्रये विद्यमानत्वेन व्यवहारात्।

अत्रोच्यते—धर्मस्य वस्तुतः तद्विशिष्टे विशेष्ये वृत्तित्वमभ्युपगम्यते। न च तद्विशिष्टे वर्तमानस्य तस्मिन्नपि वृत्तिरिति नियमः। घटवति भूतले वर्तमानानां गुणादीनां घटेऽपि वृत्तित्वानुपलम्भात्। अतो न काचिदनुपपत्तिरिति सिद्धो धर्मधर्मिभावः।

अथोद्दिष्टेषु द्रव्येषु प्रकृतेरेव प्राथमिकतया तामधिकृत्य परीक्ष्यते। किमियं प्रकृतिः सर्वजगद्धेतुभूता प्रत्यक्षगम्या। उतानुमानवेद्या ? अथवा आगमप्रमाणैकलभ्या ? नाद्यः, प्रकृतिविकारभूतस्य घटादिस्थूलपदार्थस्य प्रत्यक्षवेद्यत्वेऽपि सूक्ष्मभूतमूलप्रकृतेरतथात्वात्। न द्वितीयः, प्रकृतिकार्यभूतं महदादि-कारणगुणात्मकं कार्यत्वात्, पटादिवत् इत्याद्यनुमानमपि न घटते। कारणगुणात्मकमिति साध्यांशस्य कोऽर्थः ? कारणगुणेन तादात्म्यमुत कारणं प्रति गुणभूतत्वं ? तत्र तन्त्वादिगुणैः शौक्ल्यादिभिः पटस्य तादात्म्यं न दृष्टम्। नापि तन्तुं प्रति पटस्य गुणभूतत्वं। अथ कारणगुणात्मकत्वं नाम स्वगुणसजातीयगुणकत्वमिति चेन्न गोमय-वृश्चिकादौ सजातीयगुणकत्वाभावेन व्यभिचारात् साध्यस्य कार्यत्वस्य च व्याप्त्यभावः। तस्मात् आगमेनैव प्रकृतिः महदादिकारणत्वेन सिद्ध्यति। सेयं प्रकृतिः परस्परसंमिश्रसत्त्वरजस्तमोगुणकत्वात् त्रिगुणमित्युच्यते। विचित्रसृष्ट्युपकारकत्वान्मायेति, महदादिविकारप्रकृतित्वान्मूलप्रकृतिरिति, विद्याविरोधित्वादविद्येति, सर्वप्रपञ्चप्रधानकारणत्वात् प्रधानमिति, अतिसूक्ष्मत्वादस्फुटत्वाच्चाव्यक्तमिति चोच्यते।

अथ सृष्टिक्रमः

गुणत्रयाश्रयात् प्रधानात् सत्त्वादिगुणोन्मेषभेदेन सात्त्विको, राजसः, तामसश्चेति त्रिधा महानुत्पद्यते। त्रिविधान्महतः तथैव त्रिविधः अहंकारः। तत्र सात्त्विकाहङ्कारस्य वैकारिक इति, तामसाहङ्कारस्य भूतादिरिति च नामान्तरम्। सात्त्विकाहङ्कारात् एकादशेन्द्रियाणि जायन्ते। तामसाहङ्कारात् शब्दतन्मात्रमुत्पद्यते। तत आकाशः। आकाशात् स्पर्शतन्मात्रं, ततो वायुः। तस्माद्रूपतन्मात्रं; ततस्तेजः तस्मात् रसतन्मात्रं, तस्मादापः, अद्भ्यो गन्धतन्मात्रं तस्मात्पृथिवीति।

सृष्टिक्रमविषये सुबालोपनिषदुक्तप्रक्रियाविरोधाशङ्का, तत्परिहारश्च

सुबालोपनिषदि 'पृथिव्यप्सु प्रलीयते, आपस्तेजसि लीयन्ते, तेजो वायौ लीयते, वायुराकाशे लीयते। **आकाश इन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु। तन्मात्राणि भूतादौ लीयन्ते।** भूतादिर्महति लीयते, महानव्यक्ते लीयते, अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते तमः परे देव एकीभवति' इति लयक्रमः श्रूयते। यत्र लयः तस्मादुत्पत्तिरिति

वस्तुस्थितिः। अन्यत्र श्रुतिवाक्ये आकाशस्य शब्दतन्मात्रे, शब्दतन्मात्रस्य केवलं तामसाहङ्कारे, इन्द्रियाणां च वैकारिकसंज्ञे सात्त्विकाहङ्कारे लय उक्तः। अत्र तु इतरप्रमाणविलक्षणतया आकास्येन्द्रियेषु, इन्द्रियाणां तन्मात्रेषु, सर्वेषां तन्मात्राणां भूतादिसंज्ञके तामसाहङ्कारे च लयः प्रतिपादितः। एतदनुरोधेन आकाशं प्रति इन्द्रियाणां प्रकृतित्वमवगम्यते, तथासति तानीन्द्रियाणि एकादश, प्रकृति-महदहङ्कार-तन्मात्राणि अष्टौ, आहृत्य एकोनविंशति प्रकृतयस्युः, विकृतयश्च पञ्चभूतान्येव भवेयुः। तर्हि अष्टौ प्रकृतयः षोडशविकृतय इति श्रुतिविरोधः स्पष्ट इति आशङ्का। यद्यपि, "आकाश इन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु" इत्यन्तरालवाक्यद्वये लयपदं न श्रूयते। तदश्रवणेऽपि पूर्वोत्तरवाक्येषु लयपदश्रवणात् लयप्रकरणत्वावगमात् तद्वशेन मध्यवर्तिवाक्ययोरपि लयपदानुषङ्ग आवश्यकः। एवं सति अधोनिर्दिष्टरीत्या श्रुत्यन्तरविरोध इति शङ्कितुराशयः। अत्रेदं समाधानं प्रतिपाद्यते—आकाश इन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु, इति स्थलद्वये लयपदाश्रवणात् नाकाशस्य इन्द्रियेषु लयः। पूर्वं पृथिव्यप्सु प्रलीयते इत्यारभ्य लयप्रतिपादनात् अत्र लयपदाश्रवणेऽपि प्रकरणात् लयपदस्यानुषङ्गोऽभिप्रेत इति तु न वक्तुं शक्यं, तथा सति "पृथिव्यप्सु प्रलीयते" इति आदावेकत्र लयप्रदश्रवणमात्रेण अन्यत्र सर्वत्र अनुषङ्गसंभवे निरुक्तस्थलद्वयात् पूर्वोत्तरेषु अबादिवाक्येषु पृथक् लयपदाम्नानं व्यर्थं स्यात्। अतो नाकाशस्य इन्द्रियेषु लयः प्रतिपाद्यते। किन्तु तत्रत्या सप्तमी आप्यायकभूतसंबन्धस्येन्द्रियेष्वपि सत्त्वात् सम्बन्धसद्भावतोऽपि अधिकरणत्वाभिधानेनोपपद्यते। इत्थं च तत्र लयाप्रतिपादनान्नेन्द्रियोपादानकत्वप्रसक्तिरिति न पूर्वोक्तश्रुतिविरोधगन्ध इति सिद्धयति।

नैयायिकोक्तजगत्सृष्टिविमर्शः

नैयायिकाः परमाणुभिरेव द्व्यणुकत्र्यणुकोत्पत्तिक्रमेण जगत्सृष्टिर्भवतीति प्रतिपादयन्ति। अवयवाः स्वभागैः मिथः संयुज्य अवयविनमारभन्त इति तेषां सिद्धान्तः। द्व्यणुकारम्भे तु निरवयवाः परमाणव हेतव इति। अत्रायं विकल्पः—यदि परमाणवः स्वांशतः संयुज्य अवयविनमारभेरन् तदा परमाणोरंशस्यापि तदवयवरूपत्वात्, तस्याप्यवयवान्तरमित्यनवस्था स्यात्।

अथावयवशून्यानां परमाणूनां संयोगैरेव द्व्यणुकत्र्यणुकादिरुत्पद्यत इत्युच्येत तदा स्वाधिकदेशव्यापि कार्यारम्भो न स्यात्। यतो हि परमाणूनां परस्परं कात्स्न्र्येन संयुक्तत्वात् भागप्रयुक्ताधिकपरिमाणवत्वं न संभवतीति।

न च परिमितानां पदार्थानां यथा दिग्भेदेन भागभेदो दृश्यते तथा परमाणुष्वपि स्यादिति वाच्यम्। सावयवत्वे खलु दिग्भेदप्रयुक्तः अवयवभेदः वक्तुं शक्यते। परमाणोः भवद्भिः अनवस्थाभिया निरवयवत्वोपगमेन दिग्भेदप्रयुक्तभागभेदासम्भवात्। तस्मात्परमाणूनां समानदेशत्वे स्वाधिकदेशव्यापिकार्योत्पत्तेरसम्भवेन न तैः द्व्यणुकादिक्रमेण जगत्सृष्टिस्संभवति। इत्थमत्र परमाणुकारणतावादं भङ्क्त्वा कार्यद्रव्यस्योपादानात्मककारणद्रव्याद् भेदोऽपि नास्तीति प्रसाध्यते।

मृत्कपालादिरूपकारणद्रव्यस्य घटादिरूपकार्यद्रव्यस्य च भेदमङ्गीकुर्वन्ति नैयायिकाः। तथा सति कार्यद्रव्यस्य कारणद्रव्यस्य च मेलनेन गुरुत्वस्याधिक्यात् गुरुत्वप्रयुक्तपतनरूपकार्यापत्तिः। यथा द्विपलविशिष्टस्य वस्तुनः एकपलविशिष्टस्य वस्तुनश्च मेलने सति त्रिपलविशिष्टता वस्तुनो भवति, यथा वा पटद्वयोर्माने गुरुत्वाधिक्यं दृश्यते, एवं तन्तुतत्कार्यपटसमुदायोन्मानेऽपि गुरुत्वदर्शनापत्तिः। न तथाऽवलोक्यते, किन्तु सर्वेषु पटोपादानतन्तुषु यावद्गुरुत्वं तावत एव तन्तुसमुदायात्मकपटोन्मानेऽपि दर्शनात् कारणव्यतिरिक्तकार्यं नास्ति। तन्तुः, पटः, कपालः, घटः इत्यादिनामभेदस्तु कारणद्रव्यस्यैव कारणत्वावस्था कार्यत्वावस्था चेत्यवस्थाभेदाङ्गीकारादुपपद्यते। अतः अवयवातिरिक्तावयविवादो न युक्तः। एवं तन्तव एव पटः, मृदेव घटः इत्येवमेकत्वप्रत्यभिज्ञायास्सत्त्वाच्च कार्यकारणयोरनन्यत्वं स्थिरीकृतम्।

यदपि नैयायिकैः शरीरादिषु (घटादिषु) पृथिव्यादिभूतान्तरसमवायसत्त्वेऽपि एकमेव भूतमुपादानमन्यत् संसर्गिमात्रमित्युक्तं, शरीरस्य पांचभौतिकत्वे साङ्कर्यदोषो भवेत्। सांकर्यस्य जातिबाधकतया शरीरस्य एकभूतोपादनकत्वमेव युक्तमिति तेषामभिप्रायः। तत्रोच्यते चतुर्विधमाहारमयं शरीरं, पंचभूतात्मकं वपुरित्यादिभिः पांचभौतिकत्वं प्रतिपाद्यते श्रुतिभिः। पार्थिवघटादौ पंचभूतसमाहारसत्वेऽपि जलाद्यंशस्य न्यूनतया पार्थिवांशस्य भूयस्त्वाच्च केवलपार्थिवत्वेन व्यवहारः भवति। तदुक्तं "वैशेष्यात्तु तद्वादस्तद्वाद" इति। नैयायिकैरपि पार्थिवघटादौ जलादेस्संसर्गोङ्गीकृतः। भूतान्तरोपष्टब्धेष्वपि देहादिषु पार्थिवादिव्यवहारस्य तदंशाधिक्येनैवोपपत्तिरिति प्रतिपादितः। एवं सत्यपि पृथिव्याद्येकोपादानकत्वं यदुच्यते, तत्प्रमाणविरुद्धं अनुभवविरुद्धं च। अनुभवश्च एकस्मिन् देहादौ सर्वेषां भूतानामंशो वर्तत इति। अतः यथादर्शनमेव पदार्थसिद्धिरभ्युपगन्तव्या। पंचभूतात्मकं वपुरित्यागमप्रमाणेनापि शरीरस्य पांचभौतिकत्वमेवोद्घोषितम्।

अथ पांचभौतिकत्वे सांकर्यदोषापत्तिरिति यदाशङ्कितं, तस्य भवत्पक्षे नरसिंहादिशरीरे सांकर्यापत्तौ यादृशः परिहारः तादृशोऽत्रापि समानः। अथवा सांकर्यस्य दोषत्वमेव नास्ति। इत्थं द्रव्यस्यावस्थाभेदं स्वीकृत्य कार्यकारणयोरन्यत्वं प्रतिक्षिप्तम्।

अथ सांख्यैरप्यवस्थाभेदपूर्वकं द्रव्येषु सत्कार्यवादाभ्युपगमात् तन्मतादविशेषापत्तिरित्याशङ्कायामिदानीं सांख्योक्तसत्कार्यवादनिरसनमुखेन विशिष्टाद्वैतिसम्मतः सत्कार्यवादः स्थाप्यते। सांख्यपक्षे सदेव कार्यं भवतीति सत्कार्यवादशब्दार्थः। ईदृशसत्कार्य (वाद)साधकतया च।

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम्॥

इति कारिकायां पंच हेतव उपन्यस्ताः। अत्रायमनुमानप्रयोगः—घटादिकार्यं सत् असदकरणात् इति। असदकरणादित्यस्य सदितरकरणादृष्टेरित्यर्थः। सदितरशब्देन प्रागसत्वमिह विवक्षितम्। मृदादेः द्रव्यस्य कारणत्वावस्था कार्यत्वावस्था चेत्यवस्थाद्वयमङ्गीक्रियते। तत्र कार्यत्वावस्थापि वस्तुनः कार्यत्वेन दर्शनात्प्रागेव तत्र वर्तते। असतः करणानुपपत्तेः। न ह्यसत् खपुष्पादि क्रियते। एवमुपादानग्रहणादिभिर्हेतुभिरपि द्रव्येऽवस्थाः प्रागेव सन्तीति वदन्ति।

न च कार्यत्वावस्थायाः प्रागेव सत्त्वे चक्रभ्रमणादिरूपकारकव्यापारस्य वैयर्थ्यमिति वाच्यम् ? अवस्थायाः अभिव्यक्त्यर्थं कारकव्यापारस्यावश्यकत्वात्। एवं च कारणद्रव्ये पूर्वं सत एव कार्यस्य अभिव्यक्तिर्भवति, न त्वसत इति सिद्धयति। अयं च सत्कार्यवादः न श्रुत्यनुकूल इत्यन्यथैव सत्कार्यवादं वर्णयन्ति विशिष्टाद्वैतिनः। मृदादिरूपकारणद्रव्ये कार्यत्वावस्थाऽपि पूर्वमेव वर्तते, तस्या अभिव्यक्तिमात्रं कारकव्यापारेण भवतीति यदुक्तं तन्न संगच्छते। मृद्रूपे उपादानकारणे घटत्वावस्था पूर्वमेव वर्तत इति नाभ्युपगम्यते। मृद्रूपोपादानात् घटत्वरूपकार्यत्वावस्थाया उत्पत्तिः मृदः घटत्वार्हे सत्येव नियता। अत एवासतः निष्पत्तिश्चेत्तिलात् क्षीरमपि स्यादित्यापत्तिः न कर्तुं शक्यते। तिलस्य क्षीरोचितत्वाभावात्। उचितादेव कार्यदृष्टेः। अपि च घटनिमित्तकारणदण्डचक्रादौ घटसूक्ष्मरूपाभावेऽपि यथा निमित्तत्वं, तथा उपादानत्वमपि संगच्छते। तस्मात् कार्यत्वावस्थाया उत्पत्तिरेवाभ्युपगन्तव्या। सत्कार्यप्रवादस्तु मृदादिकारणातिरिक्तकार्यद्रव्यस्यासत्वेनासत्कार्यं न भवतीति रीत्या, न तु कार्यत्वरूपावस्थाया अपि नित्यत्वमभ्युपगम्य। अन्यथा या चेयमभिव्यक्तिरभिहिता साप्यभिव्यज्यत इत्युच्येत, तदा तस्या अप्यभिव्यक्तिरित्यनवस्थापरम्परा स्यात्। अभिव्यक्तेरुत्पत्तिस्तु सत्कार्यवादसिद्धान्तविरोधात् दूरापास्ता। एवं च वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतिमूलकत्वेनावस्थाया उत्पत्तिमभ्युपगम्य उपदर्शितरीत्यैव सत्कार्यवादः आस्थेयः।

क्षणभङ्गनिरासः

बौद्धस्तु—जगत् क्षणिकं सत्त्वात्, यत् सत् तत् क्षणिकं यथा जलधरः, इत्यनुमानेन क्षणिकत्वं वर्णयन्ति। सोऽयं घट इत्यादिप्रत्यभिज्ञया वस्तुनः स्थैर्यसिद्धेः जगतः क्षणिकत्वं न सम्भवति।

ननु एकस्यैव बीजस्य अङ्कुरानुत्पादकत्वं, अङ्कुरोत्पादकत्वमिति मिथो विरुद्धधर्मवत्वासंभवात् कथं तद्विषयकप्रत्यभिज्ञायाः तदेवेदं बीजमित्याद्याकारिकायाः प्रामाण्यमिति चेन्न। पङ्कसलिलादि-सहकृतस्य बीजस्यैव अङ्कुरोत्पादकत्वेन कुसूलस्थबीजे तादृशसहकारिकारणाभावेनैव अङ्कुरोत्पादकत्वानुपपत्तेः। क्षेत्रस्थबीजस्य तु तादृशसहकारिकारणसंनिधानात् तद्युज्यते। अतश्च स्वरूपतो बीजस्याङ्कुरोत्पादकत्वशक्तिरक्षुण्णैवेति नात्र विरुद्धधर्मोपहितविषयत्वं प्रत्यभिज्ञाया वक्तुं शक्यते।

एवं सोऽयं घट इत्यत्रापि तत्त्वेदन्त्वयोः परस्परं विरुद्धत्वेऽपि देशकालादिभेदेनैकत्र समावेशः युज्यते। अतः स इति अयमिति च गृह्यमाणस्य मिथो विरुद्धधर्मविशिष्टत्वेन प्रत्यभिज्ञात्मकप्रत्यक्षस्याप्रामाण्यशङ्का न सम्भवति। अत्रेदं विधीयते—अथ प्रत्यभिज्ञायाः विरुद्धानुपहितत्वेन वस्तूनां स्थिरत्वं सिद्धयतीति यदुक्तं तन्न युज्यते। सोऽयमिति प्रत्यभिज्ञायां तत्त्वमिदन्त्वं च विषयो भवति। तत्र च तत्त्वं पूर्वकालसम्बन्धित्वं, इदन्त्वं च वर्तमानकालसम्बन्धित्वम्। तयोः एकस्मिन् काले वस्तुनि वृत्तित्वं न सम्भवति। विभिन्नकालद्वयसम्बन्धस्यैककाले विरोधात्। एवं च सोऽयं घट इत्यादिप्रत्यभिज्ञायाः तत्त्वेदन्त्वरूपविरुद्धधर्मद्वयविषयकत्वात् न प्रामाण्यं वस्तुस्थैर्यविषये इति चेत्। अत्रोच्यते—घटस्य देशभेदेन अतीतकालसम्बन्धे वर्तमानकालसम्बन्धे च सति विरोधस्याप्रतीतेः। विरोधस्तु प्रतियोगितदभावयोः युगपदवस्थाने सत्येव। अतश्च घटस्य स्ववृत्तित्वकालसम्बन्धः यदा भवति तदैव घटाभावकालसम्बन्धोऽपि स्यात्तदा विरोधः। न त्वेतदस्ति। एकत्रैव नैल्यस्थौल्याद्यनेकविशेषणवत् नानाकालसंबन्धा अपि भवितुमर्हन्ति, तथैवानुभवात्। एवञ्च प्रत्यभिज्ञायाः विरुद्धानुपहितविषयकत्वेन तया वस्तुनः स्थिरत्वमेव सिद्धयतीति क्षणिकत्वानुमानबाधः।

अथ प्रत्यक्षेण क्षणिकत्वस्यैव गृह्यमाणत्वात् प्रत्यभिज्ञैव बाध्या। यतो हि अतीतानागतविषये प्रत्यक्षस्य सामर्थ्यं नास्ति। इदमिति प्रत्यक्षं तावत् वर्तमानत्वेन पदार्थं गृह्णदवर्तमानभिन्नत्वेन दर्शयति। एवं चावर्तमानमित्यनेन पूर्वोत्तरयोः क्षणयोर्ग्रहणम्। प्रत्यक्षस्य तद्विषयत्वासंभवेन परिशेषाद्वर्तमानक्षणमात्रविषयकत्वेन क्षणिकत्वमेव सिद्धयति, न तु स्थायित्वमिति तेन प्रत्यभिज्ञाबाधः। यद्यपि प्रत्यक्षस्य प्रत्यभिज्ञायाश्च प्रत्यक्षत्वात्कथमेकेन इतरस्य बाधो भवतीति शङ्का जायते। परन्तु प्रत्यभिज्ञायाः संस्कारोपनीतार्थविषयत्वात् तादृशप्रत्यक्षापेक्षया साक्षादिन्द्रियसंनिकर्षजन्य शुद्धप्रत्यक्षस्य प्रबलत्वेन तेन प्रत्यभिज्ञाया बाधः। अतो वस्तुस्थैर्ये प्रत्यभिज्ञायाः प्रामाण्यं न सम्भवतीति चेदत्र प्रतिविधीयते—प्रत्यक्षेण घटघटत्वादिरूपस्यार्थस्यैव ग्रहणं भवति, न तु कालस्य। तस्यातीन्द्रियत्वादनुमानमेवेति तार्किकाः। अन्ये तु मीमांसकादयः प्रत्यक्षे सर्वत्र कालस्य प्रकारतया भानं नियतमिति कथयन्ति। अस्तु यथा तथा वा। प्रत्यक्षे प्रकृतकालसम्बन्धित्वग्रहणेऽपि प्रकृतकालमात्रसम्बन्धीति मात्रार्थः न प्रतीयते। एवं चावर्तमानत्वव्यावृत्तत्वेन वर्तमानस्य प्रत्यक्षाविषयतया न प्रत्यक्षेण पदार्थानां क्षणिकत्वं सिद्धयति। प्रत्यभिज्ञया तु वस्तुनः तत्काले पूर्वस्मिन् काले च सत्त्वं बोध्यते। प्रत्यक्षेण तु तत्कालासत्वाभावमात्रं बोध्यते। न तु कालान्तरासत्वविशिष्टतत्कालसत्वमित्युभयोरपि विरोधाभावान्न प्रत्यभिज्ञाबाधः प्रत्यक्षेण सम्भवति।

ननु जातस्य हि ध्रुवो मृत्युरिति गीतावचनात् उत्पन्नानां पदार्थानां हेतुनैरपेक्ष्येण विनाशसिद्धेः सर्वेषां पदार्थानां क्षणिकत्वमेव। तथा हि भावो विनाशी उत्पन्न-

त्वात्, विनाशः हेतुनिरपेक्ष ध्रुवभावित्वात्, जगत् क्षणिकं निरपेक्षनाशप्रतियोगित्वादित्यनुमानपरम्परया जगतः क्षणिकत्वमेष्टव्यम्। अत्र चोदाहरणं वस्तुस्वरूपम्। यथा वस्तुनः स्वरूपं वस्तुप्रयोजकातिरिक्तहेतुसापेक्षं न दृश्यते, तथैव विनाशस्याप्युत्पन्नत्वमात्रेण विनैव हेतुनाऽवश्यंभावेन पदार्थानां प्रतिक्षणमुत्पत्तिःविनाशश्च भवतीति क्षणिकत्वं सिद्धमिति चेत्। नैतत्सारम्। विनाशः हेतुनिरपेक्षः, ध्रुवभावित्वादित्यनुमाने भावित्वशब्देन भविष्यत्वमुच्यते चेत्तदा व्यभिचारः, घटपटादिवस्तूनां व्यवस्थित्यर्थं युष्माभिरेव भविष्यत्कालीनघटाद्युत्तरक्षणं प्रति पूर्ववर्तिघटक्षणस्य कारणत्वाङ्गीकारात् तत्र पूर्वपूर्वक्षणहेतुकत्वेन हेतुनिरपेक्षत्वरूपसाध्याभावसत्वेन भविष्यत्वरूपहेतोः स्थित्या च व्यभिचारः। एवं कस्यचिदङ्कुरस्य सामग्रीप्रवाहवशात् यत्र पत्रं पुष्पं वा भाविनि काले दृश्यते तत्र हेतुसापेक्षत्वस्यैव दृष्टत्वेन हेतुनिरपेक्षत्वरूपसाध्यस्य अभावसत्त्वेन भविष्यत्वरूपहेतोः दर्शनाच्च व्यभिचारः। एवमुत्तरक्षणस्य पूर्वक्षणः कारणमिति बौद्धमतमपि न सिद्ध्यति। भवत्पक्षे सर्वस्यैव क्षणिकत्वात्कार्योत्पत्तिकाले कारणस्यैव नष्टत्वात्। यदि कार्यपूर्ववृत्तित्वमेव कारणत्वं तर्ह्येको घटक्षणः स्वोत्तरकालभाविगोमहिषाश्वकुड्यपाषाणादिसर्वक्षणकारणं स्यात्। तदुत्तरक्षणेभ्यः सर्वेभ्यः पूर्ववर्तित्वस्य पूर्वक्षणसाधारणत्वात्। अथैतत्परिहाराय देशकालादीनामुपाधित्वमभ्युपगम्य तदुपाधिककार्ये तदुपाधिकपूर्वक्षणस्य प्रतिनियततया कारणत्वसंभवेन सर्वक्षणस्य न कारणत्वापत्तिः इति चेत्, भवत्पक्षे देशाद्युपाधेरपि क्षणिकत्वेन कार्यकारणयोरेकदेशस्थत्वैकजात्याश्रयत्वादेर्दुर्वचत्वात्केवलोत्तरत्वमात्रं वक्तव्यमिति सर्वस्यैक एव क्षणः कारणं स्यात्। तस्मात्पदार्थानामव्यवस्थापत्या उत्तरक्षणस्य पूर्वक्षणः कारणमिति कार्यकारणभावो दुर्वचः।

अपि च विगीतं जगत् क्षणिकं मेयत्वात् यथा क्षणोपाधिः। वस्तुस्थैर्यवादिनाप्यखण्डकाले क्षणत्वाद्युपपादनमुपाधिमादायैव वक्तव्यम्। तत्र च क्षणाधिककालस्थायिनो न क्षणोपाधित्वं सम्भवति। अतस्तस्योपाधेः क्षणिकत्वं, मितिविषयत्वरूपमेयत्वं च अस्तीति क्षणोपाधि दृष्टान्तीकृत्य जगतोऽपि मेयत्वेन क्षणिकत्वं यत्प्रतिपादितं तन्न शोभनम्। क्षणोपाधेरपि स्थिरत्वेन दृष्टान्तस्य साध्यविकलत्वात्। घटप्रागभावविशिष्टघटकारणकलापः एकः क्षणोपाधिः। अयं च हेतुसमुदायात्मकः सामग्रीपदवाच्यः। अतश्च एकविशिष्टापररूपा, अर्थात् मृद्विशिष्टचक्रविशिष्टदण्डविशिष्टकुलालः घटसामग्रीं। तत्र च ते सर्वे प्रत्येकं स्थिरा एव। समुदायोऽपि स्थिरः, तत्र क्षणोपाधित्वमस्ति। एकविशिष्टापररूपेण तद्ग्रहणे तस्य घटोत्पत्तिप्राक्क्षणमात्र एव सुवचत्वात् मेयत्वहेतुना क्षणिकत्वसाधनमयुक्तम्। बाधदृष्टान्तहानिरूपदोषयोस्सत्त्वात्।

अन्यच्च बौद्धैः—दीपनिर्वाणसमये अन्तिमदीपज्वालानन्तरं सर्वथा दीपानुपलम्भात् दीपस्य निरन्वयविनाशोऽभ्युपगन्तव्यः। वेदान्तिभिरपि प्रतिक्षणं तैलवर्त्यंशादिसामग्रीभेदेन भिन्नायां दीपज्वालायां एकदीपद्रव्याननुवृत्तेरभ्युपगमात् तद्दृष्टान्तेन घटादेरपि निरन्वयविनाशसंभवेन क्षणिकत्वं सिद्ध्यतीति यदभिहितं तदपि न मनोरमम्।

घटादिनाशानन्तरं कपाल इत्यादि प्रतीतेर्दर्शनात् न तत्र निरन्वयविनाशः शक्यते वक्तुम्। घटादिनाशे सान्वयत्वेनैव दृढमनुभवात् तेनैव न्यायेन दीपादिनाशेऽपि तदनुमानात् दीपलयकालेऽपि दीपद्रव्यमस्त्येव। परन्तु जले क्षिप्तः लवणखण्डः यथा न दृश्यते तथा द्रष्टुमशक्यावस्थां प्राप्य दीपो वर्तत इति नात्र दीपदृष्टान्तेन घटादौ निरन्वयविनाशः, तत एव च प्रतिक्षणं भिन्नभिन्नघटः उत्पद्यत इति क्षणिकत्वोपपादनं च सुलभम्।

अथ चार्वाकः प्रत्यवतिष्ठते, कपालादिरूपावयवद्रव्यादवयविद्रव्योत्पत्तिर्भवतीति अवयवावयविनोः कार्यकारणभावः तार्किकस्य, पूर्वस्थितस्यैव कार्यस्याभिव्यक्तिर्भवतीत्यभिव्यक्तेरेव कार्यत्वमभिव्यञ्जकस्य कारणत्वमिति सांख्यस्य, प्रतिक्षणं द्रव्यभेदात् पूर्वमुत्तरस्य कारणमिति बौद्धस्य, अनुवृत्तस्यैव एकद्रव्यस्य भिन्नभिन्नपूर्वोत्तरावस्थामादाय कार्यकारणभाव इति रामानुजाचार्यस्येति पक्षचतुष्टयं प्रतिपादितम्। तत्र किमिदं कार्यत्वेनाभिमतं कार्यं कारकव्यापारात्पूर्वमस्ति न वा ?। पूर्वमस्ति चेद् गगनादिवन्नित्यत्वेन साध्यत्वाभावात् कार्यत्वमेव न स्यात्। पूर्वं नास्ति चेदसतस्सत्वापादनासंभवेन खपुष्पवदकार्यत्वमेव स्यात्। तस्मात् किंचित्कार्यं प्रति किंचित्कारणमिति व्यवहारः निष्प्रमाणः। अपि च यत्कारणमित्युच्यते तदपि कार्यसंबद्धं सत्कारणं, उत तदसंबद्धं सत् ? आद्ये कार्यमुत्तरकालीनं कारणं तु पूर्वकालीनम्। (अतः) उत्तरकालीनस्य पूर्वकालीनेन संबन्धस्याप्यसम्भवात् कार्यसंबद्धं सत् कारणं भवतीति वचनं व्याहतम्। द्वितीयमपि न घटते असंबद्धत्वाविशेषात् सर्वस्मात् सर्वोत्पत्तिः स्यात्। मृदः घट इव पटादिरपि उत्पद्येतेत्यतिप्रसङ्गः। अतः कार्यकारणभाव एव न सम्भवति इति।

अत्रेदमुत्तरमभिधीयते—यदि कार्यकारणभावः नाभ्युपगम्यते, तदा पुरुषस्य बुभुक्षाशान्त्यर्थं भोजनादौ प्रवृत्त्यभावप्रसङ्गः। प्रवर्तते तु पुरुषः। तस्माद्भोजनादेः बुभुक्षानिवृत्तिं प्रति कारणत्वदर्शनेन स्वक्रियादेर्विरोधात् अनुभवानुसारेण कार्यकारणभावः अवश्यमङ्गीकर्तव्यः। एवं भवद्भिरेवार्थकामयोरेव पुरुषार्थत्वेन तत्प्राप्त्यर्थमुपायानुष्ठानं क्रियत इति कथनात् अर्थकामयोः कार्यत्वस्य उपायानुष्ठानस्य कारणत्वस्य च सिद्धत्वात् कार्यकारणभावः नापलपितुं शक्यते। मृदः सहकारिकारणैस्साकं घटोत्पत्तावेव शक्ततया न तया पटोत्पत्यापत्तिरूपः अतिप्रसङ्गः उद्भावयितुं शक्यते। अतः कारणं कार्यसंबद्धं सत्कारणमिति द्वितीयपक्षे न काचिदनुपपत्तिः। एवं कण्टकादीनां तीक्ष्णता पुष्पाणां सौकुमार्यञ्च यथा विनैव निमित्तं स्वभावतः दृश्यते तद्वदेव सर्वत्र तत्तद्वस्तुस्वभावस्यैव नियामकत्वं, न त्वतिरिक्तं किंचित्कारणमिति वादोऽपि न युक्तः।

अथ कोऽयं स्वभावः यद्वस्तु यथा वर्तते तदेव तस्य स्वभावः। घटस्य कदाचिदेव दर्शनात् तस्य कादाचित्कत्वं स्वभावः। गगनस्य तु नित्यत्वं स्वभावः। तथैव दर्शनात्। अर्थाद्धेतुनैरपेक्ष्यमेव तदिति चेदत्रोच्यते—घटे कादाचित्कत्वस्य स्वभावत्वाभ्युपगमे नित्यपदार्थस्वभाववत् कादाचित्कत्वस्यापि हेतुनैरपेक्ष्येण सर्वदा सत्त्वापत्त्या कादाचित्कत्वव्याघातः। हेतुनैरपेक्ष्यस्यैव स्वभावशब्दार्थत्वात्। यदि घटादेः कादाचि-

त्कत्वं न स्वभाव इत्युच्येत तदा अतत्स्वभावः कथं कारणसहस्रेणापि तत्स्वभावत्वं भजेत्। अथैतद्दोषपरिहाराय स्वभावस्यापि हेतुमत्वोपगमे निर्हेतुकं किंचिदपि न स्यात्। तस्मात् स्वभावस्य नियामकत्वं स्वीकृत्य वस्तुव्यवस्थासंपादनस्य च सर्वथाऽशक्यत्वात्कार्यकारणभावः सिद्धयतीति भावः।

इन्द्रियाणां भौतिकत्वनिरासः

अथ चक्षुरादीनां ज्ञानेन्द्रियाणां भौतिकत्वं सात्त्विकाहंकारिकत्वं वेति विचार्यते। नैयायिकास्तु दीपस्य रसाद्यग्राहकत्वे सति रूपग्राहकत्वम् यथा दृश्यते, तथैव चक्षुरिन्द्रियस्यापि रूपमात्रग्राहकत्वेन तैजसत्वम्। तत्र चानुमानं प्रमाणं तथाहि–चक्षुरिन्द्रियं तैजसं रूपरसादिषु मध्ये रसाद्यग्राहकत्वे सति रूपस्थैव ग्राहकत्वात्, एवं रसनेन्द्रियस्य जलीयत्वं त्वगिन्द्रियस्य वायवीयत्वं, घ्राणेन्द्रियस्य पार्थिवत्वं, श्रोत्रेन्द्रियस्य नाभसत्वं सिद्धयति।

अत्रेदं विचार्यते—रूपग्राहकत्वमित्यस्य रूपज्ञानकरणत्वमित्यर्थः, तदा सपक्षभूते दीपे रूपज्ञानकरणत्वस्याभावेन सपक्षव्यावृत्तत्वाद्धेतोरसाधारण्यं स्यात्। विपक्षव्यावृत्तत्वं तु रूपज्ञानकरणत्वरूपहेतोः नितरां स्पष्टम्। अतोऽत्र रूपग्राहकत्वरूपहेतुना न चक्षुरिन्द्रियस्य तैजसत्वं साधयितुं शक्यम्। साधकतमत्वस्यैव करणत्वशब्दार्थतया सन्निकर्षविशेषविशिष्टचक्षुरिन्द्रियस्यैव तादृशत्वेन दीपस्य चक्षुरिन्द्रियजन्यरूपज्ञाने सहकारिकारणमात्रतया करणत्वाभावात् रूपग्राहकत्वलिङ्गानुमाने रूपज्ञानकरणत्वविवक्षायां असाधारणो दृष्टान्तहानिश्च स्यात्। यदि रूपज्ञानसहकारिकारणत्वमेव रूपग्राहकत्वं तदा स्वरूपासिद्धिः। चक्षुरिन्द्रियस्य प्रधानकारणतया रूपज्ञानं प्रति तस्य सहकारिकारणत्वासम्भवात्। एकत्राभयविधकारणत्वानुपपत्तेः। भिन्नभिन्नेष्वेव सहकारिकारणत्वमुख्यकारणत्वयोरनुभवात्। कथंचिन्मनुष्यादीनामन्धकारस्थले दीपस्य चक्षुरिन्द्रियस्य चोपकारकत्वविषये समत्वदर्शनेऽपि उलूकादिजन्तुविशेषस्य ऽऽलोकं विनाऽपि अन्धकारस्थले प्रत्यक्षदर्शनेन तत्र दीपस्योपयोगाभावेन उपकारकत्वमपि न घटते। अतश्च रूपज्ञानकरणत्वमेव वक्तव्यम्। तथासति दीपान्तर्भावेनासाधारणरूपसव्यभिचारदोषः अपरिहार्य एव स्यादिति नात्रानुमानैः चक्षुरादीनां भौतिकत्वं वक्तुं शक्यम्। किन्तु बह्वीभिः श्रुतिभिस्तथा उपबृंहणैश्च इन्द्रियाणां सात्त्विकाहङ्कारजन्यत्वस्य प्रतिपादितत्वात् आहंकारिकमेवेन्द्रियमिति वेदान्तिनां निष्कर्षः।

कर्मेन्द्रियनिरूपणम्

अथ ज्ञानेन्द्रियवत् श्रुत्या हस्तादीनि पञ्च कर्मेन्द्रियाण्यपि सिद्धयन्ति। यथा रूपादिज्ञानकरणतया चक्षुरादिज्ञानेन्द्रियाणां सत्त्वमङ्गीक्रियते तथा गति–वचनदानादिक्रियाकरणत्वेन वागादिकर्मेन्द्रियाणामपि स्थितिरभ्युपगन्तव्या। अविशेषात्। यदि प्रत्यक्षदृष्टं यद्धस्ताद्यधिष्ठानं तदेव गत्यादिक्रियायाः कारणं न त्वधिष्ठानातिरिक्तमप्रत्यक्षं

कर्मेन्द्रियमभ्युपगम्यत इति चेत् तदा ज्ञानेन्द्रियस्थलेऽपि तेनैव न्यायेन गोलकादेरेवेन्द्रियत्वसंभवेन किमिति तदतिरिक्तचक्षुरिन्द्रियं स्वीक्रियते। एवं चोभयत्राप्यन्यथासिद्धिशङ्कापरिहारौ समानौ। जीवस्य शरीरवृत्तित्त्वदशायां चक्षुरादिज्ञानेन्द्रियाणामिव हस्तादिकर्मेन्द्रियाणामपि जीवोपकारकत्वस्य तुल्यत्वात् "इन्द्रियाणि दशैकं मन" इति श्रुत्या एकादशेन्द्रियाणि ज्ञानकर्मसाधनतया सिद्धयन्ति। प्रपञ्चितश्चायमर्थः "सप्त गतेर्विशेषितत्वाच्च" 'हस्तादयस्तु स्थितेऽतो नैवम्' इति सूत्रार्थविचारावसरे भगवता भाष्यकारेण। 'मनषष्ठान्येवेन्द्रियाणी'ति गीतावचने तु एवकारेण न कर्मेन्द्रियव्यावृत्तिरभिधीयते। किन्तु ज्ञानेन्द्रियाणामनुगमपूर्वकमियत्ता प्रतिपाद्यत इति न विरोधः। सर्वेषामिन्द्रियाणां सात्त्विकाहङ्कारोपात्तत्वमेवानुगतं लक्षणम्।

मनस अन्तःकरणत्वादिवाच्चित्वप्रतिपादनम्

इन्द्रियेषु मनस एवान्तःकरणत्वं बुद्ध्यहङ्कारचित्तानां तु मनोवृत्तिविशेषत्वमेव। तत्तु अन्तःकरणमिति रामानुजीयाः। अद्वैतिनस्तु मनोबुद्ध्यहङ्काराणां यथाऽन्तःकरणत्वं तथा चित्तस्याप्यन्तःकरणत्वं मन्यन्ते। तन्मतमधिकृत्य विचार्यते—

किमत्र श्रुत्या बुद्ध्यहङ्कारचित्तानामन्तःकरणत्वं, उत कल्पनया वा ? नाद्यः, तथाऽनुपलम्भात्।

न द्वितीयः एकमेवान्तःकरणं इतरे बुद्ध्यादयस्तु तस्यैवावस्थाविशेषा इत्युच्येत तदानेन न्यायेन सर्वदेहव्यापितया बाह्येन्द्रियाणामपि ऐक्यं कुतो न स्यात्। एकस्यैव देहव्यापिन इन्द्रियस्य चक्षुःश्रोत्रपाणिपादादिप्रदेशभेदेन संसर्गवशात् विचित्रज्ञानक्रियाजननशक्तिमङ्गीकृत्य तयैव भिन्नकार्योपपत्तेः अनेकेन्द्रियवादो न घटत इति चेन्न। सर्वशरीरिसंबन्ध्यपि एकमेवेन्द्रियमिति कुतो न स्यात्। एकस्यैव देहभेदेन संसर्गवशात्प्रतिनियतशक्तिकल्पनासम्भवात्। अतो यथानुभवं यथाप्रमाणमेव सर्वमङ्गीकर्तव्यम्। "इन्द्रियाणि दशैकं मनश्चे'त्याद्यागमेन एकादशत्वाभिधानात् अनुभवबलाच्च एकादशैवेन्दियाणीति निष्कर्षः। एवं देहस्यैवेन्द्रियत्वमिति पक्षोऽपि देहस्य तामसाहङ्कारिकत्वेनेन्द्रियस्य सात्त्विकाहङ्कारिकत्त्वेन उपदानभेदश्रवणात्प्रत्युक्त इति ध्येयम्।

इन्द्रियपरिमाणविचारः

अथ इन्द्रियाणां विभुत्वमुताणुत्वं वेति विषये अणुत्वमेवेति विशिष्टाद्वैतिनः संगिरन्ते। अणुत्वं चात्र परिच्छिन्नत्वम्। चक्षुःश्रोत्रादीनामनेकेषामिन्द्रियाणां स्वस्वविषयसम्बन्धयौगपद्येऽपि क्रमेणैव ज्ञानोत्पत्तिः तादृशस्थले दृश्यते, न तु युगपत्। यदि मनसः विभुत्वं तर्हि युगपदेव सर्वविषयज्ञानापत्तिः। चक्षुरिन्द्रियवन्मनसोऽपि संबन्धस्य विद्यमानत्वात्। अतः अणुत्वमेव। तथासति क्रमेणैव मनसः संबन्धस्य वक्तव्यतया धीक्रमो युज्यत इति। एवं "प्राणमनून्क्रामन्तं सर्वे प्राणा अनून्क्रामन्ति' इति श्रुत्या इन्द्रियाणां देहात् निष्क्रमणमभिधीयते। तच्च विभुत्वपक्षेऽनुपपन्नम्। अत्र प्राणशब्दः इन्द्रियवाची।

ननु देहे स्थितस्य चक्षुरिन्द्रियस्य परिच्छिन्नत्वे दूरतरविषयप्रत्यक्षं न स्यात्। विषयस्यासन्निकृष्टत्वादिति चेन्न। वृत्तिद्वारा विषयसंबन्धसम्भवेनानुपपत्त्यभावात्। न चैवमपि "त एते सर्व एव समाः सर्वे अनन्ता" इति श्रुत्या अनन्तत्वरूपविभुत्वश्रवणात् कथमिन्द्रियाणां परिच्छिन्नत्वमिति वाच्यम्। इन्द्रियकार्याणामसंख्येयतया अनन्ता इत्युक्तम्। न त्विन्द्रियस्य विभुत्वाभिप्रायेण। तथा चोक्तं श्रीभाष्ये- "आनन्त्यश्रुतिस्तु उपास्यप्राणविशेषणकार्यबाहुल्याभिप्राया" इति। अतो न कश्चिद्विरोधः।

यदुक्तमिन्द्रियस्य वृत्तिद्वारा बाह्यार्थसंबन्धः [दूरतरार्थसंबन्धः] संभवतीति। तदपि न युज्यते। जलेऽपि वस्तुनः प्रत्यक्षमनुभूयते। तत्र जलस्य वृत्तिनिरोधकत्वेन तदसंभवापत्तेः। तस्मात् विमतं चक्षुरादीन्द्रियं प्राप्यग्राहीन्द्रियत्वादितरवदित्यनुमानेन साक्षात्संबन्धे सत्येव इन्द्रियाणां प्रत्यक्षजनकत्वं सम्भवति इति पूर्वपक्षिणामाशयः। जलस्य स्वच्छद्रव्यत्वेन वृत्तिरोधकत्वाभावेन विरलपटन्यायेन वृत्तेः प्रवेशसंभवेन तद्द्वारा चक्षुरिन्द्रियेण प्रत्यक्षमुत्पद्यत एवेति न काचिदनुपपत्तिः।

शब्दग्रहणविषये मतभेदः

इन्द्रियाणां प्राप्यग्राहित्वं पूर्वमुपापादि। तत्र शब्दग्रहणविषये मतभेदः प्रदर्श्यते। इन्द्रियाणां प्राप्यग्राहित्वेऽपि श्रोत्रेन्द्रियं स्ववृत्तिद्वारा दूरदेशस्थमन्तिकदेशस्थं च शब्दं गृह्णाति–शब्ददेशं गत्वा। अत एवास्या दिशः अमुकशब्द आगच्छतीति दिग्भेदग्रहणं, तथा आसन्नत्वानासन्नत्वादिज्ञानं च भवतीति सांख्याः कथयन्ति। न चास्मिन् पक्षे दूरासन्नदेशोत्पन्नशब्देषु विशदाविशदबुद्ध्यनुपपत्तिः। श्रोत्रगतेरविशेषादिति वाच्यम्। चक्षुर्वृत्तिनयवत् श्रोत्रवृत्तेरप्यासत्तितारतम्यानुरोधेन शब्दे विशदाविशदावभासोपपत्तेः।

अन्ये तु श्रोत्रेन्द्रियदेशायातस्यैव शब्दस्य ग्रहणं, न तु शब्ददेशं प्रति गतेन श्रोत्रेन्द्रियेणेति कथयन्ति। तेषामयमाशयः—दूरस्थो जनः ताड्यमानभेर्याः दशकोणाभिघातात्पश्चाच्छब्दं शृणोति। वादकाः भेर्यासन्नपुरुषाश्च अविलम्बितमेव शब्दं शृण्वन्ति। एवमनुवातप्रतिवातयोरतिदूरानतिदूरं च शब्दो गृह्यते, बहिरन्तर्गृहगतानां च स्फुटास्फुटधीश्च दृश्यते। तस्मात् श्रोत्रप्रदेशायातस्य भूतधर्मस्य शब्दस्यैव ग्रहणमिति। शब्दस्य च वाय्वादिरूपाश्रयद्वारैव गतिमत्वम्। उक्तं च श्रीयामुनाचार्यैः आत्मसिद्धौ "शब्दगन्धसूर्यालोकरत्नप्रभादयो धर्म्यतिवर्तिनो गतिमन्तश्चे"ति। अयं पक्षः विशिष्टाद्वैत्येकदेशिनां पक्ष इत्यवधातव्यः। इत्थमत्र सात्विकाहङ्कारजन्यस्येन्द्रियस्य विचारः उपन्यस्तः।

आकाशस्य प्रत्यक्षत्वसाधनम्

अथ तामसाहङ्कारजन्यभूतचिन्ता प्रस्तूयते। तत्र सृष्टिक्रमे आकाशस्य प्राथमिकत्वात् तदधिकृत्य आदौ विमृश्यते।

नैयायिकाः आकाशो न प्रत्यक्षः किन्तु अनुमेय एवेति संगिरन्ते। तदेतन्न संगच्छत इति प्रतिपाद्यते। किमाकाशे प्रत्यक्षप्रतीतेः भ्रमत्वादनुमेयत्वमुच्यते ? आहोस्वित् प्रत्यक्षकारणस्य रूपस्यासत्वाद्वा ? नाद्यः, नीलं नभ इत्यबाधितचाक्षुषप्रतीतेस्सत्वात्। न चेयं भ्रान्तिः, तलत्वादिवदारोपितस्य नीलत्वस्यैव प्रतीतेरिति वाच्यम्। किमसावारोपः चाक्षुषः उताचाक्षुषः। आद्ये अधिष्ठानस्याकाशस्य चाक्षुषत्वमन्तरा अधिष्ठितस्य नीलत्वादेश्चाक्षुषत्वानुपपत्तेः। यद्यत्र अधिष्ठानचाक्षुषत्वमन्तराऽपि आरोपितस्य धर्मस्य चाक्षुषत्वमिष्यते तदा वाय्वादावपि रूपवत्ताबुद्धिप्रसङ्गः। भवत्पक्षे वायोरप्रत्यक्षत्वस्वीकारात्।

किञ्च नेदं रजतमितिवत् न नीलं नभ इति बाधितप्रतीतेरभावान्नात्र भ्रान्तित्वं युज्यते। एवमिह खगः पततीति प्रतीतौ इहेत्यनेनाधिकरणतया आकाशस्यैव प्रतीतेस्तस्य प्रत्यक्षत्वम्। न चात्र आतपादेरेव विषयत्वमिति वाच्यम्। खगादिवदेव आतपादेरप्याधेयतया तस्य इहेत्यनेनाधिकरणतया बोधयितुमशक्यत्वात् न चासावाकाश आतपादिपदवाच्यः। तथा कुत्राप्याननुभवात्। प्रत्युत इह व्योम्नि खगः, आतपः, तमः, मेघः, वायुरित्येवं सर्वेषामेव पदार्थानामाकाशाधिकरणकतयैवानुभवदर्शनाच्चाकाशस्यास्मदादिप्रत्यक्षविषयत्वं निराबाधम्।

अथ द्वितीयः रूपाभावप्रयुक्तः प्रत्यक्षत्वाभाव इति पक्षो निरस्यते। नीलं नभ इति प्रतीतेरापरोक्ष्यात् प्रत्यक्षत्वमवश्यमेष्टव्यम्। यथादर्शनमेव पदार्थानां व्यवस्थास्वीकारात्। अन्यथा रूपस्याप्यप्रत्यक्षत्वापत्तिः ! रूपे रूपाभावात्। एवं च प्रत्यक्षसामान्ये रूपं कारणमिति कार्यकारणभावस्य निर्बीजत्वात्। अथ रूपप्रत्यक्षे व्यभिचारवारणाय चाक्षुषद्रव्यप्रत्यक्ष एव रूपस्य कारणत्वमुच्यते तदा तेनैव न्यायेनास्माभिः प्रत्यक्षयोग्यताया एव वस्तुनि प्रत्यक्षत्वनियामकत्वमुपगम्य रूपवत् रूपिद्रव्यसंसर्गस्यापि प्रत्यक्षे कारणत्वस्य सुवचत्वेन प्रकृते आकाशे पंचीकरणप्रक्रियया रूपिद्रव्यपार्थिवादेः संसर्गस्याक्षुण्णतया प्रत्यक्षत्वं सुलभमिति न किंचिदेतत्। अतश्च परम्परया आकाशेऽपि नीलरूपसत्वात् द्रव्यप्रत्यक्षे रूपस्य नियमेन कारणत्वपक्षेऽपि न काचिदनुपपत्तिः।

आकाशस्यानुमेयत्वनिरासः

अथ निष्क्रमणादिहेतुना आकाशोऽनुमीयत इति सांख्यपक्षं तथा परिशेषानुमानेन आकाशस्य सिद्धिं वदतां कणादानां पक्षं चानूद्य निरस्यते। तथाहि—पृथिव्यादिचतुष्टयस्य शब्दाश्रयत्वं न संभवति मूर्तत्वात्, मनोवदित्यनुमानेन शब्दाश्रयतया पृथिव्यादिचतुष्टयव्यावृत्तिः। एवं शब्दः न दिक्कालमनसां गुणः विशेषगुणत्वादित्यनुमानेन, रूपादिविशेषगुणाश्रयत्वं यथा कालादीनां न सम्भवति तथा शब्दाश्रयत्वमपि न युज्यत इति त्रयाणां दिक्कालमनसां शब्दाश्रयत्वानुपपत्तिः। तथा शब्दः आत्मगुणो न

भवति बाह्येन्द्रियग्राह्यत्वात् रूपादिवदित्यनुमानेनात्मव्यावृत्तिः। तस्मात्परिशेषात् शब्दः किञ्चिदाश्रितः गुणत्वादित्यनुमानेन पृथिव्याद्यष्टद्रव्यातिरिक्तस्य आकाशस्य शब्दाश्रयत्वेन सिद्धिर्वाच्येत्युपदर्शितरीत्या परिशेषानुमानेन आकाशोऽनुमेय एव न तु चाक्षुषप्रत्यक्षविषय इति काणादाः।

अयं च निर्वाहो न समीचीनः। उक्तानुमानेषु विपक्षे बाधकतर्काभावात् नात्र परिशेषानुमानेनाकाशस्सिद्धयति। यतो हि मूर्तत्वरूपहेतुरस्तु शब्दाश्रयत्वाभावरूपसाध्यो मास्त्वित्यप्रयोजकत्वशङ्कायां युष्माभिः पृथिव्यादेः शब्दाश्रयत्वेनोपलम्भापत्तिरिति बाधकतर्कं उद्भावनीयः। स च न संगच्छते। पञ्चीकरणप्रक्रियया समेषु भूतेषु सर्वस्यापि भूतस्यांशतो वृत्तित्वाभ्युपगमात् शब्दाश्रयत्वेनोभयसंप्रतिपन्ने आकाशेऽपि अस्माभिः पृथिव्याद्यंशस्य स्वीकारात् शब्दस्य पृथिव्याद्याश्रितत्वाभ्युपगमे बाधकाभावात्। प्रत्युत भवद्भिरुक्तरीत्यैव स्पर्शः न पृथिव्यादिधर्मः नीरूपेन्द्रियग्राह्यत्वात् इत्यनुमानेन पृथिव्याद्यतिरिक्तस्य स्पर्शाधारत्वकल्पनापत्तिः। अयमाशयः—नैयायिकैः स्पर्शग्राहकस्य त्वगिन्द्रियस्य वायवीयत्वाङ्गीकारात् वायोश्च नीरूपत्वेन विलक्षणत्वात् स्पर्शस्य नीरूपत्वगिन्द्रियग्राह्यत्वेन तदाश्रयत्वेन पृथिव्यादिविलक्षणस्य (वायुमात्रस्य) स्वीकारापत्तिः। न चेष्टापत्तिः स्पर्शस्य पृथिव्यादिचतुष्टयवृत्तित्वस्य भवताऽप्यभ्युपगमात्। एवं शब्दस्य बाह्येन्द्रियग्राह्यगुणत्वेन आकाशरूपविभुगुणत्वमपि न संभवति रूपादिवत्। रूपादीनां बाह्येन्द्रियग्राह्यत्वेन दृष्टानां अविभुगुणत्वेन दर्शनात्। ततश्च शब्दः न विभुगुणः बाह्येन्द्रियग्राह्यगुणत्वादिति विपरीतानुमानस्यापि सुवचत्वात् न त्वदुक्तानुमानेनाकाशसिद्धिः, किन्तु प्रत्यक्षेणैव।

अथ पुरुषस्य गृहादन्यस्माद्वा निष्क्रमणं प्रवेशनमित्यादिकमनुभूयते। तच्चाकाशसत्त्व एवोपपद्यते न त्वन्यथा। अतश्च निष्क्रमणादिलिङ्गेनाकाशः अनुमीयत इति वदतां मतमनूद्य निरस्यते। यद्यत्र निष्क्रमणादिना आकाशः स्वीक्रियेत तदा यत्राकाशः तत्र सर्वत्र निष्क्रमणादिकमिति वक्तव्यम्। तत्तु न सिद्धयति। आकाशव्याप्ते कुड्यादौ निष्क्रमणादेरशक्यत्वात्। न च कुड्यादिषु आकाशस्य सत्त्वेऽपि कुड्यस्य निष्क्रमणादिकं प्रति प्रतिबन्धकत्वात् न निष्क्रमणादिकार्यमिति वाच्यम्। तर्हि कुड्याभावात्मकप्रतिबन्धकाभावरूपकारणवशादेव निष्क्रमणादेरन्यथासिद्धत्वेन आकाशकल्पनाया अनावश्यकत्वात्तादृशहेतुना नभसः अनुमेयत्वं न युक्तम्। अपि चाकाशस्य विभुत्वेन कुड्यादावपि तत्सत्वमवर्जनीयम्। कुड्यादावाकाशानभ्युपगमे आकाशस्य सच्छिद्रत्वापत्तिः। सच्छिद्रत्वापत्या सावयवत्वापत्तिः। सावयवत्वापत्या अनित्यत्वापत्तिश्चेति दोषप्रसङ्गोऽपि दुष्परिहरः।

यश्चाकाश अवकाशप्रद इति लौकिकवैदिकव्यवहारः, स च पृथिव्यादिभूतचतुष्टयं प्रतिघातकत्वेनावकाशप्रदं यथा न भवति न तथाऽऽकाशः, किन्तु प्राणिसञ्चारादिप्रतिघातकत्वाभावेनोपकारकतयाऽवकाशप्रद इति रीत्या उपपादनीयः। न तावता आकाशेन दैयं अवकाशाख्यं द्रव्यान्तरमस्तीति भावः।

आवरणाभाव आकाश इत्याशङ्का तन्निरासश्च

अथ आवरणाभाव एवाकाशः, न तु पृथिव्यादिभूतचतुष्टयादतिरिक्तः पदार्थोऽस्तीति वदतां चार्वाकानां मतमपनुद्यते। नञ्-सत्वे एव अभावप्रतीतेरानुभाविकतया प्रकृते आकाश-आकाश इत्येवं नञुपश्लेषं विना नभसस्सद्रूपेणैव भानान्नात्र आवरणाभावस्याकाशपदवाच्यत्वम्। किं चावरणाभावशब्देनावरणात्यन्ताभावः ? उत आवरणप्रागभावप्रध्वंसाभावौ ? आहोस्विदावरणान्योन्याभावो वा विवक्षितः ? नाद्यः अश्वे गोत्वस्य, शशे शृङ्गस्य त्रैकालिकस्याभावस्यैवात्यन्ताभावत्वेन कदाचिदावरणे सत्वे तत्र तादृशस्यासम्भवात्। न द्वितीयः आवरणेषु विद्यमानेषु आवरणप्रध्वंसस्य, आवरणप्रागभावस्य वा वक्तुमशक्यत्वात् नात्रावरणप्रध्वंसाभावरूपत्वं, आवरणप्रागभावत्वं वा नभसो युज्यते। यद्यत्र स्थलान्तरे उत्पद्य वर्तमाने आवरणे स्थलान्तरीयावरणप्रध्वंसप्रागभावयोर्नासम्भव इत्युच्येत तदा तादृशस्थलान्तरीयावरणप्रध्वंसप्रागभावयोस्तत्र स्वप्रतियोग्यावरणस्थले वक्तुमयोग्यत्वादावरणसामान्यप्रागभावः प्रध्वंसाभावश्च न सम्भवति। यत्किञ्चिदावरणध्वंसप्रागभावयोस्तु सुतरामसम्भवः। यत्किंचिदावरणे स्थिते तत्र तद्वयक्त्यावरणध्वंसप्रागभावयोरप्रामाणिकत्वादिति भावः।

आवरणान्योन्याभावात्मकस्स इति पक्षोऽपि न संगच्छते। किमस्मिन्नावरणे स्वस्मिन् स्वतादात्म्यं निषिध्यते ? उतानावरणे आवरणतादात्म्यं वा ? आद्ये स्वस्मिन् स्वतादात्म्यस्यैव सर्वत्रानुभवात्तस्य निषेधे अनुभवविरोधो दोषः। द्वितीये आवणान्यद्रव्यस्यैव भावात्मकस्यास्माभिरप्याकाशपदवाच्यत्वाभ्युपगमान्न भवदभिमतस्य आवरणाभावस्याकाशरूपत्वमिति नानिष्टं किंचित्। किञ्चावरणतादात्म्याभावस्य आवरणान्यत्वं बुद्ध्वा न कश्चित् नभःपर्यायान् प्रयुङ्क्ते। तस्मान्नात्रावरणाभावस्य आकाशत्वं, किन्तु आवरणाभावातिरिक्तो भावात्मक एवाकाशः।

आकाशस्य नित्यत्व-विभुत्वनिरासः

अथाकाशो नित्यो विभुश्च निरवयवद्रव्यत्वादित्याद्यनुमानेनाकाशस्य नित्यत्वादिकं साधितं तार्किकैः। अयमाशयः—पृथिव्यादेस्सावयवद्रव्यत्वादनित्यत्वं, आकाशस्य तु तथाऽभावान्नित्यत्वमिति। तदिदमशोभनम्। "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्यादिश्रुतिभिः आकाशस्योत्पत्तेः प्रतिपादितत्वान्नात्र श्रुतिविरुद्धानुमानेन नित्यत्वं सिद्ध्यति। प्रमाणेषु श्रुतेः प्रबलत्वात्। तस्मादाकाशः अनित्यः अविभुश्चेति विशिष्टाद्वैतिनामभिप्रायः।

दिश आकाशान्तर्भावः

अथ दिशः व्योमातिरिक्तत्वाभावे (व्योमस्वरूपत्वे) अनुपपत्तिपरिहारपूर्वकं श्रुत्यविरोधप्रदर्शनपूर्वकं च आकाशभिन्नतत्त्वाभावत्वं साध्यते। तथा हि—इयं प्राची-

त्यादिव्यवहारहेतुत्वेन दिक्तत्त्वं नैयायिकैरङ्गीक्रियते। अयं पक्षः न समञ्जसः। प्राक्त्वं च सूर्योदयगिरिसंयुक्तसंयोगपरम्पराविशेषवत्त्वम्। संयुक्तसंयोगपरम्परा नाम संप्रति प्राक्त्वेन व्यवह्रियमाणस्येदंपदार्थस्य उदयगिरेश्च मध्ये यावन्ति द्रव्याणि पङ्क्तिरूपेण निविष्टानि तावद्वस्तुमिथस्संयोगकूटम्। तस्य कूटस्य इदंपदार्थेऽस्मिन् साक्षादसम्भवात् तावत्संयोगावच्छिन्नदिक्प्रदेशसंयुक्तत्वमेव वक्तव्यम्। एवं च दिक् तादृशसंयोगकूटस्य प्रकृतेदंपदार्थे उपनायिका भवतीति तदुपनायकतया दिक् सिद्धयतीति खलु भवतामभिप्रायः। तन्नान्यथैवोपपद्यते। दिश इवाकाशस्यैव तादृशसंयोग-कूटोपनायकत्वसम्भवान्नातिरिक्तदिक्तत्त्वसिद्धिः। अयमाशयः सूर्योदयकालीनातपः यस्मिन्नाकाशे दृश्यते तत्र प्रागिति व्यवहारः। एवं सूर्यास्तमयकालीनातपः यस्मिन्नाकाशे दृश्यते तत्र प्रतीचीति व्यवहार इत्यादिरीत्या आकाशस्यैव तत्तदुपाधियोगात् प्रागादिभेदकत्वसंभवेन न तदतिरिक्ता दिक् सिद्धयति। न चाकाशस्य दिक्त्वे उभयोः पर्यायता स्यादिति वाच्यम्। उपाधिविशिष्टस्याकाशस्य दिक्शब्दार्थत्वेन अनुपहिता-काशस्य व्योमशब्दार्थत्वेन च तयोर्भेदात्पर्यायत्वोपपत्तेः। इत्थं च धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायेन दिग्रूपधर्मिकल्पनापेक्षया कल्पिताकाशरूपधर्मिण्येव तादृशसंयोगो-पनायकत्वस्य (धर्मस्य) कल्पने लाघवात् दिशः आकाशानन्यत्वम्।

नन्नेवं कल्पितस्य वियतः उपनायकत्वकल्पने अतिप्रसङ्गः। तथा हि यदि आकाशो मिथस्संयुक्तवस्तुगतसंयोगकूटं तत्तद्वस्तुसंयुक्तस्वसंयुक्तत्वसंबन्धेन प्राक्-प्रत्यगादिवस्तुनि उपनयेत्, तदा देशान्तरस्थं जपाकुसुममपि तत्संयुक्तस्वसंयुक्तत्व-संसर्गेणान्यदेशीयस्फटिके उपनयेत्। तथासति देशान्तरवृत्तिस्फटिकेऽपि लोहित-प्रतीतिर्भवेदित्यतिप्रसङ्गस्स्यात्। अत आकाशस्योपनायकत्वानुपपत्तिरिति चेन्न। सर्वत्र कारणशक्तिः कार्यानुसारेणैव यथानुभवं कल्प्यते। एवं चोपनायकद्रव्यमुखेनान्यदीय-धर्मस्य अन्यत्र कार्यकरत्वं यत्र-यत्र दृष्टं तत्र-तत्र तदुपनायकत्वशक्तिरस्तीत्यभ्युपग म्यते। अन्यथा व्योमातिरिक्तदिग्तत्त्वाभ्युपगमेऽपि उपदर्शितातिप्रसङ्गस्य दुर्वारत्वात्। विदेशीयस्फटिके स्थलान्तरीयजपाकुसुमप्रयुक्तलौहित्यानानुभवान्न तत्रातिप्रसङ्गः। अत एव तत्र जपाकुसुमे विदेशस्थस्फटिके लौहित्याधायकशक्तिर्नाङ्गीक्रियते। इत्थं च नभसः उपाधियोगात् दिग्रूपत्वस्वीकारे न काचिदनुपपत्तिः।

एवं "रूपान्तरं तत् द्विज कालसंज्ञ" मित्यादिना कालस्य पृथक्तत्त्वोपदेशवदागमे तत्त्वसृष्टिप्रकरणे दिशः पृथक् पाठादर्शनादपि नभसोऽनन्यत्वं सिद्धयति। न च पुरुषसूक्ते "पद्भ्यां भूमिर्दिशः श्रोत्रादि"ति मन्त्रेण भगवतश्श्रोत्रादृदिशः उद्भवस्य तथा व्याकरणे "दिग्देशकालेष्वस्तातिः" इति सूत्रे देशकालव्यतिरिक्तदिङ्निर्देशस्य दिशः श्रोत्रमित्यनेन दिशः श्रोत्रे लयस्य च दर्शनात् दिशो नभोरूपत्वं न संभवतीति वाच्यम्। पुरुषसूक्ते दिगुणाधीनां दिगधिष्ठानदेवतानां वा भगवतः श्रोत्रादुत्पत्तिः प्रतिपाद्यते न त्वतिरिक्तदिशः। श्रोत्रस्येन्द्रियत्वेन अष्टौ प्रकृतयः षोडशविकारा इत्यनेन

तस्य विकृतावेवान्तर्भावकथनेन उपादानत्वासंभवेन उपदर्शितश्रुतीनां सृष्टिविषये लयविषये वा ऐदम्पर्याभावात्। अन्यथा "नाभ्या आसीदन्तरिक्ष"मिति श्रवणादन्तरिक्षलोकादेरपि तत्त्वान्तरत्वापत्तिः। अतश्च पुरुषसूक्ते ब्राह्मण-क्षत्रिय-चन्द्र-सूर्यादिव्यष्टिसृष्टिप्रकरणे अन्तरिक्षस्वर्गादिकल्पनाश्रवणात् दिक्सृष्टेरपि व्यष्टिविषयकत्वेन दिशः न तत्त्वान्तरत्वं वक्तुं शक्यत इति भावः। एवं व्याकरणस्यापि दिशः स्वरूपनिष्कर्षे न तात्पर्यम्। किन्तु आगमादिप्रमाणसिद्धदिक्तत्त्वानुसारेण कार्यविशेषणविधान एव तात्पर्यान्न तेन अतिरिक्तदिक्तत्त्वसिद्धिरिति।

वायुनिरूपणम्

अथ वायुः निरूप्यते—नैयायिकास्तावत् योऽयं रूपवद्द्रव्यासमवेतस्पर्शः स क्वचिदाश्रितः स्पर्शत्वात्, पृथिवीसमवेतस्पर्शवदित्यनुमानेन वायोः सिद्धिं प्रतिपादयन्ति। अत्रायं घट इत्यादिप्रत्यक्षधीवत् त्वगिन्द्रियपवनसंयोगे सति सावधानस्य पुरुषस्य वातो वातीति प्रत्यक्षबुद्धेरानुभाविकतया वायुः प्रत्यक्ष एव न त्वनुमेय इति विशिष्टाद्वैतिनः। अयमाशयः यदि वायुरप्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यनुमानेन वायोरनुमेयत्वं ब्रूयात् तदा—प्रत्यक्षस्पर्शाश्रयत्वरूपहेतोः पृथिव्यादिभूतेष्वपि विद्यमानतया अन्धस्य निमीलितचक्षुषो वा पुरुषस्य तादृशहेतुना घटादीनामपि अनुमित्यैव भानापत्तिः। यतो हि अन्धादीनां पृथिव्यादिभूतेषु त्वगिन्द्रियेण या स्पर्शधीर्भवति तस्याः स्पर्शमात्रविषयकत्वात्। एवं चान्धस्य पृथिव्यादिविषयकत्वगिन्द्रियजन्यप्रत्यक्षानुपपत्तिः। तत्राप्यन्धस्य त्वाचप्रत्यक्षत्वमिष्टमेवेति नात्रेष्टापत्तिः कर्तुं शक्यते। न च बाह्येन्द्रियजन्यज्ञानमात्रे रूपापेक्षणात् वायोश्च नीरूपत्वेन प्रत्यक्षत्वानुपपत्तिरिति वाच्यम्। रूपस्य स्पर्शस्य च नीरूपत्वेन तयोः यथायथं प्रत्यक्षत्वानुपपत्तेः। तस्मात् चाक्षुषद्रव्यप्रत्यक्षे एव रूपस्य कारणत्वं, न तु त्वगिन्द्रियजन्यप्रत्यक्ष इत्यङ्गीकार्यम्। यद्यत्र चक्षुरिन्द्रियग्राह्यरूपात्मकगुणविरहात् वायोरप्रत्यक्षत्वमुच्यते तदा रसनेन्द्रियघ्राणेन्द्रियाभ्यां ग्राह्ययोर्गन्धरसयोः अनले तेजसि असत्वात् तस्यापि दर्शनस्पर्शनाभ्यां प्रत्यक्षत्वानुपपत्तिः। अतोऽत्र इन्द्रियान्तरग्राह्यविशेषगुणविरहः नेन्द्रियान्तरवेद्यत्वविरोधीति वायौ चक्षुरिन्द्रियग्राह्यरूपाभावेऽपि त्वगिन्द्रियग्राह्यस्पर्शस्य सत्वेन तस्य त्वाच-प्रत्यक्षविषयत्वं निराबाधमिति निष्कर्षः।

नन्वेवं वायोः प्रत्यक्षत्वे तन्निष्ठसंख्यापरिमाणादीनामपि स्पार्शनप्रत्यक्षत्वापत्तिः। तेषामध्यक्षयोग्यतायाः द्रव्योपलम्भप्रतिनियतत्वात्। संख्यादिप्रत्यक्षं प्रति योग्यतदाश्रयसन्निकर्षस्यैव कारणत्वादिति वायोः न प्रत्यक्षत्वमिति चेन्न। एका वह्निशिखा, एका वारिधारेत्यादिवदेकोऽयं वायुरिति व्यवहारात् वायुगतसंख्यादीनामप्यंशतः प्रत्यक्षत्वमिष्यत एवेति न विरोधः।

वस्तुतस्तु आश्रयद्रव्यप्रत्यक्षे सति तन्निष्ठसंख्यापरिमाणादीनामपि प्रत्यक्षत्वं भाव्यमिति नियमो न संगच्छते। यतो हि मानसप्रत्यक्षवेद्ये आत्मनि तेषामप्रत्यक्षत्वात्

व्यभिचारापत्तेः। यद्यपि आत्मनि अहमेक इति संख्याधीः वर्तते। तथापि तत्परिमाण न गृह्यते। अत एवाणुत्वविभुत्वदेहपरिमाणत्वसन्देहो भवति। अथ यदि आत्मव्यतिरिक्ते बाह्येन्द्रियजन्यद्रव्यप्रत्यक्ष एवेयं व्याप्तिः स्वीक्रियत इत्युच्यते तदा आत्मवायूभयभिन्न एवेयं व्याप्तिरित्येवंरीत्यापि संकोचस्य कर्तुं शक्यतया न वायोः तद्गतानां संख्यादीनामप्रत्यक्षत्वेनाप्रत्यक्षत्वं वक्तुं युज्यते। तस्माद्वायोः प्रत्यक्षत्वमेवेति निगूढाभिसन्धिः।

प्राणो वायुविशेष एव, न क्रियाविशेषः, नवेन्द्रियम्

अथ वायुविशेषः प्राणो वा? उत वायुसामान्यं प्राणपदवाच्यं? आहोस्वित् वायोरुत्पन्नत्वात् प्राणस्य "वायोरग्निः" इति श्रुत्या तेजसः तत्त्वान्तरत्वत् तत्त्वान्तरत्वं वेति सन्देहे सयुक्तिकं प्राणस्य वायुविशेषरूपत्वमभिधीयते। तथाहि—एतस्माज्जायते प्राणः रवं वायुरिति श्रुतौ प्राणेन सह वायोः पृथक्पाठदर्शनान्नात्र प्राणस्य वायुसामान्यरूपत्वं युज्यते। तथात्वे वायुप्राणयोरैक्येन पृथक्पाठायोगात्। नापि तेजोवत् तत्त्वान्तरत्वम्। तत्त्वसृष्टिप्रकरणे पृथक् तत्त्वतयाऽगणनात्, वायुत्वानपायाच्च। यद्यत्र वायुभिन्नतत्त्वान्तरत्वमुच्यते तदा प्राणस्य वायुविशेषत्वेनोपलम्भानुपपत्तिः। तस्मात् यथा घनीभूतजलाभिन्नकरकायाः जलत्वेन प्रत्यभिज्ञानात् जलविशेषरूपत्वं तथैव प्राणस्यापि वायुविशेषत्वेन प्रत्यभिज्ञानात् प्राणापाननागकूर्मादिदशविधवृत्तिभेदैः शरीरेऽनेककार्योपकारकः "यावद्धयस्मिन् शरीरे प्राणो वसति तावदायुः", "अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः", प्राणापानसमायुक्त इत्यादि श्रुतिस्मृतिसिद्धः वायुविशेष एव प्राणपदवाच्यः। न च स्तिमितवायौ प्राणशब्दप्रयोगाभावात् उच्छ्वासादौ प्रयोगाच्च वायोः क्रियाविशेष एव प्राण इति वाच्यम्। प्राणनापाननाद्यवस्थाश्रयत्व-शरीरसंयोगप्रवेश-निष्क्रमणरूपावस्थाश्रयत्वादिलक्षणद्रव्यत्वश्रवणात् क्रियाविशेषत्वानुपपत्तेः। तस्माद्वायुविशेष एव प्राण इति निष्कर्षः।

ननु "सप्त इमे लोका येषु चरन्ति प्राणाः", "सप्त वै शीर्षण्याः प्राणाः" इत्यादिश्रुतिषु प्राणस्य इन्द्रियैस्सहपाठात् इन्द्रियवदेव प्राणस्यापि जीवोपकरणत्वदर्शनाच्च चक्षुरादिवत् प्राणस्यापि इन्द्रियत्वं स्यादिति चेन्न। जीवोपकरणत्वस्य देहेऽपि दर्शनात् तस्य चेन्द्रियत्व-व्यवहाराभावेन नात्र प्राणस्य जीवोपकरणत्वमात्रेण इन्द्रियत्वं वक्तुं शक्यते। जीवोपकरणत्वस्येन्द्रियलक्षणत्वं न संगच्छते। देहेऽतिव्याप्तेरिति भावः।

किं च गोशब्दादेः भू-किरणेन्द्रियप्राणिविशेषादिरूपानेकार्थवाचकत्वेऽपि यथा एकस्मिन्नर्थ एव मुख्यत्वमर्थान्तरे चामुख्यत्वं तथैव प्रकृते प्राणशब्दस्येन्द्रियादिष्वमुख्यः प्रयोगः वायुविशेषे तु मुख्यप्रयोग इति रीत्या निर्वोढुं शक्यत्वेन अनेकार्थेषु शब्दैक्यस्याप्रयोजकत्वात्। एवं सात्त्विकाहङ्कारजन्यत्वरूपेन्द्रियलक्षणस्य प्राणेऽभावादपि न तस्येन्द्रियत्वम्। तस्मात् प्राणो वायुविशेष एवेति विशिष्टाद्वैतवेदान्तिनां परमाभिप्रायः।

तेजस्स्वरूपविमर्शः

तेजसः स्वरूपमधिकृत्य विचार्यते। तत्रादौ तेजोविशेषस्य जाठराग्नेः स्वरूपं तस्य जीवोपकारकत्वं तथा प्रभायाः तेजसो विशीर्णावयवत्वप्रत्याख्यानपूर्वकं तेजोविशेषरूपत्वं श्रीभाष्यादिग्रन्थतात्पर्यविरोधपरिहारमुखेन प्रतिपाद्यते। तथाहि—प्रतर्दनविद्यायां प्राणशरीरकपरमात्मोपासनाभिधानवत् वैश्वानरविद्यायां वैश्वानराग्निशरीरकपरमात्मोपासनाया अभिधानात् वैश्वानरशब्दवाच्यार्थः क इति जिज्ञास्यते। शरीरमध्ये प्राणापानाख्यो यो वेगयुक्तो वायुविशेषः तेन परितः प्रसरणशीलः जाठराग्निः वैश्वानरसंज्ञां प्राप्य जीवस्य सर्वभक्ष्यमाणपचनोपकारकस्सन् आमरणमस्ति, समुद्रमध्ये बडवाग्निवत्। न च प्राणवैश्वानरावात्मानौ। तयोः जडत्वात् घटादिवदुत्पत्तिनाशयोः श्रवणात् जीवपरापेक्षया भेदस्य श्रुतावभिधानाच्च। अतस्तौ परमात्मशरीरे एवेति तच्छरीरकतया परमात्मोपासनमेव विधित्सितमिति वैश्वानरशब्दवाच्यः जाठराग्निः तेजोविशेष एवेति सिद्धान्तः।

प्रभा-तेजोविशेषः

तेजसो या प्रभा विद्यते सा तेजोधर्मभूता एका च। तथैव सर्वजनस्यापि प्रतीतेः। अतोऽत्र तेजोधर्मत्वमेकत्वं चावश्यमेष्टव्यम्, प्रत्यक्षप्रमाणसिद्धत्वात्। अत एव "एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा", अनन्या राघवेण भास्करेण प्रभा यथा" इति स्मृत्यादौ प्रभायाः एकत्वं तेजोधर्मत्वं चोक्तं संगच्छते। न च प्रभायाः मूलाग्रयोः विशदतमत्वाविशदतमत्वोष्णत्वानुष्णत्वयोश्च विरुद्धधर्मयोरुपलम्भान्न तेजोविशेषत्वं, किन्तु तदतिरिक्तत्वमेवेति वाच्यम्। वृक्षे मूलाग्रयोः संयोगतदभावयोरवच्छेदकभेदेनोपलब्धिवत् प्रभायामपि उष्णत्वानुष्णत्वादिविरुद्धधर्माणामवच्छेदकभेदेनोपपत्तेः, नात्र तेजसोऽतिरिक्तत्वं प्रभाया युज्यते। अन्यथा दीपेषु स्थिरेष्वपि मूलाग्रयोः स्थूलत्वकृशत्वयोर्दर्शनात्तत्रापि ऐक्यानुभवानुपपत्तिस्स्यात्। न च दीपस्य विशीर्णा अवयवा एव प्रभापदवाच्या इति वाच्यम्। तथा सति रत्नादीनां निष्प्रभत्वापत्तिः। तत्र प्रतिक्षणं रत्नोत्पादकसामग्र्या अभावेन रत्ने स्वावयवविशरणस्य दुर्वचत्वात्। किं च दीपस्य विशीर्णावयवस्य प्रभापदवाच्यत्वे विशरणक्रियातत्स्वभावानां वेगवतां तेजोऽवयवानां अनुपशान्तवेगानामेव संभूय किञ्चिदुद्गमनेन दीपाद्यवयव्यारम्भणं घनीभूतानामनन्तरक्षणे विशरणं ऊर्ध्वगमनशीलानां च तेषां तत्तदंशतश्च तिर्यगूर्ध्वमधश्च प्रसरणं तादृशप्रसरणहेतुवैचित्र्यमित्याद्यनुपलब्धविविधार्थकल्पनागौरवं प्रसज्यते। तस्मात् प्रभा तेजः तिमिरापहारित्वादित्यनुमानेन प्रभायाः तेजोविशेषत्वमनुभवसिद्धमप्रकम्प्यमिति भावः।

ननु श्रीभाष्ये जिज्ञासाधिकरणे क्वचित् "प्रभा प्रभावद्द्रव्यगुणभूते" त्युक्तम्। क्वचित्तु "करतलप्रतिहृतगतयो हि रश्मयः बहुलाः स्वयमेव स्फुटतरमुपलभ्यन्ते"

इति कथितम्। प्रभायास्तेजसा सहैवोत्पत्तिविनाशयोस्तथा तेजोविशेषरूपत्वस्य चाङ्गीकारे प्रभायाः युगपदेव करतलादिदेशव्याप्युत्पत्तिमत्त्वेन गत्यादीनामसङ्गततया गतिप्रतिबन्धकपरकरतलप्रतिहतेत्यादिश्रीभाष्यग्रन्थविरोधो भवति। तेजसः विशीर्णावयवत्वस्वीकारे नात्र करतलेत्यादिग्रन्थानुपपत्तिः। किं च प्रभायास्तेजसा सहोत्पत्तिविनाशपक्षे आतपे निवृत्तेऽपि क्षितिजलयोरौष्ण्योपलम्भानुपपत्तिः। तेजोरूपप्रभाया नष्टत्वात्। विशीर्णावयवरूपत्वे नेयमनुपपत्तिः। तेजसो नष्टत्वेऽपि तदीयविशरणावयवसंक्रमणेन क्षित्यादिषु औष्ण्योपपत्तेः। एवं च करतलेत्यादिग्रन्थानुसारेण विशीर्णावयवपक्ष एव युक्त इति प्रतिभाति। परन्तु प्रभाप्रभावद्द्रव्यगुणभूतेत्यादिग्रन्थानुसारेण तु विशीर्णावयवपक्षनिराकरणमेवोपपन्नमिति ग्रन्थद्वयविरोधस्य स्फुटत्वात् कथमत्र प्रभायाः तेजोविशेषत्वं वक्तुं शक्यत इति चेदत्र ब्रूमः। प्रभाप्रभावद्द्रव्यगुणभूतेत्यादिग्रन्थः सांख्यमतानुसारेणैव प्रवृत्तः, न तु स्वमतानुसारेण। सांख्यैः—

दीपप्रभा यथा तस्मिन् विनश्यति विनश्यति।
तथा बहिर्गताप्येषा मूलच्छेदाद्विनश्यति॥

इति ग्रन्थेन इन्द्रियवृत्तेः उत्पत्तिविनाशौ इन्द्रियोत्पत्तिनाशाधीनौ। तत्र च दृष्टान्तः दीपप्रभेति प्रतिपादितत्वात्। एवं च प्रभाविषये पक्षद्वये नैर्भर्याभावान्न विशीर्णावयवत्वपक्षे भाष्यग्रन्थविरोध इति केचित् समादधिरे।

वस्तुतस्तु प्रभायाः तेजोविशीर्णावयवत्वपक्षे प्रत्यक्षप्रमाणविरोधस्य बहुविधकल्पनागौरवस्य च प्रदर्शितत्वान्नायं पक्षः भाष्यकाराभिमतः। किन्तु प्रभायाः तेजोधर्मत्वे सति तेजोविशेषत्वमेवेति यश्च पक्षः स एव। करतलेत्यादिग्रन्थविरोधोऽप्यस्मिन् पक्षे न घटते, अस्माभिः पदार्थानां स्थायित्वाभ्युपगमात् करतलादिस्थलेषु प्रभायाः कंचित्कालमवस्थाने विरोधाभावात् बहुलीभावादीनामुपपत्तेः। किं च बौद्धमतनिराकरणावसरे दीपादीनां निरन्वयविनाशस्य निराकृततया निवृत्तातपस्थलेऽपि क्षित्यादिषु सूक्ष्मतः प्रभावयवसत्वेनैव औष्ण्यप्रतीतेः निर्वाहसंभवेन विरोधाभावात्। एवं च प्रभायाः करतलादिषु तेजोनिरोधे सति ह्रासः, तदभावे विकासः तथाऽस्थिरदीपादौ च तत्समानकालीनप्रभागतिमत्त्वाङ्गीकाराच्च वारणादिकं युज्यत इति पूर्वोक्तः तेजोविशेषपक्षः भाष्यग्रन्थाविरुद्धः विद्वद्धृदयंगमश्चेति आनन्ददायिनीकारैः निगमान्तमहादेशिकैरनुगृहीतपक्षे स्वारस्यं सयुक्तिकं प्रत्यपादि।

अथ स्थिरतया गृहीते दीपे स्वावयवस्य विशरणमन्तरा क्षिप्रविनाशित्वानुपपत्तेः प्रभाया अपि तेजोविशरणरूपत्वमवश्यमङ्गीकार्यमिति पूर्वपक्षं निरस्यति। तथाहि—प्राच्यस्नेहदशादिनाशः स्वानन्तरभाविस्वजनकदीपनाशवान् दीपारम्भकस्नेहादिनाशत्वात् अन्त्यवदित्यनुमानेन दीपे क्षिप्रविनाशित्वसिद्धेः दीपस्य विशरणमवश्यमभ्युपगन्तव्यम्। तथा प्रतिक्षणं दीपवर्त्यादिनाशोऽपि प्रतिक्षणं चक्षुषा स्फुटं निरीक्ष्यते, अतः

प्रत्यक्षप्रमाणादपि दीपस्य विशरणं सिद्धयतीति पूर्वपक्षः। अत्रायं परिहारः—यथा स्नेहनाशात्प्रतिक्षणं दीपनाशः तथैव भिन्नभिन्नस्नेहादिसामाग्र्या अप्यनुभवात् प्रतिक्षणं दीपस्योत्पत्तिरपि स्वीकार्या। एवं च भिन्नभिन्नस्नेहादिसामाग्र्या भिन्नभिन्नदीपोत्पत्तेः नात्र विशरणस्यावश्यकता। सेयं दीपज्वालेत्यादिबुद्धिस्तु पूर्वदीपज्वालासादृश्यमात्रेण भवति। वस्तुतस्तस्या भ्रान्तिरूपत्वात्। यत्र भास्करे रत्नादौ सामग्र्यनुवृत्यादिहेतुविरहो दृश्यते तत्र तादृशस्य तेजोविशेषस्य स्थिरत्वात् तदीयप्रभाया अपि स्थिरत्वम्। दीपे स्थिरत्वबुद्धिस्तु भिन्नभिन्नसामग्रीबलात् बाधितेति भावः।

इत्थं तेजसि विशेषविचारं वर्तयन् तत्र प्रथममुद्दर्यमग्निं प्राणसाहचर्यान्निरूप्य ततोऽग्नित्वसाम्यात् दीपादिके उपस्थिते तत्र प्रभाप्रभावद्रूपेण भेदं, प्रभायाः तेजोविशेषत्वं च प्रत्यपादि।

सुवर्णादेः पार्थिवत्वम्

अथ तेजसः भौमदिव्योदर्याकरजभेदात् चातुर्विध्ये तार्किकोक्ते आकरजस्य सुवर्णस्य तैजसत्वनिराकरणपूर्वकं पार्थिवत्वं साधयति। सुवर्णाद्याः लोहविशेषाः पार्थिवाः पार्थिवद्रव्यहरिद्रावर्णसदृशवर्णवत्वात्, अतिकठिनत्वात् अतिशयितगुरुत्वाश्रयत्वाच्चेत्यनुमानेन सुवर्णस्य पार्थिवत्वं सिद्धयति। अत्र हेतौ केवलकठिनत्वं साधारणगुरुत्वं च करकादिरूपजलेऽप्यस्तीति पार्थिवत्वसाधनायोगात् तद्व्यावृत्तये अतीति अतिशयितेति च विशेषणम्। करकादिकाठिन्यस्य अस्थिरत्वान्नातिव्याप्तिस्तत्र। न च जले सांसिद्धिकद्रवत्वमेवास्ति, न तु नैमित्तिकद्रवत्वमिति तोयभिन्नत्वं सुवर्णस्य सिद्धयतीति वाच्यम्। तथासति पाकेन पार्थिवेऽपि वस्तुनि द्रवत्वदर्शनात् तत्रापि नैमित्तिकद्रवत्वस्याक्षुण्णतया पार्थिवे व्यभिचारापत्तेः। इत्थं च पार्थिवानां सर्पिरादीनां अत्यन्तानलसंयोगे उच्छिद्यमानद्रवत्वकत्वात् सुवर्णप्रभृतीनां च द्रवत्वस्यानुच्छिद्यमानत्वात् तादृशद्रवत्वाश्रयभागं पक्षीकृत्य सुवर्णस्य तैजसत्वं यत्परैस्साधितं तन्न समीचीनम्। तत्र पार्थिवभागस्यापि द्रवीभावात् तद्द्रवत्वमपि नोच्छिद्येतेति शंकायां अनुच्छिद्यमानद्रवत्वाश्रयद्रव्यान्तरमध्यनिर्विष्टत्वात् जलमध्यस्थघृतन्यायेन पार्थिवद्रवत्वमपि नोछिद्यत इति समाहितम्। तथासति तत्र दृष्टान्ते तोयस्य घृतचूर्णाधारतया कथनात्, तद्वदत्रापि सुवर्णाद्यंशस्तोयमेव किं न स्यात्, विनिगमकाभावात्। अनुच्छिद्यमानद्रवत्वविशेषस्य विनिगमकत्वन्तु दृष्टान्ताभावात् न संगच्छते। तस्मात् सुवर्णं पार्थिवमेवेति भावः।

तमसः पार्थिवद्रव्यत्वम्

अथ सुवर्णस्येव तमसोऽपि पार्थिवत्वं सयुक्तिकं साधयति। तमः पार्थिवं नीलरूपवत्वात् नीलघटवदित्यनुमानेन तमसः पार्थिवत्वं सिद्धयति। न च तमसः स्वरूपस्यैव नीलत्वात् नीले नीलासम्भवेन नीलरूपगुणाश्रयतया पार्थिवत्वस्य वक्तुमशक्यत्वात्

वियतिविततानां सूक्ष्माणां पृथिव्यवयवानां कृष्णो गुण एव तम इति वाच्यम्। बहुलत्व-चटुलत्वादिधर्माणामनुपपत्तेः। निबिडं तमश्चलति विरलं तम इत्यादिप्रतीत्या निबिडत्व-चलत्वादेस्तत्र दर्शनात् तादृशधर्माणां च द्रव्यधर्मत्वेन तमसो गुणत्वाभ्युपगमे तदनुप-पत्तेः। अतश्च नीलरूपगुणाश्रयतया तमसः पार्थिवत्वं निराबाधं सिद्धयतीति भावः।

ननु नैल्यादिना पार्थिवत्वसाधनं कं प्रति ? तार्किकैः तमसि नीलरूपवत्त्वस्य भ्रान्तित्वेन कथनात् तत्पक्षे हेत्वसिद्धेरिति चेत्—

तमः खलु चलं नीलं परापरविभागवत्।
प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति ॥ इत्यादिना।

भाट्टैरतिरिक्तद्रव्यत्वप्रतिपादनात् तान् प्रत्येवेति नात्र हेतोरसिद्धिः। न चालो-काभावस्तम इति युक्तम्। यतो हि च्छायायां पुरुषादिगत्यागत्योरिव प्रदीपालोकगत्या-गत्योः तत्रारोपादनुगत्युपपत्तेः। पृथक्द्रव्यत्वे तु तदनुपपत्तेरिति वाच्यम्। पृथक्द्रव्य-त्वेऽपि यथा अयस्कान्तेन अयसो गत्यागत्यनुविधानरूपं पारतन्त्र्यं तथैव तमसोऽपि गत्यागत्योस्सम्भवात्। यथादर्शनमेव पदार्थानां व्यवस्थायाः वक्तव्यत्वात्। न च तमो न रूपवत् अस्पर्शत्वादिति वाच्यम्। इन्द्रनीलप्रभायां स्पर्शाभावेऽपि रूपदर्शनेन व्यभिचारात्।

किं चास्पर्शत्वमप्यसिद्धम्। प्रभायामिव तमस्यपि अनुद्भूतस्पर्शाङ्गीकारात्। अतश्च स्पर्शाज्ञानं न रूपात्मकविषयापहारकम्। अत एव तमो न पार्थिवमस्पर्शत्वा-दित्यपि निरस्तम्। न च रूपप्रत्यक्षे आलोकस्य कारणत्वेन तमसि च तदभावात् कथं नीलप्रत्यक्षमिति वाच्यम्। आलोकाभावेऽपि सिद्धाञ्जनसहितया दृष्टया असहायोलूक-दृष्टया च प्रत्यक्षोत्पत्तेर्दर्शनेन व्यभिचारात् रूपप्रत्यक्षसामान्ये आलोकस्य तन्त्रता-संभवात्। तस्मात्तमसः पार्थिवत्वं निराबाधम्। आलोकमध्ये तमसोऽनुपलब्धिस्तु तमसः आलोकनाश्यत्वात् मध्यन्दिनालोकाप्रकाशादिवदभिभवाद्वा भवतीति यथायथं वर्णयन्ति।

अथ अज्ञानस्य ज्ञानाभावमात्रेणैव निर्वाहसम्भवेन यथा भवद्भिः भावरूपमज्ञानं न कल्प्यते तथा लाघवात् आलोकाभावेनैव निर्वहे सति तमः अन्यद्द्रव्यमिति न कल्प्यमित्याशंकायां समाधीयते। आलोकाभावमात्रं न तमः। तमः प्रतीतिकाले सर्वदैव नीलं तम इत्येव प्रतीतेः। न च सा प्रतीतिरारोपितनीलविषयिणीति वाच्यम्। शुक्ति-रजतस्थले पश्चात् नेदं रजतमिति बाधप्रतीतिवत् अत्र बाधादर्शनात् न नैल्यारोपो वक्तुं शक्यते। आरोपितस्थले सर्वत्र नियमेन पश्चाद्बाधदर्शनात्। किं च नैल्यमारोपित-मिति पक्षे शुक्लवर्णान्यत्वसाम्यात् कदाचित् पीतादिवर्णवत्त्वेनाऽपि उपलम्भापत्तिः। उपलम्भस्तु नियमेन कृष्णवर्णत्वेनैव, न तु पीतादिवर्णत्वेन। तस्मात् कथमपि नीलस्या-रोपासम्भवात् तमसो वस्तुतः नीलरूपाश्रयतया आलोकाभावातिरिक्तद्रव्यत्वं सर्वथा दुरपह्नवम्।

एवं प्रलयकाले "नासीत्तमो ज्योतिरभूत् न चान्यत्" इत्यादिना ग्रन्थेन विष्णुपुराणादिषु महर्षिभिः तमसः तेजसश्चासत्वप्रतिपादनान्नात्र आलोकाभावरूपत्वं तमसो युज्यते। प्रतियोगितदभावयोरेकत्र विरोधात् स्थित्यभाववत् तमसः आलोकाभावरूपत्वे उभयोर्निषेधस्यापि व्याहतत्वेन अशक्यत्वात्। अत्रेदमाकूतम्। आलोकाभावः अत्र नास्तीत्युक्ते आलोकः अस्तीति ज्ञायते। एवमालोको नास्तीत्यभिहिते आलोकाभावः अस्तीति वस्तुस्थितिः। तत्र तमसः आलोकाभावरूपत्वे उभयं नास्तीति निषेधो न संगच्छते, कालविशेषे नियमेन एकस्योपलम्भात्। यद्यत्र आलोकाभावातिरिक्तत्वं तमस इष्यते तदा नेयमनुपपत्तिः। घटपटवत् तमसः तेजसश्च परस्परं भिन्नत्वेन प्रलयकाले तदुभयनिषेधोपपत्तेः। किं च अन्तर्यामिब्राह्मणे "यस्य तेजश्शरीरं" यस्य तमश्शरीरमित्यादिश्रुत्या तेजसा सहातिरिक्ततया तमसोऽपि भगवच्छरीरतया पाठदर्शनात् अस्माभिः अभावस्य भावान्तररूपत्वाङ्गीकाराच्च नात्र तमसः आलोकाभावरूपत्वमुपपद्यते। अभावस्य भावान्तररूपत्ववादिनामस्माकं पक्षे भवदुक्तरीत्या तमसः आलोकाभावरूपत्वाभ्युपगमेऽपि न तस्य तेजोभावत्वं सिद्ध्यति। किन्तु अभावातिरिक्तं भावरूपत्वमेवेति अतिरिक्तत्वमक्षुण्णमित्याशयः। इत्थमत्र चलस्य तमसः पृथिव्यामन्तर्भावो न्यरूपि।

भूभ्रमणादिनिरूपणम्

अथ महापृथिवी अचलैवेति सयुक्तिकं निरूपयन् तस्याः भ्रमणं वदतां केषांचित्पक्षं जैनीयं पक्षञ्च निरस्यति। भुवः भ्रमणपक्षे "हिरण्मयेन सविता रथेने" त्यादिश्रुत्या प्रतिपादितसूर्यगत्यनुपपत्तिः। तस्मादनेकपुराणेषु श्रुतिषु च प्रतिपादितरीत्या भूः स्थिरा, ग्रहनक्षत्राणि पवनरथवशात् भ्रमन्ति इत्येवं वैदिकसिद्धान्त एव युक्तः। न च "उत्ताना ह वै देवगवा वहन्ति" इति श्रुतिसार्थक्याय यथा स्वर्लोकस्य भ्रमणं तद्वदेव भूलोकस्यापि भ्रमणमङ्गीकार्यम्। देवलोकस्य भ्रमणस्वीकारे सत्येव तत्रत्यानां गवां तल्लोकोपरितनभागस्य भ्रमणवशादधोदेशप्राप्तिदशायां देशान्तरस्थैरुत्तानतया गमनं लक्ष्येतेति वाच्यम्। "उत्ताना ह वै देवगवा" इत्यादिवाक्यानां "आदित्यो यूप" इतिवत् अर्थवादपरत्वेन स्वार्थे तात्पर्याभावान्न तादृशश्रुत्यर्थोपपत्त्यर्थं देवलोकभ्रमणं युज्यते। तस्मात् यथा स्वयं भ्राम्यन्तो बालिशाः भुवं भ्राम्यन्तीमभिमन्यन्ते तथैव भ्रान्तैरेव त्रिलोकीभ्रमणं कल्प्यते न त्वभ्रान्तैरिति। न च यथा नौकास्थः पुरुषः जलप्रवाहानुलोमगतिः तीरस्थान् निश्चलान् वृक्षादीन् प्रतिलोमगतिमतः पश्यति तथा भूमौ बम्भ्रम्यमाणायां वियत्स्थान् निश्चलानपि गृहादीन् बम्भ्रम्यमाणान् पश्यन्ति इति वक्तुं शक्यत्वेन भूमेरेव भ्रमणं युक्तमिति वाच्यम्। तथासति भूमौ धनुरादितो मुक्ता नभोगताः शर–शिलाशकलादयः कथं स्वदेशे तदासन्नदेशे वा निपतेयुः। भुवः भ्रमणाभ्युपगमे तेषां नित्यं स्वदेशपश्चिमभागे एव निपातस्स्यात्। एवमाकाशे उड्डीनानां पक्षिणां उपरिगमनावसरे तारतम्यानुपपत्तिश्च। तस्मात् भुवः भ्रमणपक्षः न शोभनः। एवं भूपतनपक्षोऽपि न घटते। यतः उर्व्याः गुरुत्वेन अतिवेगेन अधःपातात् तावत्पर्यन्तावस्थाना-

संभवात् आकाशे प्रक्षिप्तस्य लघुभूतवस्तुनः भूप्रदेशे गमनानुपपत्तेः। अनुभूयते तु तादृशवस्तुनः भूम्यामवस्थानम्। तस्मात् भूम्याः पतनं भ्रमणं वा न युज्यते, किन्तु स्थिरैव भूरिति निष्कर्षः।

एतावता प्रबन्धेन द्रव्यं द्वेधा विभक्तं जडमजडमिति, प्राच्यमव्यक्तकालाविति प्रतिश्रुतरीत्या प्रकृतेः तद्विकाराणां भूतादीनां च स्वरूपं भगवद्रामानुजाचार्यमतरीत्या निष्कृष्य प्रतिपादितम्।

कालस्याकाशातिरिक्तत्व, नित्यत्व, प्रत्यक्षत्वादि

अथ क्रमप्राप्तत्वात् कालस्य स्वरूपमिदानीमुपवर्ण्यते। अत्र केचन पूर्वपक्षिण आचक्षते। सूर्यास्तमयादिरूपोपाधिविशिष्टः आकाश एव कालपदवाच्यः। तत्र अस्तमयोदयादिरूपोपाधीनां सूर्यनिष्ठत्वेन तद्वत्वं पुरुषे कथं सम्भवतीत्याशंका जायते। अधिकदिनवान् अधिकसूर्यपरिस्पन्दवान्वा पुरुषः स्थविर इति तथा न्यूनोपाधिमान् पुरुषः युवेति च व्यवहारदर्शनात् स्पन्दादेः स्वाश्रयसूर्यसंयुक्ताकाशसंयुक्तत्वरूपसम्बन्धेन पुरुषे सत्वात् आकाशस्यैव सूर्यनिष्ठधर्मोपनायकत्वसंभवादाकाश एव कालः, न तु तदतिरिक्तः। अन्यस्य अन्यधर्मोपनायकत्वं संभवतीति भवद्भिरेव दिशः आकाशान्नन्यत्वप्रतिपादनावसरे अभिहितत्वादिति, अत्रायं सिद्धान्तः। अष्टादशपुराणेषु-प्रमाणतयामूर्धन्यभूते श्रीविष्णुपुराणे "विष्णोः स्वरूपात्परतो दिते द्वे" इत्यारभ्य "रूपान्तरं तत् द्विज कालसंज्ञ" मित्यादिना तथा "अनादिर्भगवान् काल" इत्यादिना च प्रकृतिपुरुषवत् भगवच्छरीरत्वस्य अनादित्वादेश्च प्रतिपादनात् आकाशस्य च श्रुतिषु उत्पत्तिश्रवणात् तत्स्वरूपत्वायोगात्। दिशस्तु न पृथक्पाठः न वा भगवच्छरीरत्वं कुत्रचिच्छ्रूयते। अतस्तस्याकाशानन्यत्वं युक्त्या साध्यत इति नात्र तन्न्यायेन कालस्य वियदनन्यत्वं वक्तुं शक्यते। अनादित्वानन्तत्वादेः श्रवणादेव कालस्य एकत्वं कार्यत्वाभावरूपं नित्यत्वं चाव्याहृतम्।

ननु "कालोऽस्मि लोकक्षयकृत्प्रवृद्ध" इति गीतायां भगवता श्रीकृष्णेन स्वस्यैव कालरूपत्वाभिधानान्नात्र परमात्मातिरिक्तः कालस्सिद्ध्यति। परमात्मनः सर्वकारणत्व-सर्वव्यापित्वनित्यत्वादीनामपि निराबाधतया कालस्य तादृशधर्मवत्वप्रतिपादकस्मृतीनामपि नानुपपत्तिः। अतोऽत्र ब्रह्मव कालपदवाच्यः न तु तदतिरिक्त इति चेन्न। स्थूलोऽहमित्यादिवदनादिर्भगवान् काल इत्यत्रापि शरीरशरीरिभावप्रतिपादकतया सामानाधिकरण्योपपत्तेः नात्र सामानाधिकरण्यं कालपरमात्मनोरैक्यं प्रतिपादयति। किं च रूपान्तरं तत् द्विजकालसंज्ञमित्यत्र रूपान्तरमित्यनेन स्पष्टतया परमात्मभिन्नत्वं श्रूयते। तस्मात् प्रकृत्यादिवत् कालोऽपि परमात्मव्यतिरिक्तः तच्छरीरभूत इत्याशयः।

अथ कालस्योत्पत्ति निरस्य नित्यत्व-विभुत्वादिकं प्रसाध्यते। तथाहि—"कालो नियतिश्च तथा कला च विद्या च रागश्च अव्यक्तं मायातः" इति ग्रन्थेन कालस्यापि मायातन्यत्वं प्रतिपाद्य अनित्यत्वादिकं प्रत्यपादि। तत्रेदं विमृश्यते—किमयं

कालः स्वोत्पत्तेः पूर्वं नास्ति, पश्चाच्च नाशात् न भवितुमर्हतीत्यभिसन्धिः ? उत भूतादिपदार्थवत् कालोऽपि उत्पद्यत इत्यभिसन्धिर्वा ? नाद्यः, उत्पत्तेः पूर्वं नास्तीति कथनवेलायां पूर्वशब्देन किं पूर्वकालरूपार्थः बोध्यते ? उत पूर्वशब्दः निरर्थकः ? पूर्वशब्दस्य निरर्थकत्वे तदा निरर्थकत्वरूपनिग्रहस्थानदोषः। तस्य सार्थकत्वे तदा कालस्यैव पूर्वशब्दार्थतया उत्पत्तेः पूर्वं नास्तीति स्ववचनव्याघातः। प्रागिति परमिति च प्रयुञ्जान एव कथं तदा तदा कालाभावं वदेत् ? तस्मात् कालस्यासत्वं न सिद्ध्यति। एवं काल उत्पद्यत इति पक्षेऽपि स्ववचनव्याघातदोषः। उत्पत्तिशब्दः प्रागस्थितस्य कालस्य जननं बोधयति। तत्र प्राक्शब्देन कालस्यैवाभिधानात् तस्यानादित्वे सत्येव तथा-वक्तुं शक्यत्वात्।

एवं नासदासीन्नो सदासीत्तदानीमिति श्रुतौ तदानीमितिशब्दप्रतिपाद्यकालस्य सदसत्पदार्थवत् स्पष्टं नाशाप्रतिपादनात् कालस्यानादित्वं व्यक्तम्। तस्य चोत्पत्यभ्युपगमे उपदर्शितश्रुतिविरोधश्च स्यात्। न च विद्या-कालौ भवत्कृतावित्यादिस्मृतिषु कालस्योत्पत्तेः स्पष्टं श्रवणात् कालोत्पत्तिः सिद्ध्यतीति वाच्यम्। कालोपाधिभूतानां निमेषाब्दमासादीनां "सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि, कला मुहूर्ताः" इत्यादिश्रुत्या उत्पत्तिवत् प्रकृतवाक्येऽपि कालोपाधिभूतानां तदभिमानिदेवतानां वा उत्पत्त्यङ्गीकारेण निर्वाहोपपत्तेः।

अथ क्षणादिकालोपाधीनां सूर्यपरिस्पन्दादीनामप्रत्यक्षतया तादृशोपाधिविशिष्टकालस्याप्यप्रत्यक्षत्वमेव वक्तव्यम्। एवं प्रत्यक्षे रूपस्य कारणत्वात् काले च तदभावादप्रत्यक्षत्वमेवेत्याशंकायां सयुक्तिकं कालस्य प्रत्यक्षत्वं निरूप्यते। अयं घटोऽत्र वर्तत इति प्रतीत्या क्षणादिकालस्य पूर्वकालवृत्तिघटाद्यर्थव्यावर्तकत्वदर्शनात् घटाद्यर्थवदेव तद्विशेषणीभूतस्य कालस्यापि प्रत्यक्षत्वमनुभवसिद्धम्। तत्र च क्षणादिकालस्य साक्षात् प्रत्यक्षविषयत्वं दिवसस्य तु प्रत्यभिज्ञाप्रत्यक्षविषयत्वमिति भेदः। दिवसस्य अनेकक्षणसमुदायात्मकत्वेन तद्घटकक्षणानां सर्वेषां वर्तमानत्वाभावात्। एवं नीरूपद्रव्यस्याप्याकाशस्य प्रत्यक्षत्वं रूपप्रत्यक्षवदुपपन्नमिति प्रतिपादितत्वात् तन्न्यायेन काले रूपाभावेऽपि प्रत्यक्षत्वमविरुद्धम्। किञ्च क्षणमयं तिष्ठतीत्यादिप्रतीत्या सूर्यपरिस्पन्दादीनामप्रत्यक्षत्वेऽपि क्षणादिकालप्रत्यक्षस्य सर्वानुभवसिद्धतया कालः प्रत्यक्ष एव। अन्यथा सूक्ष्मप्रकृतिवत्कालस्यापि लोकव्यवहारविषयत्वं कुत्रापि न स्यात्।

"नन्वेवमनादिर्भगवान् कालः" इत्यादिप्रमाणानुसारेण कालस्य नित्यत्व-एकत्वादिधर्मवत्वाभ्युपगमे अब्दमासादीनामनेकधा व्यवहारानुपपत्तिरिति चेन्न। उपाधिभेदादब्दमासादिभेदः उपपद्यते। यथा मृदादिद्रव्याणां स्वरूपतः एकत्वेऽपि घटत्वाद्यवस्थाभेदमङ्गीकृत्य घटादिव्यवहारो भवति, तथैव कालस्यापि अब्दमासादिव्यवहारः तादृशावस्थाभेदेनोपपद्यत इति नात्र अखण्डकालस्य एकत्वानुपपत्तिरिति केचित्समादधिरे।

यादवप्र काशाचार्यास्तु "कालोऽनाद्यनन्तः अजस्रक्षणपरिणामी"त्यादिना ग्रन्थेन

क्षणादिकालस्य महाकालपरिणामरूपत्वं स्वीकृत्य कालस्य एकत्वादिकं प्रतिपादयन्ति। उभयथा च दोषाभावात् कालो नित्यो विभुश्चेति प्रमाणानुसारं सिद्धयति।

अथ प्रकृत्यादि-जडद्रव्यं निरूप्य अजडान्तर्गतं जीवस्वरूपं द्वितीयसरे आदौ निरूप्यते। जीवस्वरूपे च तीर्थकारा अपि बहवो विवदन्ते। केचन देह एवात्मेति, केचिदिन्द्रियाणीति, अपरे मन इति, अन्ये प्राण इति, इतरे ज्ञानमिति। एवं तत्परिमाणेऽपि केचिद्विभूरिति इतरे तत्तज्जीवशरीरानुगुणपरिणाम इति, परे अणुरिति। इत्थं नानाप्रकारेण व्यवह्रियमाणस्य जीवपदार्थस्य विशिष्टाद्वैतवेदान्तिनां मते निष्कृष्टस्वरूपं किमिति यथाग्रन्थं विविच्य दर्शयिष्यते।

तत्र पामरसाधारण्येनानुभवसिद्धं देहात्मवादम् आदौ निरस्यति। स्थूलोऽहं जानामि, कृशोऽहं करोमि, देवदत्तोऽहं यज्ञदत्तोऽहमित्यादिप्रतीतौ स्थौल्यादिगुणविशिष्टाहमर्थो भासते। स्थौल्यादिगुणश्च देहस्यैव, न तु तदतिरिक्तस्य कस्यचिदिति प्रत्यक्षसिद्धम्। अतः प्रमाणमूर्धन्येन प्रत्यक्षेण देह एवात्मेति सिद्धयतीति चार्वाका वदन्ति। अत्रेदमाक्षिप्यते—देहात्मवादिना किं हस्तपादादीनाम् अवयवानां प्रत्येकं चैतन्यमङ्गीक्रियते, तत्समूहस्य वा, अथ तद्भिन्नस्य कस्यचिदवयवातिरिक्तावयविनो वा? नाद्यः, शिरःपाण्यादीनां प्रत्येकं चेतनत्वे चैत्रमैत्रादिशरीरावच्छिन्नेषु विभिन्नेष्वात्मसु यथाऽन्योन्यमीर्ष्यासूयादिभिः कलहो भवति, तथा बहूनामवयवानां प्रायेण परस्परमीर्ष्यासूयादिभिरैकमत्यासम्भवात् कलहप्रसङ्ग इति।

अथैककुटुम्बिन इवैकशरीरावयवाः परस्परमीर्ष्यादिरहिताः। अतो न मिथः कलहप्रसङ्ग इति चेन्न। जातमात्रस्य चेतनस्य प्रवृत्तिनिवृत्त्योरन्वयव्यतिरेकाभ्यां रागद्वेषमूलकत्वावगमात् रागद्वेषादिरहितः कश्चिदपि चेतनो नास्ति। रागादिसत्वे चेर्ष्यादिराहित्यासम्भवादैकमत्यानुपपत्तेरन्तरङ्गाणामेककुटुम्बवर्तिनामपि कदाचिदवर्जनीयः कलहस्स्यात्। शिरः पाण्याद्यवयवेषु च मिथःकलहो न दृश्यते। अतोऽननुभूयमानस्य तस्यापादनेनानिष्टापादनरूपतर्केणावयवानां प्रत्येकं न चैतन्याश्रयत्वमिति सिद्धयति।

अपि चावयवानामुपचयापचयविनाशादिकालेष्वपि स एवाहमिति प्रत्यभिज्ञायास्सत्त्वात् तद्विषयः कश्चिदवयवातिरिक्तः पूर्वापरकालवर्ती स्थायी अहमर्थ अवश्यमभ्युपगन्तव्यः। अन्यथा पादाद्यवयवच्छेदे सति तदनुभूतस्मरणं न स्यात्। अन्यदृष्टस्यान्येन स्मरणायोगात्।

सङ्घातस्य चैतन्यमिति द्वितीयपक्षोऽपि न युक्तः, हस्तपादाद्यवयवसङ्घाताः न चैतन्याश्रयाः सङ्घातत्वात्, बाह्येन्द्रियग्राह्यत्वात्, चाक्षुषत्वात्, भूतत्वात्, रूपवत्वात्, घटवदिति नैकानुमानेन बाधात्।

सङ्घातातिरिक्तावयवी चेतन इति पक्षोऽपि न समीचीनः। अवयवी देहश्चानित्यत्वेन कार्यः; कार्यद्रव्यवर्तिनो विशेषगुणस्य कारणगुणपूर्वकत्वनियमः क्लृप्तः; देहावयवेषु च प्रत्येकं चैतन्यासम्भवः प्रदर्शितः; अतस्तत्र कारणेऽसिद्धस्य चैतन्यस्यावयविनि कार्ये वृत्तित्वं कथं सिद्धयेत् ? अतो न चैतन्याश्रयोऽवयवी इति।

किञ्च ममेदं शरीरं मम हस्त इति व्यतिरेकप्रतीतिस्सर्वसंप्रतिपन्ना। अत्र चाहमर्थः शरीरादिकं ममेत्यभिमन्यते, अभिमन्तव्याभिमानिनोर्भेदस्य च सर्वानुभवसिद्धत्वात् शरीरहस्तादिभेदः अहमर्थस्य सिद्धयति।

यदि हस्तादिष्वेव कश्चिदेकोऽवयवः स्वभिन्नान्यवयवानि ममेत्यभिमन्यते, तदा को वा अवयवः, किं वा अवयवान्तरमभिमन्यत इत्यत्र किं नियामकम् ? हस्तादिषु नियतस्य कस्यचिदभिमन्तुरयमित्युपलम्भाभावात् मम हस्तो मुखं पादः शिरः उदरमिति सर्वस्याभिमन्तुर्भेदभानात्, स्वस्य स्वं प्रत्यभिमन्तृत्वायोगाच्च न तेष्वन्यतमः अभिमन्ता। किन्तु तदतिरिक्त एव।

अपि च तदतिरिक्तस्यावयविन एवायमभिमान इत्यपि न वक्तुं शक्यम्। अवयवातिरिक्तावयविनो निरस्तत्वात्। अतो हस्तादिष्वभिमन्तव्येषु सर्वेष्वबाधितैकप्रत्ययविषयोऽभिमन्ता तद्व्यतिरिक्तः कश्चिदहमर्थोऽवश्यमङ्गीकर्तव्यः।

अथ ममेति प्रतीतिः व्यतिरेकस्थल एव जायत इति नियमो नास्ति। ममात्मेति कुत्रचिदभेदेऽपि दृश्यते। अतस्तद्बलात् मम हस्तादिरित्यादौ शरीरादिभेद एव सिद्धयतीति नेत्याशङ्कायामभिधीयते। मम हस्तो मम शरीरमित्यादिप्रत्ययाः मम गृहं मम पशुरित्यादिवत् व्यक्तव्यतिरेकाः। ममात्मेति तु घटस्य स्वरूपमितिवत्। अत्र ममेत्युल्लेखेन शरीरादिविशिष्ट आत्मा; आत्मेति निष्कृष्टात्मस्वरूपम्; तयोर्विशिष्टकेवलयोरमुख्यो भेदोऽगत्या अङ्गीक्रियते। देहे आत्मसंसर्गरूपदोषात् अहमिति मतिः, लोहपिण्डे हुतवहबुद्धिवत् भेदाग्रहनिबन्धना।

इन्द्रियात्मवादनिरासः

घटादिप्रत्यक्षं रूपादिप्रत्यक्षं च चक्षुरादीन्द्रिये सति जायते, तदभावे न जायत इत्यन्वयव्यतिरेकाभ्यां चक्षुरादिवृत्तित्वमेव ज्ञानस्योचितम्। व्यवहारोऽपि चक्षुः पश्यति, स्पर्शनसुखो वायुः, श्रवणकटुश्शब्द इत्यादिरस्ति। इन्द्रियेषु च विकलेषु विकलोऽहमिति बुद्धिः जायते। परस्परमनुभूतार्थस्मरणमपि एकशरीरानुप्रवेशाधीनसंस्कारवैचित्र्यात् युज्यते। अत इन्द्रियाण्येवात्मेति।

अत्रोच्यते—घटादिज्ञानं प्रति चक्षुरादीनामिन्द्रियाणामन्वयव्यतिरेकानुविधानं तत्करणत्वेनाप्युपपद्यते। तथा च चक्षुषा घटं पश्यामीति संप्रतिपन्नो मुख्यो व्यवहारः,

चक्षुः पश्यतीति तु भाक्तः। अपि च चक्षुषा विकलोऽहमित्येव वैकल्यानुसन्धानम्, न तु चक्षुरहं नास्मीति, नष्टस्येन्द्रियस्य स्ववैकल्यानुसन्धानायोगात्। औदरकृम्यादीनामपि एकशरीरानुप्रवेशस्य समानत्वात् तेषामपि इतरानुभूतार्थप्रतिसन्धानापत्तेः न निरुक्त-संस्कारवैचित्र्यस्य हेतुत्वं युक्तम्। अपि च चक्षुरादीनां रूपादिप्रतिनियतविषयग्राहकत्वात् सर्वेषां प्रतिसन्धातृत्वेन योऽहं रूपादिद्रष्टा, स एव शब्दं शृणोमि इत्यादि-प्रत्यभिज्ञाविषयः इन्द्रियव्यतिरिक्त आत्मा अङ्गीकर्तव्यः। देहात्मवादे प्रत्येकसङ्घातादिविकल्पमभिप्रेत्य ये दोषा उक्तास्ते सर्वेऽत्र समाना इति विभावनीयम्।

मनस आत्मत्वनिरासः

ननु उक्तयुक्त्या देहेन्द्रियव्यतिरिक्ततया सिद्धयन्नात्मा मन एव स्यात्, तस्यैकत्वेन रूपादिसकलप्रतिसन्धानमुपपद्यते, निरवयवत्वेनासङ्घातरूपत्वात् प्रत्येकसमुदायादिविकल्पानवकाशात् न पूर्वोक्तदोषगन्धः। मम मन इति व्यतिरेकप्रत्ययस्तु राहोश्शिर इतिवदभेदेऽपि संभवति। मनोव्यतिरिक्तात्मकल्पने तु गौरवम्, अतोऽहमर्थो मन एवेति केचित्।

अत्रोच्यते—यद्यपि निरवयवत्वेनैकत्वेन च न पूर्वोक्तदोषावसरः, तथाऽपि रूपादिज्ञानकरणतया यथा चक्षुरादीन्द्रियसिद्धिस्तद्वन्मनसोऽपि घटादिस्मरणं करणसाध्यं क्रियात्वात् इत्यनुमानेन स्मृतिकरणतया सिद्धिः। आत्मा तु ज्ञानाश्रयत्वेन (ज्ञानक्रियाकर्तृत्वेन) प्रत्यक्षसिद्धः। करणस्य च कर्तृभिन्नतया सर्वत्रोपलम्भात् ज्ञानक्रियाकर्तृत्वरूपज्ञातृत्वं मनसो दुर्घटमेवेति न मन आत्मेति।

प्राणात्मवादनिरासः

केचित् "प्राणोऽस्मि प्रज्ञात्मा" इत्यात्मशब्दस्य प्राणे "प्राणोऽहृपिता" इति प्राणशब्दस्यात्मनि च प्रयोगः श्रुतौ दृश्यते। प्राणे सति जीवतीति असति च म्रियत इति व्यवहारश्च सर्वैः क्रियते। देहेन्द्रियमनसां प्रवृत्तिरपि प्राणाधीना। अतः प्राण एवात्मेति ब्रुवन्ति। तदप्ययुक्तम्। प्राणानां वायुसङ्घातत्वेन संप्रतिपन्नत्वात् शरीरं यथा (अवयव) सङ्घातत्वादचेतनं तथा प्राणा अपि न चेतयन्ते। प्राणोऽस्मीति प्राणशब्दः प्राणविशिष्टार्थकः। जीवतीत्यादिव्यवहारस्तु प्राणस्यात्मभिन्नत्वेऽपि संगच्छते। देहेन्द्रियमनसां प्रवृत्तिरपि प्राणविशिष्टात्माधीनैव। न तु प्राणमात्राधीना। मम प्राणा इति व्यतिरेकप्रत्ययेन तयोर्भेदश्च स्पष्टः।

ज्ञानात्मवादशङ्का, तन्निरासश्च

चार्वाकैकदेशिनस्तु ज्ञानशून्यदशायां भोगाभावेन ज्ञानसन्ततेरेव भोक्तृत्वं यस्य भोक्तृत्वं तस्यैवात्मत्वमितिव्याप्त्या ज्ञानस्यैवात्मत्वमिति प्रतिपादयन्ति। अथ भोक्तृत्वं

नामानुभवितृत्वविशेषः। स च ज्ञानाश्रयस्य ज्ञानमात्रस्य न सम्भवति। अतो ज्ञानाश्रयः कश्चिदात्मा ज्ञानव्यतिरिक्तः अवश्यमभ्युपगन्तव्य इति चेदुच्यते—अनुकूलप्रतिकूलविषयावगाहित्वमेव भोक्तृत्वम्, न त्वनुकूलप्रतिकूलविषयावगाहिज्ञानाश्रयत्वम्, गौरवात्। अतो धीसन्ततिरेवात्मेति।

बौद्धास्तु आलयविज्ञानं प्रवृत्तिविज्ञानं चेति काल्पनिकं ज्ञानभेदमङ्गीकृत्य आलयविज्ञाने ज्ञातृत्वमभ्युपयन्ति। तदेतन्मतद्वयं निरस्यते—

सर्वस्यापि वस्तुनो व्यवस्था ज्ञानाधीनैव। अहं जानामीति प्रत्यक्षे ज्ञानस्य क्रियात्मकस्य ज्ञातृरूपकर्तृधर्मतयैव भानात् ज्ञानं नात्मा। ज्ञानस्यानुकूलप्रतिकूलविषयकत्वमेव भोगः। तदाश्रयत्वं च ज्ञातुः। अत एव मम भोग इति प्रतीतिश्चोपपद्यते। सर्वं क्षणिकमिति वदतो बौद्धस्य ज्ञानस्यापि क्षणिकत्वात् तन्मते योऽहमद्राक्षं स एवाहं स्पृशामीति प्रत्यभिज्ञया आत्मनः प्रतिसन्धानानुपपत्तिः। अतो ज्ञानव्यतिरिक्तः नित्या ज्ञाता कश्चिदेष्टव्यः।

नित्यज्ञानेनात्मान्यथासिद्धिशङ्का; तन्निरासश्च

अथ ज्ञानस्य क्षणिकत्वे हि प्रतिसन्धानानुपपत्तिः, नित्यत्वे तु तदभावात्। यस्य मते आत्मवत् तद्धर्मभूतं ज्ञानमपि नित्यम्, तन्मत नित्येन धर्मभूतज्ञानेनैव प्रसरणभेदेन सर्वव्यवहारनिर्वाहे सति किमर्थं तदाश्रयभूतात्मकल्पनमिति चेदभिधीयते—यदि वयं प्रतिसन्धानानुपपत्त्या धर्मभूतज्ञानं तदाश्रयमात्मानं च साधयामः, तदा चोद्यस्यास्यावसरः। अस्माभिस्तु यथाश्रुति पदार्थः स्वीक्रियते, "न हि विज्ञातुर्विज्ञातेर्विपरिलोपा विद्यते" इति श्रुतौ विज्ञातुर्विज्ञातेरित्यनेन आत्मनः ज्ञानाश्रयत्वं षष्ठ्या च ज्ञानज्ञात्रा-र्व्यतिरेकः विपरिलोपो न विद्यत इत्यनेन धर्मभूतज्ञानस्य नित्यत्वं च प्रत्यपादि। 'अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा' इत्यात्मनो नित्यत्वं चोपपादि। अतः यथाप्रमाणं ज्ञानं तदाश्रय आत्मा च नित्यतयाऽङ्गीक्रियत इति न श्रुतिसिद्धार्थे लाघव-गौरवविचारावसरः।

ननु श्रुतावपि विज्ञानात्मा पुरुष इति जीवस्य ज्ञानरूपत्वाभिधानात् आत्मनो ज्ञानातिरेकसिद्धिः कथमिति चेन्न। अत्र अहमर्थं पुरुषमुद्दिश्य ज्ञानत्वं विधीयते—न तु ज्ञानमुद्दिश्यात्मत्वम्। अहं जानामीति प्रत्यक्षे अहमर्थस्य पुरुषस्य ज्ञानाश्रयतया धर्मभूतज्ञानभिन्नत्वेन च भानात् जानात्येवायं पुरुष इति श्रुतावपि कण्ठतः पुरुषस्य ज्ञानाश्रयत्वप्रतिपादनात्; धीः नात्मा तद्धर्मतया प्रतीयमानत्वादित्यनुमानेनापि आत्मभेदसाधनाच्च। इदं चात्मनि विधीयमानं ज्ञानत्वं धर्मभूतज्ञानमिव धर्मान्तरम्। ज्ञानत्वं नामार्थप्रकाशकत्वम्, तच्च धर्मधर्मिणोरुभयोः ज्ञानात्मनोरनुगतम्। तत्र धर्मिरूपं ज्ञानं प्रत्यक्त्वानुकूलत्वादिस्वासाधारणधर्मविशिष्टात्मप्रकाशकम्। धर्मभूतज्ञानं तु स्वप्रकाशकं सत् स्वान्यघटादिपदार्थस्यापि प्रकाशकमिति विवेकः। विज्ञानघन एव-

त्यादिश्रुतौ एवकारेण आत्मनो ज्ञातृत्वादिनिषेधात् कथं ज्ञातृज्ञानोभयरूपत्वं तस्येति न शङ्क्यम्। एवकारेण किञ्चिदंशेऽपि ज्ञातुरात्मनः ज्ञानत्वायोगरूपं जडत्वं नास्तीति बोध्यते। तेन न ज्ञातृत्वनिषेधरूपान्ययोगव्यवच्छेदकत्वम्, किन्त्वयोगव्यवच्छेदकत्वमेवेति पर्यवस्यति। एवं च सति ज्ञातृत्वमभ्युपगम्य जडत्वं मन्यमानानां नैयायिकादीनां मतव्यावृत्तिरस्य प्रयोजनमिति सिद्धम्। एतावता देहेन्द्रियमनःप्राणधीभ्योऽन्यः आत्मेति निरूपितः।

जीवब्रह्मभेदः

अथ जीवानां मिथो भेदः; ब्रह्मणो जीवभेदश्च निरूप्यते। तत्र केचित् "अयमात्मा ब्रह्म, तत्त्वमसि" इत्यादिश्रुत्या जीवब्रह्मतादात्म्यप्रतिपादनात् जीवस्तु परस्य ब्रह्मण औपाधिकांशः, घटाकाशमहाकाशवत्तयोर्भेदः, जीवानां मिथो भेदश्च घटाकाशकरकाकाशवत् इति। अन्ये तु सन्मात्रं ब्रह्म, तस्य अंशा जीवाः। एते च जीवाः पृथिव्यादिभूतपरमाणव इव स्वतः परस्परं भिन्नाः। यथा पृथिव्याद्यंशानां परमाणूनां प्रतिनियतरूपपरिमाणादिमत्वं तथा सद् ब्रह्मांशानां स्वतो भिन्नानां जीवानां प्रतिनियतानुभवजन्यस्मृत्यादिप्रतिसन्धानमुपपद्यते। अस्मिन्मते ब्रह्मणा सह जीवानां भेदः स्वाभाविकः, अभेदोऽपि स्वाभाविकः, अंशांशित्वेन भेदाभेदश्रुतीनां निर्वाह इति। अपरे तु अविद्यापहितं ब्रह्मैव जीवः, स च सर्वशरीरेष्वेक इति। अत्र "यद्यन्योऽस्ति", "एका हि देवः", 'पण्डितास्समदर्शिनः", "मित्रामित्रकथा कुतः" इत्यादयः प्रमाणमिति वदन्ति। तदेतन्मतत्रये यथाक्रममनुपपत्तिः प्रदर्श्यते—

जीवाः मिथः स्वाभाविकभेदवन्तः, धीस्मृतीच्छादीनां प्रतिनियतत्वात्। यथा घटत्वादिधर्माणां पटाद्यवृत्तित्वे सति नियमेन घटादिवृत्तित्वात् घटादीतरपदार्थव्यावर्तकत्वम्, तथैव तत्तदनुभवजन्यस्मृतेः तत्तन्मात्रवृत्तित्वनियमात् तदितरव्यावर्तकत्वम्। तथा चैकैकशरीरावच्छिन्नानां अनुभवस्मृत्यादीनामेकाश्रयतया प्रतिसन्धानवत् शरीरान्तरावच्छिन्नानामेकाश्रयतया प्रतिसन्धानविरहात् तत्तदनुभवजन्यस्मृत्यादयः तन्मात्रवृत्तय इति नियम उपपद्यते। अन्यथा भेदस्यौपाधिकत्वे अभेदस्य स्वाभाविकत्वेनात्मैक्ये सति सौभर्यादेरनेकशरीरावच्छिन्नभोगानामेकाश्रयत्वप्रतिसन्धानवत् चैत्रमैत्राद्यनुभवानामप्येकाश्रयत्वेनानुसन्धानं स्यात्, न चैवं प्रतिसन्दधाति कश्चित्, अतो भिन्ना एवात्मानः। अत्रायमनुमानप्रयोगश्च—चैत्रात्मा मैत्रतादात्म्यरहितः, मैत्रानुभवजन्यस्मृत्यनाधारत्वात् कदाचिदपि मैत्रगतसुखादिप्रतिसन्धानराहित्यादित्यादिः।

अथात्मन एकत्वेऽपि शरीरभेदेन मनोभेद अङ्गीक्रियते, अतश्च चैत्रमैत्रादिशरीरभेदेन सम्भूतानामनुभवादीनां तदन्यत्राप्रतिसन्धानमुपपद्यत इति चेन्न। स्वयमागतविज्ञाना इत्यादौ जातिस्मराणां केषाञ्चित् कल्पभेदेन मनोभेदसत्त्वेऽपि पूर्वानुभूतप्रति-

सन्धानदर्शनात् चेतोभेदस्य व्यवस्थापकत्वासम्भवात् । एवं शरीरबाह्येन्द्रियभेदात् यथा व्यवस्था न भवति, तथैव चेतोभेदादपि । अपि च ईश्वरात् मिथश्च जीवानां निरुपाधिकभेदः पृथगात्मानं प्रेरितारं च मत्वा "जुष्टं यदा पश्यत्यन्यमीशम्" इत्यादिश्रुतिसिद्धिः । निरुक्तश्रुतिषु औपाधिकभेद एव प्रतिपाद्यत इति न वक्तुं शक्यम्, तत्र प्रमाणाभावात् । 'अयमात्मा ब्रह्म' तत्त्वमसीत्यादौ तादात्म्यव्यपदेश एव तत्र मानमिति चेन्न । "आदित्यो यूपः" इत्यत्र यूपस्य यथाऽऽदित्याभेदः प्रत्यक्षविरुद्धः, तथा अज्ञत्वसर्वज्ञत्वयोः विरुद्धत्वेन तयोस्स्वरूपैक्यं न वक्तुं शक्यत इति तत्र शरीरशरीरिभावादिद्वारा सामानाधिकरण्यं समर्थनीयम् । अतश्च निरुपाधिकभेद एव श्रुत्या प्रतिपाद्यते ।

द्वितीयपक्षे भेद इव अभेदस्यापि स्वाभाविकत्वे निखिलजीवगतदोषजातमनवधिकं सद्रूपे ब्रह्मणि प्रसज्यत इति दोषो दुरुद्धरः । अतो भेद एव स्वाभाविकः । पूर्वोक्तरीत्या सामानाधिकरण्यनिर्वाहः ।

तृतीये यानि प्रमाणानि उदाहृत्य भेदोऽपारमार्थिकः, अविद्योपहितं ब्रह्मैव जीवः, स च सर्वशरीरेष्वेक इति यन्निरूपितं तत्रोच्यते—जीवैक्यं तावत् साजात्यमवलम्ब्योक्तम् । यथा कौसलो मथुरायां व्रीहिं दृष्ट्वा कौसलव्रीहिणा एक एवायं मथुरायां व्रीहिः, यः कौसले दृष्ट इति वदति । तत्र एक एवायमिति न स्वरूपैक्यं बोधयति, प्रत्यक्षबाधात्; किन्तु सादृश्यम् । तथा जीवेऽपि । ज्ञानानन्दत्वादिसजातीयधर्मवत्वात् पण्डितास्समदर्शिन इत्यत्र साजात्यमादाय साम्यं प्रतिपादितम्, न त्वैक्यमादाय । एकत्वे साम्यानुपपत्तेः । एको देवस्सर्वभूतेषु गूढ इति वचनं तु ईश्वरविषयकम् । मित्रामित्रकथा कुत इति ज्ञानिनो मित्रामित्राद्यभाववचनात् सर्वेषामैक्यं वाच्यम् । अन्यथा स्वव्यतिरिक्तवस्तुसत्त्वे तद्वचनमसंगतं स्यादिति यदुक्तम्, तन्न समीचीनम् । रागद्वेषादिपरिहारपरत्वादस्य वचनस्य । रागद्वेषप्रयुक्त एव हि मित्रामित्रभावः, ज्ञानिनां तु ज्ञानानन्दत्वाद्याकारेण समानत्वात् रागद्वेषाभावात् तत्प्रयुक्तमित्रामित्रकथैव नास्तीति भावः । अपि च निखिलं शरीरं (मयैवात्मवत्) मद्भिन्नात्मरहितं शरीरत्वात् मच्छरीरवत्, सर्वे जीवा (अहमेव) न मद्भिन्नाः पुरुषत्वात्, यथाऽहमित्याद्यनुमानं सर्वशरीरेष्वेक एव जीव इत्यर्थसाधकं यदुक्तम्, तदपि न साधु । नाहं देवदत्त इति प्रत्यक्षेण, नाहं देवदत्तः तदनुभूतप्रतिसन्धानाभावादित्यनुमानेन; नित्यो नित्यानामित्यादिजीवबहुत्वप्रतिपादकश्रुत्या च बाधितत्वात् । किञ्च देशान्तराप्यपि एतद्घटेनैव घटवन्ति देशत्वादेतद्देशवत्, अन्येऽपि घटा एतद्घटात्मान घटत्वात् एतद्घटवदित्यादिप्रतिबन्धकानुमानमपि प्रयोक्तुं शक्यम् । यदि निरुक्तघटविषयकानुमानस्य प्रत्यक्षविरुद्धत्वं मन्यसे, तर्हि सर्वशरीरेषु

जीवैक्यानुमानस्यापि पूर्वोक्तप्रत्यक्षादिप्रमाणविरोधः तुल्य एव। अतो न जीवैक्यं ब्रह्मणो मिथश्च वक्तुं शक्यमिति भावः।

आत्मनो नित्यत्वम्

आत्मानित्यत्ववादिनः चत्वारः। तेषु बौद्धाः ज्ञानात्मवादिनः सर्वस्यापि पदार्थस्य क्षणिकत्वादेकस्मिन्नपि शरीरे आत्मनानात्वं वदन्ति। प्राणेन्द्रियात्मवादिनः आशरीरस्थायी आत्मेति। पौराणिकैकदेशिनः प्रलयान्तमात्मा वर्तते, तदनु विनश्यतीति। औपनिषदाभासास्तु मोक्षावधिरात्माऽवतिष्ठत इति।

तत्र प्रथमपक्षे आत्मनः क्षणिकत्वे भाविदृष्टफलमुद्दिश्यापि न कश्चित्प्रवर्तेत, फलकाले स्वस्यैवाभावादित्युनुपपत्तिः। द्वितीये ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिविधिविहितयागदानादिवैदिककर्मसु कोऽपि न प्रवर्तेत। एतच्छरीरगतप्राणेन्द्रियादिनाशानन्तरमेव तत्फलावाप्तेः। तृतीये सर्वदुःखनिवृत्तिसहित आत्मनाश एव यदि मोक्षः, तर्हि तादृशस्यात्मनाशस्य प्रलयान्ते स्वयमेवावश्यंभावितया मोक्षार्थं तदुपाये कोऽपि न प्रवर्तेत। तदर्थं श्रुतावुपायोपदेशश्च व्यर्थस्स्यात्। आत्मनाशस्यानिष्टत्वेनापुरुषार्थत्वात् तदुपायं न कश्चिदपि शृणुयादित्यादिदोषः। चतुर्थे तोयेन जीवान् व्यससर्जेति जीवानां सृष्टिः, "पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि" इति लयश्च श्रूयते। एवं "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति" इति वेदवाक्यादपि उत्पत्तिलयौ प्रतिपाद्येते। अतो ब्रह्म एकमेव नित्यम्, तद्भिन्नमखिलं तत एव जनिमत्, तत्रैव विनाशि चेति श्रुतिर्वदतीति स्वनाशरूपमोक्षस्सिद्ध्यतीति।

अत्राभिधीयते–'नित्यो नित्यानाम्', 'अजो नित्यः शाश्वतोऽयं पुराणः', 'न हन्यते हन्यमानेशरीरे','न जायते म्रियते वा' इत्यादिश्रुतिशतेन जीवनित्यत्वमभिहितम्, अतस्तदनुरोधेन क्वचित् सृष्टिलयवादाभ्यां ब्राह्मणो जातः, क्षत्रियो जातः, ब्राह्मणो मृतः, क्षत्रियो मृत इत्यादौ यथा देहसम्बन्धः, तद्विच्छेदद्वारा तदुत्पत्तिविनाशव्यवहारस्तथैव (प्राकृतनैमित्तिकसृष्ट्यादावपि) अचित्संश्लेष-विश्लेषरूपोत्पत्तिविनाशावुच्येते। तोयेनेति, भूतेभ्यस्समुत्थायेति च भूतसूक्ष्मसाहित्योत्थित्योः प्रतिपादनात्, तथात्वावधारणं सुशकमिति भावः। "विज्ञानघन एवैतेभ्यो भूतेभ्यः··· ··· ···· ····· अनुविनश्यति" इत्यत्र विनाशपदं 'णश अदर्शने' इति धातोरदर्शनपरम्, न तु ध्वंसपरम्; 'अविनाशीवारेऽयमात्मा' इति श्रुतेः।

अपि च 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते, स तत्र पर्येति जक्षत्क्रीडन्' इत्यादिना परं ज्योतिरुपसम्पन्नस्य भोगविशेषश्चाभिधीयते। स च आत्मनाशाभ्युपगमे नोपपद्येत। अतो नात्माऽनित्यः।

आत्मपरिमाणविचारः

यो यद्भोगायतनवर्ती, स तत्समपरिमाण इति व्याप्त्या आत्मा देहानुरूपस्थूलत्वाणत्वादिरूपविविधपरिणतिमान्, तथा च अस्मिन् देहेऽहं वर्ते, पादे मे वेदना, शिरसि मे सुखमित्यादिप्रतीतिश्च संगच्छत इति जैना आत्मनो तत्तद्देहानुरूपपरिमाणवत्वं वदन्ति, तन्न युक्तम्, भोगायतनं शरीरवत् गृहादिकमपि, तद्वर्तिनः पुरुषस्य गृहादिसमपरिमाणत्वं नास्ति इति सर्वेषां प्रत्यक्षसिद्धम्; अतो यो यद्भोगायतनवर्ती स तत्समपरिमाण इति नियमस्य व्यभिचरितत्वात् न तया व्याप्त्या देहपरिमाणवत्वं वक्तुं शक्यम्।

किञ्च मध्यम(देहादि)परिमाणवत्त्वे घटादिवदनित्यत्वापत्तिः, सौभर्यादिवत् नानादेहस्य योगिनो देहभेदेनात्मभेदश्च स्यात्। भवन्मते मुक्तावात्मनो देहपरित्यागाङ्गीकारात् देहप्रयुक्तपरिमाणस्याप्यभावः प्रसज्यते, परिमाणाभावे (पर्यायवत्त्वं) च अवस्थावत्वरूपं द्रव्यत्वमेव न स्यात्, अपरिमितस्यापि द्रव्यत्वे विभुत्वमेव स्यात्, मुक्तो विभुरेव भवतु को दोष इति चेत्, पृथिव्या नित्यपतनवत् मुक्तस्य नित्योर्ध्वगमनं भवद्भिरुच्यते, तच्चापरिमितस्य विभोः न सिद्धयेत्। अतो मुक्तावशरीरस्य शरीरसमपरिमाणाभावेनान्यादृशस्य कस्यचित्परिमाणस्यावश्यंभावे तदेव परिमाणमात्मनः स्वाभाविकम्; आत्मनस्तत्परिमाणस्य चोभयोर्नित्यत्वात्। तच्च परिमाणं श्रुतिसिद्धमणुपरिमाणमेव।

नैयायिकास्तु—पादे मे वेदना, शिरसि मे सुखमित्यादिप्रतीतेः काश्यां काञ्च्यां वाऽन्यत्र सर्वत्र सुखदुःखाद्युपलम्भाच्चात्मनः विभुत्वमङ्गीकर्तव्यम्। अणुत्वे च तत्तत्प्रदेशावच्छेदेन शरीरस्यात्मनश्चोभयोरपि गतिः कल्पनीया। विभुत्वे तु देहगतिमात्रस्य कल्पनमिति लाघवम्। नन्वेकस्मिन्देहे जीवे तिष्ठति देशान्तरेषु बहुषु क्षेत्रवित्तसमृद्ध्यादिरूपमेतदीयं कार्यमेतददृष्टबलात् भवतीतीष्टम्। आत्मनिष्ठस्यादृष्टस्य कथं देशान्तरे सम्बन्ध इति चेत्, देशान्तरीयवस्तुनस्साक्षाददृष्टाश्रयत्वाभावेऽपि स्वाश्रयात्मसंयुक्तत्वसम्बन्धेन सम्बन्धित्वात्। गुरुत्वं यथा स्वाश्रय इव स्वाश्रयसंयुक्तेऽपि क्रियां जनयति, तद्वददृष्टमपि, पित्रादिकृतसुकृतेनापि पुत्रादेश्शुभक्रियाजननात्। अदृष्टस्य समवायसमवायिसंयोगान्यतरसम्बन्धेन क्रियां प्रति कारणत्वं कल्पनीयमिति स्वाश्रयान्तरसंयोगाय विभुत्वं स्वीक्रियते। तथा च धर्माधर्मौ स्वाश्रयसंयुक्त एवाश्रयान्तरे क्रियां जनयतः, क्रियाहेतुगुणत्वात्; गुरुत्ववदित्यनुमानमप्यस्मिन्नर्थे प्रमाणम्।

अथ विभोः जीवस्य सर्वैश्शरीरैस्सह सम्बन्धादेकस्य यदा सुखोपलब्धिः, तस्यैव सुखस्य तदैवान्यस्याप्युपलब्धिप्रसङ्ग इति चेन्न। यच्छरीरं यददृष्टोपार्जितम्, तत्तस्य

भोगायतनमिति व्याप्त्या सर्वेषां सर्वशरीरसम्बन्धे सत्यपि न सर्वत्रैकभोगप्रसक्तिः। अपि च सौभर्यादिषु एकस्य जीवस्यानेकशरीराधिष्ठातृत्वं चाणुत्वे नोपपद्यते। नित्यस्सर्वगत इति श्रुतौ सर्वगतत्वोक्त्या च विभुर्जीव इति।

अत्रोच्यते—"तेन प्रद्योतेनैष आत्मा निष्क्रामति.....शरीरदेशेभ्यः", "ये वै केचनास्माल्लोकात्प्रयन्ति, चन्द्रमसमेव ते सर्वे गच्छन्ति", "तस्माल्लोकात् पुनरेति" इत्यादिश्रुतौ प्रतिपादिता उत्क्रान्तिगत्यागतयो विभुत्वे नोपपद्यन्ते। "एषोऽणुरात्मा", "वालाग्रशतभागस्य", "आराग्रमात्रः" इत्याद्याः अणुत्वप्रतिपादिकाश्च बहवः श्रुतयः। देहगत्यैवोपपत्तौ आत्मनो गतिकल्पनं गौरवग्रस्तमिति यदभिहितम्, तन्न युक्तम्। यदि वयमनुमानेन प्रकारान्तरेण वा गतिं कल्पयामस्तदा गौरवचोद्यस्यावसरः। यथाश्रुति पदार्थाङ्गीकारे च कल्पनाया अनवकाशात् नायं दोषः। श्रुतौ च जीवस्याणुत्वं गत्यगती च स्पष्टमभिहिताः। अतो न विभुरात्मा। किञ्च धर्माधर्मौ स्वाश्रयसंयुक्त एवाश्रयान्तरे क्रियां जनयतः क्रियाहेतुगुणत्वादिति यदनुमानम्, तत्र सिद्धसाधनमुच्यते—स्वकर्मजन्यौ धर्माधर्मौ न ईश्वरीयप्रीतिकोपाद्भिन्नौ। ईश्वरप्रीतिकोपौ स्वाश्रयभगवत्संयुक्तत्वसम्बन्धेन देशान्तरीयवस्तुष्वपि वर्तेते। तद्वशात्तत्र तत्र सुखदुःखोपलब्धिश्च जीवस्य सम्भवति। नित्यस्सर्वगत इत्यादिश्रुतिः "अग्निर्यथैको भुवनं प्रविष्टः", "वायुस्सर्वत्रगो महान्" इत्यादिवत् अतिसूक्ष्मतया सर्वत्र प्रवेष्टुं योग्य इत्यर्थपरा। आत्मनोऽणुत्वेऽपि सौभर्यादिषु युगपदनेकशरीराधिष्ठानं स्वधर्मभूतज्ञानव्याप्त्या उपपद्यते। एकशरीरावयवेषु बहुष्वपि शिरःकरपादादिषु ज्ञानव्याप्त्यैव युगपत्प्रेरणानिर्वाहः। तथा चायमत्र संग्रहः—अणुश्चेतनो जीवः। अहमिति प्रतीतिसिद्धः, स्वयंप्रकाशः, नित्यो, नाना च। तस्य स्वयंप्रकाशत्वात् ज्ञातृत्वव्यपदेशोऽपि। सौभरिप्रभृतीनां शरीरेषु एकमेव शरीरं जीववत्, अन्यानि तु धर्मभूतज्ञानव्याप्ततया सुखाद्युपलब्धिसाधनानि भवन्ति। धर्मभूतज्ञानस्य शास्त्रप्रमाणेन कर्मकृतसंकोचाभ्युगमात् बद्धदशायां संकुचितत्वम्, मुक्तदशायां तु कर्माभावात् विकसितत्वात् सर्वविषयकत्वम्। जीवस्य नित्यत्वेऽपि देहसम्बन्धोत्पत्तिविनाशप्रयुक्त उत्पन्नो जीवः; नष्टो जीव इत्यादिव्यवहारः। स च जीवः त्रिविधः बद्धमुक्तनित्यभेदात्। तत्र बद्धास्संसारिणः कर्मपरवशाः ब्रह्मादिस्तम्बपर्यन्ताः। मुक्ताः कञ्चित्कालं संसारिणो भूत्वा भक्तिप्रपत्तिभ्यां निवृत्तसंसाराः। नित्याः कदाचिदप्यसंसारिणः भगवदनुभवतत्कैङ्कर्यपरा अनन्तगरुडादय इति।

मोक्षस्वरूपं तदुपायादिकं चाग्रिमखण्डे यथाऽवसरं प्रतिपादयिष्यते।

ग्रन्थकर्तृकालदेशादि

मूलग्रन्थकर्तुः श्रीमद्वेङ्कटनाथदेशिकस्य जनककूटस्थाः विश्रुतविभवाः काञ्चीनगरमधिवसन्तो विश्वामित्रगोत्राः अनन्तसोमयाजिनः। तेषां तनूजाः पुण्रीकाक्षयज्वानः। तत्पुत्रोऽनन्तसूरिः। अनन्तसूरिश्च वेङ्कटनाथजनकः। वेङ्कटनाथस्य माता तोतारम्बेत्याख्या। तदाह—

पिता यस्यानन्तसूरिः पुण्डरीकाक्षयज्वनः।
पौत्रो यस्तनयस्तोतारम्बायास्तस्य मङ्गलम् ॥ इति।

एतेषां जननकालः कल्यब्दे ४३६९ (A.D. 1268) विभवनामवत्सरे श्रवणनक्षत्रयुक्ता भाद्रपदशुक्लदशमीति प्रसिद्धः। एते भगवतः श्रीवेङ्कटेश्वरस्य प्रसादात् तदीयावभृथोत्सवदिने तद्घण्टावतारत्वेनावतीर्णा इति कृत्वा वेङ्कटनाथ इत्येव नामकरणं तत्पिताऽकरोत्।

वेङ्कटनाथोऽयं यथाकालं स्वजनकेनानन्तसूरिणोपनीतः स्वमातुलादात्रेयरामानुजाचार्यात् वयसो विंशतिवर्षेभ्यः प्रागेव साङ्गवेदम्, काव्यनाटकालङ्कारान्, पद-वाक्य-प्रमाणानि, उभयवेदान्तं चाधिजगे। तथा चोक्तम्—

रामानुजार्यादात्रेयान्मातुलात् सकलाः कलाः।
अवाप विंशत्यब्दे यस्तस्मै प्राज्ञाय मङ्गलम् ॥ इति।

एतेषां जननविषये किञ्चिद्वैशिष्ट्यमैतिह्यविदो महान्तो वदन्ति—भगवान् वेङ्कटेश्वर एकस्यां रात्रौ अनन्तसूरेः स्वप्ने आविर्भूय स्वधर्मपत्न्या तोतारम्बया सह स्वसेवनार्थं वेङ्कटाद्रिमागन्तुमन्वशिषत्। तौ दम्पती प्रातरेव काञ्चीतः प्रस्थायाचिरादेव वेङ्कटाद्रिमासाद्य भगवन्तं श्रीनिवासमासेव्य तत्रैव दिनमेकं क्षेत्रवासमकुरुताम्। तदा श्रीवेङ्कटेशस्तयोः स्वप्ने आविर्भूय स्वीयां मणिमयीं दिव्यघण्टां तोतारम्बाया हस्ते प्रदाय 'घण्टेयं युवयोः पुत्रतामापत्स्यत' इत्यनुगृह्यान्तरधात्। अनन्तसूरेर्धर्मपत्नी च सद्य एव तां मणिमयीं घण्टां तेजोरूपेण स्वगर्भमाविशन्तीमद्राक्षीत्। तदनु प्रभाते एतौ दम्पती मुदितमानसौ काञ्चीमागत्य पुत्रजननकालं प्रतीक्षाञ्चक्राते। ततो द्वादशवर्षावसाने सर्वलक्षणसम्पन्नं पुत्ररत्नं सा सुषुवे चेति।

एवमेतेषां प्रतिभातिशयविषयेऽपि किञ्चिदैतिह्यं सप्रमाणं निरूपयन्ति। तच्चेत्थम्—

भगवद्रामानुजाचार्याणां श्रीभाष्यकाराणामन्तेवासिनः चतुस्सप्ततिसंख्याकास्तन्मतस्थापनधुरन्धरतया परिगणिताः। तेषु कुरुकाधीशापरनामधेयश्शठकोपसूरिरन्यतमः। तेषां प्रशिष्याः विष्णुचित्तगुरोश्शिष्याश्च वात्स्यवरदगुरुः (नडादूरम्माल्) इति विख्याताः काञ्च्यां श्रीभाष्यप्रवचनादिकं कुर्वन्त आसन्। तदानीमेते षड्वर्षीया वेङ्कटनाथदेशिकाः स्वमातुलैरात्रेयरामानुजाचार्यैस्सह श्रीभाष्यगोष्ठीं सेवितुं तत्र गताः। तदा तद्गोष्ठीस्था विद्वांस आजानसिद्धदिव्यब्रह्मवर्चससंयुतं बालकमेनं दृष्ट्वा तदीयावतारवैभवातिशयं परस्परं श्रावयन्तस्सर्व एव श्रीभाष्यव्याख्यानविच्छेदप्रकरणं

तदा विसस्मेरुः। तस्यामवस्थायां बालकस्सन्नपि वेङ्कटनाथोऽयं विच्छिन्नं तत्प्रकरणं तेभ्यः स्मारयामास। तेन चाचार्या विस्मयाविष्टचेतसो वरदगुरव एतस्य मेधाविशेषं प्रशस्य 'वत्स ! —

'प्रतिष्ठापितवेदान्तः प्रतिक्षिप्तबहिर्मतः।
भूयास्त्वैविद्यमान्यस्त्वं भूरिकल्याणभाजनम्' ॥

इत्यन्वगृह्णन्। तदेतन्निखिलं ग्रन्थकृता सूचितम्—

नानासिद्धान्तनीतिश्रमविमलधियोऽनन्तसूरेस्तनूजः
वैश्वामित्रस्य पौत्रो विततमखविधेः पुण्डरीकाक्षसूरेः।
श्रुत्वा **रामानुजार्यात्** सदसदपि ततस्तत्त्वमुक्ताकलापं
व्यतानीत् वरदगुरुकृपालम्भितोद्दामभूमा ॥ इति।

एते वेङ्कटनाथार्याः स्वमातुलादधीतसकलविद्याः मातुलकालानन्तरं तत्रैव काञ्चीक्षेत्रे ग्रन्थप्रवचनपरास्सन्तो न्याय–व्याकरण–मीमांसादीनि सामान्यशास्त्राणि, श्रीभाष्यादिकं शारीरकं च शिष्यगणानध्यापयामासुः।

अपि च नैकशास्त्रेषु बहवो ग्रन्था विनिर्मिताः। ते च यथा—

मीमांसापादुका–सेश्वरमीसांसा चेति पूर्वमीमांसायाम्।

वेदान्ते

१. तत्त्वमुक्ताकलापः
२. सर्वार्थसिद्धिः (तत्त्वमुक्ताकलापव्याख्या)
३. शतदूषणी
४. तत्त्वटीका
५. न्यायपरिशुद्धिः
६. न्यायसिद्धाञ्जनम्
७. परमतभङ्गः
८. अधिकरणसारावलिः
९. अधिकरणदर्पणः
१०. चकारसमर्थनम्
११. ईशावास्योपनिषद्भाष्यम्
१२. गीतार्थसंग्रहरक्षा
१३. तात्पर्यचन्द्रिका, इत्याद्याः।

धर्मशास्त्रे

१. यज्ञोपवीतप्रतिष्ठा
२. आराधनक्रमः
३. सच्चरित्ररक्षा
४. श्रीपाञ्चरात्ररक्षा
५. निक्षेपरक्षा
६. वैश्वदेवकारिका, इत्याद्याः।

वैद्यकशास्त्रे

१. रसभौमामृतम्
२. वृक्षभौमामृतम्

शिल्पशास्त्रे

१. शिल्पार्थसारः

ज्योतिषशास्त्रे

१. भूगोलनिर्णयः

काव्ये

१. यादवाभ्युदयः
२. हंससंदेशः
३. सुभाषितनीवी
४. पादुकासहस्रम्

नाटके

१. संकल्पसूर्योदयः

स्तोत्रे

१. हयग्रीवस्तोत्रम्
२. दयाशतकम्
३. वरदराजपञ्चाशत्
४. अच्युतशतकम्
५. देवनायकपञ्चाशत्
६. अभीतिस्तवः
७. गरुडपञ्चाशत्
८. श्रीस्तुतिः
९. भूस्तुतिः
१०. रघुवीरगद्यम्
११. गोदास्तुतिः, इत्याद्याः।

संस्कृत-द्राविडमणिप्रवालमयाः—रहस्यत्रयसारः, संप्रदायपरिशुद्धिः, तत्त्वपदवी, रहस्यपदवी इत्याद्याः द्वात्रिंशत् रहस्यग्रन्थाः।

अनुवादग्रन्थाः—

द्रमिडोपनिषत्सारः, तात्पर्यरत्नावली इत्याद्याः दिव्यप्रबन्धविवरणपराः संस्कृतभाषानुवादरूपाः। इताऽन्येऽपि बहव एतद्विरचिताः। तेष्वपि केचन नोपलभ्यन्ते।

कदाचित् केचिन्मतान्तरस्थाः पण्डिताः श्रीरङ्गक्षेत्रमागत्य रामानुजसिद्धान्तप्रवर्तनपरान् सुदर्शनसूरिप्रभृतीन् विद्वद्वरेण्यान् शास्त्रार्थविषये वादाहवाय आहूयास्मानविजित्य भगवतः श्रीरङ्गनाथस्य श्रोपाञ्चरात्रोक्तागमप्रक्रियया नित्याराधनादिकं न कर्तव्यमित्युपप्लवं चक्रुः। श्रीसुदर्शनसूर्यादय अतीववार्धक्यवशात् चिरकालं वादाहवं सोढुमशक्नुवन्तो वेङ्कटनाथाय तां धुरं नियोजयामासुः। वेङ्कटनाथोऽपि तेषामादेशं शिरसा प्रतिगृह्य श्रीरङ्गमागत्य वादे प्रतिवादिनो निर्जित्य भगवदाराधनं यथापूर्वं निरवर्तयत्। तेन च भगवान् श्रीरङ्गनाथः अतीव प्रसन्नो भूत्वा 'वेदान्ताचार्यः' इ।त बिरुदमस्मै प्रदाय भागवतविद्वद्गाष्ठ्यामाचार्यं श्रीमद्वेङ्कटनाथं तन्नाम्ना ख्यापयामास। श्रीरङ्गनाथस्य महिषो श्रीरङ्गनायकीदेवी च तं वेङ्कटनाथं 'सर्वतन्त्रस्वतन्त्र' इति बिरुदेन बहुमन्यत स्म। तदनु साक्षणा विद्वांसा मिलत्वा तं वादकर्म ग्रन्थरूपेण विलिख्य तस्य 'शतदूषणी' इति नाम च चक्रुः। यतस्तत्र शतं दूषणानि प्रतिपादितानि, ततश्शतदूषणीति नाम्ना प्रसिद्धिमवाप।

अथ कदाचिदहीन्द्रपुरे भगवन्तं श्रीदेवनाथं संसेवमानो ग्रन्थप्रवचनपरश्चासीत् वेङ्कटनाथः। तत्र भूयोऽपि श्रीरङ्गे पूर्वं पराजिता वावदूकास्स्वेतरान् बाह्यानबाह्याँश्चामन्त्र्य तैर्मिलितास्सन्त आचार्यवर्यं वेङ्कटनाथं वादार्थमचोदयन्। तदानीं वादाह्वे तान् सर्वानपि प्रतिवादिनः प्रत्येकं जिगाय। तस्मिन् काले भगवान् श्रीदेवनाथोऽनेन नितरां प्रीतः "**कवितार्किक सिंह**" इति बिरुदेनाहूय वेङ्कटनाथं स्वकटाक्षपात्रमकरोत्। तमेव वादक्रमम् आनुपूर्वीक्रमेण विलिख्य **परमतभङ्ग** इति नाम्ना ग्रन्थमिमं विद्वांसो व्यवहरन्ति। अतस्तेषां मङ्गलाशासनकाले गुरुपरम्परानुसन्धानकाले च श्लोकानिमानद्यापि सर्वेऽनुसंदधति च यथाप्रकरणम्—

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥
सर्वतन्त्रस्वतन्त्राय सिंहाय कविवादिनाम्।
वेदान्ताचार्यवर्याय वेङ्कटेशाय मङ्गलम्॥
कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥ इति।

एते चाचार्यवरास्सदाचार्योपदिष्टेन गारुत्मतेन मन्त्रेण गरुत्मन्तमाराधयितुकामा अहीन्द्रपुरक्षेत्रे ओषधिगिरौ गरुडमन्त्रमनवरतं जपन्ति स्म। ततः प्रसन्नेन गरुत्मता हयग्रीवमन्त्र उपदिष्टः। स च मन्त्रोऽसकृदनुसंहितः। तदनु एकदा प्रसन्नो हयग्रीवोऽस्मै वेङ्कटनाथाय प्रतिवादिनिरसनसामर्थ्यम्, सर्वतन्त्रनिष्णातत्वम्, वादाह्वशूरत्वं चानुजग्राह। तत्प्रसादेन हयग्रीवः स्तोत्रादीन् बहून् ग्रन्थान् रचयामासु।

आचार्यस्य वैराग्यविशेषः; आत्मगुणाश्च

विजयनगरराजसदसि लब्धप्रतिष्ठेनैतेषां विषये नितरां सम्मान्यताबुद्धिमाबिभ्राणेनैतत्समकालिकेनानितरसाधारणं सम्मानं कारयितुं राजसकाशात् विशिष्टाह्वानपत्रप्रेषणपूर्वकमभ्यर्थिता अप्येते वेदान्तगुरवः ख्यातिलाभपूजासु आत्मना वैमुख्यम्, 'न राज्ञः प्रतिगृह्णीयात्' इति निषेधात् राजद्रव्यस्य चाग्राह्यतामाविश्चक्रुः। वैराग्यपञ्चकमिति यस्य राज्ञः प्रत्युत्तररूपं ग्रन्थरत्नमेतैर्व्यधायि। यत्रैतदर्थकश्लोका उपलभ्यन्ते।

अपि चैते सर्वातिशयितवैदुष्यपूर्णास्सन्तोऽपि मनागपि गर्व-मात्सर्यादिहेयगुणरहिताः। अथाष्टावात्मगुणाः—दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलम-

कार्पण्यमस्पृहेति। 'यस्यैते चत्वारिंशत्संस्कारा न चाष्टावात्मगुणाः, न स ब्रह्मणः सायुज्यं सालोक्यं च गच्छति' इति महर्षिगौतमोपदिष्टात्मगुणपरिपूर्णाः, सर्वेषामादर्शपुरुषाश्चाभूवन्।

वस्तुतस्तु ज्ञानानुष्ठानवैराग्यशेवधीनामेतेषामाचार्यसार्वभौमानां तपस्विनां जीवनचरित्रादिवैभवमधिकृत्य बहुभिर्विद्वद्भिः प्रतिविषयं तदीयग्रन्थप्रमाणोदाहरणपूर्वकं नानाभाषासु नैके प्रबन्धाः प्रणीताः। तावद्भिरपि न निःशेषेण प्रतिपादिता इव। तादृशां महतां महनीयगुणानां कथनेन अस्माकं जन्मसाफल्यं स्मृत्वा, संभाष्य पुण्यकृतो मनसा ध्यायेत् इति वचनार्थं मनसि निधाय तेषां ज्ञान-वैराग्यादिगुणविशेषानधिकृत्य दिङ्मात्रेण केचनैव विषया अत्र लिखिताः। इतोऽन्यस्मात् ग्रन्थविस्तरभिया विरम्यते।

व्याख्यातुरानन्ददायिनीप्रणेतुः परिचयः

आनन्ददायिनीरचयितारः कदा कं देशमलञ्चक्रुरित्यादिविषये तदीयमङ्गलश्लोकान्तर्गतकतिपयपद्यैरित्थमवगम्यते—

इमे नृसिंहदेव इति सुगृहीतनामानः श्रीवत्सगोत्राः नरसिंहसूरेः पुत्राः। तोतारम्बेत्येतेषां मातृनाम। देवराज इति पितामहः, श्रीभाष्यश्रीनिवास इति मातामहश्च। तदेतत्—

श्रीवत्सगोत्राम्बुधिमध्यदेशात्
बभूव चन्द्रो नरसिंहनामा।
तस्यात्मजः साधु जनैकसेवी
नृसिंहदेवः प्रथितो धरायाम्॥
तोतारम्बातनयः पौत्रः श्रीदेवराजस्य।
दौहित्रः कुशिककुलश्रीभाष्यश्रीनिवासस्य॥

इति पद्यद्वयेन स्पष्टमभिहितम्। एतेषां सामान्यशास्त्रगुरुः अप्पलाचार्य इति प्रतीयते। पञ्चमपद्ये—'कुशककुलजलधिचन्द्रो निगमान्तगुरुः श्रीनिवासो नः" इति कौशिकश्रीनिवासस्य वेदान्तगुरुत्वाभिधानात्; षष्ठपद्योत्तरार्धे—'अप्पलाचार्यवर्यं तं भजे विद्यागुरुं मम' इति पाठान्तरोपलम्भाच्च।

अथ यो वेदान्तगुरुः श्रीनिवासः, स एव मातामहश्रीभाष्यश्रीनिवासः? उत भिन्न इति शङ्का समुदेति। तत्र मातामहनाम्नि श्रीभाष्येति उपपदस्याधिक्येन श्रवणात्

तयोर्भेदो न सिद्धयेत्, प्रत्युत उभयत्र कौशिकगोत्रत्वाभिधानेनैक्यमेव प्रतीयत इति चेत्, सत्यं श्रीभाष्येत्युपपदमात्रं न भेदप्रयोजकं मन्यते; किन्तु प्रतिपद्यं कुशिककुलेति श्रवणात् तस्य द्विबारमावृत्त्या भेद इष्यते, अन्यथा एकत्रैव कुशिककुलेत्यभिधानेन तस्य कौशिकगोत्रत्वं ख्यापितं स्यात्, तथा च द्विबारमावृत्तिरनुपपन्ना। अपि च यदि मातामह एव वेदान्तगुरुस्तदा तथैवावश्यं निरवेक्ष्येत, तथाऽभावात् भिन्न इत्येव प्रतिभाति।

अन्या च शङ्का प्रतिसरमन्ते कुशिककुल····· ····· ··· वेदान्ताचार्यस्य भागिनेयेन नृसिंहदेवेन विरचितायामानन्ददायिन्यां 'प्रथमसरस्समाप्तः' इति वाक्ये वेदान्ताचार्यस्य भागिनेयेनेत्युल्लेखात् कदाचित् तत्त्वमुक्ताकलापग्रन्थकर्ता आनन्ददायिनीरचयितुर्मातुलो वेति समुन्मिषति, सापि "दौहित्रः श्रीभाष्यश्रीनिवासस्य" इति तदीयस्पष्टवचसैवापाकृता। यदि तत्त्वमुक्ताकलापग्रन्थकृदस्य मातुलोऽभविष्यत्, तदा तदीयगिताऽनन्तसूरिरेव मातामहस्स्यात्; तथा चानन्तसूरेर्दौहित्रत्वेनैव आत्मानं कथयेत्। अतो भिन्ना एवेमे वेदान्ताचार्याः।

एतेषां नाम नृसिंहदेव इति, एतत्पितॄणामपि नाम नरसिंह इति, स्वाराध्यदेवस्यापि "मृगपतिनराकारघटितः····· ····· ····अमृतफलवल्लीसहचरः" इत्यनेन नरसिंहत्वकथनात् वंशपरम्परया सर्वोऽपि नरसिंहभक्तस्सन् काञ्चीमण्डलान्तर्गतचोलसिंहपुरवास्तव्यः स्यादित्यभ्यूहितुं शक्यते।

कालविषये एतेषां पितामहेन देवराजेन विम्बप्रकाशनाम्नि स्वकीयग्रन्थे न्यायामृतग्रन्थस्यानुवादकरणात् न्यायामृतग्रन्थकर्तुः व्यासतीर्थस्य कालः खैस्तषोडशशतक इति प्रसिद्धत्वात् ततोऽप्यर्वाचीनत्वं सामान्यतः प्रतीयते।

एतैः प्रणीता अन्ये च ग्रन्थाः—१–भेदधिक्कारन्यक्कारः, २–मणिसारधिक्कारः ३–सिद्धान्तनिर्णयः ४–परतत्त्वदीपिका इत्याद्याः।

एतेषां नृसिंहराज इति नामान्तरेणापि व्यवहारः। अत एवास्य व्याख्यानस्य नृसिंहराजीयमित्यपि नामान्तरं प्रथते। अस्यां व्याख्यायामिदमसाधारणं यत्—बौद्धादिमतस्यानुवादावसरे प्रतिपङ्क्ति हृदयङ्गमामवतारिकां प्रदाय तत्तन्मतप्रतिपाद्यार्थविशेषो निरूपित इति। तदेतत् स्वयमेव चादौ प्रतिज्ञातवान्

अप्रसिद्धस्य पक्षस्य विस्तरेण प्रकाशिकाम्।
सर्वार्थसिद्धि सट्टीकां करोम्यानन्ददायिनीम्॥ इति।

अक्षरार्थव्याख्याकारपरिचयः

अक्षरार्थव्याख्यातारः देशिकदर्शनधुरन्धर, रामानुजसिद्धान्तभास्करेत्यादि-बिरुदभूषिताः तिरुमलैचतुर्वेद-शतक्रतु-नावल्पाक्कं अय्या श्रीदेवनाथतातार्याः श्रीमन्नाथयामुनश्रीशैलपूर्णप्रमुखबहुतरवेदान्तस्थापकदिव्यसूर्यावतारचारुतरे सद्वंशे ज्ञानानुष्ठानवैराग्यशेवधीनां ति-च श-ना अय्या श्रीनरसिंहतातार्यस्वामिनां आत्मजत्वेन (A. D 1896) दुर्मुखिसंवत्सरे कटकमासे आर्द्रानक्षत्रे प्रादुरभूवन् । स्वपितृचरणैरेव बाल्ये वयसि यथाकालमुपनयनादिभिस्संस्कारिताः । वयसो विंशतिवर्ष एव साङ्गवेदं न्यायमीमांसादिसामान्यशास्त्रं, वेदान्तशास्त्रं चाधीत्य धर्मशास्त्रोक्तरीत्या पाञ्चकालिकवर्त्मना काञ्चीमण्डलान्तर्गतनावल्पाक्काग्रहारे भगवदाराधनैकवेषेण नित्यकर्मादिकमनुतिष्ठन्तश्चिरं विरेजिरे । त्रिंशद्वारं श्रावितवेदान्त इतिवदेतेऽपि अनेकबारं स्वान्तेवासिगणेभ्यः शारीरकशास्त्राध्यापनं भगवद्रामानुजाचार्येण नियमितकैङ्कर्येषु प्रथमकैङ्कर्यत्वेन परिगणितं श्रीभाष्यप्रवर्तनमकुर्वन् । एते च विभवनामसंवत्सरे तुलाकृष्णतृतीयां (२७-१०-८८) श्रीवैकुण्ठमलञ्चक्रुः । एतैश्च कदापि विना वेतनादिभृति यथाशास्त्रं बहुभ्यश्छात्रेभ्यो न्यायादिसामान्यशास्त्रं तथा वेदान्तशास्त्रं चोपदिष्टमित्ययं विषयो नितरां महनीयः । वस्तुत एतैराचार्यैरेकाकिभिः स्वगृह एव स्थित्वा विद्याविषये यन्महायोगदानं कृतं यादृशी साधना च व्यरचिता, सा विश्वविद्यालयेनापि न समपादि । तथा विद्यासंरक्षणायात्मत्यागोऽकारि । एतैराचार्यवर्यैः अनेके ग्रन्थाः प्रणीताः । ते यथा—१–वेदान्तवैजयन्ती, २–न्यायकुसुमाञ्जलिव्याख्या न्यायवासना, ३–तत्त्वमुक्ताकलापव्याख्या अक्षरार्थः, ४–सूत्रानुगुण्यसिद्धिविमर्श इत्यादयः । तेषामितिहासविषये इतोऽन्ये विशेषाः वेदान्तवैजयन्ती—न्यायकुसुमाञ्जलि—यज्ञोपवीततत्त्वविमर्शग्रन्थभूमिकायां जिज्ञासुभिरवगन्तव्याः ।

यद्यपि तत्त्वमुक्ताकलापस्य स्वोपज्ञसर्वार्थसिद्धिव्याख्या विद्यते । तत्र प्रासङ्गिकतया मतान्तरविषयविचाराः गम्भीरा बहवः कृताः । अतस्तस्याः गहनत्वाद्विस्तृतत्वाच्च मूलार्थो गवेषणीयो भवतोत्यक्लेशेन मूलार्थबोधाय सरलशैल्या व्याख्येयं व्यरचि ।

अक्षरार्थव्याख्यानस्था विशेषाः

तत्त्वमुक्ताकलापस्य (आद्य) मङ्गलश्लोके सर्वविद्यानां लक्ष्म्यधीनत्वेनादौ लक्ष्मीः सङ्कीर्त्यत इति सर्वार्थसिद्धौ व्याख्यातम् । एते आचार्याः तच्छैलीमनुसन्धाय अक्षरार्थे सर्वविद्याप्रवर्तकत्वात् लक्ष्म्याः यथा आदौ सङ्कीर्तनम्, तथैव हयवदनमूर्तेः वेदापहारिमधुकैटभसंहारेण पुनः ब्रह्मणो वेदोपदेशद्वारा सर्वविद्याप्रवर्तकत्वात् कैटभारेरिति पदस्य श्लोकान्ते सन्निवेशः कृतः । एवञ्च विद्याप्रवर्तकत्वसामान्यधर्मपुरस्कारेण

लक्ष्मीत्युपक्रम्य कैटभारेरित्युपसंहारात् लक्ष्मीहयवदनरूपभगवदवतारमूर्तिरत्रानुसन्धीयत इति प्रतीयते। लक्ष्मीहयवदनवपुषः शुद्धस्फटिकसङ्काशत्वेन प्रसिद्धत्वात् कालिमा कैटभारेरिति मूलोक्तं कथं घटत इत्याशङ्क्य जपासन्निधिना स्फटिके लौहित्यप्रतीतिवद् भगवद्विग्रहे लक्ष्म्या नित्ययोगात् तदीयनेत्रकान्तिसन्ततिसन्निधानात् कालिमाऽनुसन्धानमपि नानुपपन्नमिति प्रत्यपादयन्।

जीवसरे "कश्चिद्धीरः प्रत्यगात्मानमैक्षत्" इति श्रुतौ आत्मविशेषणतया प्रतीयमानं प्रत्यक्त्वं किं रूपमिति विचारे उदयनाचार्याः "प्रत्येतुः प्रत्येतव्यादव्यतिरेकः" इत्याहुः। प्रत्येतव्यः—ज्ञानविषयः तस्मात् प्रत्येतुः—ज्ञातुरव्यतिरेकः—अभेद इत्यर्थः। तन्मते आत्मनो जडत्वान्मानसप्रत्यक्षवेद्यत्वमेव। अर्थात् अहं जानामीति ज्ञाने आत्मनो विषयत्वेन कर्तृतया च भानात् ज्ञेयज्ञात्रोरभिन्नत्वात् स्वविषयकज्ञानाश्रयत्वमेव प्रत्यक्त्वमिति पर्यवस्यति। अस्मन्मते अहं जानामीत्यत्र घटाद्यवभास इव स्वावभासेऽपि प्रतिसम्बन्धितया अञ्चति भासत इति व्युत्पत्त्या "घटादिपरागर्थविलक्षणतया स्वेतरनिरपेक्षमेव स्वभानात् प्रतीपमञ्चतीति व्युत्पत्त्या वा स्वस्मै भासमानत्वरूपं स्वप्रकाशफलित्वं अन्यानधीनप्रकाशवत्वं वा प्रत्यक्-शब्दस्य प्रवृत्तिनिमित्तम्। तच्च अहमिति अहंत्वेनात्मनो भाने भासते। तथा च स्वस्मै भासमानत्वम्, स्वेनैव भासमानत्वमिति द्विविधं प्रत्यक्त्वम्।

अस्य प्रत्यक्त्वस्य प्रकाशविषये धर्मिभास्यं स्वयंप्रकाशमिति पक्षद्वयं वर्तते। स्वस्यैवात्मा तु सिद्धिमित्यत्र सर्वार्थसिद्धौ स्वासाधारणेन केनचित्स्वभावेन विशिष्ट इह स्वशब्दार्थ इति स्वपदस्य विशिष्टपरतया व्याख्यातत्वादात्मप्रकाशेनैव प्रत्यक्त्वं भासत इति प्रथमः पक्षः। शतदूषण्यां संविदनुत्पत्तिदूषणभङ्गवादे स्वमात्रप्रकाशस्याप्यहमर्थस्वरूपस्य अस्माभिः प्रत्यक्त्वानन्दत्वादिविशेषवत्तयैव स्वतःप्रकाशत्वाभ्युपगमेन" इत्यादिग्रन्थेन आत्मनः स्वमात्रप्रकाशमभ्युपगम्य प्रत्यक्त्वादिविशेषवत्तया प्रतीतेरुक्तत्वात् अहं जानामीत्यत्र स्वयंप्रकाशस्यापि धर्मभूतज्ञानस्य विशेषणतया भानवत् प्रत्यक्त्वस्याप्यात्मनि विशेषणतया स्वयंप्रकाशत्वमिति द्वितीयः पक्षः। पक्षद्वयस्यापि श्रीमद्वेङ्कटनाथाभिमतत्वादुपदर्शितप्रमाणबलेन मतद्वयमपि साध्विति न्यरूपयन्।

जीवसरे २८ तमे श्लोके नित्यसंसारिणस्सत्वे असत्वे च भगवति प्रसक्तं दोषमाशङ्क्य परिहारोऽभिहितः। सृष्ट्यादिः भगवतो लीलैव। तस्याप्तकामत्वात्। नित्यसंसारी कश्चिदपि नास्तीति पक्षे सर्वेषामात्मनां मोक्षे सति सृज्यस्यैवाभावात् सृष्ट्यादिहेतोरसत्यभावात् विश्वकर्ता भगवान् प्रतिहतसृष्ट्यादिलीलासंकल्पस्यादिति दोषः।

नित्यसंसारी वर्तत इति पक्षे भगवतो निरुपधिकदयावत्त्वेन प्रसिद्धस्य तदीय-दुःखानिवारणात् तद्विषयदयाहीनतया निरुपाधिकदयाहानिरिति दोषः।

प्रथमपक्षे परप्रतिरोधाल्लीलां सम्पादयितुमशक्ततया तदुपरतिस्स्यात्तदा प्रतिहत-दोषस्स्यादिति दोषः सम्भवेत्। भगवल्लीलायाः न परप्रतिबन्धादुपरतिः; किन्तु स्वेच्छ-यैव। तदीयप्रवृत्तिवन्निवृत्तेरप्यैच्छत्वात्। तथासत्यप्रतिहतसंकल्प एव स इति नेयमापत्तिः। द्वितीयपक्षे आसुरप्रकृतिषु तत्तज्जीवकर्मवशान्नित्यं दयावरोधः, तावता न निरुपाधिकदयाहानिप्रसङ्गः। तद्विषये कृपारूपेच्छायोग्यतायास्सत्वात् यथा वदान्ये कश्चिद्गर्वादिना न प्रतिगृह्णाति, समीपं वा नायाति, तावता वदान्यस्य का हानिः ? तथा यदि कश्चिद्दुष्कर्मवशात् भगवन्तं शरणं न व्रजेत्, तर्हि भगवतो निरुपाधिक-दयायाः कथं हानिः ? सत्सु दैवप्रकृतिषु सा दया सावकाशा।

अयं भावः—नित्यसंसारिविषये कृपायोग्यता वर्तते; परन्त्वेषः संसारी यदि भगवन्तं शरणं गच्छेत्तदा भगवतोऽपि एतद्विषये मोक्षयिष्यामीत्याकारिका इच्छारूपा कृपा जायते। यदैतस्य तच्छरणव्रज्यायां दुष्कर्म प्रतिबन्धकं भवति, तदा भगवतः एतद्विषये सत्यामपि योग्यतायां कृपा नोदेति। न तावता तस्य निरुपाधिकदयाहानि-प्रसङ्ग इति। अत्र (१) विरतिविहरणः, (२) विहृतविहरणः, (३) विरतविहरण इति त्रेधा पाठस्समुपलभ्यते। व्याख्यानान्तरे विहरणप्रवृत्तस्येश्वरस्येष्टा लीला विहन्येतेति शङ्का-स्वारस्यात् प्रथमपादे विरतविहरण इति प्राच्यः पाठः साधीयान्। तृतीयपादे तु विहरणविरतिरिति कृतकृत्यः स्वयमेव विहरणाद्विरमतीति समाधानौचित्यादिति दर्शितम्। यद्यप्यानन्ददायिन्यां विहृतं त्यक्तं विहारो यस्येति व्याख्यातत्वात् विहृत-विहरणस्तदभिमत इति प्रतीयते। तृतीयपादे विहरणविरतिरिति पाठे कस्यापि विवादो नास्ति; परन्तु शङ्कासमाधानयोस्समानविषयकत्वावश्यंभावात् तृतीयपादगतस्य समाधानरूपत्वात् तत्स्वारस्यात्तदनुरोधेनाक्षरार्थव्याख्यातृभिः यस्या एव दोषत्व-माशङ्कितम्, तस्या एव तत्परिहर्तव्यतया उत्तरार्धे विहरणविरतिर्नैव दोष इति कथनात् पूर्वार्धे विरतिविहरण इति प्राचीनपाठ एव साधीयान् इति सोपपत्ति न्यरूपि।

इत्थं जडद्रव्यसरे विंशतितमे श्लोके उपादानव्यतिरिक्तं कार्यद्रव्यं (अवयवा-तिरिक्तावयवी) सोपपत्ति निरस्यते। यदि कार्योपादानयोः (कपालघटयोः) भेदोऽ-ङ्गीक्रियेत, तर्हि तुलायां कपालद्वयनिक्षेपे सति यावदवनमनं भवति, तदपेक्षया एकघट-निक्षेपे उपादानातिरिक्तकार्यमेलनेन गौरवाधिक्यावश्यंभावेन अवनमनातिरेकस्स्यात्। नैवं कुतो दृश्यत इत्यापत्तिः दर्शिता। तदेतदर्थं कार्योपादानभेदे न कथमधिकतद्गौरवा-देस्स्वकार्य"मिति प्रथमपादः। अत्र मैसूरनगरमुद्रितकोशे "न कथमधिकता" इति पाठः प्रकाशितः। उत्तमूर अभिनवदेशिकवीरराघवप्राचार्यस्वामिप्रकाशिते अधिकतो गौरवा-

देरिति । अस्मद्गुरुचरणैस्तु स्वव्याख्यायां विशेषोपपत्तिप्रदर्शनपूर्वकं अधिकतद्गौरवा-देरिति पाठः समादृतः । इत्थं व्याख्याने केचन विशेषाः स्थालीपुलाकन्यायेन प्रदर्शिताः । इतोऽन्ये विशेषाः तत एवावधेया इति विद्वांसः प्रार्थ्यन्ते ।

तत्त्वमुक्ताकलापस्य विषयश्च सरद्वये ।
श्रीकृष्णतातयार्येण संग्रहेणोपपादितः ॥

सव्याख्यतत्त्वमुक्ताकलापप्रकाशनस्य मुख्यमुद्देश्यम्, मातृकादिसामग्री-विवरणं च

बहोः कालात्प्राक् मूलमात्रं ग्रन्थाक्षरैः मुद्रितम् । तदनु काञ्च्यामण्णङ्गराचार्येण सर्वार्थसिद्धिवृत्तिमात्रोपेतं मूलं प्राकाशि । अनन्तरं मैसूरनगरे सर्वार्थसिद्धि-व्याख्यामानन्ददायिनीं च संयुज्य मुद्रापितम् । परन्तु तत्र जीवसरे त्रिंशत्श्लोकपर्यन्त-मेवासीत् । बहूनां विदुषां तु आनन्ददायिन्यास्सम्पूर्णभागस्यावलोकने उत्कटेच्छा वरोवर्ति । अधुना तु समग्रस्यापि प्रकाशनं भवतीति सापि इच्छा पूरिता भविष्यति, अस्य प्रकाशनस्य प्राचीनप्रकाशनैरगतार्थता च । अपि चेतः पूर्वमप्रकाशिता अस्मद्गुरु-वर्यप्रणीता अक्षरार्थव्याख्या च मूलार्थमात्रमधिजिगांसूनां महते उपकाराय कल्पिष्यत इत्येतादृशविशिष्टप्रयोजनमुद्दिश्यैतत्प्रकाशनं चिकीर्षितमस्माभिः ।

चिरादस्य ग्रन्थस्य प्रकाशनेच्छा अस्मदाचार्याणामासीत्; परन्तु मुद्रणादिकार्ये भूयसोऽर्थव्ययस्यावर्जनीयतया तद्भरणे वयमशक्ता इति विचिन्त्य ते शिथिलितमन-सोऽभूवन् । कदाचिदस्माभिः ग्रन्थोऽयं विश्वविद्यालये रामानुजवेदान्ते आचार्यकक्षायां पाठ्यग्रन्थत्वेन निर्धारितः, अस्य च एतावत्पर्यन्तमप्रकाशितं व्याख्यानं अस्मदाचार्यवि-रचितं वर्तते । प्रौढस्यास्य ग्रन्थस्य सरलव्याख्यानसहितस्य मुद्रणं भवति चेत्, अध्येतॄणां छात्राणां विदुषां च महते उपकाराय भवेदिति सम्पूर्णानन्दसंस्कृतविश्वविद्यालयाधिका-रिभ्यः निवेदितम् । तदनु तत्रत्यैरधिकारिभिरेतत्प्रकाशनं सहर्षमनुमोदितम् । विषय-मिमं श्रुत्वा आचार्यवर्याः अमन्दानन्दभरितास्सन्तः मयि "आनन्ददायिनीमातृका ताल-पत्रमयी ग्रन्थाक्षरैर्लिखिता, स्वप्रणीताक्षरार्थनाम्नी मूलव्याख्या ग्रन्थाक्षरमयी स्वहस्तलिखिता चास्ति" इति मातृकाद्वयं प्रदाय एतत्प्रकाशनं विदधत्विति महत्या कृपया अस्मभ्यमन्वगृह्णन् । तदीयमातृकात एवाक्षरार्थस्य, आनन्ददायिन्याः जीवसरे द्वात्रिंशत् श्लोकादारभ्य तत्सरान्तभागस्य च मुद्रणोपयिकतया प्रतिलिपिः कृता । जीवसरे मैसूरनगरे मुद्रितपाठभेदाश्च कतिपयार्थविशेषप्रतिपादने उपयुक्ततमा भवन्तीति विचिन्त्य संयोजिताः । एवमेतेषां कोशानां साहाय्येन यथामति संशोध्य प्रकाश्यते ।

समर्पणम्

त्रयीविद्यामध्यात्मशास्त्रं न्यायादि-सामान्यशास्त्रं च कृपयाऽस्मभ्यमुपदिष्टवतां प्रातःस्मरणीयानां आपस्तम्बोक्तर्षिलक्षणसम्पन्नानां ज्ञानानुष्ठानवैराग्यशेवधीनां रामानुजसिद्धान्तभास्कर-देशिकदर्शनधुरन्धरेत्यादिबिरुदभूषितानां तिरुमलैचतुर्वेद-शतक्रतु-नावल्पाक्कं अय्या श्रीदेवनाथताताचार्यस्वामिपादानां चरणारविन्दयोः सर्वप्रथमं सहस्रशो वन्दनानि समर्प्यन्ते। इमे पूज्यपादा अस्य ग्रन्थस्य प्रकाशनाय स्वकीयनवतितमे वर्षेऽस्मानादिशन्ति स्म। सम्प्रति सत्यसङ्कल्पास्ते—

लौकिकानां च साधूनामर्थं वागनुधावति।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥

इति वचनमस्मान् स्मारयन्ति।

कृतज्ञतानिवेदनम्

बहुषु कार्येषु सत्स्वपि ग्रन्थमिममवलोक्य प्रस्तावनालेखनेनानुगृहीतवतां प्राच्यप्रतीच्यविद्यानिष्णातानां वेङ्कटनाथप्रणीतग्रन्थेषु मान्यताप्रतिपत्तिमाबिभ्रतां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिमहोदयानां पण्डितवर्याणां 'पद्मश्री' प्राचार्य-वि० वेङ्कटाचलमहाभागानां सविधे अनन्ताः प्रणामाः निवेद्यन्ते।

निवेदयामश्च सबहुमानमेतस्य सव्याख्यतत्त्वमुक्ताकलापस्य प्रकाशनावश्यकतां समितौ सम्यगुपपाद्यास्मान्नितरामनुगृहीतवद्भ्य एतद्ग्रन्थगौरवाभिज्ञेभ्यः न्यायवेदान्ता-द्यनेकशास्त्रनिष्णातेभ्यः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य दर्शनसंकायवेदान्त-विभागाध्यक्षवर्येभ्यः डॉ० देवस्वरूपमिश्रमहाभागेभ्यो विशेषतो नतिततीः।

एतस्य ग्रन्थरत्नस्य प्रकाशनार्थमनुमतिं प्रदाय सम्पादनकार्ये अस्माकमुत्साहं वर्धितवद्भ्यः प्रकाशनसमितिसदस्येभ्यः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्यानुसन्धान-संस्थाननिदेशक डॉ० वागीशशास्त्रिप्रभृतिभ्यश्च हार्दिकं कार्तज्ञ्यं प्रकटीकरोमि।

एतादृशोत्तमग्रन्थप्रकाशनकर्मणि बद्धदीक्षेभ्यः अस्य ग्रन्थस्य प्रकाशनार्थं प्रयासं स्वीकृत्य तदा तदा प्रूफसंशोधनादितत्तत्कर्मसु प्रतिपुरुषं यथार्हं त्वरापादनद्वारा सुचारु-रूपेण प्रकाशनकार्यमिदं निर्व्यूढवद्भ्यः पण्डितवर्येभ्यः सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयस्य प्रकाशनाधिकारिभ्यः डॉ० हरिश्चन्द्रमणित्रिपाठिमहाभागेभ्यः विशेषतो धन्यवादास्समर्प्यन्ते।

उपयुक्तानां शुद्धाशुद्धप्रमाणाकरादिसूचीनां निर्माणे उपकृतवतां न्यायशिरोमणि-डॉ० के० इ० गोविन्दाचार्याणां सविधे कृतज्ञो भवामि। मुद्रणविषये कदाचिदनिवार्यतया समुपनतेष्वपि कतिपयक्लेशेषु स्वयमनिर्विद्य निरवद्यमेव मुद्रणकार्यमतीवश्रद्धया च सुष्ठु विहितवद्भ्यः विजयप्रेस-अधिकारिभ्यः श्रीगिरीशचन्द्रमहाशयेभ्यो भगवान् सर्वेश्वरः मङ्गलानि अनुगृह्णात्वित्यर्थये।

यद्यत्रावधानतोऽनवधानतः प्रकारान्तरेण वा दोषाः संवृत्ताः, तान् क्षमन्तां गुणैकपक्षपातिनो विद्वांस इति प्रार्थये।

विद्वज्जनविधेयः

एन्० आर्० कण्णन्

(ना० रा० श्रीकृष्णतातार्यः)

न्यायमीमांसावेदान्तशिरोमणिः, विद्यावारिधिः

पुरी
१५-९-८९,

तत्त्वमुक्ताकलापे

जडद्रव्यसरः

लक्ष्मीनेत्रोत्पलश्रीसततपरिचयादेष संवर्धमानो
नाभीनालीकरि[ङ्ग]ङ्गन्मधुकरपटलीदत्तहस्तावलम्बः ।
अस्माकं संपदोधानविरलतुलसीदामसञ्जात भूमा
कालिन्दी कान्तिहारी कलयतु वपुषः कालिमा कैटभारेः ॥ १ ॥

नानासिद्धान्तनीतिश्रमविमलधियोऽनन्तसूरेस्तनूजो
वैश्वामित्रस्य पौत्रो विततमखविधेः पुण्डरीकाक्षसूरेः ।
श्रुत्वा रामानुजार्यात्सदसदपि ततस्तत्त्वमुक्ताकलापं
व्यातानीद्वेङ्कटेशो वरदगुरुकृपालम्भितोद्दामभूमा ॥ २ ॥

प्रज्ञासूच्याऽनुविद्धः क्षतिमनधिगतः कर्कशात्तर्कशाणा-
च्छुद्धो नानापरीक्षास्वशिथिलविहिते मानसूत्रे निबद्धः ।
आतन्वानः प्रकाशं बहुमुखमखिलत्रासवैधुर्यधुर्यो
धार्यो हेतुर्जयादेः स्वहृदि सहृदयैस्तत्त्वमुक्ताकलापः ॥ ३ ॥

शिष्टा जीवेशतत्त्वप्रमितियुतपरोपासनामुक्तिहेतुः
शक्यस्तत्तत्प्रकारावगतिविरहिभिर्नैव याथात्म्यबोधः ।
ते ते चार्था विदध्युः कुमतिविरचितास्तत्त्वबोधोपरोधं
तस्मान्निर्धूतसर्वप्रतिमतविमतिं साधये सर्वमर्थम् ॥ ४ ॥

आवापोद्वापतस्स्युः कतिकति कविधीचित्रवत्तत्तदर्थे-
ष्वानन्त्यादस्तिनास्त्योरनवधिकुहनायुक्तिकान्ताः कृतान्ताः ।
तत्त्वालोकस्तु लोप्तु प्रभवति सहसा निस्समस्तान्समस्तान्
पुस्त्वे तत्त्वेन दृष्टे पुनरपि न खलु प्राणिता स्थाणुतादिः ॥ ५ ॥

द्रव्याद्रव्यप्रभेदान्मितमुभयविधं तद्विदस्तत्त्वमाहु-
र्द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ ।
अन्त्यं प्रत्यक् पराक् च प्रथममुभयधा तत्र जीवेशभेदा-
न्नित्या भूतिर्मतिश्चेत्यपरमिह जडामादिमां केचिदाहुः ॥ ६ ॥

तत्र द्रव्यं दशावत्प्रकृतिरिह गुणैस्सत्त्वपूर्वैरुपेता
कालोऽब्दाद्याकृतिस्स्यादणुरवगतिमान् जीव ईशोऽन्य आत्मा ।
संप्रोक्ता नित्यभूतिस्त्रिगुणसमधिका सत्त्वयुक्ता तथैव
ज्ञातुर्ज्ञेयावभासो मतिरिति कथितं संग्रहाद् द्रव्यलक्ष्म ॥ ७ ॥

एकार्थप्रत्यभिज्ञा भवति दृढतरा दर्शनस्पर्शनाभ्यां
संघातादेरयोगादवगमयति सा वस्तुरूपादतोऽन्यत् ।
एकस्मिन् दूरतादेरविशदविशदप्रत्यभिज्ञादि तद्वत्
नैकत्वेऽप्यक्षभेदाद्भिदुरमिव मिथस्संश्रयादिप्रसङ्गात् ॥ ८ ॥

धर्मो निर्धर्मकश्चेत्कथमिव भविता सोऽभिलापादियोग्यो
धर्मेणान्येन योगे स च भवति तथेत्यव्यवस्थेति चेन्न ।
कश्चिद्धर्मोऽपि धर्मी स्फुटमतिमथने स्वान्यनिर्वाहकत्वं
तन्निष्कर्षप्रयोगेष्वपि भवति पुनस्तस्य धर्मी विशेषः ॥ ९ ॥

तच्छून्ये तस्य वृत्तिः कथमिव घटते तद्विशिष्टे तु वृत्तौ
स्वाधारत्वप्रसङ्गस्तत इह न गुणो नापि धर्मीत्ययुक्तम् ।
तद्वृत्तिर्धर्ममात्रे न भवति तत एवास्य तच्छून्यताऽतो
नोक्तौ दोषौ स्वधीवाग्विहतिरितरथा तद्वदन्येऽपि जल्पाः ॥ १० ॥

स्वच्छन्देनागमेन प्रकृतिमहदहङ्कारमात्राक्षसिद्धि-
र्नाध्यक्षेणाप्रतीतेर्न पुनरनुमया व्याप्तिलिङ्गाद्यसिद्धेः ।
सत्त्वाद्युन्मेषभिन्नान्महत इह तथा स्यादहङ्कारभेदः
प्राच्यादक्षाणि मात्राः प्रजनयति परो मध्यमस्तूभयार्थः ॥ ११ ॥

तत्राहङ्कारजन्यं भजति परिणतैः शब्दमात्रं नभस्त्वं
तद्वत्तन्मात्रपूर्वास्तदुपरि मरुदग्न्यम्बुभूम्यः क्रमात्स्युः ।
सूक्ष्मस्थूलस्वभावस्वगुणसमुदयप्रक्रियातारतम्यात्
तन्मात्राभूतभेदः कललदधिनयात् कल्पितस्तत्त्वविद्भिः ॥ १२ ॥

अद्भ्यश्चोऽग्निस्तेजसस्ता इति न हि वचसोर्बाधितुं युक्तमेकं
निर्वाहः कल्पभेदाद्यदि न दृढमितात्तत्त्वसृष्टयैकरूप्यात् ।
व्यष्टौ ताभ्यः कदाचित्तदुपजनिरतो व्यत्ययस्तत्समष्टौ
आदावप्सृष्टिवादश्रुतिमितमितरन्न प्रतिक्षेप्तुमीष्टे ॥ १३ ॥

पृथ्व्यास्स्पर्शादिभेदो द्रवमृदुकठिनीभावभेदश्च दृष्ट-
स्तद्वत्पृथ्वीजलाग्निश्वसनपरिणतिर्लाघवायेति जैनाः ।
तत्र द्रव्यैक्यमिष्टं क्रमजनिविलयौ त्वागमादप्रकम्प्यौ
तर्कैकालम्बिगोष्ठ्यां भजतु बहुमतिं तादृशी लाघवोक्तिः ॥१४॥

तत्त्वेष्वाथर्वणेऽष्टौ प्रकृतय उदिताः षोडशान्ये विकारा
निष्कर्षेदंपरेऽस्मिन् वचसि तदितरत्सर्वमावर्जनीयम् ।
दृष्ट्वा सांख्यं पुराणादिकमपि बहुधा निर्वहन्त्येतदेके
चिन्तासाफल्यमान्द्याच्छ्रमबहुलतयाऽप्यत्र तज्ज्ञैरुदासि ॥ १५ ॥

निश्शेषं कार्यतत्त्वं जनयति स परो हेतुतत्त्वैश्शरीरी
तत्तत्कार्यान्तरात्मा भवति च तदसौ विश्रुतो विश्वरूपः ।
तेजोबन्नाभिधेये बहुभवनमभिध्यानलिङ्गं च दृष्टं
तस्मादीशाननिघ्नाः प्रकृतिविकृतयस्स्वस्वकार्यप्रसूतौ ॥ १६ ॥

द्वेधा भूतानि भित्त्वा पुनरपि च भिनत्त्यर्धमेकं चतुर्धा
तैरेकैकस्य भागैः परमनुकलयत्यर्धमर्धं चतुर्भिः ।
इत्थं पञ्चीकृतैस्तैर्जनयति स जगद्धेतुरण्डादिकार्या-
ण्यैदंपर्यं त्रिवृत्त्वश्रुतिरधिकगिरामक्षमैका निरोद्धुम् ॥ १७ ॥

कार्यं नैवारभेरन्समधिकमणवस्सर्वतस्संप्रयुक्ता
दिक्संयोगैकदेश्यान्न घटत इह ते दिक्कृतोऽप्यंशभेदः ।
बुद्धेस्त्वंशानपेक्षा स्फुरति विषयिता विश्रमस्त्ववस्तु दृष्टे
नो चेदारम्भकांशप्रभृतिषु नियता दुर्निवाराः प्रसङ्गाः ॥ १८ ॥

स्याद्भागानन्त्यसाम्ये परिमितिसमता सर्षपक्ष्माभृतोश्चे-
न्मैवं भागेष्वनन्तेष्वपि समधिकता स्थौल्यहेतुर्गिरेः स्यात् ।
व्यक्त्यानन्त्येऽपि जात्योः परतदितरता पक्षमासाद्यनन्तं
श्रौतोपादानसौक्ष्म्यं न भवदभिमतं तत्प्रथिम्नश्श्रुतत्वात् ॥ १९ ॥

कार्योपादानभेदे न कथमधिकतो गौरवादेस्स्वकार्यं
नान्यत्वं नामसंख्याव्यवहृतिधिषणाकारकालादिभेदैः ।
द्रव्याभेदेऽप्यवस्थान्तरत इह तु ते पत्रताटङ्कवत्स्युः
नोचेदंशांशिनोस्स्यात्प्रतिहतिरुभयोः स्पर्शवत्त्वाविशेषात् ॥ २० ॥

इत्थं वृत्त्यादिखेदो न भवति न च नः कल्पनागौरवं स्या-
द्वस्त्रे दीर्घैकतन्तुभ्रमणविरचिते वस्त्रधीर्नापि बाध्या ।
देशाधिक्यं समेतेष्वणुषु न हि ततः स्थूलधीबाधशङ्का
संसर्गादेर्विशेषादवयविपरिषद्राशिवन्यादिवादः ॥ २१ ॥

द्रव्यैक्यं प्रत्यभिज्ञा प्रथयति परिमित्यन्तरेऽन्याप्रतीते-
रंशूत्कर्षक्षयादिक्षममपि च ततो राशिवत्स्थूलमेकम् ।
नो चेदश्रान्तचण्डानिलजलधिधुनीदन्तिदावानलाद्यैः
क्षोणीयं क्षुद्यमाना क्षणमपि चरमामण्ववस्थां न जह्यात् ॥ २२ ॥

संघातोऽनेकभूतैरपि भवति यथा ह्येकभूतस्य भागै-
र्देहादिः पञ्चभूतात्मक इति निगमाद्युक्तिभिश्च प्रसिद्धम् ।
न त्वेवं संकरः स्याद्व्यवहृतिनियमस्सूत्रितस्तारतम्या-
द्देहादौ येन भूतान्तरयुजि भवतो भौमतादिव्यवस्था ॥ २३ ॥

सन्ति प्रागप्यवस्थास्सदितरकरणाप्राप्तनिष्पत्त्यदृष्टेः
शक्ताशक्तप्रभेदादिभिरपि यदि न स्वोचितात्कार्यदृष्टेः ।
तस्मिन्सत्येव तस्माज्जनिरपि नियता तन्निमित्तादिनीते-
र्व्यक्तिर्व्यक्ताऽनवस्थां भजति न च कृतामात्थ नैवं कृतौ नः ॥ २४ ॥

वस्तुस्थैर्यं विरुद्धानुपहितविषया साधयेत् प्रत्यभिज्ञा
नैकस्मिञ् शक्त्यशक्ती कृततदितरयोः साह्यभेदेन सिद्धेः ।
एकस्मिन् कालभेदाद्भवति च सहकार्यन्वयानन्वयादि-
र्नोचेन्नो देशभेदादपि सुपरिहरस्तेन नैकं क्वचित्स्यात् ॥ २५ ॥

तत्त्वेदंत्वे हि कालान्तरघटनमये नैककाले घटेतां
कालद्वैतेऽनवस्थाद्यत इह न मितिः प्रत्यभिज्ञेति चेन्न ।
स्वस्य स्वाभावकाले विहृतिनियमनात्स्वेन चात्रैककाल्यात्
काले कालानपेक्षे कथमपि सुवचौ नानवस्थाविरोधौ ॥ २६ ॥

प्रत्यक्षम् वर्तमानं प्रथयति यदिहावर्तमानाद्विभक्तं
तस्मात्तेनैव सिद्धं क्षणिकमिति न सत्तावदित्यप्रतीतेः ।
तत्कालासत्त्वमेव ह्यपनयति सतो वर्तमानत्वबोधः
कालेऽन्यत्रापि सत्त्वं प्रमितमिति कथं तद्विरोधप्रसङ्गः ॥ २७ ॥

उत्पन्नानां विनाशे ध्रुवभवितृतया हेत्वपेक्षाविहीने
जन्मन्येवोपरोधात्क्षणिकमिह जगत्सर्वमित्यप्यसारम् ।
लिङ्गं ह्यस्त्यत्वमात्रं जननविधुरता तत्क्षणानुक्षणत्वे
तत्त्वं तज्जन्यता वा तदिदमनियमासिद्धिबाधादिदूष्यम् ॥ २८ ॥

कालानन्तर्यसाम्ये क्षणिकवपुषि ते देशकालाद्युपाधौ
सर्वे पूर्वे भवेयुस्तदुपरि भवतां कारणानि क्षणानाम् ।
सन्तानैक्यव्यवस्था निजफलनियतिर्वासनानां च न स्यात्
कार्पासे रक्तताद्यक्रमविपरिणमत्संस्कृतद्रव्यतस्स्यात् ॥ २९ ॥

मेयत्वाद्यैर्विगीतं क्षणिकमिह जगत्स्यात्क्षणोपाधिवच्चेद्
बाधो दृष्टान्तहानिः स्थिर इति विदितो यत्क्षणस्याप्युपाधिः ।
सामग्री कार्यशून्या क्षण इयमपि तद्धेतुसंघो न चासौ
हेतुर्नान्यः स्थिरास्ते क्रमवदुपधिवत्स्यात्क्षणत्वं स्थिरेऽपि ॥ ३० ॥

दीपादीनां कदाचित्सदृशविसदृशाशेषसन्तत्यपेते
ध्वंसे दृष्टेऽप्यशक्या तदितरविषयेऽनन्वयध्वंसकल्प्तिः ।
बाधादेर्दर्शितत्वादपि च दृढमिते सान्वयेऽस्मिन्घटादौ
दुर्दर्शावस्थया स्युः पयसि लवणवल्लीनदीपादिभागाः ॥ ३१ ॥

सत्त्वेऽसत्त्वेऽपि पूर्वं किमपि गगनतत्पुष्पवन्नैव साध्यं
हेतुप्राप्तिर्न पश्चाद्भवितुरघटितोत्पादनेऽतिप्रसङ्गः ।
जन्यं जन्मान्यथा वा द्वयमसदनवस्थानकार्यक्षतिभ्या-
मित्याद्यैर्हेतुसाध्यं न किमपि यदि न स्वक्रियादेर्विरोधात् ॥ ३२ ॥

कादाचित्कस्य कालावधिनियतिकरं पूर्वसत्कारणं स्यात्
भावोपष्टम्भशून्यो न खलु तदवधि प्रागभावोऽपि कुर्यात् ।
कार्यं निर्हेतुकं चेत्कथमिव न भवेन्नित्यता तुच्छता वा
कादाचित्कस्वभावाद्यदि न नियमनादन्यथाऽतिप्रसङ्गात् ॥ ३३ ॥

नेत्रादेर्दीपिकादेरिव नियमयुतं तैजसत्वादिसाध्ये
रूपादिग्राहकत्वं यदि करणतया स्यादसाधारणत्वम् ।
तत्साहाय्यं त्वसिद्धं भवति गमकतामात्रमप्यञ्जनादा-
वक्षाहङ्कारिकत्वं श्रुतिपथनिपुणैर्घोषितं नैव बाध्यम् ॥ ३४ ॥

तन्मात्रेष्विन्द्रियाणां श्रुतिरिह न लयं वक्ति किंतु प्रवेशं
नो चेत्पृथ्व्यादिवाक्येष्विव हि लयपदं व्योम्नि चाक्षेषु च स्यात् ।
भूतैराप्यायितत्वात्क्वचिदुपचरिता भौतिकत्वोक्तिरेषा-
मन्नाप्तेजोमयत्वं श्रुतिरपि हि मनःप्राणवाचामुवाच ॥ ३५ ॥

रूपादिज्ञानसिद्धौ यदि करणतया कल्पनं धीन्द्रियाणां
तद्वद्गत्यादिकर्मस्वपि करणतया सन्तु कर्मेन्द्रियाणि ।
कर्मज्ञानाक्षहेत्वोस्समपरिहरणा ह्यन्यथासिद्धिशङ्का
तस्मादेकादशाक्षाण्यपि निगमविदो मन्वते न्याय्यपूर्वम् ॥ ३६ ॥

सांख्यैस्त्रेधोक्तमन्तःकरणमिह मनोबुद्ध्यहङ्कारभेदा-
च्चित्तं चान्ये चतुर्थं विदुरुभयमसत्तादशश्रुत्यभावात् ।
तत्तत्त्वोक्तिमात्रं न हि करणभिदामाह कल्प्तिस्तु गुर्वी
बुद्ध्याद्याख्या निरूढा क्वचिदिह मनसो वृत्तिवैचित्र्य[मात्रा]योगात् ।३७
एकं तत्तत्प्रदेशप्रतिनियततया शक्तिभेदं प्रपन्नं
देहव्यापीन्द्रियं चेत्प्रथममिह भवेदागमेनैव बाधः ।
नो चेत्स्याद्देहभेदप्रतिनियततया सर्वजन्तोस्तदेकं
भेदाज्ञानादकल्प्तेरपि न च भजते देह एवेन्द्रियत्वम् ॥ ३८ ॥

सूक्ष्माण्येकादशाक्षाण्यपि न यदि कथं देहतो निष्क्रमादि-
श्चित्ताणुत्वे तु सर्वेन्द्रियसमुदयने धीक्रमोऽप्यस्तु मानम् ।
वृत्त्याऽक्ष्यादेर्दवीयः प्रमितिजनकता वृत्तिराप्यायनार्थैः
भूतैर्जातः प्रसर्पः श्रुतिमितमपि चानन्त्यमेषां स्वकार्यैः ॥ ३९ ॥

प्राप्यग्राहीन्द्रियत्वाद्विमतमितरवत्प्राप्तिरुक्तप्रकारा
वृत्तिं दृष्टेर्निरुन्धे विरलपटनयादम्बुकाचादिरच्छः ।
नो चेद्गृह्येत योग्यं सममिह निखिलं निष्फले छादकादौ
स्थैर्ये तद्योग्यभावो न हि गलति समा सन्ततिस्त्वन्मतेऽपि ॥ ४० ॥

शब्दं गृह्णाति दूराभ्युदितमपि बहिस्सन्तता श्रोत्रवृत्ति-
र्दिग्भेदासन्नतादिग्रहणमपि तदा तत्र तत्सन्निधानात् ।
इत्येकेऽन्ये तु दूरान्तिकगतजनताशब्दधीकालभेदात्
श्रोत्रायातस्य तस्य ग्रहमनुमितिमप्याहुरस्मिन्दिगादेः ॥ ४१ ॥

प्रत्यक्षं व्योम नीलं नभ इति हि मतिश्चक्षुषैवास्मदादेः
कूपोऽसौ रन्ध्रमेतत्पतति खग इहेत्यादिधीश्चात्र मानम् ।
आधारोऽत्रातपादिर्यदि भवति कथं तस्य चेहेति बोध-
स्तस्यांशैश्चेत् त्र्यणौ तच्छिथिलगति न च व्योमवागातपादौ ॥ ४२ ॥

रूपस्पर्शोज्झितत्वान्न भवति गगनं दर्शनस्पर्शनार्हं
घ्राणश्रोत्रे रसज्ञाऽप्यवगमयति न द्रव्यमन्यत्त्वबाह्यम् ।
तस्मान्नाध्यक्षवेद्यं वियदिति यदि न प्रत्ययस्यापरोक्ष्यात्
पक्षीकारेण नैल्यं पटमलिनिमवद्भाषितं वोपकुर्यात् ॥ ४३ ॥

शब्दस्याधारभूतं कथमपि गगनं शक्यते नानुमातुं
स्वेच्छातः पारिशेष्यक्रम इह कथितोऽतिप्रसङ्गादिदुःस्थः ।
निष्क्रान्त्यादेर्न तद्धीस्सति नभसि यतो नास्ति कुड्यादिकेऽसौ
रोधस्त्वावारकैश्चेत्तदभवनवशान्निष्क्रमादिश्च सिध्येत् ॥ ४४ ॥

यत्त्वाकाशोऽवकाशप्रद इति कथितं शास्त्रतस्तत्र याऽसा-
वन्योन्यं स्पर्शभाजां विहतिरिह न सा प्राच्यतत्त्वेष्विव स्यात् ।
इत्यैदंपर्यमूह्यं न यदि कथमिवान्येषु लभ्योऽवकाशः
सिद्धादेः स्वप्रभावाज्जल इव कथितो युज्यते मज्जनादिः ॥ ४५ ॥

सद्रूपेणैव भानान्न भवति वरणाभावमात्रं विहायः
संसर्गाभावमात्रं न च भवति यतो नास्ति संसर्गिबोधः ।
अत्यन्ताभावनाशावजननिरपि वा सत्सु तेष्वेव न स्यु-
स्तादात्म्याभावसिद्धिः कथ[मिव]मपि च भवेत्तंतमर्थं विहाय ॥ ४६ ॥

नित्यत्वाद्यम्बरादेर्यदि निरवयवद्रव्यताद्यैः प्रसाध्यं
कः स्याद्बाधो विपक्षे कथमिव निगमे बाधकेऽत्रानुमा स्यात् ।
बाधस्सामान्यदृष्टचा श्रुतिसमधिगते नैव कुत्रापि शक्य-
स्तेनामूर्तत्वलिङ्गान्न सृजति विमतो मूर्तमित्याद्यपास्तम् ॥ ४७ ॥

प्राक्प्रत्यक्त्वादिभेदं भजतु वियदिदं भानुयोगादिभेदा-
दस्यैवोपाधिभेदादधिकदिश इव स्तां परत्वापरत्वे ।
व्योमोत्तीर्णेऽपि देशे प्रभवतु तदुपाध्यन्वितैस्तत्तदर्थै-
र्दूरत्वादिव्यवस्था स्वयमुत विभुना ब्रह्मणा किं परैनः ॥ ४८ ॥

अन्यस्मिन्नन्यधर्मान् घटयतु वियदाद्यत्र नातिप्रसक्तिः
सिध्यत्कार्योपयुक्तोपनयननियमोपेततच्छक्तिकल्पेः ।
एवं ह्येवाधिकायामपि दिशि भवतोऽतिप्रसङ्गो निषेध्यो
धर्मी धर्मश्च कल्प्यौ तव तदितरता स्यात्तु काले स्वमानात् ॥ ४९ ॥

संख्यानं तत्त्वपङ्क्तौ क्वचिदपि न दिशः कालवद्वा न भेदः
कण्ठोक्तो व्याक्रियादिव्यवहरणमपि ह्यन्यथैवोपपन्नम् ।
श्रोत्रादुक्तस्तु लोकप्रभृतिवदुदयस्तस्य तत्राप्ययो वा
नैतावत्तत्त्वभेदं गमयति न च तच्छ्रौत्रतामान्यपर्यात् ॥ ५० ॥

वातो वातीति साक्षान्मतिरितरसमा स्पर्शतो नानुमाऽसा-
वन्धेऽन्येषु प्रसङ्गान्न पुनरगमकं स्पर्शनं रूपशून्ये ।
अन्याक्षग्राह्यतादृग्विधगुणविरहो ह्यन्यदक्ष न रुन्धे
निर्गन्धो नीरसोऽपि स्फुरति यदनलो दर्शनस्पर्शनाभ्याम् ॥ ५१ ॥

संख्याद्यास्स्पर्शनास्स्युस्तदधिकरणकास्स्पर्शने गन्धवाहे
तेषां द्रव्योपलम्भप्रतिनियतनिजाध्यक्षयोग्यत्वतश्चेत् ।
इ[ष्टंत्वं]ष्टस्त्वंशेन चात्मप्रभृतिषु सहते तैः प्रसिद्धयन्ति सर्वे
तद्बाह्ये व्याप्तिरिष्टा यदि सततगतेरप्यसावस्तु बाह्ये ॥ ५२

न प्राणो वायुमात्रं सह परिपठनान्न क्रिया द्रव्यतोक्ते-
स्तेजोवद्वा न तत्त्वान्तरमगणनतो वायुतानुज्झनाच्च ।
तस्माद्वातो विशेषं घनजलकरकान्यायतः प्राप्य कंचि-
द्देहान्तर्दाशविध्यं भजति बहुविधोपक्रियो वृत्तिभेदैः ॥ ५३ ॥

प्राणोऽक्षं प्राणशब्दादुपकरणतया क्षेत्रिणश्चेत्ययुक्तं
शब्दैक्यं ह्येकजात्यं व्याभचरति न च प्राणताऽक्षेषु मुख्या ।
देहस्यानक्षभावेऽप्युपकृतिरधिका तत्समाक्षोक्त्यदृष्टि-
र्न प्राणे सात्त्विकाहङ्करणविकृतितालक्षणं तद्धि तेषाम् ॥ ५४ ॥

प्राणापानाख्यभस्त्याारभसविसृमरः प्राप्य वैश्वानराख्यां
मध्येदेहं हुताशो वसति जलनिधावौर्ववत्सर्वभक्षः ।
तत्तद्विद्यासु वे[द्यस्त्वन]द्यं त्वन इव हि परज्योतिषः सोऽपि रूपं
नात्मानौ तौ जडत्वाज्जनिविलयमुखैर्भेदकण्ठोक्तिभिश्च ॥ ५५ ॥

धर्मो भाति प्रभैका बहलविरलताद्यत्र दृष्टानुसारात्
सा दीपांशा विशीर्णा इति यदि बहुधा कल्पनागौरवादि ।
रत्नादीनां स्थिराणां विशरणविहतेर्निष्प्रभत्वादि च स्यात्
तेजस्तत्सप्रभाकं तिमिरहरतया साऽपि तेजोविशेषः ॥ ५६ ॥

भाष्ये भास्वत्प्रभादौ प्रतिहतिबहलीभावपूर्वं यदुक्तं
तेन स्रोतस्समाधि परमतनयतः प्राहुरेके प्रभायाम् ।
वस्तुन्यस्ते विकल्पे स्फुटविघटनयोर्वक्तुराप्तस्य वाचो-
स्तात्पर्यं तर्कमानानुगुणमधिगुणैश्चिन्त्यमन्तेवसद्भिः ॥ ५७ ॥

प्राच्ये स्नेहादिनाशे चरम इव दृढोऽनन्तरं दीपनाशः
सामग्रयन्यान्यकार्यं जनयति च न चानेकदीपप्रतीतिः ।
साम्यादेः स्यात्तु तद्धीः प्रवहणभिदुरास्सप्रभास्तत्प्रदीपा
निर्बाधा भास्करादौ प्रथयति नियत प्रत्यभिज्ञा स्थिरत्वम् ॥ ५८ ॥

वर्णानां तादृशत्वादतिकठिनतया गौरवस्यापि भूम्ना
धात्रीभागैः प्रभूतैस्स्फुटमिह घटिता धातवो हाटकाद्याः ।
तादृक्त्वेपि स्फुरत्ताद्यनितरसुलभं किंचिदन्वीक्ष्य तज्ज्ञैः
व्याख्यात तैजसत्व विधितादितरयोस्तन्त्रसौकर्यसिद्धयै । ५९ ॥

नैल्याद्धौमं तमिस्रं चटुलबहलताद्यन्वयात्तन्न नैल्यं
छायावत्पारतन्त्र्यं त्वयस इव मणौ दृष्टसिद्धात्स्वभावात् ।
स्पर्शाख्यातिर्न रूप हरति हरिशिलालोकवत्तत्र चाक्षणो-
र्नालोकोऽभ्यस्ससिद्धाञ्जननयनदिवाभीतदृष्ट्यादिनीतेः ॥ ६० ॥

नालोकाभावमात्रं तिमिरमविरतं नीलमित्येव दृष्टे-
र्नैल्यं त्वारोपितं चेत्कथमिव न भवेत्क्वापि कस्यापि बाधः ।
आरोपे चात्र नैल्य न भवति नियत भास्वरान्यत्वसाम्या
न्नात्रादृष्टं नियन्तृप्रतिनियतगुणारोपकल्पैर्गुरुत्वात् ॥ ६१
ध्वान्तं तेजश्च नासीदिति मुनिभिरुपाख्यायि संवर्तवार्ता
भावाभावौ निषेद्धुं तदुभयविधिवद्व्याहतत्वादशक्यम् ।
अन्तर्यन्तुश्च तेजः सहपठिततमो देह इत्यामनन्ति
स्याच्चाभावोऽपि भावान्तरमतिमथने वक्ष्यमाणक्रमेण ॥ ६२ ॥

तिष्ठत्युर्वीभचक्रं पवनरयवशाद्भ्राम्यतीत्युक्तमाप्तै-
र्भ्रान्तैः कल्पं त्रिलोकीभ्रमणमिह तथा मेदिनीभ्रान्तिपातौ ।
तद्भ्रान्तौ प्राक्प्रतीचोः प्रसजति पतने पत्रिणोस्तारतम्यं
पाते गुर्व्यास्तु तस्याः प्रलघु दिवि समुत्क्षिप्तमेनां न यायात् ॥ ६३ ॥

ज्योतिश्शास्त्रं पुराणाद्यपि न हि निगमग्राह्यमन्योन्यबाध्यं
विद्यास्थानं तु सर्वं प्रतिनियतनिजोपक्रियांशे प्रमाणम् ।
तात्पर्यं तर्कणीयं तदिह बहुविदा भूपरिध्यादिभेदे दैः
दुर्ज्ञानं सर्वथा यन्मुनिभिरपि परैस्तत्र तूदासितव्यम् ॥ ६४ ॥

सूर्यावृत्त्याद्युपाधिव्यतिकरवशतः कालताऽस्त्वम्बरादे-
रन्यस्मिन्नन्यधर्मोपनयननियमः प्राग्वदत्रेति चेन्न ।
कल्पान्तेऽप्येककालः प्रकृतिपुरुषवद्ब्रह्मणोरूपमन्य-
न्निर्दिष्टोऽनाद्यनन्तो मुनिभिरिति ततः कार्यता चास्य भग्ना ॥ ६५ ॥

कालोऽस्मीति स्वगीता कथयति भगवान्काल इत्याप्तवर्यो
हेतुः सर्वस्य नित्यो विभुरपि च परः किं परेणेति चेन्न ।
कालान्तर्यामितादेः स खलु समुदितः संप्रतीते तु भेदे
साधर्म्यं नैक्यहेतुः स हि तदितरवद्धोषितस्तद्विभूतिः ॥ ६६ ॥

कालस्योत्पत्तितः प्राक् परमपि च लयात् कालनास्तित्ववादी
स्वोक्तिव्याघातभग्नो न वदति यदि यत्को वदेत्कालसृष्टिम् ।
आप्तस्तत्सृष्टिवादस्तदुपधिपरिणत्यादिभिस्सार्थकस्या-
न्नोचेत्तत्रापि पूर्वापरवचनहतिर्दुर्निवारप्रसङ्गा ॥ ६७ ॥

कालोऽध्यक्षावसेयः क्षणलवदिवसाद्यंशतोऽर्थान्विशिंषन्
साक्षाद्धीस्तत्तदर्थेष्विव भवति हि नः कापि कालान्वयेऽपि ।
तत्संयोगाः परत्वादय इति च ततोऽप्येष नैवानुमेयो
नो चेन्न क्वापि लोकव्यवहृतिविषयोऽव्यक्तवत्स्यादनेहा ॥ ६८ ॥

कालस्योपाधिभेदात्कतिचिदभिदधत्यब्दमासादिभेदं
तत्तद्रूपेण कालः परिणमत इति प्राहुरेके तदा तु ।
ये तत्रोपाधयः स्युस्त इह परिणतिं प्राप्नुयुस्सानुबन्धाः
नित्यो व्यापी च तादृक्परिणतिभिरसौ सर्वकार्ये निमित्तम् ॥ ६९ ॥

वायुर्धूयते यद्वदयमुडुगणो बम्भ्रमीति द्रुतं खे
तेजो जाज्वल्यते यद्वदपि [जलनिधि] न जलधिर्माधत्तें दोधवीति ।
भूर्यद्वा बोभवीति स्थिरचरधृतये तच्च तादृक्च सर्वं
स्वायत्ताशेषसत्तास्थितियतनपरब्रह्मलीलोर्मिचक्रम् ॥ ७० ॥

जीवसरः

यो मे हस्तादिवर्ष्मेत्यवयवनिवहाद्भाति भिन्नस्स एकः
प्रत्येकं चेतनत्वे बहुरिह कलहो वीतरागो न जातः ।
तत्सङ्घातातिरिक्तेऽप्यवयविनि कथं तेष्वसिद्धा मतिस्स्यात्
सङ्घातत्वादिभिर्वा घट इव तदचित्स्यान्ममात्मेत्यगत्या ॥ १ ॥

स्याद्वाऽसौ चर्मदृष्टेरयमहमिति धीर्देह एवात्मजुष्टे
निष्टप्ते लोहपिण्डे हुतवहमतिवद्भेदकाख्यातिमूला ।
श्रुत्यर्थापत्तिभिश्च श्रुतिभिरपि च नस्सर्वदोषोज्झिताभिः
देही देहान्तराप्तिक्षम इह विदितस्संविदानन्दरूपः ॥ २ ॥

बाह्याक्षेभ्योऽन्य आत्मा तदखिलविषयप्रत्यभिज्ञातुरैक्यात्
कर्तुः स्मृत्यादिकार्ये करणमिति मनो मानसिद्धं ततोऽन्यत् ।
प्राणास्सङ्घातरूपा वपुरुदितनयान्न ध्रुवं चेतयन्ते
ज्ञानं च ज्ञातृधर्मः क्षणिकमपि च वस्तेन नास्यात्मभावः ॥ ३ ॥

धीर्नित्या यस्य पक्षे प्रसरति बहुधाऽर्थेषु सैवेन्द्रियाद्यै-
स्तेनात्माऽजागलस्थस्तन इव किमिह स्वीक्रियेतेति चेन्न ।
कल्प्यं चेदात्मतत्त्वं कथयितुमुचितं लाघवं तत्र युक्त्या
नित्या सा यस्य तद्वानपि निगममितो गौरवं नास्य भारः ॥ ४ ॥

ज्ञानत्वं वक्ति पुंसः श्रुतिरिह न पुनर्बुद्धिमात्रस्य पुंस्त्वं
प्रत्यक्षादेः प्रकोपादनुगतकथने ज्ञानमर्थप्रकाशः ।
स्वस्यैवात्मा तु सिद्धि मतिरनुभवति स्वान्ययोस्सिद्धिभावं
ज्ञातुर्जाड्यप्रसङ्गव्युदसनविषया ज्ञानमात्रोक्तयोऽपि ॥ ५ ॥

आत्मा स्वेनैव सिध्यत्यहमिति निगमैर्यत्स्वयंज्योतिरुक्तः
स्वापेऽप्यस्य स्वसिद्धावशयिषि सुखमित्यक्षता प्रत्यभिज्ञा ।
चेतश्चान्यानपेक्षं मतिषु न हि भवेत्किं च वेदान्तदृष्ट्या
ज्ञानत्वादेष धीवत् स्वविषयधिषणानिर्व्यपेक्षस्वसिद्धिः ॥ ६ ॥

प्रत्यक्त्वं पुंसि केचित् स्वविषयधिषणाधारतामात्रमाहुः
स्वस्मै स्वेनैव भानं तदिति समुचितं तत्स्वतस्सिद्धिसिद्धेः ।
प्रत्यङ् स्वापेक्षयाऽसौ त्वमयमिति मितः स्वेतरैः स्वस्य बुद्ध्या
भातं नित्यं परस्मै जडमजडमपि स्यात्परागर्थ एव ॥ ७ ॥

बोद्धा कर्ता च भोक्ता दृढमवगमितः प्रत्यगर्थः प्रमाणैः
कर्तृत्वाभाववादे स्वयमिह भगवानान्यपर्यं त्वगायत् ।
कर्ता शास्त्रार्थवत्त्वात्कृतिषु च स पराधीन आभाषि सूत्रै-
श्चित्रैः कर्मप्रवाहैर्यतनविषमता सर्वतन्त्राविगीता ॥ ८ ॥

यद्भव्यं तन्न न स्याद्यदभवितृ न तद्यत्नकोट्यापि सिद्ध्येद्
द्वेधाऽपि व्यर्थयत्ना नर इति यदि न स्वोक्तियत्नादिबाधात् ।
यद्यत्नेनैव भव्यं भवति यतनतस्तत्स्वहेतूपनीता-
द्दुस्साधा यत्नलभ्ये प्रति यदि यतते तत्र नैष्फल्यमिष्टम् ॥ ९ ॥

भिन्ना जीवाः स्वतस्स्युः प्रतिनियततया धीस्मृतीच्छासुखादेः
चेतोभेदाद्व्यवस्था न तु भवति यथा देहबाह्याक्षभेदात् ।
नित्यान् भिन्नांश्च जीवान्कथयति निगमस्तद्धि नोपाधितस्स्यात्
आत्माद्वैतश्रुतीनामितरहृदयता तत्रतत्रैव सिद्धा ॥ १० ॥

जीवाः पृथ्व्यादिभूतेष्वणव इव मिथो भेदवन्तः स्वतोऽमी
सन्मात्रब्रह्मभागास्तदिह नियतयस्सुस्थिता इत्ययुक्तम् ।
ऐक्यस्याप्यक्षतत्वादनवधि च सति ब्रह्मणि स्यादवद्यं
सत्यं तच्चेत्यभिज्ञैर्बहिरगणि मृषावादतोऽप्येष पक्षः ॥ ११ ॥

देहृत्वाद्यैर्विगीतं निखिलमपि मया ह्यात्मवत्कि च पुंस्त्वात्
सर्वे जीवा अहं स्युर्न यदि भवति ते गौरवादीत्यसारम् ।
श्रुत्यध्यक्षादिबाधात्प्रसजति च तदा तत्तदैक्यं घटादेः
पक्षादेर्वादिनोश्चेत्यलमिह कलहैस्तज्जिगीषादिमूलैः ॥ १२ ॥

साविद्यं ब्रह्म जीवस्स च न बहुतनुर्नेतरे सन्ति जीवाः
स्वप्नादेकस्य लोके बहुविधपुरुषाध्यासवद्विभ्रक्लृप्तिः ।
नेतः प्राक्कोऽपि मुक्तो न परमपि स तु प्राप्स्यति श्रेय एको
मायोत्थौ बन्धमोक्षाविति च मतमसत्सर्वमानोपरोधात् ॥ १३ ॥

स्वस्य स्वेनोपदेशो न भवति न परब्रह्मणा निष्कलत्वा-
न्नाविद्या चेतयित्री स्वतनुसमधिकं वर्ष्म निर्जीत्रमात्थ ।
कश्चित्तत्त्वं ब्रवीतीत्ययमुपनिपतत्भ्रान्तिरुन्मुच्यते चेत्
तादृग्भ्रान्तिः पुराऽपि ह्यभवदिति न ते किं तदैवैष मुक्तः ॥ १४ ॥

तोयाधारेषु दोषाकर इव बहुधोपाधिषु ब्रह्म शुद्धं
छायापन्नं विशेषान् भजति तनुभृतस्तत्प्रतिच्छन्दभूताः ।
इत्यप्यत्यन्तदुःस्थं प्रसजति च तदा जीवनाशोऽपवर्ग-
श्छायाच्छायावदैक्यं न भजति न च तद्दर्शनं ब्रह्मणस्ते ॥ १५ ॥

एकं ब्रह्मैव नित्यं तदितरदखिलं तत्र जन्मादिभागि-
त्याम्नातं तेन जीवोऽप्यचिदिव जनिमानित्यनध्येतृचोद्यम् ।
तन्नित्यत्वं हि साङ्गश्रुतिशतपठितं सृष्टिवादः पुनः स्यात्
देहादिद्वारतोऽस्मेत्यवहितमनसामाविरस्त्यैकरस्यम् ॥ १६ ॥

स्थैर्यं चेन्नाभ्युपेतं भवभृति न भवेदैहिकार्थप्रवृत्तिः
देहान्तत्वे तु धर्म्ये पथि निरुपधिका विश्ववृत्तिर्न सिध्येत् ।
आकल्पस्थायिपक्षे कृतमफलतया मुक्तिमार्गोपदेशैः
आमोक्षस्थायितायां श्रुतिरनभिमुखी पूरुषार्थे चतुर्थे ॥ १७ ॥

व्याप्तास्सर्वत्र जीवास्सुखतदितरयोस्तत्रतत्रोपलम्भा-
न्निर्वाह्ये देहगत्यागतिरिह वितथा तद्वतोऽपीति चेन्न ।
वक्त्री पञ्चाग्निविद्याप्रभृतिषु भविनां स्वस्वरूपेण सिद्धं
यातायातप्रकारं श्रुतिरगतिरिमां लाघवोक्तिं शृणोतु ॥ १८ ॥

अव्यापित्वेऽपि पुंसोऽभिमतबहुवपुःप्रेरणे यौगपद्यं
ज्ञानव्याप्त्योपपन्नम् बहुषु च वपुषोऽशेषु निर्वाह एषः ।
यच्चादृष्टं क्रियां स्वाश्रययुजि तनुतेऽन्यत्र तत्कृद्गुणत्वा-
दित्येतत्सिद्धसाध्यं विभुन इह हि ब्रह्मणः प्रीतिकोपौ ॥ १९ ॥

इष्टं प्रादेशिकत्वं विभुषु जनिमतां बुद्धिशब्दादिकानां
तेनादृष्टं च तादृङ् न यदि तव सुखाद्याश्रयव्यापकं स्यात् ।
तस्मात्तत्स्वप्रदेशान्वयवति जनयेत्स्वं फलं यत्ननीत्या
भ्रातृव्यादौ च पीडां न घटयितुमलं किं विभुत्वेन भोक्तुः ॥ २० ॥

स्वादृष्टोपार्जितत्वाद्विभुषु यदवदन्विग्रहादेर्व्यवस्थां
तच्चैवं निर्निमित्तं तत इह न कथं सर्वतस्सर्वभोगः ।
आराध्ये विश्वसाक्षिण्यनुगुणफलदे त्वस्ति राजादिनीति
स्तत्साम्ये भोगसाम्यं न हि भवति यथाकर्म भोगप्रदानात् ॥ २१ ॥

देहान्तर्मात्रदृष्टेः पृथगिह विषयिप्राणजीवोत्क्रमोक्ते-
र्भूयोवाक्यानुसारादणुरिति वचने तादृशोपाध्यनुक्तेः ।
ईशादाराग्रमात्रो ह्यवर इति भिदावर्णनात्स्पन्दवाक्या-
द्व्याप्त्युक्तिर्जातिधर्मप्रतिहतिविनिवृत्त्यादिमात्रेण जीवे ॥ २२ ॥

नात्मा देहानुरूपं विविधपरिणतिर्निर्विकारोक्तिबाधात्
स्थूलोऽहं मूर्ध्नि जातं सुखमिति च मतिस्तस्य देहात्ममोहात् ।
नानादेहश्च योगो प्रसजति भिदुरः पुंसि देहप्रमाणे
मुक्तौ देहात्ययात्स्यात्परिमितिविरहस्तत्प्रयुक्तेऽस्य माने ॥ २३ ॥

निर्मुक्तस्त्वन्मते स्यात्कथमपरिमितो नित्यमूर्ध्वं प्रधावन्
देहः कश्चित्तदानीमपि यदि नियतस्यात्तु तन्निघ्नताऽस्य ।
इच्छातो देहमेकं विशति स परिमित्यर्थमेवेति हास्यं
तस्मादास्माकनीत्या परिमितिरिह सा स्थायिनी या विमुक्तौ ॥ २४ ॥

कर्माविद्यादिचक्रे प्रतिपुरुषमहानादिचित्रप्रवाहे
तत्तत्काले विपक्तिर्भवति हि विविधा सर्वसिद्धान्तसिद्धा ।
तल्लब्धस्वावकाशप्रथमगुरुकृपागृह्यमाणः कदाचित्
मुक्तैश्वर्यान्तसम्पन्निधिरपि भविता कश्चिदित्थं विपश्चित् ॥ २५ ॥

कृच्छ्रात्संवर्तकष्टाद्यपगमजनितस्थूलदेहस्य जन्तो-
र्जाग्रत्स्वप्नस्सुषुप्तिर्मरणमथ मृतेरर्धसंपद्दृशास्युः ।
सर्वं दुःखान्धकारस्थगितमिह सुखं त्वत्र खद्योतकल्पं
त्यक्त्वा शुद्धाशयास्तन्निरवधिकसुखां निर्विविक्षन्ति मुक्तिम् ॥ २६ ॥

कश्चिच्चेन्नित्यबद्धः किमयमहमिति स्यान्मुमुक्षोरुपेक्षा
मैवं युक्तस्य मुक्तिर्भवति दृढमिति प्रत्ययात्तत्प्रवृत्तेः ।
नो चेत्स्यामन्त्यमुक्तः किमहमिति न केऽप्यद्य मुक्तौ यतेरन्
सर्गस्थित्यादिसन्तत्यविरतिरत इत्येवमेकेऽन्यथाऽन्ये ॥ २७ ॥

निःशेषात्मापवर्गे विरतविहरणो विश्वकर्ता तदा स्यात्
नित्यं चेत्कोऽपि दुःख्येन्निरुपधिकदयाहानिरस्येति चेन्न ।
पक्षः पूर्वो यदि स्याद्विहरणविरतिः स्वेच्छया नैव दोषः
शिष्टे पक्षे निरुद्धा निरुपधिकदया कुत्रचिन्नित्यमस्तु ॥ २८ ॥

भक्तिर्मुक्तेरुपायः श्रुतिशतविहितसा च धीः प्रीतिरूपा
तन्निष्पत्त्यै फलेच्छाद्युपधिविरहितं कर्म वर्णाश्रमादेः ।
ज्ञानध्यानादिवाचां समफलविषया सैव युक्ता प्रतिष्ठा
सामान्योक्तिस्समानप्रकरणपठिता पर्यवस्येद्विशेषे ॥ २९ ॥

ध्यानाद्युक्त्या ध्रुवानुस्मृतिरिह विहिता ग्रन्थिमोक्षाय सैव
स्पष्टा दृष्टिस्तथैव श्रुतफलविषया सेवनत्वादुपास्तिः ।
क्वाऽप्यैक्यं विद्युपास्त्योर्व्यतिकरितगिरा भक्तिमेवाह गीता
सर्वं तद्वित्तिमात्रे फलवति विफलं तेन सैवं विशिष्टा ॥ ३० ॥

विद्याः पञ्चाग्निवैश्वानरदहरमधुन्यासस्तूर्वसंज्ञाः
नाना शब्दादिभेदात्तुलितफलतया तद्विकल्पश्च शिष्ट : ।
कर्मज्ञानाख्ययोगौ त्विह परभजनाधिक्रियार्थौ स्वदृष्टया
धर्मैर्वर्णाश्रमाणां त्रयमिदमवदन् सेतिकर्तव्यताकम् ॥ ३१ ॥

विश्वान्तर्यामि तत्त्वं स्वयमिह चिदचिद्विग्रहैर्वा विशिष्टं
यस्यामालम्बनं सा भवभयशमनी वीतरागस्य विद्या ।
यस्तूपास्ते यथोक्तं तदितरदखिलं ब्रह्मदृष्टया स्वतो वा
नैतस्य ब्रह्मनाड्योद्गतिरपि न पदव्यर्चिरादिर्न मोक्षः ॥ ३२ ॥

स्वान्तध्वान्तप्रसूतं दुरितमपनुदन् योगिनस्सत्त्वशुद्धयै
सर्वो वर्णाद्यिधर्मश्शमदममुखवत्सन्निपत्योपकारी ।
विद्यां चेत्यादिवाक्येऽप्यनुकथितमिदं नैकवाक्यानुरोधात्
कर्मापेक्षाभिसन्धिं क्वचन विवृणुते तत्समुच्चित्यवादः ॥ ३३ ॥

संस्कारः कर्मकर्तुर्न भवति विहितं मुक्तये ज्ञानमन्य-
न्नाप्येतत्कर्मणोऽङ्गम् न च सकृदसकृत्त्वाप्रयाणानुवृत्तम् ।
अङ्गं तस्यासनाद्यं प्रणिधिसमुचितौ देशकालप्रभेदा-
वित्याद्यं साङ्गयोगप्रकरणवितते सूत्रभाष्यादिषूक्तम् ॥ ३४ ॥

ब्रह्मण्यैकान्त्यभाजां मुहुरनुकथितो मोक्षधर्मेऽपवर्ग-
स्तस्मान्नानाऽमरेज्या न भवति परभक्त्यङ्गमित्यप्ययुक्तम् ।
ऐन्द्रीप्रातर्दनादिप्रथितनयविदामन्तरात्मैकलक्ष्ये-
ष्वग्नीन्द्रादिप्रयोगेष्वखिलमपि विभुः कर्म भुङ्क्ते स एकः ॥ ३५ ॥

त्यागत्रैविध्यमुक्त्वा स्वमतमिह जगौ सात्त्विकं त्यागमीश-
स्तस्माद्वर्णाश्रमादित्यजनमपदृशां तामसं मोहमूलम् ।
योगारूढस्य कर्मच्यवनमपि तदा सह्यमङ्गत्वमुक्त्वा
र्योगं त्वत्याश्रमिभ्यः परममिति वचो वक्ति मोक्षाश्रमेण ॥ ३६ ॥

तुर्यो निष्कृष्य मोक्षाश्रम इति कथितस्तेन नान्येषु विद्या
शान्त्यादिव्याहतेश्चेत्यसदिह गुणिनां सर्वतोमुक्त्यधीतेः ।
यावजीवं द्वितीयाश्रमवति पुनरावृत्त्यभावोऽप्यधीतः
स्मृत्याद्यैश्चैवमुक्तं भवति तु चरमे योग्यताधिक्यमात्रम् ॥ ३७ ॥

यन्नित्यं तन्न काम्यं तदपि न तदिति स्थापिते कर्मभेदे-
ऽप्येकं विद्याश्रमाङ्गम् भवति हि विनियुक्त्यन्तरेणोपपत्तेः ।
तत्रानुष्ठानतन्त्रं विदुषि तु घटते कर्तृकालाद्यभेदात्
प्राजापत्यादिलोकार्थिनि च तदितरोऽनर्थरोधाय तद्वान् ॥ ३८ ॥

मन्दस्यापि प्रवृत्तिः किमपि फलमनुद्दिश्य कस्यापि न स्यात्
नित्येऽनर्थोपरोधप्रभृति फलमतः काम्यतैवेति चेन्न ।
नित्येष्टोऽनर्थरोधस्तदितरदतथा किंच शिष्टो विधीना-
माज्ञानुज्ञाविभागस्सुगम इह निरुक्त्यैव नैमित्तिकांशः ॥ ३९ ॥

कर्तव्यं यन्निमित्ते सति तदुभयधा पापशान्त्यर्थमेकं
तत्स्यात्काम्येन तुल्यं परमकरणतो दोषकृन्नित्यतुल्यम् ।
सत्यां कामश्रुतौ संवलितमपि भवेत्तद्बलादेतदेव
त्यागे च प्रत्यवायस्त्वनधिकृतिमुखस्तत्रतत्रावसेयः ॥ ४० ॥

निष्कामं चेन्निवृत्तं तदिह न घटते मुक्तिकामाधिकारात्
स्वप्रीतिस्पर्शहीना न च भवति परप्रीतिरिष्टेति चेन्न ।
युक्ता यस्मान्निवृत्तिर्बहुभयशबलात्तन्निवृत्तं निवृत्तं
सूते यत्र प्रवृत्तिस्त्वभिमतमहितं तत्प्रवृत्तं प्रवृत्तम् ॥ ४१ ॥

पुंभिः सिद्धाधिकारैः क्रतव इव निराकाङ्क्षभावं भजन्त्यः
प्रोक्तास्त्रैवर्णिकार्हाश्रुतिनयवशतो यद्यपि ब्रह्मविद्याः ।
अस्तेयाद्यैः प्रपत्त्या परिचरणमुखैरप्यधीतैः स्वजातेः
सर्वेऽपि प्राप्नुयुस्तां परगतिमिति तु ब्राह्मगीतादिसिद्धम् ॥ ४२ ॥

ध्यानादृष्टेन साक्षात्कृतिरुपजनिता बाधते चेत्प्रपञ्चं
तत्तुल्यार्थैव शाब्दी प्रमितिरपि न किं बाधते पूर्वमेव ।
ज्वालैक्यादौ परोक्षादपि हि निजगदुर्बाधमध्यक्षबुद्धे-
र्नाप्यत्रादृष्टरूपामहितविमथनीं शक्तिमङ्गीकरोषि ॥ ४३ ॥

निर्दिष्टो निष्प्रपञ्चीकरणविधिरसौ गौडमीमांसकाप्तै-
र्दृष्टो न क्वापि दुर्निर्वहमपि करणाद्यत्र साध्याविशेषात् ।
मुक्तिर्नैयोगिकी चेज्जगदपि न मृषा नश्वरी सापि ते स्यात्
ध्वंसात्मत्वेऽपि तस्या न च वदसि भिदां ब्रह्मणस्तच्च नित्यम् ॥ ४४ ॥

वाक्यार्थज्ञानमात्रादमृतमिति वदन्मुच्यते किं श्रुतेऽस्मिन्
बाढं चेन्मानबाधस्स यदनुभवति प्रागिवाद्यापि दुःश्वम् ।
ध्यानादीनां विधानं भवति च वितथं तन्न युक्तं न चेष्टं
ध्यानाद्यङ्गाढ्यशब्दोदितचरममतेर्नाधिकं वः प्रकाश्यम् ॥ ४५ ॥

उद्देश्यांशे त्वमाद्यं स्फुटमनुभवतां सम्यगध्यक्षवित्त्या
प्रत्यक्षत्वभ्रमोऽयं त्वमसि दशम इत्यादिवाक्यार्थबोधे ।
शब्दात्प्रत्यक्षबोधे प्रसजति शिथिला तद्व्यवस्था ततोऽर्थे
साक्षात्कारं न शब्दो जनयति विमतस्सिद्धवच्छब्दभावात् ॥ ४६ ॥

शिष्यो जीवस्त्वसिद्धः किमु तव यदि वा भ्रान्तिसिद्धो मितो वा
नासिद्धायोपदेशो भ्रमविषयमितौ नोपदेशार्हतास्य ।
भेदेनैक्येन वाऽन्त्यः कथमुपदिशतु ज्ञातभेदोऽप्यभेद
तादात्म्ये जागरूके सति किमुपदिशेत्स्वात्मने तद्विदे सः ॥ ४७ ॥

नैवालं भ्रान्तिबाधे परमपि तदिदं तत्त्वमस्यादिवाक्यं
भ्रान्तोक्तिर्यद्वदादौ श्रुतिकृतनिखिलभ्रान्तिमूलत्वबोधात् ।
रज्जौ सर्पभ्रमे किं जनयति विदितभ्रान्तवाक्सर्पबाधं
स्वप्नेऽहिः स्वप्नबुद्ध्या किमु गलति यदा तत्र च स्वाप्नताधीः ॥४८॥

छायादिर्न त्वसत्यस्सदवगतिकरस्तत्र हेतुर्हि तद्धी-
स्साध्यज्ञप्त्यादिवत्सा स्वयमिह न मृषा नास्ति धीरित्यबाधात् ।
सत्येनैव प्रसूता घट इव विमता शेमुषी कार्यभावा-
द्धेतुत्वालीकभावौ कथमिव विहतावेकमेवाश्रयेताम् ॥ ४९ ॥

ज्ञानस्याशेषभेदोदयविहृतिकृतो न स्वनाश्यत्वयुक्ति-
र्वाताद्यैरेव सद्यश्शममधिकुरुते दग्धदाह्योऽपि वह्निः ।
तस्मात्तस्यान्यदेव प्रशमकमपरं तस्य चेत्यव्यवस्था
तच्चेच्छान्तिं न गच्छेत्कथमिव भविता सर्वभेदोपमर्दः ॥ ५० ॥

बोधस्यान्त्यस्य वेद्य किमु तव विशदं ब्रह्म मायान्वितं वा
किं वा भेदप्रपञ्चः किमु तदनृतता किन्नु वेद्यं न किञ्चित् ।
आद्ये स्याद्ब्रह्म दृश्यं तदुपरि युगले मोहसत्ताऽथ तुर्ये
सूते द्वैतं सती सा स्वविहृतिमनृता पञ्चमे स्यान्न धीत्वम् ॥ ५१ ॥

साध्या वस्सर्वमायाविरतिरपि परं ब्रह्म तस्मात्परा वा
पूर्वत्र प्रागपि स्यात्परमपि न भवेदुत्तरत्राभ्युपेते ।
साऽपि स्याच्चेन्निवर्त्या पुनरपि विलयेत्पूर्व एव प्रपञ्चो
नो चेत्सत्यैव सा स्यात्प्रसजति च ततो ब्रह्म तत्सद्वितीयम् ॥ ५२ ॥

अन्त्यज्ञानस्य जीवः स्थितिपदमथवा केवलं ब्रह्म ते स्या-
दाद्ये तेनैव बाध्यो न तदुपजनयेद्धीस्थितौ किं ततोऽस्य ।
अन्त्ये सत्याऽनृता वा तदधिकरणता नाद्य इष्टः परस्मिन्
तत्क्लृप्त्यादेरयोगस्तदिह विमृशतां किं न दुष्टं त्वदिष्टम् ॥ ५३ ॥

नाभुक्त कल्पकोटयाऽप्युपशमनमियात्कर्म निष्कृत्यभावे
विद्यातस्तद्विनाशश्रुतिरिह तदसौ तत्प्रशंसेति चेन्न ।
तादृग्विद्यैव तन्निष्कृतिरिति हि विदांचक्रुराम्नायवृद्धा
नान्यद्ब्रह्मानुभूतिप्रतिभटदुरितध्वंसतस्साध्यमत्र ॥ ५४ ॥

प्रायश्चित्तं न पुण्ये न च सुकृतमनुश्रूयते धर्मबाध्यं
नाधर्मत्वं विधानान्न यदि सुचरितं त्वङ्गमस्याश्च न स्यात् ।
मैवं धर्मोऽप्यधर्मो भवति हि बहुधाऽधिक्रियादेर्विशेषात्
धर्मं त्रैवर्गिकं तु स्वयमिह निगमः पाप्मकोटौ पपाठ ॥ ५५ ॥

अश्लेषः पाप्मभिश्चेत्प्रसजति वितथा दुश्चरित्रान्निवृत्ति-
स्तेषु प्रामादिकेष्वप्यमतिकनिपतद्बीजवत्स्यात्प्ररोहः ।
मैवं शास्त्रैकवेद्ये फलफलिविषये युक्तयो ह्यस्वतन्त्राः
शास्त्राद्बाधस्तु तिष्ठेन्मतिकृतविषये शब्दशक्त्यादिभिर्नः ॥ ५६ ॥

श्लिष्टं विद्याङ्गपुण्यं स्वफलवितरणान्नेतरार्थं विरागे
रागादारभ्यमाणं फलवदमतिकं संभवेन्नैव पुण्यम् ।
पुण्याश्लेषस्ततोऽस्मिन्न घटत इति चेन्नोपयुक्तातिरिक्तै-
र्विद्याङ्गैस्तस्य योगादमतिकृतमपि ह्यामनन्त्येव पुण्यम् ॥ ५७ ॥

कर्माश्लेषप्रणाशौ तदुपधिभगवन्निग्रहादेर्निवृत्ति-
र्नैष्टाश्लिष्टातिरिक्तं न च किमपि ततः संक्रमः कस्य मैवम् ।
तत्तत्कर्मप्रसूतौ स्वभजनशमितौ निग्रहानुग्रहौ यौ
तत्तुल्यावेव देवः प्रयति विदुषि तच्छत्रुमित्रेषु धत्ते ॥ ५८ ॥

अन्यश्चेदन्यकर्मप्रजनितफलभुक् शास्त्रवैयाकुली स्या-
द्ब्रह्मज्ञैरुज्झितानां क्वचिदपि न ततः कर्मणां संक्रमः स्यात् ।
उद्वेलस्याच्च धातेत्यसदविषमताद्यन्वितेनैव धात्रा
विद्यानिष्ठोपकाराद्युचितफलमिदं दीयते वर्गयुग्मे ॥ ५९ ॥

अर्चिर्घस्रोऽथ पक्षस्सित उदगयनं वत्सरो मातरिश्वा
मार्तण्डस्तारकेशस्तडिदपि वरुणामर्त्यनाथप्रजेशैः
आदिष्टो विश्वनेत्रा स्वयमतिवहने देवयानाध्वगानां
यः प्रोक्तोऽमानवाख्यस्स तटिदधिपतिर्विश्रुतो मानसोऽपि ॥ ६० ॥

बुद्धेर्योऽसौ विकासः कबलितनिखिलोपस्कृतब्रह्मतत्त्वः
स प्राक्चेन्नित्यमुक्तिर्न यदि कथमसौ नश्वरत्वं न गच्छेत् ।
मैवं प्रध्वंसवत्ते स खलु मम तथा शौनकाद्युक्तनीत्या
शान्ताशेषापराधे न च भवति पुनस्तत्र सङ्कोचहेतुः ॥ ६१ ॥

मुक्तौ देहाद्यभावे मुकुलितविषयो जक्षदादिप्रवाद-
स्तत्सत्त्वे चाशरीरश्रुतिविहतिरतः का चिकित्सेति चेन्न ।
इच्छातस्स्यादवस्थाद्वयमुभयविधश्रुत्यबाधाद्विमुक्तौ
कर्मायत्तैर्वियोगः परमिह कथितस्तस्य देवोपमस्य ॥ ६२ ॥

स्यान्मुक्तो विश्वदेही यदि भवति जगद्व्यापृतौ तस्य शक्तिः
स्वातन्त्र्यं क्वाप्यशक्तौ विगलति स च नः स स्वराडित्यधीतः ।
धत्तेऽनुच्छेद्यसारा तदियमुभयतः पाशतां तर्करज्जु-
र्मैवं देवस्तदिच्छां क्वचिदपि न विहन्त्येवमस्तु स्वराट् सः ॥ ६३ ॥

आविर्भूतस्वरूपा निरवधिकसुखब्रह्मभुक्तिस्तु मुक्तिः
सेवात्वाद्दुःखकृत्सा भवति यदि न तद्धर्ममानेन बाधात् ।
पाप्मा चास्मिन्नुपाधिस्स च न खलु तदा पुण्यपापव्यपाया-
दात्मानो विष्णुशेषा इति च सुखमयी सा स्वरूपानुरूप्यात् ॥ ६४ ॥

सर्वस्याप्यानुकूल्यं स्वत इह जगतो वासुदेवात्मकस्य
व्यक्ति तन्मुक्तिकाले भजति भवकृतज्ञानसङ्कोचहानेः ।
प्राचीनप्रातिकूल्यक्रमविषयधिया नैष दुःख्येत्तदानीं
प्रागप्येतत्स्वकर्मोपधिकृतभगवन्निग्रहैकप्रयुक्तम् ॥ ६५ ॥

अन्ये चानादिशुद्धाः श्रुतिसमधिगतास्सूरयस्सन्त्यसङ्ख्याः
कर्माभावादन दर्नं तु भवति कदाऽप्येषु संसारबन्धः ।
शेषाणां शेषिणश्च स्फुरति सुखतया सर्वदा सर्वतत्त्वे
नित्यानां मुक्तिभाजामपि भुवनकृता भोगमात्रं समानम् ॥ ६६ ॥

सालोक्याद्याः प्रभेदा ननु परिपठिताः क्वापि मोक्षस्य मैवं
सायुज्यस्यैव तत्त्वात्तदितरविषये मुक्तिशब्दस्तु भाक्तः ।
तस्मिंस्ते च त्रयस्स्युस्तदपि च सयुजोर्भाव इत्येकरस्यं
युक्साम्यं [लोक] योगसाम्यादिवदपटुधियां तावतैवैक्यमोहः ॥ ६७ ॥

विश्वाधारस्य लक्ष्मेत्यभिहितमखिलं संभवेन्नापवृक्ते
तन्निष्ठत्वादि सर्वं न हि विलयमियात्तच्छरीरस्य तस्य ।
तन्निघ्नत्वेऽपि मुक्तो न भवति पुनरावृत्तिशङ्काकलङ्की
तादृक्सौहार्ददृष्टेर्वयमिह तदनावृत्तिशास्त्रेण विद्मः ॥ ६८ ॥

विश्वैर्वैशेषिकैस्तैर्भवति विरहितो नाशितादृग्गुणत्वा-
ज्जीवात्मा जन्मकाले घटवदिति यदि स्यादिहाम्नायबाधः ।
दृष्टान्तस्साध्यहीनः क इव निगमविल्लिप्सते मुक्तिमेतां
धीर्नित्येच्छादयस्तत्परिणतय इति स्याच्च हेतोरसिद्धिः ॥ ६९ ॥

आत्मा चिन्मात्ररूपो विकृतिमति जडे बिम्बितो बुद्धितत्त्वे
तच्चास्मिँस्तद्विवेकाग्रहणविरचितः पुंसि संसारमोहः ।
अन्त्या विज्ञानवृत्तिः प्रकृतिपुरुषयोरन्यतां गाहमाना
तादृक्संसारभेत्त्री पुरुष इह सदा मुक्त एवेति साङ्ख्याः ॥ ७० ॥

नीरूपे बिम्बितत्वं क्वनु भवति कथं रूपशून्यस्य तस्या-
न्निर्लेपे संसृतिः का कथमतिविशदो निष्क्रियश्चैष मुह्येत् ।
नित्यं वा किं न मुह्येदुपधिभिरितरैर्वेत्तु भेदं कथं वा
को वा मोक्षोऽद्य पुंसः प्रथममपि न खल्वस्य दुःखादिगन्धः ॥ ७१ ॥

व्यापिन्येकाऽपि सांख्यैः प्रकृतिरभिहिता सर्वसाधारणी सा
व्याप्ता जीवाश्च सर्वे प्रकृतिपरिणतिर्भोग एषामभीष्टः ।
सर्वे सर्वस्य भोगाः स्युरिह तत इमे संनिधानादिसाम्यात्
बुद्धीच्छाद्यं च सर्वं प्रकृतिगतमतो न व्यवस्था ततोऽपि ॥ ७२ ॥

मुक्तिः प्राणाक्षदेहादिभिरुपधिभिरत्यन्तविश्लेषरूपा
जीवब्रह्मावोऽपि तैस्सङ्गम इति विहतेर्जीवतस्सा कथं स्यात् ।
आपस्तम्बादयश्च श्रुतिगतिभिरिमां युक्तिभिश्च व्युदासु-
र्जीवन्मुक्तादिशब्दः क्वचिदुपचरितस्तत्समावस्थयैव ॥ ७३ ॥

चन्द्रैकत्वादिबुद्धया न हि विलयमियाच्चक्षुरर्थादिदोषः
स्याद्बाधेऽपि द्विचन्द्रप्रभृतिषु हि ततो भ्रान्तिमात्रानुवृत्तिः ।
विस्रम्भाभावतः स्यात् फलमपि न तु ते जाघटीति द्वयं तद्
ब्रह्मान्याशेषबाधादनतिबलतया बाध्यतो बाधकस्य ॥७४ ॥

स्वातन्त्र्यं ब्रह्मणैक्यं पशुपतिसमतां वासनोच्छेदमात्रं
धीसन्तानप्रणाशं निजमतिसुखयोर्नित्ययोस्सन्निकर्षम् ।
चित्तेन स्वात्मसौख्यानुभवमुपलवब्रह्मावमूर्ध्वंप्रयाणं
शून्याद्वैतं च मुक्तौ श्रुतिरुपकृतये कल्पतां जल्पतां वः ॥ ७५ ॥

सव्याख्यतत्त्वमुक्ताकलापविषयसूची

१. मङ्गलाचरणम्	.....	.....	१—४
२. वक्तृसम्प्रदायवैलक्षण्यम्	.....	.....	५—
३. (ग्रन्थस्य मुक्ताकलापता) ग्रन्थनाम्नः औचित्यप्रतिपादनम्	.....	.....	६—
४. मतान्तरनिरसनपूर्वकस्वमतस्थापनप्रतिज्ञा	.....	.....	७—८
५. तत्त्वज्ञानप्रयोजनम्	....	.....	९—
६. तत्त्वविभागः	.....	.....	१०—११
७. द्रव्यतद्विशेषलक्षणम्	....	.....	१२—
८. द्रव्यसिद्धिद्रव्याद्वैतभङ्गौ	.....	.....	१८—
९. धर्मनिर्धर्मकत्वनियमभङ्गः	.....	.....	—
१०. धर्मधर्मिणोरैक्यनिरासः	.....	....	३५—४०
११. प्रकृतिमहदादीनामागमिकत्वमुत्पत्तिप्रकारश्च	.....	.....	४०– ६१
१२. तन्मात्रभूतसृष्टिप्रकारः	.....	...	६४—६३
१३. अप्तेजसोर्व्यष्टिसृष्टिविशेषः	.....	.....	६४—६५
१४. पुद्गलानामनुगतपृथिव्यादिपरिणामवादभङ्गः	.....	.....	६६—६७
१५. प्रकृतिविकृतिविभागः	.....	....	६७—७१
१६. सर्वतत्त्वानामीश्वराधिष्ठानेनकार्यकरत्वम्	.....	.....	७२—७३
१७ पंचीकरणप्रक्रिया	.....	.....	७३– ७५
१८. अवयव्यारम्भपरमाणुकारणतावादभङ्गः	.....	.....	७५—८२
१९. आनन्त्यकृतदोषपरिहारः	.....	.....	८२—८६
२०. अवयविवादे दोषः, साधकाभावश्च	.....	.....	८६—९१
२२. स्वपक्षसाधकोपन्यासेन अवयविवादभङ्गः	.....	.....	१०१—१०४
२३. देहादेः पांचभौतिकत्वम्	.....	.....	१०५—१०८
२४. सांख्यसत्कार्यवादभङ्गः	.....	.....	१०८—१२६
२५. वैनाशिकमतभङ्गः	.....	.....	१२७—१३३
२६. एकत्र तत्त्वेदन्त्वानन्वयनिरासः	.....	.....	१३३—१३३
२७. प्रत्यक्षेण क्षणिकत्वसिद्धिभङ्गः	.....	.....	१३६—१३९
२८. नाशगतध्रुवभावित्वविवेचनम्	.....	.....	१३९—१४३
२९. क्षणिकत्वानुमाने प्रतिकूलतर्कः	.....	.....	१४३—१४५
३०. क्षणभङ्गसाधकनिरासः	.....	... .	१४५—१५५
३१. चार्वाकोक्तकार्यकारणभावभङ्गस्य निरासः	.....	.....	१५५—१६९
३२. इन्द्रियाणां भौतिकत्वाहङ्कारिकत्वनिरासः	.....	.....	१७०—१७६

३३. एकादशेन्द्रियसिद्धिः	.....	.....	१७७—१८१
३४. अन्तःकरणवैविध्यभङ्गः	.....	.....	१८१—१८५
३५. एकेन्द्रियवादभङ्गः	.....	.....	१८५—१८८
३६. इन्द्रियाणां सूक्ष्मत्वम्	.....	.....	१८८—१९४
३७. चक्षुरादेः प्राप्यकारित्वम्	....	.....	१९४—२०१
३८. शब्दग्रहणविषये विशेषः	.....	.....	२०२—२०५
३९. आकाशनिरूपणम्	.....	.....	२०६—२०८
४०. आकाशस्यास्मदादिप्रत्यक्षविषयत्वम्	.....	.....	२०९—२११
४१. आकाशस्यानुमेयत्वभङ्गः	.....	.....	२१२—२१३
४२. आकाशस्यावकाशप्रदत्वनिरूपणम्	.....	.....	२१३—२१५
४३. आकाशस्यावरणाभावमात्रत्वभङ्गः	.....	.....	२१५—२२४
४४. आकाशादेरनित्यत्वाव्यापित्वादि	.....	.....	२२५—२२६
४५. दिशस्तत्त्वान्तरत्वाभावः	.....	.....	२२७—२२९
४६. दिशां वियादित्वायोगभङ्गः	.....	.....	२२९—२३१
४७. दिशोऽनन्यत्वे श्रुत्यविरोधः	.....	.....	२३१—२३३
४८. वायुनिरूपणम्	.....	.....	२३३—२३५
४९. वायोः प्रत्यक्षत्वम्	.....	.....	२३५—२३६
५०. प्राणस्य वायुविशेषत्वम्	.....	.....	२३७—२३९
५१. प्राणस्यानिन्द्रियत्वम्	.....	.....	२४०—२४२
५२. तेजोनिरूपणम्	.....	...	२४२—२४३
५३. प्रभायाः प्रभावदवयवातिरेकत्वतेजस्त्वे;	.....	.....	२४३—२४५
५४. प्रभाविषयग्रन्थद्वयगमनिका	.....	.....	२४५—२४८
५५. स्थिरास्थिरतेजोविभागः	.....	.....	२४५—२५०
५६. हेमादेस्तैजसत्वोक्तितात्पर्यम्	.....	.....	२५०—२५३
५७. तमसः पार्थिवत्वम्	.....	.....	२५४—२५८
५८. तमसः आलोकाभाव-आरोपितनीलरूपवादभङ्गः		.....	२५८—२६१
५९. भूभ्रमणपतनपक्षभङ्गः	.....	.....	२६३—२६८
६०. भूपरिमाणादिवाक्येषु परस्परविरोधपरिहारः	.....	.....	२६८—२७०
६१. आकाशाद्यतिरिक्तकालसिद्धिः	.....	.....	२७०—२७२
६२. कालस्येश्वरैक्यशङ्कानिरासः	.....	....	२७२—२७४
६३. कालोत्पत्तिवादनिरासः	.....	.....	२७४—२७६
६४. कालप्रत्यक्षत्वम्	.....	.....	२७६—२८१
६५. कालस्यावच्चेदकप्रकार-विभुत्व-सर्वकार्यहेतुत्वानि		.....	२८१—२८६
६६. सर्वतत्त्वस्थितिप्रवृत्तीनामीश्वरेच्छायत्तत्वम्	...	.....	२८६—२८७

६७. आत्मनो देहातिरिक्तत्वम् .... २८९—३२३
६८. आत्मन इन्द्रियाद्यतिरेकः .... ३०३—३१४
६९. आत्मनो बुद्ध्यतिरिक्तत्वम् .... ३१४—३१५
७०. आत्मनः स्वयंप्रकाशत्वम् .... ३१५—३२०
७१. प्रत्यक्त्वादिप्रकारः .... ३२१—३२४
७२. आत्मनः कर्तृत्वादि .... ३२४—३२७
७३. यत्नसाफल्यम् .... ३२७—३२८
७४. औपाधिकभेदवादनिरासः .... ३२८—३३३
७५. ब्रह्मस्वरूपस्वाभाविकांशजीवभेदभङ्गः .... ३३३—३३५
७६. सर्वशरीरैकजीववादनिरासः .... ३३५—३३७
७७. उपदेशानुपपत्त्या मोक्षानुपपत्तिः .... ३३८—३३९
७८. एकशरीरैकजीववादभङ्गः .... ३४०—३४३
७९. ब्रह्मप्रतिछन्दजीववादभङ्गः .... ३४३—३४६
८०. आत्मानित्यत्वादिवादानामध्यक्षविरोधः .... ३४६—३५७
८१. जीवविभुत्वभङ्गः .... ३५१—३५६
८२. जीवस्याणुत्वे प्रमाणम् .... ३५६—३५८
८३. आत्मविषये जैनाभिमतदेहपरिमाणवादभङ्गः .... ३५८—३६७
८४. संसरतां प्रत्यापत्तिहेतुविशेषः .... ३६८—३६९
८५. मुमुक्षोत्पत्तिप्रकारः .... ३७०—३७१
८६. नित्य संसारिसदसद्भावौ .... ३७१—३७३
८७. पक्षद्वयोक्तप्रसङ्गपरिहारः .... ३७४—३७५
८८. वेदनोदेर्भक्तौ विश्रान्तिः ... . ३७५—३७८
८९. भक्तिस्वरूपतन्मोक्षोपायत्वे .... ६७८—३८०
९०. विद्याभेदतद्विकल्पादिः .... ३८०—३८३
९१. मोक्षतदितरार्थविद्याविभागः .... ३८३—३८४
९२. कर्मणां विद्योपकारकत्वप्रकारः .... ३८५—३८६
९३. विद्यायाः कर्मकर्तृसंस्कारत्वभङ्गः .... ३८६—३८८
९४. वर्णाश्रमधर्माणामैकान्त्यविरोधपरिहारः .... ३८८—३९०
९५. वर्णाश्रमादिधर्मस्वरूपत्यागभङ्गः .... ३९०—३९१
९६. सर्वाश्रमिणां ब्रह्मविद्याधिकारः .... ३९२—३९४
९७. नित्यकर्मणां विद्याङ्गत्वाश्रमाङ्गत्वादि .... ३९४—३९५
९८. नित्यकाम्यादि विभागः .... ३९६—३९७
९९. प्रवृत्तिनिवृत्तिविभागः .... ३९८—३९९

१००. त्रैवर्णिकाधिकार-सर्वाधिकार विभागः	... ...	३९९—४०२
१०१. ध्याननियोगवादभङ्गः	... .	४०२—४०३
१०२ निष्प्रपञ्चीकरणनियोगवादभङ्गः	....	४०४—४०७
१०३. वाक्यार्थज्ञानस्य मोक्षोपायत्वभङ्गः	....	४०७—४०९
१०४. शाब्दप्रत्यक्षभङ्गः	....	४०९—४१३
१०५. आत्माद्वैतिन उपदेशानुपपत्तिः	....	४१३—४१४
१०६. तत्त्वमस्यादेः प्रपञ्चबाधभङ्गः	....	४१४— ४१७
१०७. असत्यात्सत्यसिद्धिभङ्गः	....	४१७—४२२
१०८. निवर्तकज्ञाननिवर्तकानुपपत्तिः	....	४२२—४२४
१०९. निवर्तकज्ञान वेद्यानुपपत्तिः	....	४२४—४२५
११०. प्रपञ्चनिवृत्त्यनुपपत्तिः	....	४२६—४२७
१११. निवर्तकज्ञानाधारानुपपत्तिः	... .	४२७—४२९
११२. विद्यायाः पापनाशकत्वोपपत्तिः	... .	४२९—४३२
११३. त्रैवर्गिकसुकृतस्यापि विद्यानाश्यत्वम्	....	४३३—४३४
११४. प्रामादिकोत्तराधाश्लेषोपपत्तिः	....	४३५—४३७
११५. पुण्यस्याप्यलेषः	... .	४३७—४३८
११६. प्रियाप्रिययोः शत्रुमित्रयोः संक्रमः	....	४३८—४४०
११७. प्रियाप्रिययोः विद्वत्कर्मफलसमानसृष्टेः स्वकर्मफलत्वम्	.....	४४० - ४४१
११८. आतिवाहिकक्रमवल्लप्तिः	....	४४१ ४४४
११९. मुक्तधीविकासस्य नित्यत्वम्	....	४४३—४४५
१२०. मुक्तस्यैच्छिकशरीरयोगानियमः	....	४४५—४४६
१२१. पराधीनस्यापि मुक्तस्येच्छाविहतिराहित्यं	....	४४६—४४८
१२२. निरुपाधिकब्रह्मानुभवस्य दुःखरहितनिरतिशयानन्दत्वं	.....	४४८—४५४
१२३. नित्यसूरिसिद्धिः, नित्यमुक्तेश्वराणामपि भोगसाम्य च	.....	४५४—४५६
१२४ मुक्तानुभवस्य समानभोगत्वलक्षणसायुज्यैकरूपत्वम्	....	५५६—४५९
१२५ पुनरावृत्तिप्रसङ्गपरिहारः	....	४५९ ४६१
१२६. पाषाणवन्मोक्षभङ्गः	....	४६१—४६५
१२७. समीक्षोक्तसंसारानुवादः	....	४६५—४६८
१२८. सांख्यसंसारमोक्षादिनिरासः	... .	४६८—४७४
१२९. जीवन्मुक्तिभङ्गः	... .	४७४—४७५
१३०. परोक्तबाधितानुवृत्तिभङ्गः	....	४७५—४७७
१३१. परमते विरुद्धानामर्थानां मोक्षविरुद्धत्वप्रतिपादनम्	.....	४७७—४७९

॥ श्रीः ॥

॥ श्रीलक्ष्मीहयवदनपरब्रह्मणे नमः ॥

कवितार्किकसिंह-सर्वतन्त्रस्वतन्त्र-श्रीमन्निगमान्तमहादेशिकप्रणीतः

तत्त्वमुक्ताकलापः

जडद्रव्यसरः

श्रीमान् वेङ्कटनाथार्यः कवितार्ककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

लक्ष्मीनेत्रोत्पलश्रीसततपरिचयादेष संवर्धमानो
नाभीनालोकरि[ङ्ग]ङ्गन्मधुकरपटलीदत्तहस्तावलम्बः ।
अस्माकं संपदोघानविरलतुलसीदामसंजातभूमा
कालिन्दीकान्तिहारी कलयतु वपुषः कालिमा कैटभारेः ॥ १ ॥

सर्वार्थसिद्धिः

जयति सकलविद्यावाहिनीजन्मशैली जनिपथपरिवृत्तिश्रान्तविश्रान्तिशाखी ।
निखिलकुमतिमायाशर्वरीबालसूर्यो निगमजलधिवेलापूर्णचन्द्रो यतीन्द्रः ॥

ताराकल्पे स्फुरति सुधियां तत्त्वमुक्ताकलापे
दूराद्वृत्त्या दुरधिगमतां पश्यतां सर्वसिद्धयै ।
नातिव्यासव्यतिकरवती नातिसंकोचखेदा
वृत्तिस्सेयं विशदरुचिरा कल्प्यतेऽस्माभिरेव ॥

आरिप्सितस्य प्रबन्धस्याविघ्नपरिसमाप्त्यादिसिद्धयै मङ्गलमाचरन्नर्थाद्वक्ष्यमाणं द्रव्याद्द्रव्यविभागं प्रतितन्त्रविशेषांश्च संग्रहेण सूचयति—**लक्ष्मीति** । *यज्ञविद्येत्यादिना सर्वविद्यानां तादधीन्योक्त्या सा ख्याप्येति लक्ष्मीरादौ संकीर्त्यते । नित्ययुक्तत्वसूचनाय सततपरिचयोक्तिः, नाभीत्यादिना पद्मभुवः कार्यत्वकर्मवश्यत्वसूचनात्ततोऽर्वाचामनीश्वरत्वं कैमु[तिक] त्यसिद्धम् । **अस्माकमिति** । जीवानामीश्वरादन्योन्यं च भेदः, प्रत्यक्त्वमहंशब्दार्थत्वं च प्रख्याप्यते । तेन स्थालीपुलाकन्यायेन परमतनिरासमप्युदाहरति—**संपदोघानिति** । तत्त्वज्ञानादिकाः स्वप्राप्तिपर्यन्तास्सिद्धिपरम्पराः । अविरलेत्यादिना सत्त्वाधिकप्रशस्ततमद्रव्यार्च-

नीयतयाऽन्येभ्यो व्यावर्तनीयत्वमनुवर्ण्यते । कालिन्दीकान्तिहारीत्यनेन तद्गुणानां परगुणतिरस्कारकत्वमुपलक्ष्यते । कैटभारेर्वपुष इति व्यतिरेकविभक्त्या शुद्धसत्त्वमयविग्रहयोगस्त[स्यस्व] त्स्वरूपादन्यत्त्वं च स्थाप्यते । वपुषः कालिमेति द्रव्याद्रव्यविभागप्रदर्शनार्थम् । एवं जडाजडाद्यपि यथास्थानमूह्यम् ॥ १ ॥

॥ श्रीमते हयग्रीवाय नमः ॥

श्रीसर्वार्थसिद्धिव्याख्या आनन्ददायिनी

श्रीमान् वेदान्तवेद्यः शुभगुणनिलयो निस्समस्सर्वदोष-
प्रत्यर्थीभूतमूर्तिः चिदमितमहिमानन्दसत्यस्वरूपः ।
सृष्टिस्थित्यन्तलीलः सकलचिदचितां मोक्षदस्सर्वविद्या-
वेद्यो वागीशमूर्तिः वृषभगिरिपतिः श्रेयसे स्यात्सदा नः ॥ १ ॥

जरीजृम्भत् स्तन्भादुदयगिरिशृङ्गादिव रविः
विभिन्दानो रक्षस्तिमिरपटलीं यः कररुहैः ।
वितन्वन्नानन्दं मृगपतिनराकारघटितः
स नश्श्रेयो देयादमृतफलवल्लीसहचरः ॥ २ ॥

आराधनार्थं वृषशैलभर्तुः घण्टा मुदा पद्मभुवा प्रयुक्ता ।
यद्रूपमास्थाय जगन्त्यरक्षत्तमेव वेदान्तगुरुं नमामि ॥ ३ ॥

प्रतिमतकथकधुरन्धरविद्याहङ्कारतूलवातूलः ।
सकलजनवन्दनीयो भवतु मुदे मे महागुरुर्नित्यम् ॥ ४ ॥

कुशिककुलजलधिचन्द्रो निगमान्तगुरुश्श्रीनिवासो नः ।
जयति यतिराजदर्शितसिद्धान्ताम्भोजमोदकरभानुः ॥ ५ ॥

आत्रेयवंशदुग्धाब्धिप्रालेयांशुं कलानिधिम् ।
सुराचार्यसमप्रज्ञमप्पलाचार्यमाश्रये ॥ ६ ॥

श्रीवत्सगोत्राम्बुधिमध्यदेशात् बभूव चन्द्रो नरसिंहनामा ।
तस्यात्मजः साधुजनैकसेवी नृसिंहदेवः प्रथितो धरायाम् ॥ ७ ॥

तोतारम्बातनयः पौत्रश्श्रीदेवराजस्य ।
दौहित्रः कुशिककुलश्रीभाष्यश्रीनिवासस्य ॥ ८ ॥

अप्रसिद्धस्य पक्षस्य विस्तरेण प्रकाशिकाम् ।
सर्वार्थसिद्धिसट्टीकां करोम्यानन्दवल्लिकाम् ॥ ९ ॥

इह खलु कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रो वेदान्ताचार्यापरनाम । श्रीमान् वेङ्कटनाथार्यः तत्वहितपुरुषार्थज्ञानहीनानवलोक्य सञ्जातकारुण्यः तद्रक्षणाय प्राचीनप्रबन्धेषु संक्षिप्तान् विप्रकीर्णांश्च सङ्कलय्य तत्वमुक्ताकला-

पाख्यपद्यरूपप्रबन्धेन निरूप्य तस्य दुरधिगमतामवलोक्य स्वयमेव व्याख्यास्यन् निर्विघ्नपरिसमाप्तिप्रचयगमनाय शिष्टाचारपरिप्राप्तं गुरुप्रकाशनरूपं मङ्गलमारचय्य शिष्यशिक्षार्थं निबध्नाति—**जयतीति** ॥

ताराकल्पे—नक्षत्रसदृशे। दूराद्वृत्या—नक्षत्रपक्षे दूरस्थित्येत्यर्थः। 'दूरान्तिकार्थेभ्यो द्वितीया च' इति सप्तम्यर्थे पञ्चमी। ग्रन्थपक्षे वृत्तिः—व्याख्या वृत्त्या इति षष्ठी; वृत्तेर्दूराद्धेतोः—वृत्त्यभावादिति यावत्। यद्वा कर्तरि तृतीया। वृत्त्या—क्रमदूरत्वादित्यर्थः। दुरधिगमत्वं एकत्र अप्राप्तिः अपरत्राज्ञानम्। **व्यासो**—विस्तरः। **व्यतिकरः**—सङ्कीर्णता। **खेदा**—खिद्यमाना कर्मणि घञ्। **स्थानमिति**—अविरलतुलसीत्यादौ ॥ १ ॥

तत्त्वमुक्ताकलापव्याख्या अक्षरार्थः

श्रीमते श्रीनिवासपरब्रह्मणे नमः

श्रीमते रामानुजाय नमः

श्रीमते वेदान्तगुरवे नमः

अजायत यतस्सर्वं प्रजापतिमुखं जगत्।
अजाश्वमेधेऽभिव्यक्तं गजाद्रौ भाति तन्महः ॥ १ ॥

अम्बुजभुवा समर्पितमम्बु यदङ्घ्रेश्शिवो दधे मूर्ध्ना।
अम्बुधिकन्याध्युषितं जम्बुपुरीशं तमाश्रये देवम् ॥ २ ॥

यदपाङ्गतरङ्गसङ्गताङ्गस्तुलनामाङ्गिरसेन याति लोकः।
तमभङ्गुरमानने तुरङ्गं कमलोत्सङ्गमुपैमि वागधीशम् ॥ ३ ॥

रामानुजाय मुनये सीमातीतानतीरहं विदधे।
क्षेमाय यो जनानां भूमावाविश्चकार परमार्थम् ॥ ४ ॥

त्रय्यन्तरङ्गसूक्तिस्त्रय्यन्तगुरुस्तुरङ्गवदनोऽन्यः।
मय्यन्तराविशन्नक्षय्यं तम आन्तरं शमं नयतु ॥ ५ ॥

नत्वा नृसिंहसूरीन्द्रं मत्वा तन्मुखतः श्रुतम्।
तत्त्वमुक्ताकलापार्थं तत्त्वमत्र प्रकाश्यते ॥ ६ ॥

सर्वार्थसिद्धिग्रहणेऽलसाये
मूलाक्षरार्थाधिगमोत्सुकास्युः।
तेषां मुदे सिद्धिमवेक्ष्यतत्त्व-
मुक्ताकलापस्य लिखामि टीकाम् ॥ ७ ॥

श्रीमान् वेङ्कटनाथार्यः प्रारिप्सितस्य प्रबन्धस्य निर्विघ्नपरिपूर्तिसिद्धये स्वेष्टदेवतां स्तुवन् तत्र तत्त्वज्ञानादिसंपदमभ्यर्थयते—**लक्ष्मीति**। अत्र लक्ष्मीत्युपक्रम्य कैटभारेरित्युपसंहारात् लक्ष्मीहयवदनरूपभगवदवतारमूर्तेरनुस्मरणं कृतमित्यपि गम्यते। यथा "यज्ञविद्या महाविद्ये" त्यादिना सर्वविद्याप्रवर्तकत्वोक्त्या लक्ष्म्या इह सङ्कीर्तनं तथा वेदापहारिमधुकैटभसंहारेण तदपहृतनिखिलवेदप्रत्यानयनपूर्वकं ब्रह्मणः पुनस्तदुपदेशेन सर्वविद्याप्रवर्तकतया हयवदनमूर्तेरनुस्मरणमप्यावश्यकमित्याशयः।

विरोधि निरसनाय लक्ष्मीरादौ संकीर्त्यते तस्य तदधीनत्वश्रवणात्। अतएव "यज्ञविद्या महाविद्ये" त्यादिना पुराणरत्ने सर्वविद्यारूपतोक्तिः नित्ययुक्तायास्तस्या **नेत्रोत्पलश्रीसततपरिचयः** सदासंदर्शनात् नेत्रनीलकान्तिसंक्रमः **तत एष संवर्धमान** इत्युक्त्या प्रागेव उपादानपरादिविग्रहरूपस्य कालिम्नः—मात्रयाऽनुवृत्तिरस्तीति गम्यते।

शुद्धस्फटिकसङ्काशेऽपि तद्वपुषि मात्रया तदुपादानपरविग्रहादिरूपानुवृत्तिसंभावनया स्फटिके जपासन्निधिना लौहित्यप्रत्ययवत् लक्ष्मीनेत्रकान्ति सन्ततिसन्ततानुवृत्या कालिमानुसन्धानमपि नानुपपन्नम्॥

तत्रादिमे पदे सततपरिचयेत्युक्त्या लक्ष्म्याः नित्ययोगस्सूचितः। एष संवर्धमान इत्युक्त्या स्वतएव मात्रया विद्यमान इति गम्यते। **नाभीनालीकेत्यनेन** नाभिकमलोत्पन्नब्रह्मादिस्तम्बपर्यन्तजगत्कारणत्वं सूचितम्। तत्र रिङ्खन्मधुकरपटली—तदवकाशापर्याप्त्या—तदुपरि भ्रमतां अमितानां मधुव्रतानां मण्डली। तया **दत्तहस्तावलम्बः**—यथा रूपान्तरे निमग्नो न भवेत् तथा समुद्धृत इति भावः।

अस्माकमित्यनुबन्धिनोऽप्यन्तर्भाव्य बहुवचनम्। **संपदोघानिति**। तत्त्वज्ञानादिमोक्षार्थपर्यन्तसपत्परम्परोत्कीर्तनं। **कलयत्वित्यनेन** तदन्वयः। **अविरलेति** पादादिमौलिपर्यन्ततुलसीमालालङ्कारेण लब्धातिशय इत्यर्थः। अलङ्कारवैलक्षण्यादलङ्कार्यवैलक्षण्यस्यापि लाभः। उक्तातिशयलाभेन सर्वतेजसां छादकतामाह—**कालिम्नीति कलयतु**—तनोतु **वपुषः** अप्राकृतविग्रहस्य **कालिमा** नीलवर्णः।

कैटभारेरिति! मधुकैटभदैत्यसंहारेण तदपहृतनिखिलवेदप्रत्यानयन पूर्वकं ब्रह्मणः—पुनस्तदुपदेशादिना महोपकारिणः हयवद्नरूपेणावतीर्णस्य विष्णोरिहानुस्मरणं क्रियते।

अत्र भगवतः श्रीनित्ययोगः निषेव्यत्वं सर्वकारणत्वम् सर्वस्मादुत्तमत्वं बहुभ्यो—जीवेभ्यो भेदः मोक्षपर्यन्त (संपत्) फलप्रदत्वं सत्वाधिकद्रव्यार्चनीयतया सर्वाधिकत्वं परगुणतिरस्कारकगुणबहुलदिव्यमङ्गलविग्रहादियोगः तत एव द्रव्याद्रव्य जडाजडादिभेदाः' इत्यादयः वक्ष्यमाणाः बहवोविषयास्संग्रहेण सूचिता भवन्ति॥ १॥

नानासिद्धान्तनीतिश्रमविमलधियोऽनन्तसूरेस्तनूजो
वैश्वामित्रस्य पौत्रो विततमखविधेः पुण्डरीकाक्षसूरेः।
श्रुत्वा रामानुजार्यात्सदसदपि ततस्तत्त्वमुक्ताकलापं
व्यातानीद्वेङ्कटेशो वरदगुरुकृपालम्भितोद्दामभूमा ॥ २ ॥

सर्वा०। चिकीर्षितस्य श्रद्धेयत्वाय वक्तृसम्प्रदायवैलक्षण्यं दर्शयति **नानेति**। सत्—प्रामाणिकं मुमुक्षोरुपादेयं च; तदन्यदसत्। सतस्सत्त्वेनासतश्चासत्त्वेन श्रवणमिहेष्टम्, ततः—श्रवणादेव हेतोः ॥ २ ॥

आनन्द०। ननु प्रारिप्सितं विहाय नानासिद्धान्तेत्यादिना स्वमहिमवर्णनमनुचितमित्यत्राह—**चिकीर्षितस्येति**। सदसतोर्वैपरीत्येन श्रवणे श्रद्धेयत्वं न स्यादित्यत्राह—**सत**। **व्यातानीदिति**—आशंसायाम्; कर्तुमाशंसत इत्यर्थः। सङ्कल्पमात्रेण ग्रन्थस्य सिद्धत्वं मत्वा भूतनिर्देशः ॥ २ ॥

अक्ष०। अत्र प्रेक्षावतां श्रद्धेयत्वाय वक्तृसंप्रदायवैलक्षण्यं दर्शयन् चिकीर्षितं प्रतिजानीते **नानेति**-नानाभूता ये सिद्धान्ताः तेषां नीतयः यथा—नानाभूताश्च याः सिद्धान्तनीतयः तासु परिश्रमेण परिचयेन विमला संशयविपर्ययादिरहिता धीर्यस्य। **अनन्तसूरेस्तनूजः**। **वैश्वामित्रस्य**—विश्वामित्रकुलोद्भूतस्य। **विततमखविधेः** विस्तृतयज्ञानुष्ठानस्य। **पुण्डरीकाक्षसूरेः पौत्र**। एतावता ज्ञानानुष्ठानविख्यातपितृपितामहवत् स्वस्याऽपि यथावस्थिततत्त्वज्ञानार्हता निदर्शिता।

अथ मातुलकुलवासात् विशेषज्ञतामाह **श्रुत्वेति**। **रामानुजार्यात्**—वादिहंसाम्बुवाहार्यात्। **सदसदपि** सत् प्रामाणिकं असत् अप्रामाणिकञ्च **श्रुत्वा** आकर्ण्य। सतः तेन रूपेण श्रवणं उपादानाय कल्पते असतः तेन रूपेण श्रवणमपि हानार्थमुपयुज्यतएवेतिभावः। **ततः** श्रवणादेवहेतोः। **तत्त्वमुक्ताकलाप**—तत्त्वानां जडजीवेश्वरबुद्धयद्रव्याणां यथावस्थितानामेव निर्दोषाणां मुक्तामणीनामिव धारणार्हतया सुसंगतं संग्रथनात् तन्नामकं ग्रन्थरूपं भूषणं। **व्यातानीत्**—कर्तुमाशंसत इत्यर्थः। **वेङ्कटेशः**—वेङ्कटाद्रीशावताररूपतया तन्नामधेयः। प्राचार्यानुग्रहेण लब्धातिशयमप्याह—**वरदेति वरदगुरोः** वात्स्यवरदार्यस्य। तथा भगवतो वरदस्य क्षीरदाननिबन्धनेन मातृत्वेन गुरुभूतस्य। कृपया **लम्भितः** प्रापितः। **उद्दामभूमा** बालभावादेव ग्रहणधारणातिशयदर्शनविस्मितेन "प्रतिष्ठापितवेदान्त" इत्याद्यनुग्रहकरणात् निस्सीममहिमा यस्य तथोक्त इत्यर्थः।

एवमाजानसिद्धतत्वाधिगमनैपुण्यस्यापि प्रबन्धुः आचार्यप्राचार्यप्रसादातिशयेन पुलस्त्यवसिष्ठवरप्रदानेन पराशरस्येव श्रद्धेयतद्वाग्विलासत्वं सिद्धमिति भावः ॥ २ ॥

प्रज्ञासूच्याऽनुविद्धः क्षतिमनधिगतः कर्कशात्तर्कशाणा-
च्छुद्धो नानापरीक्षास्वशिथिलविहितो मानसूत्रे निबद्धः ।
आतन्वानः प्रकाशं बहुमुखमखिलत्रासवैधुर्यधुर्यो
धार्यो हेतुर्जयादेः स्वहृदि सहृदयैस्तत्त्वमुक्ताकलापः ॥ ३ ॥

सर्वा० । प्रबन्धस्य स्वरूपातिशयादपि सुधीभिस्स्वीकार्यत्वमाह**प्र ज्ञेति** । ज्ञातस्यातिशयाधायिनी धीः प्रज्ञा । कलापस्यानुविद्धत्वादि प्रत्येकद्वारा । तत्त्वानां प्रज्ञया अनुविद्धत्वं सम्यङ्निर्धारितत्वम् । रत्नान्तरेषु शाणक्षतिसंभवो न मुक्तासु । प्रमाणतर्कैर्यथात्म्यान्वेषणं परीक्षा । तन्नानात्वं तर्कादिभेदात् । मुक्तासु स्वानुगुणपरिमाणयुक्तं सूत्रं मानसूत्रम् । अन्यत्र प्रमाणमेव सूत्रं तस्याशिथिलविहितिः—निर्बाधत्वेन विशेषतो धीस्थत्वम् । प्रकाशम्—आलोकं बोधं च । बहुमुखम्—सर्वतोदिक्कं सर्वविषयं च । त्रासो मणिदोषः प्रतिपक्षाद्भीतिश्च । जयादेरित्यादिशब्देन क्वचिदैश्वर्यादेरन्यत्र तत्त्वनिर्णयस्य च संग्रहः । हृच्छब्दो वक्षश्चित्तं च वदति । सहृदयैः—सारासारविवेचनार्हहृदयवद्भिः । धार्यः—क्वचिदाभरणतयाऽन्यत्राप्रमोषेण ॥ ३ ॥

आनन्द० । प्रबन्धातिशयवर्णनमपि प्रारिप्सताननुगुणमित्यत्राह–**प्रबन्धस्येति**-शुद्धो नानापरीक्षास्वित्यत्र 'भ्रम्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा' इति स्रग्धरालक्षणे मुनियतिमत्त्वमुक्तमिति तदभावो नाशङ्क्यः; तद्व्याख्याने—'स्वरसन्ध्याप्तसौन्दर्ये यतिभङ्गो न दोषभाक् इत्यभिधानात् । अत्र स्वरसन्धिलब्धसौन्दर्यसत्वान्न दोष इति भावः ॥ ३ ॥

अक्ष० । अथास्य प्रबन्धस्य स्वरूपतोपि वैलक्षण्यमाह–**प्रज्ञेति** । अत्र तत्वमुक्ताकलाप इत्यनेनायं प्रबन्धो मुक्ताहारश्चोच्यते । उभयत्र योजनीयानि विशेषणानि । प्रकृष्टा ज्ञप्तिः मेयस्यातिशयावहा धीः । सैव सूची तया । **अनुविद्धः** तत्वानामनुवेधनं प्रत्येकं सम्यङ्निधारणं । मुक्तानान्तु सरंध्रीकरणं अन्यथा निबन्धनानुपपत्तेः । यथा तत्वानां तर्केण न बाधप्रसक्तिः तथा मुक्तानामपि न शाणेन क्षतिर्भवितु मर्हति स्वत एवमसृणीभूतत्वादित्याह—**क्षतिमनधिगत इति** प्रमाणतत्वादिना निर्दोषत्वान्वेषणं परीक्षा—तथाऽन्वेष्षणेऽपि दोषस्याऽनुपलम्भात् निर्दोषस्सिद्ध इत्याह–**शुद्ध इति** । **अशिथिलविहिते** बाधप्रसङ्गरहिते क्लेदनानर्हे । **मानं** प्रमाणमेव सूत्रं स्वानुगुणपरिमाणवत् । तत्र । निबद्धः परस्परसंकरानर्हतया निवेशित इत्यर्थः । **प्रकाशं** बोधं आलोकञ्च । **बहुमुखं** सर्वविषयं बहु देशव्यापिनं । **आतन्वानः** विस्तृतं विदधानः । **अखिलानां त्रासानां** प्रतिपक्षेभ्यो भयानां मणिदोषाणाञ्च । **वैधुर्यस्य** अत्यन्ताभावस्य । **धुर्यः** उद्वहनसमर्थः । **जयादेः** प्रतिपक्षविजयादेः । आदिशब्देन तत्वफुरणस्य ऐश्वर्यस्य च संग्रहः । **हेतुः** संपादकः । **स्वहृदि**—आत्मनो-

मनसि वक्षसिच । **सहृदयैः** सारासारविवेकार्हहृदयैः । **धार्यः** न विस्मरणीयः सर्वदा भूषयितव्यः धारणीयश्चेत्यर्थः ॥ ३ ॥

शिष्टा जोवेशतत्त्वप्रमितियुतपरोपासना मुक्तिहेतुः
शक्यस्तत्तत्प्रकारावगतिविरहिभिर्नैव याथात्म्यबोधः ।
ते ते चार्था विदध्युः कुमतिविरचितास्तत्त्वबोधोपरोधं
तस्मान्निर्धूतसर्वप्रतिमतविमतिं साधये सर्वमर्थम् ॥ ४ ॥

सर्वा० । नन्वपवर्गसिद्धौ यदन्तरङ्गं तदेव विशदं तदर्थिभिरवगन्तव्यम्, तावदेव शिष्यादिभ्योऽपि प्रवर्तितव्यम्, किमन्यैरिह कीर्त्यमानैरित्यत्राह **शिष्टेति** । शिष्टा—चोदितेत्यर्थः । जीवेशावेव तत्त्वे जीवेशतत्त्वे; तयोः प्रमितिरिहागमजन्या । परोपास्तेस्तत्त्वज्ञानमितिकर्तव्यता, नतु स्वयं साधनम् । प्रमितियुता—प्रमितिजनितानुस्मृतिपूर्विकेत्यर्थः । तदभिप्रायेणोक्तं जीवपरमात्मयाथाम्यज्ञानपूर्विकेत्यादि । परोपासनेति सर्वविद्याभिप्रायं, परस्य ब्रह्मण उपासनेति वा । **शक्य** इत्यादि— न हि द्रव्याद्रव्यविभागाभावे शिष्टोपासनमूलकतत्त्वप्रतीतिसिद्धिः । तत्त्वनिरूपणाभावे च तत्त्वनिर्णयोपयुक्तयोस्तर्कानुमानयोर्व्याप्तिः शङ्काकलङ्किता स्यात् । परोक्तानुमानानामन्यतरासिद्ध्यनैकान्तिकत्वाद्युद्भावनं च कथं स्यात् ? परो वा कथमस्मत्सिद्धान्तानभिज्ञः कथायामस्माभिरधिक्रुर्यात् ? परकल्पितार्थभङ्गेन तदहङ्कारखण्डनं च तत्त्वाध्यवसायसंरक्षणार्थम् । तत्तदिति प्रस्तुतौ जीवेशौ गृह्येते । अथवा तत्तत्प्रकृत्यादिप्रकारबोधाभावे तत्तत्प्रतिसंबन्धिकं तयोरपि याथात्म्यं नावगम्येत । ते ते चार्थाः ब्रह्मविवर्तपरिणामभिन्नाभिन्नत्वादयः । कुमतिविरचिताः—कुदृष्टिभिः, कल्पिताः, भ्रान्तिविजृम्भिता इति वा । अत एव कुमतिभिरर्थ्यन्त इत्यर्थाः न तु परमार्थाः । प्रतिमतैर्विमतिः—विवादः, तत्प्रसूता वा विरुद्धबुद्धिः । सर्वमर्थं—मुमुक्षुभिर्ज्ञातव्यम् । परम्परयेत्यर्थः ॥ ४ ॥

आनन्द० । ननु तत्वमुक्ताकलापं व्यातानीत् इति वदता तत्वनिरूपणं विहाय जीवेशज्ञानपूर्वकोपासनाया मुक्तिहेतुत्वप्रतिपादनमनुपपन्नं इत्यत्राह—ननु **अपवर्गसिद्धाविति** ॥

शिष्टेति—शासेः रूपं न तु शिषेरित्याह—**चोदितेत्यर्थ** इति तत्वप्रमितेर्विनष्टत्वात् तद्युक्तत्वं तज्जन्यत्वं वा न संभवतीत्यत्राह **प्रमितिजन्यानुस्मृतिपूर्विकेति** । परविद्यापरत्वं परोपासनाशब्दस्याभिप्रेत्याह— सर्वविद्याभिप्रायमिति— 'स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम्' इति परविद्याप्रकरणाम्नानमुपलक्षणमिति भावः ॥

योगवृत्त्या सर्वविद्यापरत्वमाह—**परस्येति** । तत्तदिति—जीवेशपरत्वे वीप्साया अभावात् द्वन्द्वो वाच्यः; स न युक्तः एकशेषप्रसङ्गादित्यभिप्रायेणाह— **अथवा इति**—केचित्तु 'तत्तदिति प्रकृतौ जीवेशौ गृह्येते' इत्यस्यायमर्थः—तत्त-

दित्यत्र प्रथम तच्छब्देन जीवेशौ गृह्येते। तयोः तत्प्रकारः—तत्तत्प्रकारः; व्यावर्तकत्वेन श्रुतिप्रतिपन्नप्रकारः इति न वीप्साद्वन्द्वौ; अपि तु षष्ठीतत्पुरुषः इत्याहुः। मायिनो विवर्तपक्षः। भास्करस्य परिणामः। यादवस्य भेदाभेदौ। आदिशब्देनासत्कार्यवादाभिव्यक्तिवादक्षणिकत्ववादादयोऽभिमताः। तत्त्वबोधोपरोधकत्वमर्थानां न युक्तं इत्यत्राह **प्रतिमतैरिति** ॥ ४ ॥

अक्ष०। जयादिसाधनत्वेऽपि मुमुक्षूणामनेन किम्प्रयोजनमित्यत्राह—**शिष्टेति** विहितेत्यर्थः।

जीवेति जीवेशावेव तत्त्वे तयोः प्रमितिः यथावस्थितयाथात्म्यज्ञानं तेन युतं तज्जनितानुस्मृतिपूर्विका। **परोपासना** परस्य ब्रह्मणः उपासनं। मुक्तेः हेतुः साधनमित्यर्थः। तथाच मुमुक्षूणामपि मोक्षसाधनोपासनानिष्पादनाय जीवेश्वरनिरूपणमतीवोपकारकमिति भावः। तथापि तत्र द्रव्याद्रव्यनिरूपणं कथमुपयुज्यत इत्यत्राह **शकय इति** तत्तदिति जीवेश्वरावुच्येते। तयोः प्रकारः। तत्र जीवस्य ज्ञातृत्व स्वयंप्रकाशत्व प्रत्यक्त्व नित्यत्वानन्दत्वादयः ईश्वरस्य तु ततोप्यधिकाः सत्यत्व ज्ञानत्वानन्तत्वानन्दत्वविमलत्व-श्रीपतित्व जगत्कारणत्वादयः तेषां। **अवगतिविरहिभिः** ज्ञानशून्यैः। **याथात्म्यबोधः** जीवेश्वरयोः यथावस्थित प्रकार विशिष्टनिर्णयो नैव संपादयितुं शकय-इत्यर्थः।

कार्यद्रव्यवर्ग-तत्तद्द्रव्यादिभेदनिरूपणस्य तदुपयोगेऽपि प्रमाणतर्कतदाभास सांख्यसौगतादि परमतनिरसनादीनां क्वोपयोगइत्यत्राह—**तेत इति**। **कुमतिविरचिताः** कुदुष्टिकल्पिताः। भ्रान्तिभिरारोपिता वा सर्वनित्यत्व क्षणिकत्वाकस्मिकत्व मिथ्यात्वादिरूपाः अर्थाः। **तत्त्वबोधोपरोधं** पूर्वोक्तयाथात्म्यज्ञानप्रतिबन्धं। **विदध्युः** कुर्युः। **तस्मात्** कुमतिकल्पनानामपि तत्त्वज्ञानविरोधकरणार्हत्वात्-तन्निरसनावश्यम्भावे सति कथाप्रसक्तौ स्वपरोक्तसाधनदूषणस्थेम्ने प्रमाण तर्क तदाभासादि बोधनमप्युपयुक्तमेव। अतः **निर्धूतसर्वप्रतिमतविमतिः** निर्धूता-निरस्ता सर्वप्रतिमतविमतिः सांख्यगसौतादिप्रतिवादिविवादः तदधीन विपरीतत्वादिधीः यस्मिन् तथाभूतमेव। **सर्वमर्थं साधये** मुमुक्षुभिः परमपरया—ज्ञातव्यमपि निर्धारयामीत्यर्थः।

अतो मुमुक्षूणामपीह न किञ्चन निरर्थकं वचनमस्तीतिभावः। अतएव एतद्व्याख्यायाः सर्वार्थसिद्धिरिति नामापि सिद्धयतीति हृदयम् ॥ ४ ॥

आवापोद्वापतस्स्युः कतिकति कविधीचित्रवत्तत्तदर्थे
ष्वानन्त्यादस्तिनास्त्योरनवधिकुहनायुक्तिकान्ताः कृतान्ताः।
तत्त्वालोकस्तु लोप्तुं प्रभवति सहसा निस्समस्तान्समस्तान्
पुंस्त्वे तत्त्वेन दृष्टे पुनरपि न खलु प्राणिता स्थाणुतादिः ॥ ५ ॥

सर्वा० तथाऽपि निर्धूतसर्वप्रतिमतविमतिं सर्वमर्थं साधये इत्यशक्योक्तिः, त्रैकालिकसिद्धान्तभेदानन्त्यादित्याशङ्क्योद्घाटनपूर्वकं प्रयोजकशिक्षया कृत्स्नाभीष्ट-

साधनं च शक्यमिति स्थापयति–**आवापेति**– । एकस्मिन्नेव हि दर्शने व्याख्यातृभेदात्केषांचित्प्रमेयानामावापोद्वापौ दृश्येते, यत एकदेशिव्यपदेशः । कविधीचित्रवत्–कवीनां धीभिः कृतं काव्यादिकं कविधीचित्रम्; तद्वन्मतभेदा अप्यनन्तास्संभवन्ति । तत्तदर्थेष्वस्तिनास्त्योरानन्त्यादित्यन्वयः । अस्तिनास्त्योरिति प्रयोगपरम् । कुहना–छद्म । तत्संबन्धिन्यो युक्तयः कुहनायुक्तयो हेत्वाभासच्छलजातिरूपाः ताभिः कान्ताः सम्यक्त्वेनैव भाताः । तत्त्वालोकः—यथार्थाध्यवसायः । प्र [कृ] स्तुतशङ्कानिरासार्थमपेक्षणीयान्तराभावात्सहसेत्युक्तम् । निस्सम इति निरधिकत्वोपलक्षणम् । प्रतिरोधबाधरहित इत्यर्थः । उक्तस्थापकं त्रय्यन्तार्थविशेषव्यञ्जकमप्यर्थान्तरं न्यस्यति–**पुंस्त्व** इति । पुनर्न प्राणिता–संशयविपर्ययसामग्रीलोपान्न भासेतेत्यर्थः ॥ ५ ॥ **इति तत्त्वज्ञान प्रयोजनम् ॥**

आनन्द० । ननु तत्त्वनिरूपणं प्रस्तुत्य विशेषदर्शनस्य संशयादिनिवर्तकत्वबोधस्य तत्तत्कल्पनाधीनभ्रमनिवर्तकत्वोक्तिरनवसरग्रस्तेत्यत्राह—**तथा पीति** । ननु अस्तिनास्तीत्यस्तिनास्तिशब्दावुच्येते । तयोर्द्वैरूप्येणानन्त्याभावादित्यत आह—**अस्तिनास्त्योरिति** प्रयोगाणां बहुत्वाद्विषयविषयिभावसंबन्धेनार्थगतत्वमितिभावः ॥ ५ ॥

अक्ष० । एवं निर्धूतसर्वप्रतिमतविमर्ति साधये सर्वमर्थमित्युक्तमशक्यमेव त्रैकालिकानां प्रतिमतानामानन्त्येन ज्ञातुमशक्यत्वादित्याशंकामुद्घाटयति-**आवापेति** तत्वानां तत्स्वभावभेदानां वा सत्वासत्वाद्युपगमभेदेन कियन्तस्सिद्धान्तभेदा भविष्यन्तीत्यत्राह **आवापोद्वापेति** । तत्र अविद्यमानानां संग्रह आवापः । विद्यमानानां परित्याग उद्वापः । तद्भेदात् एकस्मिन्नेव दर्शने तत्राविद्यमानस्याप्यन्यत्र दर्शने विद्यमानस्य कस्यचित् परिग्रहात्तत्र विद्यमानस्यापि कस्यचिदंशस्य परिवर्तनाय परसिद्धान्तभेदानां अन्यान्यसिद्धान्तपरिकल्पनया वहूनां संभवास्स्युः ।

अतएव तत्र एकदेशिव्यपदेशः **कतिकतीति** असंख्याता इति भावः । अत्र दृष्टान्तं दर्शयति **कविधीचित्रवत्** 'एकविषयेऽपि कविधीकल्पितं काव्यादिरूपं बहुरूपं चित्रं' तद्वदिति भावः ।

तत्तदर्थेषु जीवेश्वरद्रव्याद्रव्यादिष्वर्थेषु । अस्ति नास्तीति प्रयोगयोरानन्त्यात् । "सर्वमेव नास्तीति केचित्" "चिन्मात्रमस्ति नेतरदि" त्यन्ये । "रूपादिकमस्ति नतु तदधिकरणं द्रव्य" मित्यपरे । "शरीरमस्ति नतु तदतिरिक्त आत्मे" ति च । "आत्मा परमस्ति नतु ततोन्य ईश्वर इति **कतिचित्** एवंप्रकारेण अस्ति नास्ति प्रयोगानन्त्यात्—अनवधयः अवधिरहिताः कुहनायुक्तयः कपटयुक्तयः उक्त छलजात्यादिवञ्चनोक्तयः ताभिः कान्ताः समीचीना इव भासमानाः । **कृतान्ताः** सिद्धान्ताः असंख्यातास्स्युरितिपूर्वेणान्वयः । इत्थमनन्तानां विधूननमशकयमित्याशंकां—परिहरति—**तत्वालोकस्त्विति**त्यादिना । तुशब्दः शंकितव्यावृत्यर्थः ।

तत्त्वालोकः यथार्थतत्वावबोधः। अशेषानपि **तान्** प्रतिसिद्धान्तान् **लोप्तुं** बाधितुं। **सहसा** इतरापेक्षाविरहादविलंबेन। **प्रभवति** समर्थो भवति। तत्रहेतुगर्भविशेषणं— **निस्सम** इति। निरधिकत्वस्याप्युपलक्षणम्। निस्समाधिकत्वात् तत्र समः सत्प्रतिपक्षः अधिकः बाधः' तयोरन्यतरस्याप्यभावात् विरोधिराहित्येन प्रबल इति भावः। अथ अर्थान्तरन्यासेन उक्तमेवार्थं समर्थयति - **पुंस्त्व इति** पुरोवर्तिनि पुरुषत्वे। **तत्वेन** परमार्थत्वेन। **दृष्टे पुनरपि** पश्चादपि। पूर्ववत् **स्थाणुतादिः** आदिना स्तंभत्वादिपरिग्रहः।

"न खलु प्राणिता नैव जीविष्यति ज्ञानविषयो न भविष्यतीत्यर्थः"। एवं पुरुषसूक्तादिना कारणवस्तुनः पुरुषोत्तमत्वे परमार्थतया निश्चिते रुद्रत्व-विधित्वादि—संशयो नैव भवितुमर्हतीत्यपि गम्यते। बलीयसि यथार्थाध्यवसाये सति— आगामिनामनन्तानामपि विपरीतसिद्धान्तानां अतीतवर्तमान—प्रतिसिद्धान्तन्यायेन अबाधितस्थितिर्न सम्भवतीत्युक्तं भवति ॥ ५ ॥

द्रव्याद्रव्यप्रभेदान्मितमुभयविधं तद्विदस्तत्त्वमाहु-
र्द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ।
अन्त्यं प्रत्यक् पराक् च प्रथममुभयधा तत्र जोवेशभेदा-
न्नित्या भूतिर्मतिश्चेत्यपरमिह जडामादिमां केचिदाहुः ॥ ६ ॥

सर्वा०। अथ निरूप्यमर्थजातं साधर्म्यवैधर्म्यभेदैस्संगृह्य विभज्य च निर्दिशति **द्रव्येति**। अत्र तत्त्वमिति पदार्थमात्रोक्तिः। मितं–प्रमितम्। तथात्वं च सर्वसाधारणम्। तदपि हि सामान्यतः प्रमितम्। अन्ततस्स्वपरनिर्वाहान्नानवस्था। इदं च साधर्म्योक्तिमात्रं व्यवच्छेद्याभावेन लक्षणत्वासिद्धेरित्येके। निर्दिष्टव्यापित्वे सति तदन्यवृत्ति [रहितत्त्वा] विरहाल्लक्षणमपि स्यादित्यन्ये। बाह्यकुदृष्टिव्यावृत्तास्तद्विदः। अत्र तत्तदन्यरूपेण विभागेषु न नीलपीतादिवत्कोटयन्तरावकाशः। द्रव्यत्वात्यन्ताभाववत्त्वरूपेण तदन्यत्वस्य विवक्षितत्वाद्द्रव्यलक्षणं वक्ष्यति। जडमिह स्वगोचरज्ञानत एव प्रकाशनम्। अव्यक्तशब्देन व्यक्तमपि लक्ष्यते तदनन्यद्रव्यत्वज्ञापनार्थम्। प्रत्यक्–स्वस्मै भासमानम्। पराक्–परस्मा एव भासमानम्। भूतिर्विभूतिः, स्वातिशयाधानार्थं नियन्तव्यद्रव्यम्। नित्या भूतिरिति नित्यप्राचुर्यतश्शुद्धसत्त्वमुपलक्ष्यते। इहादिमां–नित्यभूतिम्। केचिज्जडामाहुरिति सयूथ्यमतभेदोक्तिः ॥ ६ ॥ **इति द्रव्यविभागः ॥**

आनन्द० ननु निरूपणे प्रवृत्तस्य तत्वविभागकरणमसङ्गतमित्यत्राह—**अथ निरूप्यमिति**। निरूपणसौकर्याय विभागः कृत इति भावः। **तदपीति** प्रमितत्वमित्यर्थः। ननु प्रमितत्वेऽपि प्रमितत्वे अनवस्थेत्यत्राह–**अन्तत इति**। ननु प्रमितत्वस्य लक्षणत्वं नोपपद्यते इतराप्रसिद्धावितरभेदासाधकत्वादित्यत्राह—इदं चेति। व्यावर्तकत्वाभावेऽपि व्यवहारप्रयोजकत्वाभिप्रायेणाह—**निर्दिष्टेति**—निर्दिष्टं लक्ष्यम्।

लक्ष्यनिष्ठात्यन्ताभावाप्रतियोगित्वं तद्व्यापित्वम् । तदन्यवृत्तित्वनिषेधश्च निर्दिष्टत्वरूपलक्ष्यतावच्छेदकव्याप्यत्वम् । तेन तदन्यस्याप्रसिद्धया तत्प्रयुक्तदोषानवकाशः । केचित्तु—निर्दिष्टं—स्वलक्ष्यम् । स्वलक्ष्यव्यापकत्वे सति तदन्यनिष्ठत्वं तत्तदतिव्यापकेषु प्रसिद्धं प्रकृते निषिध्यते; यथा स्वोपादानगोचरजन्यकृतिजन्यान्यत्वमित्यत्रेत्याहुः ॥

ननु द्रव्यान्यत्वं द्रव्यस्याप्यस्ति घटस्य पटादन्यत्वात् । यथाच तदन्यरूपेण विभागे नीलपीतादिवत् कोटचन्तरमस्त्येवेत्यत आह—**द्रव्यत्वात्यन्ताभाववत्त्वरूपेणेति ।** स्वगोचरं स्वभिन्नमेव; भेदनिबन्धनत्वाद्विषयविषयिभावस्येति भावः ॥ ६ ॥

अक्ष० । अथ तत्वं निरूप्यते–**द्रव्याद्रव्येति** । तत्र तत्वमिति **निरूप्य**पदार्थजातस्योद्देशः । मितमिति तल्लक्षणम् प्रमितमिति तदर्थः । प्रमितत्वं पदार्थसामान्यवृत्ति । प्रमितत्वस्यापि सामान्यतः प्रमितत्वमस्त्येव । क्वचित्स्वपरनिर्वाहक्लृप्त्याच नानवस्थितिः । लक्ष्यतावच्छेदकसमनियतत्वञ्च लक्षणस्य लक्षणम् । तच्च स्वव्यापकलक्ष्यतावच्छेदकव्यापकत्वं । स्वपदं लक्षणपरं अतो लक्ष्येतराप्रसिद्धावपि न क्षतिः । व्यावर्तकस्यैव लक्षणत्वे साधर्म्यमात्रपरमित्युक्तम् । एवं साधारणधर्मवत्तया ज्ञातस्य विभाग उच्यते–**द्रव्याद्रव्यप्रभेदादुभयविधमिति**–द्रव्यत्व द्रव्यान्यत्वे विभाजकधर्मौ तत्र द्रव्यान्यत्वस्य द्रव्यत्वरूप सामान्यधर्मावच्छिन्नप्रतियोगिताकभेदस्यातिरिक्तस्यानङ्गीकारे द्रव्यत्वात्यन्ताभावरूपत्वेन विभाजकत्वं बोध्यम् अतोऽस्याजडत्वेन यत्किञ्चिद्द्रव्यान्य द्रव्यान्तरसाधारणतया द्रव्यत्वविरुद्ध त्वाभावान्नविभाजकत्वानुपपत्तिः ।

तद्विदः तत्वविदः । आहुरित्यन्वयः । द्रव्यस्य लक्षणमनन्तरं वक्ष्यते–इदानीं विभाग माह **द्रव्यमिति** जडमजडमिति द्वेधा विभक्तं द्विविधमित्यर्थः । जडत्वाजडत्वे विभाजकधर्मौ–तत्र जडत्वं स्वविषयकज्ञानादेव प्रकाशमानत्वं अजडत्वं स्वयंप्रकाशमानत्वं । जडं विभजते—**प्राच्यमिति** अव्यवहितपूर्वविभजने प्रथमनिर्दिष्टं जडमित्यर्थः । **अव्यक्तकालौ**–अव्यक्तं प्रकृतिः कालश्चेति जडं द्विविधमित्यर्थः । अत्र अव्यक्तपदेन त्रिगुणद्रव्यं विवक्षितं तेन व्यक्तानामपि संग्रहः । अजडं विभजते–**अन्यमिति** जडाजडविभागे चरमनिर्दिष्टमजडमित्यर्थः । तच्च प्रत्यक् पराक् चेतिद्विविधमित्यर्थः । तत्र प्रत्यक्त्वं स्वस्मै भासमानत्वं, पराक्त्वं—परस्माएव भासमानत्वं । तत्र प्रत्यगर्थं विभजते—**प्रथममिति** । **तत्र** प्रत्यक्परागर्थयोर्मध्ये । पूर्वं विभागवाक्ये प्रथमनिर्दिष्टं प्रत्यक् । **जीवेशभेदात् उभयथा**–जीवो ईश्वरश्चेति उभयविधमित्यर्थः । **अपरं**–अजडं । परागर्थं विभजते–नित्येति–नित्या । **भूतिः** विभूतिः **मतिश्चेति** उभयथा द्विविधमित्यर्थः इह सयूथ्यमतभेदः प्रदर्श्यते–**जडामादिमामिति** आदिमां-अत्र नित्या भूति रिति प्रथमोक्तां नित्यविभूतिं । **जडां**—परेणैव प्रकाश्यामाहुः । तन्मते जडद्रव्यमेव त्रेधा विभजनीयमिति भावः ॥ ६ ॥

तत्र द्रव्यं दशावत्प्रकृतिरिह गुणैस्सत्त्वपूर्वैरुपेता
कालोऽब्दाद्याकृतिस्स्यादणुरवगतिमान जीव ईशोऽन्य आत्मा ।
संप्रोक्ता नित्यमूर्तिस्त्रिगुणसमधिका सत्त्वयुक्ता तथैव
ज्ञातुर्ज्ञेयावभासो मतिरिति कथितं संग्रहाद् द्रव्यलक्ष्म ॥ ७ ॥

सर्वा० । प्रस्तुतस्य द्रव्यस्य तदवान्तरभेदानां च लक्षणमाह–**तत्रेति** ॥ तत्र-द्रव्याद्रव्ययोर्मध्ये । द्रव्यं दशावत्–विकारधर्मवदित्यर्थः । ईश्वरादावपि मूर्तसंयोगा आगन्तुकास्सन्ति । संचरति हि मूर्ते तस्य विभुनश्च संयोगा विद्यन्त एव । प्रकृतिशब्दः प्राग्वद्विकृतीनामप्युपलक्षकः; त्रिगुणशब्दाभिलप्यद्रव्यमित्यर्थः । तत् स्वगुणैरेव लक्षयति–**गुणैरित्यादिना** । इह अव्यक्तकालयोर्मध्ये । त्रिगुणस्य रजस्तमसी पृथग् लक्षणे; सत्त्वं तु बन्धकत्त्वेन विशेषितम् । **कालोऽब्दाद्याकृतिरिति** । उपाधिकृतविभागैरब्दादिव्यवहारविषय इत्यर्थः । तत्तत्परिणामवान्काल इति पक्षोऽपि वक्ष्यते । ईश्वरादचेतनादणोश्च व्यवच्छेदायाणुरवगतिमानित्युक्तम् । ईशोऽन्य आत्मा-अणुव्यतिरिक्तश्चेतन इत्यर्थः । जीवे विभुत्वोक्तिरीश्वरेऽणुत्वोक्तिश्चान्यपरेति सूत्राद्युक्तम् । संप्रोक्ता, तत्परैश्शास्त्रैरिति शेषः । त्रिगुणसमधिका–त्रिगुणद्रव्यादन्या । सत्त्वयुक्ता सत्त्वाख्यगुणविशेषवती । त्रिगुणान्यत्वं कालादेरप्यस्तीति तद्व्यवच्छेदोऽनेन कृतः । एतावन्मात्रेण त्रिगुणसाधर्म्यमित्यभिप्रायेण तथैवेत्युक्तम् । रजस्तमस्समानाधिकरणसत्त्वस्यापि तत्र सत्त्वात्; * सत्त्वं निर्मलत्वात्प्रकाशकमित्यादि समानमिति वा । ज्ञातुर्ज्ञेयावभासो मतिः–अहमिदं जानामीत्यहमर्थाश्रयतया सिध्यन्सकर्मकः प्रकाशो मतिरित्यर्थः । तादृशावस्थायाऽपि तद्विशिष्टं गृह्यते । द्रव्यलक्ष्म–सामान्यतो विशेषतश्चेति शेषः ॥ ७ ॥ **इति द्रव्यतद्विशेषलक्षणम् ॥**

आनन्द० ननु द्रव्यस्यावस्थायोगित्वकथनमयुक्तं द्रव्यादिनिरूपणस्यैव कर्तव्यत्वादित्यभिप्रायेणाह–**प्रस्तुतस्येति**—। दशाशब्दस्यावयवार्थत्वे नित्येष्वव्याप्तिरित्यत्राह–**विकारधर्मवदित्यर्थ** इति–धर्मवत्त्वं लक्षणमित्युक्ते अभावरूपधर्मवति गुणेऽतिव्याप्तिः । भावरूपधर्मवत्त्वमित्युक्ते रूपत्वादिजातिमति पुनरप्यतिव्याप्तिः । अत उक्तं विकारधर्मवत्त्वमिति ।

ननु ज्ञाततावादिमते पुनरप्यतिव्याप्तिः; एकदेशिभिः; शब्दादावपि संख्याङ्गीकाराच्छक्तयङ्गीकाराच्चातिव्याप्तिः । न च गुणादौ शक्तयभावः; कारणत्वानुरोधेन तदावश्यकत्वादिति चेदुच्यते— आगन्तुकधर्मवत्त्वमित्यर्थः । ज्ञाततातिरिक्तधर्म्यनन्तरकालीनोत्पत्तिकधर्मत्वमागन्तुकत्वं विवक्षितं । यद्यपि द्वित्वरूपा संख्या तादृशी; तथाऽपि सा सिद्धान्ते नास्त्येव । तथा शक्तिरपि सहजा; आधेया तु गुणे न; मानाभावात् । सहजाऽपि प्रतिबन्धे गुणादौ न विद्यते; तदपगमे धर्म्यनन्तरमुत्पद्यते इति तथेति शङ्का गुणस्यैवापगमोत्पत्तिभ्यां परिहार्या । यद्यपि–यादृशादेव करतलानलसंयोगाद्दाहः तादृशादेव मणिसमवधाने न दाह इति शक्तेरेवोत्पत्त्यपगमौ;

तथापि प्रतिबन्धकाभावधर्म्यतिरिक्त विशेषकारणतावच्छेदकावच्छिन्नकारणता-प्रतियोगिककार्यतावच्छेदकावच्छिन्नधर्म्यसमानकालीनस्ववर्तमानव्यवहारविषयता-प्रयोजकधर्मानवच्छिन्नधर्मत्वं विवक्षितमिति न दोषः। प्रतिबन्धकाभावश्च धर्मी च प्रतिबन्धकाभावधर्मिणौ ताभ्यामतिरिक्ते वस्तुनि विशेषकारणतावच्छेदकावच्छिन्ना कारणता तत्प्रतियोगिककार्यतावच्छेदकावच्छिन्न इति धर्मविशेषणं। धर्म्यसमाने-त्यारभ्यावच्छिन्नेत्यन्तमपि धर्मविशेषणं। आद्येन शक्तिमादायातिप्रसङ्गनिरासः; धर्म्यनन्तरकालोत्पन्नशक्तेः प्रतिबन्धकाभावधर्मिभ्यां विशेषकारणाभ्यामुत्पन्नत्वात्। द्वितीयेन ज्ञाततामादायातिप्रसङ्गनिरासः; ज्ञाततायाः अतीतधर्म्यादौ स्ववर्तमान-व्यवहारप्रयोजकधर्मावच्छिन्नत्वात्। केचित्तु संयोग एव विकार इत्याहुः। अन्यतर-कर्म संयोगहेतुरस्तीत्याह—**संचरति हीति**। लक्ष्यतावच्छेदकमाह—**त्रिगुणशब्दा-भिलप्येति**। ननु सत्वपूर्वैरित्यत्र सत्वविशिष्टरजस्तमोवत्त्वं लक्षणमिति भाति; तच्चायुक्तं; रजस्तमसोरेव प्रत्येकं लक्षणत्वसंभवात्। नापि प्रत्येकं सत्वस्य; शुद्धसत्वेऽ-तिव्याप्तेः। किञ्च सत्वपूर्वैरिति बहुवचनानुपपत्तिः अन्यपदार्थबहुत्वाभावात् इति चेत्; तत्राह—**त्रिगुणस्येत्यादिना**। 'सर्वादीनि सर्वनामानि' इत्यत्रैव सत्वस्याप्यन्य-पदार्थान्तर्भावान्न बहुवचनानुपपत्तिरिति भावः। कालस्य विकाराभावपक्ष आह—**उपाधीति**। **आकृति**शब्दस्य 'हूतिराकारणाह्वाने' इत्यादौ व्यवहारे आङ्पूर्वस्य कृञोऽनुशासनाद्व्यवहारार्थत्वं वक्तुं युक्तं व्यवहारविषयत्वमब्दत्वाद्युपाधेरप्यस्ती-त्याह—**तत्तदिति ईश्वरादिति**—अणुत्वेनेश्वरव्यावृत्तिः। अवगतिमानित्यचेतन-व्यावृत्तिः। लक्ष्म्या ईश्वरकोटित्वान्नाव्याप्तिः। **अन्य** इत्यस्य जीवलक्षणलक्षिता-दन्यत्वोक्तौ तदन्तर्गतावगतिमद्विशेषणवैयर्थ्यमित्याह—**अणुव्यतिरिक्तश्चेतन** इति। **जीवे इति**—अणोरणीयान् महतो महीयान्' 'स चानन्त्याय कल्पते' इत्यादेः;। 'हृद्यपेक्षया तु मनुष्याधिकारत्वात्' 'निचाय्यत्वादेवं व्योमवच्च' 'उत्क्रान्तिगत्या-गतीनां' इत्यादौ उपासनार्थमौपाधिकाणुत्वादिकमुक्तमिति भावः। **अहमर्थाश्रयतया** इति—**सकर्मकःप्रकाशो** मतिरिति लक्षण। तदर्थस्तु स्वव्यतिरिक्तप्रकाशनियततत्कत्वं नचात्मादौ स्वव्यतिरिक्तप्रत्यक्तादिप्रकाशकत्वादतिव्याप्तिः; आत्मवदेव तस्यापि स्वेनैव प्रकाशात्। अत एव शतदूषण्यां तेषां धर्माणां ज्ञानदृष्टान्तेन स्वप्रकाश-तोक्तिः॥ ७॥

अक्ष०। पूर्वं विभक्तानां द्रव्याणां सामान्यतो विशेषतश्च लक्षणमाह—**तत्रेति** तत्र द्रव्ययोर्मध्ये। द्रव्यसामान्यं दशावत्। दशा नाम अवस्था, आगन्तुः अपृथक्सिद्धो धर्मोऽवस्थेति कीर्त्यते। आगन्तुः अनित्यः आश्रयकालीनप्रावभागप्रतियोगी अपृथक्सिद्धः—पृथक्स्थित्यनर्हः। धर्मः पृथुबुघ्नोदरत्वादिः तद्वत्वं द्रव्य सामान्य-लक्षणमित्यर्थः। नित्यद्रव्येष्वपि अनित्यसंयोगादिसत्वान्नाव्याप्तिः।

अव्यक्तपदोक्तस्य लक्षणमाह-**प्रकृतिरिहेति** इह-द्रव्येषुमध्ये। प्रकृतिः त्रिगुण-द्रव्यसामान्यम् **गुणैस्सत्वपूर्वैरिति**-तद्गुणसंविज्ञानोबहुव्रीहिः सत्त्व रजस्तमोगुणैरु-

पेतेत्यर्थः। अत्र गुणानां प्रत्येकमेवलक्षणत्वं सत्वस्य बन्धकत्वेन विशेषणात् नित्यविभूतौ नातिव्याप्तिः। कालं लक्षयति-**कालइति**। **अब्दादीति** आदिना मासपक्षादि परिग्रहः औपाधिकविभागैः अब्दादिव्यवहारविषयत्वं अब्दादिपरिणामवत्वं वा तल्लक्षणमिति भावः। जीवलक्षणमाह **अणुरिति** अणुत्वेसत्यवगतिमत्वं ज्ञानवत्वं तल्लक्षणं तत्राद्यं ईश्वरवारणाय, अन्त्यमचेतनवारणायेति बोध्यम्। ईश्वरं-लक्षयति **ईशइति अन्य आत्मेति** जीवान्यत्वे सति चेतनत्व मीश्वरलक्षणमिति भावः। तत्र जीववारणाय आद्यं अचेतनवारणाय अन्त्यमितिध्येयम्। नित्यविभूतेर्लक्षणमाह—**संप्रोक्तेति**–तत्परैश्शास्त्रैरिति शेषः। **त्रिगुणसमधिकेति** त्रिगुणभिन्नेत्यर्थः।

सत्वयुक्ता तथैवेति त्रिगुणद्रव्यवदेव सत्वयुक्तेत्यर्थः। त्रिगुणद्रव्यभिन्नत्वेसति सत्वगुणवत्त्वं तल्लक्षणमिति भावः। तत्र त्रिगुणवारणायाद्यं। कालादिवारणायान्त्यमिति भाव्यम्। मतिं लक्षयति—**ज्ञातुरिति** स्वाश्रयस्यात्मनः। **ज्ञेयावभासः** इदमहं जानामीत्याकारः विषयप्रकाशः। विषयगतव्यवहारानुगुण्यापादनं तद्विशिष्ट इत्यर्थः। स्वाश्रयकर्तृक स्वभिन्नविषयव्यवहारानुगुण्यापादकत्वं मतेर्लक्षणमिति भावः।

तथा च भगवता भाषितं "अनुभूतिरिति स्वाश्रयं प्रति स्वसद्भावेनैव कस्यचिद्वस्तुनः व्यवहारानुगुण्यापादनस्वभावः ज्ञानावगतिसंविदाद्यपरनामा सकर्मकोऽनुभवितुरात्मनो धर्म विशेषः" इति। अत्र स्वाश्रयं प्रतीति वस्तुस्थितिकथनं—ज्ञातुरवश्यमङ्गीकरणाय। लक्षणे तदप्रवेशेऽपि नानुपपत्तिः। विषयव्यवहारानुगुण्यापादकत्वमेव पर्याप्तम्। इति द्रव्यलक्षणं संग्रहादिहोक्तमित्याह—**संग्रहादिति**। विस्तरस्तु अग्रे तत्तन्निरूपणे भविष्यतीति भावः॥ ७॥

एकार्थप्रत्यभिज्ञा भवति दृढतरा दर्शनस्पर्शनाभ्यां
संघातादेरयोगादवगमयति सा वस्तुरूपादतोऽन्यत।
एकस्मिन् दूरतादेरविशदविशदप्रत्यभिज्ञादि तद्वत्
नैकत्वेऽप्यक्षभेदाद्भिदुरमिव मिथस्संश्रयादिप्रसङ्गात्॥ ८॥

सर्वा०। ननु द्रव्यमद्रव्यमित्युभयमसिद्धं रूपादेराश्रयाभावात्, रूपादितया विकल्प्यमानस्यैकस्यैव वा सत्त्वादिति पक्षद्वयमेकेनैव प्रतिक्षिपति **एकार्थेति**॥ एवमाहु-**र्वैभाषिकाः**–निराधारा निर्धर्मकाश्च रूपादयश्चत्वारः पदार्थाः। ते चक्षुराद्येकैकेन्द्रिय ग्राह्या इति।

वात्सीपुत्रास्तु शब्दादीन् पञ्च वैभाषिका विदुः।
शब्दात्मानश्चतुर्ष्वेव केचिदित्यपरेऽब्रुवन्॥

तत्र निराधारत्वं तावत्प्रतिसन्धानविशेषेण निरस्यति। अस्ति हि दृष्टमेव स्पृशामीति द्वीन्द्रियग्राह्यवस्तुविषया धीः। सा तावन्न संशयात्मा विरुद्धानियतकोटय

[नवलम्बात्] नुपलम्भात्। न च विपर्ययः स्वारसिकबाधादृष्टेरन्यथासिद्धेश्च। तदेतदुभयं दृढ़तरेति संगृहीतम्। ग्रहणमिति वक्तव्ये प्रत्यभिज्ञेत्युक्तिर्ज्ञातृज्ञेयस्थैर्यस्यापि व्यक्त्यर्था। सेयं न रूपमात्रगोचरा, तस्य स्पर्शनविषयत्वाभावात्, अन्यथाऽन्धस्यापि स्पर्शनेन रूपोपलम्भनप्रसङ्गात्। न च स्पर्शमात्रगोचरा, तस्यापि दृग्विषयत्वाभावात्। तथात्वे चास्पृशतोऽपि दृशा स्पर्शधीप्रसङ्गात्। न चोभयविषया, दर्शनस्पर्शनयोः प्रत्येकविषयत्वादेव। अत इयं प्रत्यभिज्ञा रूपाद्यतिरिक्तं तदाश्रयभूतं वस्तु प्रकाशयति इदं रूपस्पर्शवदिति। ननु रूपस्पर्शयोर्नियताक्षवेद्यत्वेऽप्यवस्थाभेदात् प्रतिसन्धानं स्यात्; न ह्यस्माकमिव स्थिरमवस्थान्तरभाक्किंचित् त्वन्मते। विभज्यवैभाषिकपक्षस्त्वतिमन्दः। तदिह संहतासंहतस्वलक्षणभेदमात्रं तु स्यात्; तत्र संघातस्वरूपं तस्य प्रतिसन्धानविषयत्वं च न युज्यते इत्याह—**सङ्घातादेरयोगादिति**। सङ्घातोऽपि सङ्घातिस्वरूपस्तदन्यो वा; पूर्वत्र न प्रतिसन्धानपदम्, द्वितीये सत्योऽसत्यो वा? आद्ये द्रव्यवाद एव वरं, संसर्गाख्यधर्मस्वीकारो वा; तेन परस्परविशिष्टस्वरूपमेवेत्यपि निरस्तं विशेषणविशेष्यतत्संम्बन्धातिरिक्तविशिष्टायोगात्। द्वितीये कथं प्रत्यभिज्ञात्मकार्थक्रियाकारित्वम्? निरन्तरस्वरूपं सङ्घात इति पक्षोऽपि प्रत्येकपक्षवन्नेन्द्रियान्तरेण प्रतिसन्धिः स्यात्। अन्यथा रसादिष्वपि संहतेतु तत्प्रसङ्गात्। एतेन देशैक्यमेव संघात इत्यपास्तम्; एकदेशान्वयिनां त्रैकालिकानामेकसंघातत्वप्रसङ्गात्। देशोऽपि तदातदा भिन्न एवेति चेन्न, क्षणभङ्गस्य निरसिष्यमाणत्वात्। न च ते देश आकाशादिरूपः; तस्य युष्माभिरावरणाभावादिमात्रत्वज्ञापनात्। न चोपादानरूपः, स्पर्शरूपादीनां भिन्नभिन्नक्षणोपादानत्वाभ्युपगमात्। एकोपादानत्वे तु तदेव द्रव्यं पृथिव्यादिदेशैक्यात्सङ्घातस्यापि संघातान्तरापेक्षायामनवस्था, अन्योन्याश्रयो वा। त्वन्मते पृथिव्यादिः रूपादिसङ्घातातिरिक्तो न; तथा पृथिव्यादेरपि देशैक्यं पृथिव्यादिसङ्घातातिरिक्तं न। अतिरिक्तं चेत्पृथिव्यादेर्देशैक्येऽपि तद्देशसङ्घातातिरिक्तं पृथिव्यादिदेशानां देशान्तरैक्यमेव प्रयोजकं स्यात्। एवं सत्यनवस्थेत्यर्थः। एवं च पृथिव्यादिसङ्घातप्रयोजकैकदेशानपेक्षयां तु रूपादेस्संहतत्त्वे पृथिव्यादिसंहतत्त्वमेव प्रयोजकं स्यात्, पृथिव्यादेस्संहतत्वे तु रूपादेस्संहतत्वमेवेत्यन्योन्याश्रय इत्यर्थः।

अथ स्यात् गृहीतेन रूपेण पूर्वमेव स्पर्शोऽनुमितः, तत्र दृष्टरूपानुमितमेव स्पृशामीत्येव प्रतिसन्धानमिति चेन्न; द्वयोरेकाश्रयत्वग्रहणमन्तरेण व्याप्तिग्रहणासम्भवादनुमानासिद्धेः। दृष्टे रूपे स्पृष्टे च स्पर्शे भेदाग्रहात्। दृष्टमेव स्पृशामीति बुद्धिशब्दाविति चेन्न, भेदेनैव तयोर्गृह्यमाणत्वात्, रसादिष्वपि प्रसङ्गाच्च। ननु निर्विषयैवेयं प्रत्यभिज्ञा वासनावशात्स्यादिति चेन्न; योगाचारनीत्या रूपादेरपि निह्नवप्रसङ्गात्। बाधाबाधाभ्यां विशेष इति चेन्न; स्वारसिकबाधादृष्टेर्यौक्तिकबाधस्य समत्वाच्च। अतो रूपस्पर्शवदिदमिति मिथो भिन्नविशेषणमेकं विशेष्यं सर्वलोकसिद्धं दुरपह्नवम्।

यत्तु मतान्तरं स्पर्शमात्रस्वरूपो वायुः स्वलक्षणः, तैजसादयस्तु द्वित्रिचतुस्स्वभावाः, अतस्तेजःप्रभृतीनां द्वीन्द्रियग्राह्यत्वमिति, तदप्यसत् एकस्यानेकस्वभावत्वायोगात्; तदभ्युपगमे च जैनमतावतारात्। अनेकधर्मत्वे त्वस्मन्मतसिद्धेः। एकस्मिन्नेव रूपादिस्वभावभेदकल्पनेति चेन्न; सर्वत्रासिद्धस्य कल्पनायोगात, क्वचित्सिद्धौ द्रव्यवादसिद्धेश्च। एतेन भेदोपलम्भाभावादभेदसिद्धिरिति प्रत्युक्तम्, विपरिवर्तस्यैव सुवचत्वात्। न हि रूपमिदमिति घटादीन् कश्चित्क्वचित्प्रत्येति! किंतु तद्वदिति। सहोपलम्भनियमादिति हेतुचतुष्टयं च निरसिष्याम [हे]। न च रूपादेर्धर्मिणश्च सहोपलम्भनियमः, पीतशङ्खादिभ्रमे रूपमन्तरेण रूपिणस्तमन्तरेण तस्य चोपलब्धेः। न चात्रान्यश्शङ्खस्तदानीमुत्पन्नः; नापि शङ्खरूपोऽयं पित्तविवर्तः, स्पर्शनेन स एवायं शङ्ख इति गृहीतेः। एवं स्पर्शादावपि। यदि चासौ हेतुरङ्गीक्रियते किमपराद्धं *सहोपलम्भनियमादभेदो नीलतद्धियोरिति वदद्भिः? अतस्सहोपलम्भनियमाद्धर्मधर्मिभेद एव सिध्यति। किंच रूपस्पर्शयोस्सहधीनियमस्त्वयाऽपि दुस्साधः; अतस्तयोरयुगपदुपलम्भादभेदासिद्धावेकस्य प्रत्यभिज्ञाविषयस्य ततोऽन्यत्वं [प्र] स्पष्टम्। यत्तदन्यत्र युष्माभिरुक्तम्—

* अनुपप्लवभूतार्थस्वभावस्य विपर्ययैः। न बाधो यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः॥

तदिह प्रतिसन्धेयम्। बुद्धचन्तराणि च तद्बाधकान्यभिन्नेन्द्रियजन्यान्याह—**एकस्मिन्निति**। आसन्नदेशे दृष्ट्वा दूरं गतस्याविशदा प्रत्यभिज्ञा, दूरे दृष्ट्वा समीपं गतस्य तु विशदा; एवं क्रमात् बहलविरलालोकादिवशादप्युभयधा ग्राह्या। अल्पधर्मविशिष्टतया ग्रहणम् अविशदग्रहणम्; भूयोधर्मविशिष्टतया तु विशदग्रहणम्; नतु न्यूनाधिकदर्शनमात्रम्; तथा सति घटपटदर्शने घटमात्रदर्शने च विशदाविशदव्यवहारप्रसङ्गात्। न चात्र रूपमेवाविशदं विशदं च भाति, पीतशङ्खादिभ्रमे रूपान्तरवत्तया भातस्यापि तथा प्रत्यभिज्ञानात्। नापि परिमाणं, तस्य परमार्थस्य त्वयाऽनभ्युपगमात्। दूरे च परिमाणान्तरवत्तया वस्तुनः स्फुरणात्। अत एव नैकत्वसंख्या; दूरासन्नयोरेकानेकत्वबोधे तदेवेति दर्शनात्। अत्रोत्तरेणादिशब्देन संशयविपर्यय [धि] योर्ग्रहणम्। संशयविपर्ययौ तावदधिष्ठानग्रहे विशेषाग्रहात् समानधर्मग्रहाच्च भवतः। तथादृष्टिनियमश्च नान्यथयितुं शक्यः।

अधिष्ठानस्य कात्स्न्र्येन भानेऽभाने च न भ्रमः।
भाताभाताकृतिभिदा कथं निर्धर्मके भवेत्॥

बाधकधीश्चाधिष्ठानातिरिक्ततदसाधारणधर्मविषया, तत्स्वरूपग्रहस्यारोपसहत्वात्। जिज्ञासा च नात्यन्तानुपलब्धे, अदर्शनात्। न च निश्शेषविदिते, वेद्याभावात्। अतस्तद्विषये विदिताविदिताकारत्वं सिद्धम्। तदिदं सर्वमभिप्रेत्य भिन्नाभिन्नवादिभिरप्युक्तम्—

* आविर्भावतिरोभावधर्मकेष्वनुयायि यत्।
तद्धर्मि यत्र वा ज्ञानं प्राग्धर्मग्रहणाद्भवेत्॥ इति।

अत्रागृहीताशेषधर्मधर्मिग्रहणं तु न मृष्यामहे। यत्तु बौद्धैरुक्तम्–

* धर्मोपकारशक्तीनां भेदे तास्तस्य किं यदि।
नोपकारस्ततस्तासां तथा स्यादनवस्थितिः॥
नानोपाध्युपकाराङ्गशक्त्यभिन्नात्मनो ग्रहे।
सर्वात्मनोपकार्यस्य को भेदः स्यादनिश्चितः॥ इति।

तदपि मन्दम्, अन्वयव्यतिरेकसिद्धकारण [णदि] वैचित्र्यनिबन्धनस्वभावभेदवतामुपाधीनां परस्परव्यभिचारिवृत्तिनियतसामग्रीबोध्यत्वेन ग्रहणाग्रहणयोरुपपत्तेरिति। नन्वस्तु प्रतिसन्धानबलात् द्वीन्द्रियाह्यं किञ्चित्, तत्तु रूपरसाद्यात्मकमिति वा तदाश्रय इति वा न मृष्यामहे। तेषामेवाभावात् एकस्मिन्नेव ग्राहकभेदात्तत्तद्धर्मधीः, यथा मणिकृपाणदर्पणादिव्यञ्जकभेदान्मुखादेरणुत्वपृथुत्वमलिनत्वविमलत्वादिधीः, सव्यदक्षिणविपर्यासश्चेति। तमिमं पक्षं प्रतिक्षिपति **नैकत्वेऽप्यक्षभेदाद्भ्रुवमिवेति**। इह तावत्सर्वत्रासिद्धस्य कल्पनानुपपत्तिरुक्ता बाधकान्तर माह–**मिथ इति**। चक्षुरादिग्राहकवैजात्यं हि ग्राह्याकारभेदात्कल्प्यते। तदसिद्धौ कथं तद्ग्राहकभेदक्लृप्तिः, तदभावे च कथं तत एव ग्राह्याकारभेदक्लृप्तिरिति। इह तु मध्ये बुद्धिभेदप्रवेशे चक्रकम्। अस्तु कारणभेदादिन्द्रियभेदक्लृप्तिरिति चेन्न; इन्द्रियवैजात्यव्यवस्थापकस्य तस्यानुपलम्भात्, तत एव तत्क्लृप्तौ तत्रापि मिथस्संश्रयात्। ननु दर्पणादिग्राहकभेदाद् ग्राह्ये सव्यदक्षिणविपर्यासः, पृथुत्वाणुत्वविमलत्वमलिनत्वकल्पना च दृष्टेति चेत्सत्यम्, दर्पणादेस्तद्धर्माणां च भेदेन दृष्टत्वात्तदधीनाध्यासभेदो यथादर्शनमङ्गीक्रियते। अत्र तु न तथा। अक्षेषु च ते बहिः कल्पनीयानां रूपादीनामसंभवात्। उपाधिज्ञाननिरपेक्षेयमौपाधिकभेदधीरस्तु मण्डूकवसाक्तदृष्टेर्वैशेषूरगबुद्धिवदिति चेन्न; तत्तद्दोषशक्त्या तत्तद्भ्रान्तिभेदसिद्धेः कल्प्याकारस्य क्वचित्सम्भवाच्च। चक्षुरादिस्वभावा एवात्रापि रूपादिभ्रान्तिहेतवो दोषा इति चेन्न; सर्वकल्पनाधारे स्वलक्षणेऽप्यनाश्वासप्रसङ्गात्। ततश्चेन्द्रियस्वभावभेदोऽपि दुर्वचः; अधिष्ठानाकाङ्क्षायामपि बुद्धयैव चरितार्थत्वात्। तथा चेन्द्रियस्वभावभेदोऽपि नावेक्ष्यः; पूर्वपूर्वबुद्धिशक्तिभेदादेवोत्तरोत्तरविचित्रभेदोपपत्तेः। ननु स्पर्शनेन्द्रियस्याज्ञातैर्भागभेदैः करतलप्रकोष्ठादिवर्तिभिरेकस्यैव दुरालभास्पर्शस्योल्लेखभेदा भवन्तीति चेन्न। स्पर्शस्यात्र भेदेनानुल्लेखात् दुरालभावयवानां तु वह्निकणवच्छरीरमाविशतां तद्विकृतिजनकत्वमात्रम्; प्रदेशभेदेन विकृतितारतम्यं च वह्न्यादिभिरिव नानुपपन्नम्। ननु मनुष्यपशुमृगादीन्द्रियभेदाद्भक्ष्यादिष्वानुकूल्यादिवैपरीत्यं तत्तारतम्यं च दृश्यते। न च वस्त्वेवानुकूलप्रतिकूलस्वभावम्; विरोधात्, सर्वेषामविशेषेण सर्वदोभयविधानुपलम्भात्, अनेकान्तवादानभ्युपगमाच्च। एवं

चक्षुरादिभेदाद्रूपादिभेदभ्रमस्यादिति; तदपि न, तत्तत्कर्मशक्तिवैचित्र्यात्तत्तदनुकूलत्वादिव्यवस्थोपपत्तेः। वस्तुषु चानुकूलत्वप्रतिकूलत्वे सुखदुःखजनकत्वे एव; तथाऽपि सुखदुःखे बुद्धिभेदावेव भवद्भिरपि स्वीक्रियेते। ततश्चात्र विषयभेदाद्धीभेदः। तस्मादेव च स इति प्रसङ्गस्यादिति चेन्न; विषयभेदस्य स्वकारणाद्यधीनत्वात्, तदुत्पाद्यबुद्धिभेदस्य तत्कारणत्वाभावात्, द्वयोरपि परस्परप्रतीतिनिरपेक्षप्रमाणसिद्धत्वाच्च। एवमुपाधिभेदैरेकस्मिन्नेव ह्रस्वत्वदीर्घत्वधीनिदर्शनान्यपि नेतव्यानीति। अत्रादिशब्देन पूर्ववत् संशयाद्यसम्भवो नीलपीतशीतोष्णमधुराम्लादिभेदासम्भवश्च गृह्यते। न हि नीलादिभेदेष्विन्द्रियभेदोपाधिकत्वं शक्यं वक्तुं, रूपादिभेदमिथ्यात्वे तदन्तःपातिनीलादिभेदोऽपि मरीचिकावीचिकान्यायेन मिथ्यैव स्यादिति चेन्न; असिद्धस्यासिद्धेन दुस्साधत्वात्। मिथो निदर्शनेन साधने मिथस्संश्रयात् निदर्शनमात्रेण निश्शेषनिह्नवप्रसङ्गाच्चेति। तथाऽप्येकमनेकस्वभावमिति चेन्न। स्वरूपभेदस्यानभ्युपगमात् धर्मभेदस्याविरुद्धत्वात्।

वेद्यहेतुफलाकारैर्भिन्नैरेका समेति धीः।
तथा बाह्येऽपि दृष्टत्वाद्युगपत्क्रमशोऽपि नः॥
प्रतिसंबन्ध्यनेकत्वं यथा नैकस्य बाधकम्।
तथा संबन्ध्यनेकत्वं स्वाभीष्टे च समत्वतः॥ ८॥

॥ इति द्रव्यसिद्धिद्रव्याद्वैतभङ्गौ ॥

आनन्द०। नन्ववस्थाश्रयो द्रव्यमिति लक्षणमसंगतं; धर्मधर्म्यभावात् इत्याक्षेपसंगतिं दर्शयति—**नन्विति**—चत्वारो हि बौद्धाः—वैभाषिकसौत्रान्तिकयोगाचारमाध्यमिकभेदात्। तत्र वैभाषिका अपि द्विविधाः— वात्सीपुत्राः अन्ये च। तत्र वात्सीपुत्राः— रूपरसगन्धस्पर्शशब्दपञ्चकव्यतिरेकेण धर्मी नास्ति। ते च चक्षुराद्येकैकेन्द्रियग्राह्याः। त एव समुदिताः पृथिवीत्वेन एकैकह्रासेन जलादित्वेन व्यवह्रियन्त इति वदन्ति। अन्ये वैभाषिकाः—शब्दस्तावन्न तत्वान्तरं। अपि तु रूपादिष्वेव केचन शब्दात्मानः इति वदन्ति। अपरे वैभाषिकाः सौत्रान्तिकैकदेशिनश्च एकस्य रूपादेः शब्दात्मकत्वे श्रोत्रग्राह्यत्वं चक्षुर्ग्राह्यत्वं चेति ग्राहकभेदाधीनभेदव्यवहार आवश्यकः। नच केचन रूपादयः श्रोत्रग्राह्याः शब्दात्मानः; तथा सति सर्वेषां रूपाद्यन्यतमत्वप्रसङ्गेन चत्वार इत्यस्याभावप्रसङ्गात्। नच पञ्चाप्यङ्गीकार्याः। तथा सत्यपि ग्राहकभेदं विना निर्वाहासंभवात्तदावश्यकत्वे दर्पणकृपाणादिव्यञ्चकभेदाद्यथा मुखं नीलत्वदीर्घत्वारोपवद्भासते तथा धर्म्येव रूपरसादिरूपेण भासते इति धर्मा न सन्ति धर्म्येक एवेत्याहुः॥ सौत्रान्तिकमते धर्मिणोऽनुमेयत्वेऽपि इन्द्रियजन्यवृत्तौ तदाकारार्पणात् ग्राहकभेदेन तद्भेद इत्यवगन्तव्यम्। 'योगाचारस्य तु बुद्धिव्यतिरेकेण किमपि नास्तीति मतं। माध्यमिकस्य तु सर्वं शून्य-मिति मतम्॥ तत्र वैभाषिकसौत्रान्तिकमतद्वयमनुवदति **रूपादेरिति**। **निराधाराः** धर्मा इत्यर्थः। **रूपादितयेति** धर्म्येक एवेति पक्षः।

रूपत्वेन रसत्वेन च **विकल्प्यमानस्य** गृह्यमाणस्येत्यर्थः। **एवमाहुरिति** तत्वसा(ग)रादिग्रन्थ इति शेषः। निराधारा इति धर्मपक्षः। निर्द्धर्मका इति धर्मिपक्षः। केचित्तु–रूपादय इत्युक्तया धर्मपक्षः एव। धर्मिपक्षस्तु–

अत्थि रूआइएण एअं घयत्ति, अक्खभेआदो।

इत्यादिभिरुक्त उपलक्ष्य इत्याहुः।

अस्ति रूपादिकेन एकं गृह्यते अक्षभेदात्। इति तदर्थः॥

वत्सी वैभाषिकमाता। वत्सीपुत्र (छात्राः) संबन्धिनो **वात्सीपुत्राः**।

निराधारत्वं तावदिति—निर्द्धर्मकत्वं 'धर्मोनिर्धर्मकश्चेत्' इत्युत्तरत्र निरसिष्यते। अनन्यथासिद्ध(प्रमाणभूत)प्रतीतेरेवार्थसाधकत्वात् तामुपन्यस्यति—**अस्तिहीति**। प्रामाण्यानन्यथासिद्धिं दर्शयति—सा तावदिति। **ग्रहणमिति वक्तव्ये** इति—उभयेन्द्रियजन्यैकविषयज्ञानमात्रेणापि धर्मिसिद्धिसंभवात् प्रत्यभिज्ञाग्रहणस्य प्रयोजनं वक्तव्यमित्यर्थः। पूर्वं स्पृष्टवत इदानीं पश्यतश्चैक्यात् ज्ञातृस्थैर्यं, पूर्वं स्पृष्टस्येदानी दृश्यस्य चैक्यात् ज्ञेयस्थैर्यमिति बोध्यम्। नन्वेवमपि प्रत्यभिज्ञया रूपाद्यतिरिक्तं द्रव्यं साधयितुं न शक्यते। रूपस्पर्शैक्यबोधनेनैव तस्याश्चरितार्थत्वात् इत्यन्यथासिद्धिमाशङ्क्य परिहरति–सेयं इत्यादिना। **न रूपमात्रगोचरा**—न रूपमात्रैक्यविषयिणी। **दर्शनस्पर्शनयोरिति**—चक्षुरिन्द्रियत्वगिन्द्रिययोः एकैकमात्रविषयत्वेन कस्यापीन्द्रियस्योभयग्राहकत्वं न संभवति। न च मिलितं गृह्णाति, पूर्वापरकालव्यापारत्वेन युगपद्व्यापाराभावात्। भावेऽप्येकस्योभयगोचरत्वाभावेन वायौ स्पर्शं घटे रूपं च गृह्णतोः दर्शनस्पर्शनयोरिव प्रत्यभिज्ञापकत्वायोगादिति भावः।

इदं रूपस्पर्शवदिति—यदेव रूपवत् तदेव स्पर्शवदित्यर्थः। ननु रूपादेः प्रतिनियतेन्द्रियग्राह्यत्वं न स्वरूपेण, अपितु रूपत्वाद्यवस्थाविशिष्टतया, तथाच रुपत्वविशिष्टस्यैव स्पर्शत्वाद्यवस्थस्य त्वगिन्द्रियेण ग्रहसंभवात् न प्रत्यभिज्ञान्यथानुपपत्त्या तदतिरिक्तधर्मिसिद्धिरिति शङ्कते—**नन्विति**–इयं शङ्का भवत्पक्षे (नोदेति) नोपपद्यते इत्याह—**न स्यादिति**। ननु विभज्यवैभाषिकेण—'अत्थिहि भिक्खवे अकदयं' इत्यागमबलेन नित्यस्यापि तत्वस्याङ्गीकारात् कथमवस्थान्तरभाजो वस्तुनो राहित्यमित्यत्राह–**विभज्येति**—अस्तिहि भिक्षोरकृतकं इति तदर्थः। विभज्य–विभागेन नित्यवस्त्वङ्गीकारात् विभज्यवैभाषिक इति नाम। वैभाषिकैकदेशीति यावत्।

अतिमन्द इति—बौद्धसमयप्रसिद्धसत्वक्षणिकत्वव्याप्तिभङ्गप्रसङ्गात् तेनैव न्यायेन सर्ववस्तुस्थायित्वस्यापि प्रसंगादिति भावः।

केचित्तु—

णाणम्मि अप्पऊणिअ आआरं वत्तु अप्पाणं।
णिब्भाइ सोसरूवं धम्मो वा कोवि तस्सव्व॥

इत्यादिसौत्रान्तिकपक्षे धर्माभ्यनुज्ञानात् कथंचिदवस्थामादाय शङ्कासंभवेऽपि वैभाषिकपक्षो विशिष्यासंगत इत्याह विभज्येति इत्याहुः ।

{ ज्ञानेऽर्पयित्वा आकारं वस्त्वात्मनः । }
{ निर्भाति सस्वरूपं धर्मो वा कोऽपि तस्यैव ॥ }

इति तदर्थः । विभज्य विशिष्येत्यर्थः । धर्मिवादिसौत्रान्तिकापेक्षयेति शेषः ।

ननु रूपादौ रूपत्वाद्यवस्था अतिरिक्ता माभूत् । किंतु रूपादिकमेव संहतावस्थं द्वीन्द्रियग्राह्यं; तदेवासंहतस्वरूपं प्रतिनियतेन्द्रियग्राह्यं भवत्वित्यनूद्य परिहरति—**तदिहेति**—

न प्रतिसन्धानपदमिति—न प्रत्यभिज्ञाविषय इत्यर्थः । संघातिस्वरूपाणां प्रतिनियतेन्द्रियग्राह्यत्वादिति भावः । **द्रव्यवाद एव वरमिति**—अवयव्यादिवद्वृत्तिविकल्पदुष्टाप्रामाणिकसंघाताश्रयणा(द्रूपी) दपि घट इति प्रतीत्यनुसारेण द्रव्यस्याङ्गीकारो न्याय्य इति भावः ।

ननु भवद्भिरपि तन्तुसंघातः पट इति स्वीकारात् स एवाङ्गीकर्तुं युक्त इत्यत्राह—**संसर्गाख्येति**—तथाऽपि तवापसिद्धान्त इति भावः ।

विशेषणविशेष्येति—तथा च द्रव्यवादसधर्मकत्वयोः प्रसङ्ग इति भावः । **द्वितीय इति**—यद्यपि शुक्तिरूप्यस्यापि तदिदमिति प्रत्यभिज्ञाविषयत्वमस्ति; तथाऽपि प्रत्यभिज्ञाया अबाधितत्वेन प्रमात्वात् तन्मते अर्थजत्वस्यावश्यकत्वे तज्जनकत्वेनार्थस्यार्थक्रियाकारित्वादसत्वं न स्यादिति भावः । नन्वस्मिन् पक्षे व्यवधानाभावसहितं स्वरूपं संघातः संयोगस्य नैरन्तर्यरूपत्वाङ्गीकारात् । अतो न संसर्गाख्यधर्मस्वीकार इति पक्षमनूद्य दूषयति—**निरन्तरेति-प्रत्येकपक्षवदिति**—उभयेन्द्रियग्राह्यस्यैकस्याभावात् । न च नैरन्तर्यरूपाभावस्यैवोभयेन्द्रियवेद्यता; तथाऽप्युभयोर्निरूपकयोरग्रहणे उभयनैरन्तर्यस्यापि ग्रहणासंभवात् । वस्तुतस्तस्य तुच्छतया प्रत्यभिज्ञाक्रियार्थक्रियाकारित्वं न युक्तं; अन्यथा तदादाय सधर्मकत्वप्रसङ्ग इति भावः । नैरन्तर्यमात्रेणेन्द्रियान्तरग्राह्यत्वाङ्गीकारे बाधकमाह—**अन्यथेति**—अविशेषादिति भावः । ननु दृष्टमेव जिघ्रामि मधुरमेव पश्यामि इति प्रत्यभिज्ञानदर्शनादिष्टापत्तिरिति चेन्न, रसादीनामपि चक्षुरादिग्राह्यत्वे दर्शनमात्रेण रसादिग्रहणात् संशयाभावप्रसङ्गेन प्रत्यभिज्ञायास्तदनुमितधर्मिविषयत्वात् । ननु वनादौ देशैक्यस्य संघातत्वदर्शनादत्रापि तथास्त्वित्याशङ्क्य निराकरोति—**एतेनेति**—देशस्यापि रूपादिस्वलक्षणमात्रत्वे द्वीन्द्रियग्राह्यत्वाभावात् प्रत्यभिज्ञानुपपत्तिः । रूपादेराश्रयतयाऽभ्युपगतस्य एकस्य वस्तुनः संघातत्वे द्वीन्द्रियग्राह्यत्वे च तस्यैव द्रव्यत्वापत्तिः सधर्मकत्वापत्तिरित्यादिनेत्यर्थः । एतेनेत्यस्य रसादिष्वपि प्रसङ्गेनेत्यर्थमप्याहुः ॥ दूषणान्तरमप्याह—**एकदेशान्वयिनामिति**—अतिप्रसङ्गपरिहारं शङ्कते । **देशोऽपीति**—अभिन्नदेशकालं स्वलक्षणं संघात इति भावः ।

तस्य युष्माभिरिति—'आकाशे हि पदार्थानामवस्थानं आकाश एव ह्यवकाशः स चावरणाभावः' इति भावत्कवचनात्। तस्य शून्यतया रूपाद्यनाधारस्य संघातव्यवहारनिमित्तत्वाभावादिति भावः। **भिन्नभिन्नक्षणेति**—पूर्वपूर्वरूपस्पर्शोपादानत्वादुत्तरोत्तररूपस्पर्शयोरिति भावः। **तत्संघातस्येति**—भवत्पक्षे तस्यापि (रूपादि) क्षणत्वेन नानात्वात् तदैक्यं च संघातत्वेन वक्तव्यं तस्यापि संघातरूपत्वेन संघातरूपदेशापेक्षायां अनवस्था। तथाच—पृथिव्याद्येकदेशसंघातप्रयोजको दुर्लभ इति भावः। **अन्योन्येति**—पृथिवीशब्दवाच्यरूपरससंघातस्य एतत्संघातावच्छेदेन संघातत्वाङ्गीकारे इति भावः। ननु गन्धानुमिते द्रव्ये घ्रातमेव पश्यामीतिवद्दृष्टरूपानुमितस्पर्शे दृष्टमेव स्पृशामीति प्रत्यभिज्ञेत्याशङ्क्य उभयाश्रयस्यैकस्य त्वयाऽनङ्गीकारेण साहचर्यगर्भव्याप्तिग्रहासंभवान्नानुमानप्रवृत्तिरिति परिहरति—**अथेति**। भेदग्रहेऽपि भ्रमरूपप्रत्यभिज्ञाङ्गीकारे बाधकमाह–**रसादिष्वपीति**। प्रत्यभिज्ञाया निर्विषयत्वे प्रत्ययमात्रस्याविशेषान्निर्विषयत्वप्रसङ्गेन रूपादिस्वलक्षणस्याप्यपह्नवस्यादित्याह—**योगाचारनीत्येति**। **समत्वादिति** ग्राह्यग्राहकभावानुपपत्त्यादिबाधकस्य तेनापि प्रतिपादनादिति भावः। संघातादेरयोगादित्यत्रादिशब्दसंगृहीतं मतान्तरं शङ्कते—**यत्तु मतान्तरमिति**। द्वित्रिचतुस्स्वभावा इति द्वन्द्वगर्भो बहुव्रीहिः। न च सर्वत्र सर्वान्वयः, देवदत्तयज्ञदत्तविष्णुमित्राः रक्तशुक्लकृष्णाः इतिवद्योग्यतयान्वयव्यवस्थासंभवात्। अतो द्वित्रिचतुरित्यत्र न समासान्तप्रसङ्गः। तदुक्तं तत्वमात्रपञ्चिकायां—

वाच्यादिव्यवहारो भवति स्पर्शादिलक्षणैरेव।
द्वित्रिस्वभावभाग्भिः एकस्माद्ध्रस्वतादीव॥

इति। अत्र मते धर्माणामेव तथाव्यवहारसाधनत्वं; धर्म्येवेति पक्षे तु न वस्तुनानास्वभावत्वं; किन्तु ग्राहकभेदेन तथा व्यवहार इति भेदः॥

स्वभावभेदा इत्यत्र स्वश्चासौ भावश्चेति स्वभावः—स्वरूपमित्यर्थः; उताहो स्वस्य भावः स्वभावः इति षष्ठीसमासः इति विकल्पं मनसि निधाय प्रथमं दूषयति—**एकस्येति**। चतुष्ट्वे हि वस्तुस्वभावानां परस्पराभेदे चतुष्ट्वव्याघातः भेदेऽत्वेकत्वव्याघात इति भावः। द्वितीयं दूषयति—**अनेकेति**। अगत्या धर्मिपक्षमवलम्बते—**एकस्मिन्नेवेति**। **सर्वत्रासिद्धस्येति**—क्वचित्सिद्धस्यैवारोपादिति भावः। ननु प्रत्येकं सिद्धानामेकस्मिन्नारोपे को विरोध इति चेत्; न; एकैकात्मकत्वेन सिद्धानां भेदाद्विरोधग्रहेणारोपासंभवादविरोधार्थं क्वचित्समावेशे वक्तव्ये तदसिद्धिरिति भावः। ननु रूपरूपिणोः भेदग्राहकप्रमाणाभावादभेदसिद्धौ रूपादीनामाश्रयासिद्धिरित्यत आह—**एतेनेति**—प्रत्यभिज्ञानुपपत्तिरूपस्य पूर्वोक्तसाधकस्य सत्त्वेनेत्यर्थः। दूषणान्तरमाह—**विपरिवर्तस्येति**। अभेदानुपलम्भेन भेदस्यैव सिद्धेरित्यर्थः। अभेदानुपलम्भमेव दर्शयति–**नहीति**। ननु वैपरीत्यप्रसङ्गो नोपपद्यते–सहोपलम्भनियम मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यैकशब्दानुविद्धप्रत्यय प्रथ-

मपिण्डग्रहणकालिकाभेदग्रहणरूपाभेदोपलम्भहेतुचतुष्टयस्य सत्त्वादित्यत्राह—**सहोपलम्भनियमादीति**। **निरसिष्यामह** इति। भेदाभेदनिरसनावसरे इत्यर्थः। असिद्धश्चायं प्रथमो हेतुरित्याह—**नचेति**। **रूपमन्तरेणेति**—स्वकीयरूपमन्तरेणेत्यर्थः। धर्मिज्ञानस्याप्यारोपहेतुत्वादिति भावः। **तमन्तरेणेति**—शङ्खमन्तरेण तदीयरूपस्यान्यत्रारोपस्थल इत्यर्थः। ननु पीतशङ्खादिभ्रमे पीतिमगुणविशिष्ट एवान्यश्शङ्खस्तदानीमुत्पद्यते; क्षणिकत्वाङ्गीकारेण पूर्वशङ्खस्य नाशात्। यद्वा—पित्त (पीत)द्रव्यस्यैवायं शङ्खाभासरूपेण परिणामः। तथाच सिद्ध एव सहोपलम्भनियमः तत्राह—**नचेति**। तत्र हेतुमाह—**स्पर्शनेनेति**—न क्षणिकत्वेन शङ्खान्तरोत्पादानं युक्तं; स एवायमिति प्रत्यभिज्ञानुपपत्तेः नापि पित्तविवर्तः; त्वगिन्द्रियविषयत्वानुपपत्तेरित्यर्थः। **एवमिति**-जले औष्ण्यभ्रमकाले तदीयशैत्यानुपलम्भात् उष्णस्पर्शस्याश्रयं विनोपलम्भाच्चेत्यर्थः। आदिशब्देन रसादयो गृह्यन्ते। सहोपलम्भनियमस्य व्याप्तिग्रहस्थानाभावान्न साधकत्वं तथाऽपि साधकत्वे योगाचारमतप्रसङ्ग इत्याह—**यदि चासाविति**। प्रत्युत सहभावस्य भेदघटितत्वात्तन्नियमहेतुर्विरुद्ध इत्याह—**अत इति**। किंच सहोपलम्भनियमेन धर्मधर्मिभेदनिरसनेऽपि रूपस्पर्शयोस्तन्नियामकाभावादसिद्धेः दृष्टमेव स्पृशामीति प्रत्यभिज्ञानुपपादनादेतावान् प्रयासो व्यर्थइत्याह-**किञ्चेति**। भवद्भिरेवानुगतो धर्मी बुद्धेर्बाध्यबाधकभावनिरूपणस्थले बुद्धितत्वमालायामुक्तः; स इदानीं त्यज्यत इति पूर्वापरविरोधश्चेत्याह **यत्तदन्यत्रेति अनुपप्लवेति**—इदमित्थं सिद्धिटीकायां व्याख्यातं—शुक्तिकारजतयोर्बाध्यबाधकभावः कथं नियम्यते ? नहि विरोधेन, वैपरीत्यस्यापि प्रसङ्गात्। नच निषेधात्मकतया, विधेरपि क्वचिद्बाधकत्वात् निषेधस्यापि बाध्यत्वात्। न च प्रामाणिकत्वाप्रामाणिकत्वाभ्यां, प्रामाणिकस्यापि दुर्बलस्य शत्रोर्बाध्यत्वात्। किञ्च बाधार्थं बाध्यविषयकव्यापारं कुर्वाणो हि लोके बाधक इत्युच्यतेः नहि सत्यस्य शुक्त्यादेर्मिथ्यारजतत्वादिकं प्रति व्यापारोऽस्ति; अव्याप्रियमाणस्यापि बाधकत्वेऽतिप्रसङ्गो विपरिवर्तश्च स्यात्। तस्मात्कथं बाध्यबाधकभावव्यवस्थेति ? उच्यते—अनुपप्लवेति—उपप्लवभूतोऽर्थस्वभावो रजतत्वं; **अनुपप्लवभूतो**ऽर्थस्वभावोऽनारोपितश्शुक्तित्वादिः। तस्य **विपर्ययैः**—उपप्लवभूतैः रजतत्वादिभिः **न बाधः**; किंत्व **यत्नवत्त्वेऽपि**—बाध्यरजतत्वविषयव्यापाररहितत्वेऽपि शुक्तित्वादिरेव बाधः; कुतः **बुद्धेस्सत्पक्षपाततः**—भूतार्थपक्षपातित्वात्। अयं भावः—भूतार्थपक्षपातो हि बुद्धीनां स्वभावः। तावदेवेयमनवस्थिता; तावदेवेयं भ्रान्तिः। यावत्तत्वं न प्रतिलभते; तत्प्रतिलाभे तु तत्र स्थितपदा सती अप्रामाणिकं रजतत्वं न संस्पृशेत्; बुद्धेस्ततो निवृत्तिरेव तद्विषयव्यापारमकुर्वतोऽपि बाधकत्वं नाम। यथा हि वेश्यया परिगृह्यमाणः कुरूपो दरिद्रो वा तद्विषयव्यापारमकुर्वताऽपि सुरूपेणाढ्येन वा बाध्यते; बाधकत्वं चाढ्यस्य सुरूपस्य दरिद्रात्कुरूपाद्वा वेश्याया निवृत्तिरेव तथैतदपीति। अन्ये तु—सर्वेपि पुरुषास्सर्वेष्वपि पदार्थेषु संभावितभ्रान्तयः

आहोस्वित् कस्मिंश्चित्पदार्थे कश्चिदसंभावितभ्रान्तिरपि भवतीति ? तदर्थं विचारितं; कस्मिंश्चित्पदार्थे कांश्चिदाकारान् कश्चिद्गृह्णानि । अपरस्तु ततोऽप्यधिकान् । ततोन्यस्ततोऽप्यधिकान् । तत्र पूर्वस्या बुद्धेरुत्तरोत्तरमुत्कृष्यते । इयं चोत्कर्षपरम्परा कस्मिंश्चित्पुरुषे समाप्यते आहोस्विदप्रतिष्ठां गच्छतीति ? यदा तु काष्ठां न प्राप्नोति तदा सर्वेऽपि संभावितभ्रान्तयः । सर्वेषामपि स्वाज्ञाताकारस्य पदार्थेषु संम्भवात् । यदा तु काष्ठां प्राप्नोति तदा तस्मिन् पदार्थे तेनाज्ञाताकाराभावात् आकाराज्ञानहेतुकभ्रमासंभवः इति । तत्र पदार्थाभ्यासो हि बुद्ध्युत्कर्षहेतुर्भवति । अभ्यासेन जायमानोत्कर्षपरम्परा काष्ठां गच्छन्ती दृष्टा । यथा पुटपाकोत्कर्षेण जायमाना स्वर्णोत्कर्षपरम्परा दशवर्णे । पदार्थाभ्यासोऽभ्यासत्वात्काष्ठाप्राप्तिहेतुः इति । ननु लङ्घनाभ्यासेऽप्यभ्यासत्वं वर्तते; न स काष्ठाप्राप्तिहेतुर्भवतीति, मैवं; तत्रोत्कर्षं जनयन् लङ्घनाभ्यासः पूर्वपूर्वप्रयत्नाधिकप्रयत्नापेक्ष एवोत्कर्षं जनयति । तथा च त्रैलोक्यलङ्घनहेतुभूतप्रयत्नस्या संभवात्तत्रोत्कर्षकाष्ठाप्राप्तिर्नास्ति । अयं चाभ्यासोऽधिकप्रयत्नापेक्ष एवोत्कर्षहेतुः पुटपाकाभ्यासवत् । तस्मादुत्कर्षकाष्ठाप्राप्तिहेतुर्भवतीति । एतदेवाभिप्रेत्योक्तं—**अयत्नवत्त्वेऽपि बुद्धेरिति** । पूर्वप्रयत्नाधिकप्रयत्नसापेक्षेणाभ्यासेन जायमानतया उत्कर्षकाष्ठां प्राप्तायाः । अत एव यथार्थविषयाया बुद्धेः तत्पक्षपाततो बाधकत्वमुपपद्यते इति । अस्मिन् पक्षद्वयेऽपि धर्मिस्वरूपस्य धर्मस्य चाङ्गीकाराद्विरोध इति भावः । अत्र बुद्धेस्सत्पक्षपाततः तत्पक्षपातत इति पाठद्वयं बोध्यं । केचिदेवं व्याचख्युः –निष्कलङ्कप्रत्यक्षसिद्धस्य युक्तिभिर्न बाध इति त्वयाङ्गीकारात् तन्न्यायो धर्मविशिष्टधर्मिण्यप्यस्तित्वत्रयत्राह—यत्तदन्यत्रेति । **उपप्लवो**—बाधः । प्रत्यक्षबाधाभावादनुपप्लवभूतः स चासावर्थश्च तथोक्तः । **स्वभावः**—स्वरूपं । **विपर्ययैः**—यौक्तिकबाधैः प्रत्यक्षबुद्धेरबाधितार्थविषयकत्वस्यौत्सर्गिकत्वादित्यर्थ इति । **तदिहेति**—एकस्मिन् धर्मिणि भ्रान्त्यभ्रान्त्यनुगत प्रामाणिकधर्माङ्गीकारेण ह्ययं बाध्यबाधकभावसमर्थनार्थो वा काष्ठाप्राप्तिसमर्थनार्थो वा ग्रन्थ आरब्ध इति न विस्मर्तव्यमित्यर्थः । **बुद्धन्तराणीति**—यद्यपि-दृष्टमेव स्पृशामीति पूर्वोक्तापि प्रत्यभिज्ञा एकेन्द्रियजन्यैव चक्षुर्मात्रजन्यत्वात्; तथाऽपि सा इन्द्रियद्वयसापेक्षेति भावः । **अभिन्नेन्द्रियजन्यानि**—भिन्नेन्द्रियानपेक्षाणि ।। ननु विशदाविशदज्ञानं कथं धर्मिसाधकमित्यत्राह—**अल्पधर्मविशिष्टतयेति** तथाच एकस्यैव वस्तुनो भूयोऽल्पधर्मविशिष्टतया ग्रहणमेव प्रतीतेर्विशदाविशदत्वमिति धर्मिसिद्धिरिति भावः । ननु विशदाविशदत्वमधिकन्यूनविषयत्वमेव, न त्वेकधर्मिणि अधिकन्यूनधर्मविषयत्वं । तथा च न धर्मिसिद्धिरित्यत्राह * **न तु न्यूनाधिकेत्यादिना** । ननु रूपमेव दूरादूरयोरविशदं विशदं च भासतां; न (च) तु रूप एवाल्पबहुधर्मप्रसङ्गः; तदाऽपि तदाश्रयासिद्धेः इत्यत्राह—**नचेति** । तथा च पीतशङ्खभ्रमस्थले पूर्वं श्वेत्यस्य ग्रहणादिदानीं पीतिमग्रहणात्तयोरभिन्न-

त्वात् तद्विषयतया प्रत्यभिज्ञाया अनिर्वाहादुभयानुयायिधर्मिसिद्धिरिति भावः। परिमाणस्य द्वीन्द्रियग्राह्यतया प्रत्यभिज्ञाविषयत्वमस्त्वित्यत्राह—**नापीति**। काल्पनिकं परिमाणमस्त्वित्यत्राह–**दूरे चेति**। तथाच दूरान्तिकयोर्भिन्नपरिमाणस्फुरणान्न प्रतिज्ञानिर्वाह इति भावः। उक्तन्यायेन संख्याया अभावात्; काल्पनिकत्वेऽपि दूरासन्नयोः भिन्नसंख्यास्फुरणान्न तामादायापि निर्वाह इत्याशङ्क्याह--**अत एवेति** ननु संशयानुरोधात्कथं धर्मिसिद्धिरित्यत्राह—**संशयविपर्ययौ तावदिति**। किञ्चिदाकारेणाधिष्ठानज्ञानं किञ्चिदाकारविशिष्टतया च तदज्ञानं तस्मिन् सादृश्यज्ञानं च तत्कारणं। तौ तद्धर्म्यभावे न संभवत इत्यर्थः। तेषां कारणत्वे नियामकमाह–**तथा दृष्टि नियमश्चेति**–अन्वयव्यतिरेकदर्शनादित्यर्थः। ननु स्तो निर्धर्मकत्वेऽपि संशयविपर्ययावित्याङ्क्य कारणासंभवान्न संभवत इत्याह–**अधिष्ठानस्य कार्त्स्न्येनेति** निर्धर्मकत्वपक्षे अधिष्ठानज्ञानमस्ति न वा ? अस्ति चेत् कात्स्न्र्येन तद्रूपविशेषदर्शनादज्ञाताकाराभावान्न भ्रमः। तदभावे सामान्येनापि तज्ज्ञानाभावान्न भ्रम इत्यर्थः। ननु निर्धर्मकत्वेऽपि भाताभाताकारोऽस्तु इत्यत्राह--**भाताभातेति**। अयं भावः—एकस्य वस्तुनो न स्वरूपेण भाताभातत्वसंभवः विरोधात्; अपि तु किञ्चिद्धर्मविशिष्टतया ज्ञातत्वं किञ्चिद्धर्मविशिटष्त्वेनाज्ञातत्वं वाच्यं, तच्च निर्धर्मकस्य न संभवतीत्यर्थः। बाधकप्रत्ययबलादपि धर्मसिद्धिरित्याह—**बाधकधीश्चेति**। ननु धर्मस्वरूपज्ञानमेव बाधकमस्तु न तावता धर्मधर्मिभाव आवश्यकः इत्यत्राह—स्वरूपग्रहस्येति। तथाच क्वचिदप्यारोपो न स्यादिति भावः। जिज्ञासाबलाच्च धर्मधर्मिभावासिद्धिरित्याह–**जिज्ञासा चेति** इदं च निर्विशेषजिज्ञासाखण्डनसमये शतदूषण्यां प्रपञ्चितमाचार्यैः; तत्रानुसन्धेयम्। **विदिताविदिताकारवत्त्वमिति** आकारो–धर्मः। **भिन्नाभिन्नवादिभिः**—भास्करादिभिः। **आविर्भावधर्मः**—धर्मिग्रहणनियतग्रहणो धर्मः इदन्त्वादिः। **तिरोधानधर्मः**:—धर्मिग्रहणसमये कदाचित् तिरोधानार्हधर्मः शुक्तित्वादिः। तत्रानुगतं धर्मीत्यर्थः। प्रकारान्तरमाह—**यत्रेति**। यत्र वा वस्तुनि धर्मग्रहणात्पूर्वं ज्ञानं भवेत् तद्धर्मीत्यर्थः। शुद्धनिर्विकल्पकानङ्गीकारात् स्वानभिमतांशमाह- **अत्रागृहीतेति**—अगृहीताशेषधर्मस्य धर्मिणो ग्रहणमित्यर्थः। धर्मधर्मिभेदे परोक्तं बाधकं शङ्कते—**यत्तु बौद्धैरुक्तमिति। धर्मोपकारेति** सिद्धिटीकायामिदमित्थं व्याख्यातं धर्माणां न केवलं धर्मिमात्रमङ्गीकार्यं; अपितु धर्मान्प्रति उपकारः तच्छक्तिश्च। न हि तदनुपकारिणस्तद्वत्वं संभवतीति माभूद्दश मासानपि धृत्वा प्रसूतापि वन्ध्या पुत्रिणी। नचाशक्त उपकारको नाम; अतिप्रसङ्गात्। नहि नद्यश्शतं सम्भूयापि पचेरन्; तस्माद्धर्मिणमङ्गीकुर्वता तस्मिन् धर्मोपकारः तदङ्गभूता शक्तिश्चेति पदार्थद्वयमङ्गीकरणीयं। अस्तु; सम्पदेव सम्पदोऽनुबध्नातीति चेत्; नायं संपत्सपंदनुबन्धः; किन्तु विपदो विपदनुबन्ध एवायमिति प्रतिपादनार्थमिदं पद्यमवतीर्णं। **धर्मेति** अयमर्थः धर्मविषयोपकारार्थं याश्शक्तयो मया आपादिताः तासां धर्मिणां भेदोऽभेदो वा ? आद्ये तासामपि शक्तीनां धर्मत्वं

वाच्यं धर्मिणश्च तद्वत्त्वं । ततश्च **तासां** शक्तीनां **ततो**—धर्मिणः उपकारो यदि न; तदा किं ता अस्य स्युः ? अन्येषामपि किं न स्युः ? न ह्यनुपकारकस्तद्वान्नाम । अस्तु तर्हि तत्राप्युपकारश्शक्तिश्च; तत्राह—**तथा स्यादिति**—त्रिचतुरकक्ष्याविश्रमे नियामकाभावात् । अस्तु तर्हि—

स्वभावनियमाभावादुपकारोऽपि दुर्घटः ।

इति न्यायेनाभिन्ना इति द्वितीयपक्षः; तत्राह—**नानोपाधीति** । उपकाराङ्गभूता शक्तिः उपकाराङ्गशक्तिः । अयं भावः—रूपवत्त्वमात्रमस्य न स्वरूपं; अपि तु स्पर्शवत्त्वमपि । तथाच रूपवत्त्वादिसमस्तद्धर्मैरभिन्नात्मा धर्मी । तथाच यदैकधर्मवत्तया गृह्यते तदा सर्वधर्मात्मनापि गृहीत एव; स्वरूपे ग्रहणासंभवात् । ततश्चोपकार्यस्य धर्मस्य अनिश्चितः को भेदस्स्यात् अनिश्चितांशस्स्यात्रूपस्पर्शादीनां सर्वेषां एकात्मत्वेनागृहीतांशाभावादिति धर्मधर्म्यङ्गीकारेऽपि भाताभातांशानुपपत्तेः संशयाद्यनुपपत्तिस्समेत्यर्थः । **उपाधीनामिति** ॥ न तावद्रूपस्पर्शवद्धर्म्यभेदमात्रेण रूपादीनामभेदः; अन्वयव्यतिरेकसिद्धभिन्नकारणकानां रूपादीनां घटपटयोरिवैक्यासंभवात् । नच धर्मोपकारशक्तीनामित्युक्तदूषणं संभवति; अन्वयव्यतिरेकसहकृतप्रत्यक्षादिप्रमाणैः कश्चिदेव रूपादीनां धर्मीति नियमसंभवात् । अन्यथा क्षणसंतानपक्षेऽपि सर्वक्षणसंतानोऽपि सर्वस्य किं न स्यात् ? इति तत्राप्युपकारशक्तिकल्पनमुखेन बहुविप्लवप्रसङ्गात् । तथाच धर्माणां भेदे युगपद्ग्रहणनियमोऽपि नास्ति; ग्राहकाणां परस्परव्यभिचारित्वात् । तस्मात् धर्मिणो ग्रहणेऽप्यनिश्चितांशसंभवात् 'को भेदस्स्यादनिश्चितः' इत्यनुपपन्नं; रूपस्य ग्रहणेऽपि रसस्याग्रहणोपपत्तेः । रूपादितया विकल्प्यमानस्येत्युक्तं पक्षं दूषयितुमनुभाषते **नन्वस्तु प्रतिसन्धानबलादिति** । एकस्मिन् वस्तुनि रूपरसाद्याकारबुद्धिः कथमित्यत्राह—**एकस्मिन्नेवेति** । ननु ग्राहकनिष्ठानां धर्माणां ग्राह्ये ग्रहणमस्तु तत्राविद्यमानानां रूपादीनां कथं ग्रहणमित्यत्राह—**सव्यदक्षिणविपर्यासश्चेति** । **इह तावदिति** । क्वचिदप्यसिद्धस्यारोपासंभवात् ग्राहकभेदान्न भेदधीरित्यर्थः । किञ्च इन्द्रियभेदः प्रमितो ग्राह्यभेदोऽध्यस्यते उत सत्तयेति विकल्प्याद्यं दूषयति—**चक्षुरादीति** ।

कल्प्यत इति—ज्ञायत इत्यर्थः । ग्रहणभेदाद्ग्राहकभेदः कल्प्यतामित्यत्राह—**मध्ये इति** । बुद्धेर्भेदो न जातिकृतः; एकविषयप्रत्यक्षानुमित्योरिव समानव्यवहारप्रसङ्गात् । अपितु विषयकृतः । स च न संभवति; ग्राहकभेदज्ञानायत्तत्वात् । तथाच इन्द्रियभेदज्ञाने विषयभेदारोपः ततश्च विज्ञाने भिन्नविषयत्वज्ञानं तत इन्द्रियभेदज्ञानमिति चक्रकमित्यर्थः ।

इन्द्रियेति—तथाविधकारणस्यानुपलम्भात्कल्पनं इन्द्रियवैजात्येन इन्द्रियवैजात्यं च तेनेत्यन्योन्याश्रय इत्यर्थः । ननु तर्हि व्यञ्जकभेदात् क्वापि धीभेदो

न स्यात् इति शङ्कते—**नन्विति**। दृष्टान्तदार्ष्टान्तिकवैषम्येन परिहरति—**सत्यमिति**। सत्यं; मालिन्यादयो भेदेन दृष्टा आरोप्यन्ते रूपादयस्त्वक्षेषु तदन्यत्र वा न गृहीताः कथमारोप्येरन् इत्यर्थः। द्वितीयं पक्षमाशङ्कते—**उपाधीति। तत्तद्दोषेति**—न चात्रेन्द्रियस्वरूपभेदतद्दोषव्यक्तीनां सिद्धिरिति भावः। ननु प्रतीतिवैजात्यं सिद्धं कारणादिवैजात्यं साधयतीत्यत्राह—**कल्प्याकारस्येति**। **वैजात्यं** विषयकृतमिति तद्भ्रान्तिरन्यत्र तत्सिद्धिसापेक्षेति भावः। ननु चक्षुरादि-स्वभावास्सिद्धाः। त एव दोषा अध्यासहेतवः! नचान्यत्राप्रसिद्धस्यारोपानुपपत्तिः; आरोप्यज्ञानस्याहेतुत्वात्, अन्यथा कदाचिदपि सर्पादर्शिनो मण्डूकवसाञ्जनाक्त-नेत्रस्य वंशे सर्पभ्रमाभावप्रसङ्गादिति शङ्कते **चक्षुरादि स्वभावा एवेति**। चक्षु-रादीनामेव दोषत्वे स्वलक्षणस्यापि सिद्धिर्न स्यात्, दोषजन्यतया निर्विकल्पस्यापि प्रामाण्याभावप्रसङ्गादिति परिहरति नेति। **ततश्चेति** धर्मधर्मिणोरुभयोरपि कल्पितत्वप्रसङ्गात्तदुभयातिरिक्तपदार्थासम्भवाच्च न पारमार्थिकत्वं ग्राहकरूप-भेदस्य वक्तुं शक्यमित्यर्थः। ननु निरधिष्ठानभ्रमानुपपत्त्यैव चक्षुरादीनां दोषत्वं प्रतिनियतमित्यत्राह—**अधिष्ठानेति**—**बुध्यैवेति**–योगाचारवत्तत्तत्पदार्थविषयबुध्यैव तेते पदार्थाः कल्प्यन्तामित्यर्थः। (अधिष्ठानबुद्धिरेवाधिष्ठानमस्तु) कल्पनाला-घवाच्च त्वत्पक्षादप्ययं पक्षो ज्यायानित्याह—**तथाचेति**। बुद्धिशक्तिः बुद्धिरूपा शक्तिर्वासनेत्यर्थः। न च दुरालभास्पर्शस्यैकत्वेऽपि स्पर्शनेन्द्रियप्रदेशभेदैः अज्ञातैरेव करतलप्रकोष्ठादिवृत्तिभिः अनेकधोल्लेखस्य सर्वैरङ्गीकारात्तन्न्यायस्सर्वत्राप्य-स्त्विति शङ्कते—**नन्विति** तत्राप्येकस्मिन् स्पर्शे ग्राहकप्रदेशभेदादनेकधोल्लेखोऽ-सिद्ध इति परिहरति। **नेति**–नन्वेकस्मिन्ननेकधोल्लेखाभावे विकृतितारतम्यं कथमि-त्यत्राह—**प्रदेशभेदेनेति**—यथा वह्न्यवयवानामुष्णस्पर्शवतां तत्तत्प्रदेशभेदेन अल्पशो बहुशश्च प्रवेशेऽपि स्पर्श एकरूप एव गृह्यते; स्पर्शवद्बह्वल्पव्यक्तिप्रवेशकृत-मेव विकृतितारतम्यं, तथा दुरालभावयवानां (प्रदेशभेदेन) प्रविष्टानामल्पत्व-बहुत्वकृतमेव तारतम्यमित्यर्थः। नन्विन्द्रियादिभेदेन तृणादिवस्तुषु प्रतिकूलत्वमनु-कूलत्वं च कल्प्यत इति सर्वसंमतं; तद्वदत्रापि भवत्विति शङ्कते—**नन्विति**। ननु तत्र द्वयोरपि पारमार्थिकत्वमस्त्वित्यत्राह—**नचेति**। तथा च विनिगमकाभावादुभयं कल्पितमेवेति भावः।

तथाचोक्तं—

परिव्राट्कामुकशुनामेकस्यामेव योषिति ।
कुणपः कामिनी भक्ष्यमिति तिस्रो विकल्पनाः ॥

इति। अनेकान्तवादः—सप्तभङ्गीवादः। अनुकूलप्रतिकूलत्वयोः प्रतियोगि-भेदेन विरोधाभावान्नेन्द्रियकल्पितत्वं किं तु पारमार्थिकत्वमेवेति परिहरति—**तदपीति**। तर्हि सर्वेषामुभयथा प्रतीतिस्स्यादित्यत्राह—**तत्तदिति**। पारमार्थिकत्वं **विरोधाभावं चोपपादयति—वस्तुष्विति। बुद्धिभेदावेवेति**। अनुकूलविषयिणी

बुद्धिः सुखं प्रतिकूलविषयिणी दुःखं इत्यङ्गीकृतमित्यर्थः। परेषां तु ते तज्जनके इति विशेषः। तथाच—

अर्थेनैव विशेषो हि निराकारतया धियाम्।

इति न्यायेन तद्भेदाद्धीभेदः धीभेदात्तद्भेद इत्यन्योन्याश्रय इत्यर्थः। उत्पत्तिज्ञप्त्योरन्योन्याश्रयो दोषो वाच्यः। न तावदुत्पत्तावन्योन्याश्रयः, अर्थभेदः स्वसामग्र्या न तु धीभेदेन; धीभेदस्त्वर्थभेदेनेति। नापि ज्ञप्तौ; धीभेदसामग्र्येव विषयभेदज्ञाने कारणं भेदज्ञाने च मनस्सन्निकर्षादिकमिति ज्ञप्तावपि नान्योन्याश्रय इति परिहरति—**न विषयभेदस्येति**। परस्परजन्यजनकभावे परस्परप्रतीतिसापेक्षप्रतीतिकत्वे (वा) नान्योन्याश्रय इति भावः। **एवमुपाधिभेदैरिति** यद्यप्येकमेव वस्तु ह्रस्वदीर्घत्वबुद्धिविषयः; न चात्र ह्रस्वदीर्घत्वे परिमाणे स्तः; परिमाणद्वयाभावात्; तथापि निरूपकभेदाधीनन्यूनाधिकभावः परिमाणेऽस्तीति तत्रापि विषयभेद एवेति भावः। **पूर्ववदिति**—ज्ञाताज्ञातभिदाभावादित्यर्थः। ग्राहकभेदेन रूपरसादिबुद्धिभेदोपपादनेऽपि ग्राहकभेदाभावान्नीलपीतादिधीभेदो न स्यादित्याह—**नीलपीतेति**। नीलपीतयोश्चक्षुरेकेन्द्रियग्राह्यत्वात् शीतोष्णयोस्त्वगेकग्राह्यत्वात् मधुराम्लयोरसनैकेन्द्रियग्राह्यत्वादिति भावः। ननु मरीचिकाया मिथ्यात्वे तदन्तः पाति वीचिकाया इव रूपादि भेदस्यैव मिथ्यात्वे तदन्तः पाति नीलादि भेदस्य सुतरां मिथ्यत्वं; (तथा) ग्राहकभेदाभावेऽपि तद्भेदधीः कथञ्चित्समर्थनीयेति शङ्कते—**रूपादिभेदमिथ्यात्व इति**। **असिद्धस्येति**—मृगमरीचिकाया मिथ्यात्वं नाम किं स्वरूपस्य कुत्राप्यभावः? स त्वसिद्धः। अत्र सिद्धसूर्यालोकेऽन्यत्र सिद्धजलत्वारोपात् तथा वीचिकाप्युपपन्ना। नचात्र तन्न्यायो वक्तुं शक्यः; क्वापि (धी) रूपादिभेदस्यानभ्युपगमादिति भावः। ननु नीलादिनिदर्शनेन मरीचिकायाः मिथ्यात्वं साध्यतामित्यत्राह—**मिथ इति**। **निदर्शनमात्रेणेति** - स्वप्नादिप्रत्ययनिदर्शनमात्रेण स्वलक्षणमात्रस्यापि निह्नवप्रसङ्गादित्यर्थः। ननु रूपवत्त्वस्पर्शवत्त्वयोः प्रतियोगिभेदाद्भेदो वाच्यः; ताभ्यां च धर्मिण ऐक्येऽपि धर्मिभेदस्यादिति शङ्कते—**तथापीति**। स्वरूपस्यैकत्वात्तदभिन्नयोरूपवत्त्वस्पर्शवत्त्वयोर्भेदाभावान्न विरोध इत्याह—**नेति**। **धर्मभेदस्येति** नहि मशकमातङ्गभेदवद्रूपस्पर्शादिभेदस्तदाश्रयाभेदविरोधीति भावः। त्वयाप्येकस्य प्रामाणिकानेकाकारोऽप्यभ्युपगत इत्याह—**वेद्येति**। एका—बुद्धिः वेद्यस्य घटस्य हेतोश्चक्षुरादेः फलस्य चोपादानादेराकारैः **समेतीति**—सम्बध्नातीत्यर्थः; तथाहि—बाह्यार्थवादिना त्वयाऽप्ययं घट इति ज्ञानस्य घट एव विषयो नान्यदिति व्यवस्थासिद्ध्यर्थं वेद्यस्य घटस्याकारो ज्ञानेऽङ्गीकरणीयः। अन्यथा—

धियो नीलादिरूपत्वे बाह्योऽर्थः किं प्रमाणकः।
धियोऽनीलादिरूपत्वे स तस्यानुभवः कथम्॥

इति त्वदुक्तेरयोगात्। अनीलादिरूपत्वे इत्युत्तरत्र छेदः। तथा चाक्षुषमेवेदं ज्ञानं इति व्यवस्थासिद्धचर्थं हेत्वाकारोऽप्यपेक्ष्यः। एवं फलाकारोऽप्यूह्यः। **बाह्योऽपि**—घटपटादिरपीत्यर्थः।

दृष्टत्वादिति—रूपवान् गन्धवान् इति दृष्टत्वादित्यर्थः। क्षणिकबुद्धिवादिनस्ते युगपदेवानेकाकारः; **नः**—अस्माकं **युगपत्क्रमशोऽपि**; श्यामघटे क्रमशो रक्तताद्युत्पत्तिदर्शनात्। प्रतिसम्बन्धीति—एकस्यापि देवदत्तस्य **प्रतिसम्बन्ध्यनेकत्वं**—भ्रातृपुत्रतातमात्राद्यनेकत्वं यथा तदैक्यबाधकं न भवति तथा **सम्बन्ध्यनेकत्वं**—घटसम्बन्धिनां रूपरसादीनामनेकत्वं बाधकं न भवति। यद्वा— यथैकस्य वस्तुनः प्रतिसम्बन्धिनो— विरोधिनो बहवस्सन्ति तथेत्यर्थः। **स्वाभीष्टे**— क्षणिकत्वबुद्धौ। अन्यथा वेद्याकारैर्बुद्धेरपि भेदःस्यादिति भावः ॥८॥ **इति द्रव्यसाधनम्।**

अक्ष०। अथ द्रव्याद्रव्यभेदेन विभागोऽनुपपन्नः द्रव्याद्रव्ययोरुभयोरभावात् अत एव द्रव्यस्य आगन्तुकधर्मवत्त्वं लक्षणमित्यप्यनुपपन्नम्, धर्मधर्मिणोरुभयोरभावात्। निराधारा निर्धर्मका रूपादयः पञ्च चत्वारो वा पदार्थाः इति हि वैभाषिका आहुः तदेकदेशिनस्तु रूपादित्वेन विकल्पितमेकमेव वस्त्विति वदन्तीत्याक्षेपे पक्षद्वयमिदमनेन क्रमान्निरस्यति—

एकार्थेति तत्र प्रथमं रूपादीनां निराधारत्वनिरासः। अस्ति "दृष्टमेवेदं स्पृशामि" इति एकार्थविषयिणी प्रत्यभिज्ञा। साच बाधदोषाद्यभावेन विपर्ययादिरूपत्वायोगात् **दृढतरा** निश्चितप्रामाण्या स्वविषयैक्यसाधने प्रभवति। तद्विषयो रूपादिकमेवास्त्वित्यत्राह—**दर्शनस्पर्शनाभ्यामिति** दर्शनं चक्षुः चाक्षुषं वा। स्पर्शनं त्वगिन्द्रियं। उभाभ्यामित्थं जायते पूर्वं चक्षुषा दृष्टस्य तत्संकारसहकृतेन त्वगिन्द्रियेण खलु इत्थं प्रत्यभिज्ञा जायते अत इह द्वीन्द्रियग्राह्यमेव विषयो भवितुमर्हति नत्वेकैकेन्द्रियग्राह्यं रूपस्पर्शादिकम्।

नचानयोस्संघातो विषय इत्यपि वक्तुं शक्यमित्याह—**संघातादेरिति** आदिना नैरन्तर्यादिपरिग्रहः। **अयोगादिति**—संघातस्यातिरिक्तत्वोपगमे द्रव्यवाद एव वरं स्यात् अनतिरिक्तत्वे तु प्रत्येकानतिरिक्तस्य एकैकस्य द्वीन्द्रियग्राह्यत्वा योगादुक्तप्रत्यभिज्ञाविषयभावो न संभवति। एवं नैरन्तर्यवादेऽपि प्रत्येकानतिरेकादिति भावः। अतः **सा** प्रत्यभिज्ञा **वस्तु** स्वविषयं वस्तु। **रूपादितः** रूपस्पर्शाद्यपेक्षया। **अन्यत्**—भिन्नं। **अवगमयति** निश्चाययतीत्यर्थः।

एवमेकैकेन्द्रियजन्यानि बुद्धयन्तराण्यपि अवगमयन्तीत्याह—**एकस्मिन्निति**।

एकस्मिन् वस्तुनि। **दूरतादेरिति** आदिना समीपादिपरिग्रहः। **अविशदेति**—दूरे पूर्वमविशदं दृष्टमद्य समीपे विशदं पश्यामीति प्रत्यभिज्ञा चक्षुरिन्द्रियेण जन्यते तत्र अल्पधर्मविशिष्टतया वस्तुनो दर्शनमविशदं। भूयोधर्मविशिष्टतया दर्शनं ततो विशदं; नचात्र रूपमात्रं विषयः तस्य भूयोऽल्पधर्मवैशिष्ट्यानभ्युपगमात् अभ्यु-

पगमे धर्मधर्म्युभयसिद्धेरनिवार्यत्वात्। दूरे शुक्लतया दृष्टमेव शंखं समीपे पीतं पश्यामीति प्रत्यभिज्ञायां प्रतीयमानरूपभेदेन तदादाय विषयैक्यायोगाच्च। अत्र उत्तरेणादिना संशयविपर्ययोः ग्रहणम्। अधिष्ठाने समानधर्मग्रहणात् विशेषधर्माग्रहणाच्चैव हि तत्संभवः—अतस्तावपि धर्मातिरिक्तं धर्मिणमवगमयतः। **तद्वत्**—उक्तप्रत्यभिज्ञावदित्यर्थः।

अथास्तु अनेकेन्द्रियग्राह्यमपि एकमेव किञ्चिद्वस्तु तत्तु रूपाद्यात्मकं तदाश्रयरूपं वेति नाभ्युपैमः, किन्तु ग्राहकेन्द्रियभेदात् एकस्मिन्नेव रूपत्वस्पर्शत्वादिमतिर्जायते। यथा मणिकृपाणदर्पणादिव्यंजकभेदेन मुखादेः अणुत्व पृथुत्व मलिनत्व विमलत्वादिग्रहः। अतो न वस्तुतो रूपादयस्सन्तीत्यत्राह—**नैकत्वेऽपीति**। वस्तुनः एकत्वेपि तदेकमेव वस्तु—**अक्षभेदात्**–इन्द्रियभेदात्। **भिद्युरमिव** रूपत्व स्पर्शत्वादिना भिन्नभिन्नमिव भासते। एकत्रैव रूपत्वस्पर्शत्वाद्यारोपः इति न वक्तुं युक्तमिति भावः। कुत इत्यत्राह–**मिथ इति** दर्पणादिवदिन्द्रियाणि न प्रत्यक्षयोग्यानि किन्तु रूपादिग्रहणादुन्नेयानि। तथा च ग्राह्याकारभेदात् ग्राहकभेदसिद्धिः ग्राहक भेदात् ग्राह्याकारभेद इत्युपगमे अन्योन्याश्रय इत्यर्थः।

अत्रादिशब्देन नीलपीतशीतोष्णमधुराम्लादिभेदासम्भवो गृह्यते नील पीतादेः ग्राहकभेदाभावात्। अतो रूपस्पर्शाद्यनेकधर्मवत् स्थिरमेकं द्रव्यं उक्तप्रतीतिभिः सिद्धयतीति भावः।

धर्मो निर्धर्मकश्चेत्कथमिव भविता सोऽभिलापादियोग्यो
धर्मेणान्येन योगे स च भवति तथेत्यव्यवस्थेति चेन्न।
कश्चिद्धर्मोऽपि धर्मी स्फुटमतिमथने स्वान्यनिर्वाहकत्वं
तन्निष्कर्षप्रयोगेष्वपि भवति पुनस्तस्य धर्मी विशेषः॥ ६॥

सर्वा०। एवमेकाश्रयानेकदृष्टावन्यतरनिह्नवार्थिनौ पुनरपि धर्मधर्मिभावभङ्गमुखेन प्रवृत्तौ प्रतिहन्येते; अन्यथा*अन्तस्तद्धर्मोपदेशादित्याद्यनिरूढप्रायं स्यात्। नन्वनुमानं प्रमाणमिच्छन्न धर्मधर्मिभावं बाधितुमर्हति, तस्य हेतुसाध्यधर्माश्रयावश्यंभावात्। आह च **धर्मकीर्तिर्हेतुबिन्दौ**—

पक्षधर्मस्तदंशेन व्याप्तो हेतुस्त्रिधैव सः।
अविनाभावनियमाद्धेत्वाभासास्ततोऽपरे ॥ इति ॥

अन्येऽपि *ग्राह्यधर्मस्तदंशेन व्याप्तो हेतुरिति। सत्यं, काल्पनिकहेतुसाध्यधर्मद्वारा अनुमानप्रवृत्तिः, पारम्पर्येण तु स्वलक्षणविश्रान्त्या भाक्तमनुमानप्रामाण्यमिति हि बौद्धानां रहस्यम्। तत्त्वगत्या चतुर्विधानामपि तेषां धर्मधर्मिभावः क्षेप्यः। अतस्तद्भङ्गमनूद्य प्रत्याह—**धर्म** इत्यादिना। अयमर्थः—यस्त्वया कश्चिद्धर्म इष्यते स निर्धर्मकः सधर्मको वा? आद्ये तस्य शब्दवाच्यत्वं न स्यात्, अविशिष्टस्य व्युत्पत्त्याद्यगोचरत्वात्। सर्वधीशब्दानां विशिष्टविषयत्वं

च भवतां भाष्यादिषूक्तम्। द्वितीये तु येन धर्मेण धर्मः सधर्मकः सोऽपि पूर्ववद्धर्मान्तरेण धर्मी स्यादित्यपरापरापेक्षायामनवस्था, द्वित्रादिपर्वमात्रे विश्रम इति व्यवस्थाभावात्। धर्मत्वं च धर्मणां भावः। अतस्तस्यापि धर्मत्वं वाच्यम्। न चैतत्तस्यात्मैव, आत्माश्रयात्; न चान्यत्; अनवस्थानादेवेति चेत्, तन्न; सर्वेषां धर्माणां निर्धर्मकत्वानङ्गीकारात्। कश्चिद्धर्मोऽपि धर्मी स्फुटं स्पष्टम्। स्फुटदृष्टं हि नापह्नोतव्यम्। त्वयाऽपि हेतुसाध्यादिधर्माणां पक्षधर्मत्वादिधर्माः स्वीकार्याः, अन्यथाऽनुमानासिद्धौ क्षणभङ्गादिसाधनायोगात्। अतिमथने—अत्यन्तचर्चायाम्। यद्वा स्फुटमतिमथने—विशदबुद्ध्या सावधानं विमर्शे सतीत्यर्थः। स्वान्यनिर्वाहकत्वं—स्वपरव्यवहारादिव्यवस्थपकत्वम्। यत्र ह्यनवस्थाभयाद्धर्मान्तरं नेष्यते तत्र निमित्तान्तरनिरपेक्षौ तद्धीव्यवहारौ। यथा गोशब्दस्य व्यक्तिवृत्तावित्थंभावभूतं गोत्वं निमित्तम्; गोत्वे तु न निमित्तान्तरमपेक्ष्यते, आनन्त्यव्यभिचाररूपानुपपत्त्यभावात्। एवं शुक्लादिशब्देष्वपि। ननु गौः शुक्लः इत्यादिविशेष्यपर्यन्तोक्तौ तथा स्यात्; क्वचिद्गुणमात्रविषयेषु शुक्लादिशब्देशु भावप्रधानेषु *द्येकयोरित्यादिषु त्वतलाद्यन्तेषु जातिर्गुणः क्रियेत्यादिषु च वाच्यानां तत्तद्धर्माणामिदंत्वेन निर्देशादित्थंभावसापेक्षत्वेऽनवस्था। अनपेक्षत्वे तु इदमित्थमिति हि सर्वा प्रतीतिरिति भाष्यादिविरोध इत्यत्राह—**तन्निष्कर्षप्रयोगेष्वित्यादि**। अयं भावः—उदाहृतेषु नियतानियतनिष्कर्षकशब्देषु जातिगुणादेः प्रधानतया निर्देशेऽपि सन्ति केचिद्यथाप्रमाणमित्थंभावाः। त्वयाऽपि हेतुसाध्यादि [दीनां] धर्माणां पक्षधर्मत्वादिधर्माः स्वीकार्याः। अनवस्था च कथञ्चिदुपशमनीया। स्वीकृतं च सम्वेदनसम्वेदने शब्दशब्दादौ स्वपरनिर्वाहकत्वम्। न चात्र कर्मकर्तृविरोधः; स्वोत्पादकत्वादाविव पौर्वापर्यादिवैगुण्याभावात्। किञ्च स्वलक्षणादीनां जात्यादीनां च सम्वृत्तिसिद्धानां निर्धर्मकत्वेऽपि कथञ्चिदभिलापार्हत्वं त्वयाऽपि ग्राह्यम्; अन्यथा तत्तसम्व्यवहारेण कथादिप्रवृत्त्ययोगात्। अतो निर्धर्मकं शब्दवाच्यं न भवतीति स्वसिद्धान्तविरोधः, स्ववचनव्याघातश्च। आस्तामेतत्; समानाधिकरणस्येव व्यधिकरणस्यापि व्यावर्तकत्वादित्थंभावत्वं सिध्यति। तथा च नियतनिष्कर्षकप्रयोगेष्वप्येतेषु धर्मो धर्मं विशिनष्टि, यथा पटस्य शौक्ल्यं खण्डस्य गोत्वमित्यादिषु। धर्मिविशेषो धर्मस्य स्वेतरनिष्ठाद्वावृत्तिधीहेतुरित्यर्थः। न चात्र मिथःसंक्षयः, विशेषणविशेष्यधियोस्तद्व्यवहारयोश्च मिथो जन्यत्वाभावात्। निष्कर्षानिष्कर्षव्यवहारयोश्च विवक्षाभेदायत्तत्त्वात्; उभयधा व्यवहारस्य सर्वत्र सर्वैरपि दुरपह्नवत्वात्। यश्चात्र समानाधिकरणप्रयोगे विशिष्टत्वेनावस्थितोऽप्यर्थतः स्वधर्ममन्यनिष्ठाद्व्यवच्छिनत्ति, स एव पटस्य शौक्ल्यमित्यादिप्रयोगे गुणीभवन् कण्ठोक्तेन स्वसम्बन्धेन विशिनष्टि। गोत्वं शौक्ल्यमित्यादिपदेष्वपि *तस्य भावस्त्वतलावित्यादिविहिततद्धिताश्रयवाच्यत्वेन धीस्थ एवार्थो निष्कृष्यमाणः स्वविशेषणनिरूपकतयाऽनुशिष्यते। एवं विशेष्यस्यैव द्विधा विशेषणयोग इति व्यञ्जनाय पुनःशब्दः; निष्कर्षप्रयोगेषु विशेषं वा द्योयति ॥ ९ ॥

आनन्द०। इह वादिनां बहूनि कर्तव्यानि भवन्ति—स्वपक्षप्रदर्शनं तत्र साधनोपन्यासः साधनसमर्थनं प्रतिवाद्युद्भावितस्वपक्षदूषणोद्धारः परपक्षदूषणसमर्थनं इत्यादीनि। तत्र द्रव्याद्रव्यविभागेन स्वपक्षप्रदर्शनं कृतं। प्रत्यभिज्ञाश्लोके च प्रमाणोपन्यासः। तदनन्यथासिद्धयुपपादनेन च—

क्षीणानि चक्षुरादीनि रूपादिष्वेव पञ्चसु।
न षष्ठमिन्द्रियं तस्य ग्राहकं विद्यते बहिः॥

नैकं रूपाद्यभेदो वा दृष्टं चेन्नेन्द्रियेण तत्।
अक्षानेकत्ववैयर्थ्यं स्वार्थे भिन्नेऽपि शक्तिमत्॥

अविद्यमानाभेदेऽपि तदक्षागोचरत्वतः।
स्पृशतोऽप्यस्ति सा बुद्धिः द्रव्यं तत् स्पर्शनं यदि॥

नायं घट इति ज्ञानं सर्वं (वर्ण) प्रत्यवभासनात्।

इत्यादीनि बौद्धपठितदूषणान्युद्धृतानि भवन्ति। इदानीं तु प्रमेयदूषणोद्धारः क्रियते इति सङ्गतिं दर्शयन् द्रव्यनिराकरणवादिनः पूर्वं प्रधानतया प्रस्तुतत्वात् तद्द्रव्यबाधकयुक्तीनां पृथगुपन्यासः तत्समाधानं च राद्धान्तिना वक्तव्यं; न चात्र तत्क्रियते धर्ममात्र पर्यवसानाद्वक्ष्यमाणयुक्तीनां; धर्ममात्रदूषणं च तच्छून्यश्लोकेस युक्तिकमुपपादयिष्यते। अतः कथमुत्तरश्लोकारम्भ इति शङ्काद्वयं पौनरुक्त्यं च परिहरन्नवतारयति—**एवमेकाश्रयेति** धर्मधर्मिभावोऽत्र निराक्रियते न धर्ममात्रं। उत्तरत्रवृत्तिविकल्पेन अत्र तु धर्मधर्मिभावभङ्गमुखेन इति न कृत्वाकरणं नापि पौनरुक्त्यमिति भावः। धर्मधर्मिभावस्योपयोगमाह—**अन्यथेति**—धर्मधर्मिभावाभावे 'अन्तस्तद्धर्मोपदेशात्, इत्यादेरयोगादिति भावः। बौद्धानां धर्मधर्मिभावखण्डनमपसिद्धान्त इति शङ्कते **नन्विति**। **हेतुर्धूमादिः साध्यं** वन्ह्यादिः स एव**धर्मः** तदाश्रयः पर्वतादिः पक्षः **धर्मकीर्तिः**—बौद्धविशेषः। **हेतुबिन्दौ**—हेतुबिन्द्वाख्यग्रन्थे। पक्षधर्म इत्यादि—**पक्षधर्मः** साध्याश्रयस्य पक्षस्य पर्वतादेः धर्मः। तन्निष्ठो धूमादिरिति यावत् **तदंशेन**—पक्षांशेन तस्य पक्षस्य अंशेन—विशेषणेन साध्येन व्याप्तः। त्रिविधेन कार्यस्वभावानुपलब्धिभेदेन। **अविनाभावस्य नियमात्**—विद्यमानत्वादित्यर्थः। **ग्राह्यधर्म** इत्यादि—ग्राह्यस्य इन्द्रियग्राह्यस्य पक्षस्य धर्मस्तदंशेन साध्येन व्याप्तो हेतुः इति न्यायकौमुदीकारादय आहुरित्यर्थः। नात्रार्थतथात्वलक्षणं प्रामाण्यमङ्गीक्रियते; तस्य निर्विकल्पकमात्रपर्यवसायित्वात् अपितु अविसम्वादित्वलक्षणं;तच्च**धर्मधर्मि**भावकल्पनयाऽप्युपपद्यते इति परिहरति **सत्यमिति**—अस्मिन् श्लोके न **वैभाषिक** एव पूर्वपक्षी; अपि तु चत्वारोऽपीत्याह—**चतुर्विधानामिति**। नन्वयं विकल्पो विषयसिद्धयसिद्धपराहत इत्याह—**अयमर्थं इति—त्वयेति**। परसिद्धेन परो बोधनीय इति न्यायान्न व्यावात इति भावः। **आद्ये इति**। वाच्यत्वाभावाद्भवन्मतानुरोधेन

तुच्छत्वं स्यादिति भावः। शब्दगोचरत्वाभावे हेतुः **अविशिष्टस्येति**। अविशिष्टेऽपि व्युत्पत्तिरस्त्वित्यत्राह **सर्वधीशब्दानामिति**। अविशिष्टस्य सकलप्रमाणबाह्यतया धीगोचरत्वाभावेन व्युत्पत्तिविषयत्वाभावान्न शब्दमात्रविषयत्वमित्यर्थः। यावद्दर्शनं व्यवस्था भविष्यतीत्याशङ्क्य च दर्शनमसिद्धमित्याह—**द्वित्रादीति**। ततश्च—

अस्मानुपालभ्य पुनः कुर्वतो धर्मविप्लवम्।
तव वाक्यमिदं हास्यं श्वश्रू निर्गच्छ वाक्यवत्॥

इति न्यायस्स्यादिति भावः। प्रकारान्तरेणानवस्थां प्रतिपादयति--**धर्मत्वं** चेति। धर्माणां भावो धर्मान्तरं न तु स्वरूपमित्यर्थः। ततः किमित्यत्राह--**अत इति**। **धर्मत्वं वाच्यमिति**—तत्रापि धर्मत्वे धर्मत्वं नाम धर्मान्तरं वाच्यमित्यर्थः। ननु सकलधर्मवर्तिधर्मत्वं स्वात्मैव; अन्यथा सकलधर्मवृत्तित्वव्याघातादित्यत्राह--**न चेति**। स्वनिष्ठत्वाभावे सकलधर्मवृत्तित्वव्याघातवत् स्वस्य स्ववृत्तित्वेऽपि व्याघातस्स्यादित्यर्थः। **अनवस्थानादेवेति**—स्वीकृतस्वीक्रियमाणधर्मवर्तिधर्मस्वीकारेऽनवस्था स्यादिति;

धर्मं समर्थयन् मूर्खः तेन धर्मेण बाध्यते।
कवाटविवरे पुच्छं प्रेरयेन् जम्बुको यथा॥

इति न्यायस्स्यादिति भावः। सिद्धान्ती परिहरति—**तन्नेति**। **सर्वेषामिति** जातिगुणक्रियादिवृत्तीनामेव निर्धर्मकत्वस्वीकारादिति भावः। तेषां च शब्दबोध्यत्वादिकमुपपादयिष्यते। **स्फुटदृष्टमिति**—

धर्मत्वेन प्रतीयन्ते स्पष्टं जातिगुणक्रियाः।
तत्तल्लक्षणयोगेन परस्परविलक्षणाः॥

इति प्रतीतत्वादित्यर्थः। अपसिद्धान्तमेव द्रढयति–**त्वयाऽपीति**। **अन्यथेति**–पक्षधर्मत्वादीनां कल्पितत्वेऽनुमानस्याभासत्वात् क्षणभङ्गादिसाधनमपि न स्यादित्यर्थः। **अत्यन्तचर्चायामिति**। अयं भावः—धर्मधर्मिभावमपलपतः को भावः? किमनुभव एव नास्तीति; उत सत्यपि तस्मिन् अनवस्थादुस्स्थतया न सद्विषयत्वमिति। नाद्यः; वाङ्मात्रेण प्रतीतिमात्रापह्नवप्रसङ्गात्। न द्वितीयः; स्वपरनिर्वाहकत्वेऽनवस्थाया एवाभावात् इति। तर्हि प्रथमत एव स्वपरनिर्वाहोऽस्तु किं **धर्ममात्रेणापीति** शङ्कां परिहर्तुं 'स्फुटमतिमथने' इत्येकनिर्वाहप्रमाणपरतया योजयति—**यद्वेति**। स्फुटा चासौ मतिश्चेति स्फुटमतिः। मतिरेव वस्तुसद्भावे **भवति शरणं**। स्वान्यनिर्वाहकतया केषाञ्चिदेव धर्माणां प्रतीतिरित्यनुभवानुसारात् **क्वचिद्धर्मान्तरेण** सधर्मकत्वं नापह्नोतुं शक्यमिति भावः। सदृष्टान्तमुपपादयति–**यत्र होति**। **नन्वेवं** धर्मे धर्मान्तरनियमाभावे यस्य धर्मत्वादेर्न धर्मान्तरं तस्य **व्युत्पत्त्याद्यभावे शब्दवाच्यत्वादिकं** न स्यादिति चेन्न; तत्र धर्मान्तराभावेऽपि

स्वस्यैव स्ववृत्तितया प्रमेयत्वादिवद्विशिष्टबुद्ध्यादिविषयत्वेन वाच्यत्वादिसंभवात्। नच सिद्धान्ते गोत्वस्य संस्थानरूपतया आनन्त्यव्यभिचाराद्यनुपपत्तिः; तथाऽपि सौसादृश्यरूपस्यैकस्य सम्भवादिति भावः। **एवं शुक्लादिशब्देष्वपीति**—ननु शुक्लादीनामनेकत्वान्न गोत्वादिन्याय इति चेन्नं; शुक्लत्वस्यैकस्योपाधेर्वक्तुं शक्यत्वात्। ननु यदि केषां चिद्धर्माणां स्वेनैव विशेषः तथात्वेऽपि गौरित्यादिजाति-शब्देषु धर्मिपर्यन्तेषु शुक्लादिशब्देषु व्यक्तेर्जातिर्गुणश्च जातेर्व्यक्त्यादिश्च वैशिष्ट्य-प्रतियोगित्वादिना भासतां। यत्र गुणमात्रविषयकश्शुक्लशब्दः यत्र वा भावप्रधान-निर्देशो द्वेचकयोरित्यादिषु बहुवचनप्रसङ्गेन द्वित्वैकत्वपरेषु त्वतलाद्यन्तेषु गोत्व-गोतादिशब्देषु जातिरित्यादिशब्देषु च प्रधानतया गुणादीनां निर्देशः तत्र किञ्चि-द्धर्मवत्त्वाभावे प्राधान्यायोगात्तदन्यत्वेऽनवस्थाप्रसङ्गात्तदभावे एकस्य विशेषण-विशेष्यतया प्रतीत्ययोगादपसिद्धान्तः। प्रमेयत्वादिकं च पक्षसममिति तत्र धर्मा भावेऽपि गत्यन्तराङ्गीकारे सर्वत्र तथाऽस्त्विति शङ्कते—**नन्विति**—ननु धर्माणां धर्मान्तराङ्गीकारे अनवस्था; स्वस्यैव स्वनिष्ठत्वे आत्माश्रयः; धर्मिणश्च धर्मापेक्षया धर्मत्वेऽन्योन्याश्रयः; परस्परव्यावर्तकत्वे कर्मकर्तृविरोध इति तन्निष्कर्षकप्रयोगे धर्मी विशेष इत्यनुपपन्नमित्यत्राह—**अयं भाव** इति। कल्पितधर्ममादाय सधर्मक-त्वप्रतीत्युपपादनेऽपीदृशदोषाःस्युरिति त्वयापि कथंचित्परिहार्या इत्याह— **त्वया-पीति**। स्वपरनिर्वाहकत्वं त्वयापि क्वचित्स्वीकार्यमित्याह—**स्वीकृतं चेति**। संवेदनसंवेदनं—ज्ञानमात्रविषयकं ज्ञानं। आदिशब्देन सर्वमित्यादिशब्द उक्तः। देवदत्त आत्मानं पश्यतीत्यादौ कर्मकर्तृभावदर्शनान्न विरोध इत्याह—**न चात्रेति**। ननु तर्हि स्वस्य स्वजनकत्वमपि स्यादित्यत्राह—**स्वोत्पादकत्वादाविति**। तत्र हि सत्त्वासत्त्वयोर्विरोध इति भावः। ननु धर्मे स्वपरनिर्वाहकत्वमसिद्धमित्यत्राह— **किं चेति**। ननु कल्पितधर्ममादाय धर्मे व्यवहार इत्यत्राह— **जात्यादीनामिति**। तत्रापि धर्मकल्पनेन व्यवहारेऽनवस्था स्यादिति भावः। **अतो निर्धर्मकमिति**। कल्पितधर्ममादाय शब्दवाच्यत्वे शुक्त्यादेरपि रजतादिशब्दवाच्यत्वप्रसङ्गे लोक-व्यवहारविरोधाद्व्यवस्था न स्यादिति स्वरूपेणापि वाच्यत्वं स्वलक्षणं वाच्यमिति सिद्धान्तविरोधोऽपीति भावः। **स्ववचनेति**। निर्धर्मकं शब्दवाच्यं न भवतीति निर्धर्मकशब्दवाच्यत्वेन तदवाच्यत्वप्रतिपादनात् स्ववचनव्याघात इत्यर्थः। ननु प्रतिबन्दीमात्रमनुत्तरमित्यत्राह—**आस्तामिति**। **व्यावर्तकत्वादिति**। राज्ञः पुरुष इत्यादौ व्यावर्तकत्वादित्यर्थः। ननु परस्परव्यावृत्तबुद्धिविषयत्वेऽन्योन्याश्रयः इत्याह—**नचेति**। परस्परविशिष्टबुद्धिर्व्यावृत्तिधीहेतुः। नचात्रान्योन्याश्रयः परस्परव्यावृत्तिबुद्धेः परस्परहेतुत्वाभावात्। तद्विशिष्टबुद्धिश्चेन्द्रियसंप्रयोगाद्विशिष्ट-शब्दादिप्रमाणाद्वा भवति। तत्र शब्देन कदाचित्किञ्चिद्विशेष्यतया भासते। तथानियमस्य विवक्षा नियामिका। उभयथाऽपि प्रतीतौ परस्परव्यावर्तकत्वाविशेषे कथं विशेषणविशेष्यभावभेद इत्यत्राह—**यश्चेति**। नन्वेवं सति गोत्वं शौक्लच-

मित्यादौ तद्धिताश्रयप्रकृतिगवादिशब्दैः धर्म्येव धर्मविशेषितः प्रतीयत इति गुणीभवन् कण्ठोक्तेन सम्बन्धेन प्रतीयत इत्यनुपपन्नमित्यत आह–**गोत्वं शौक्लच्यमित्यादीति**। प्रकृत्या विशिष्टार्थोपस्थितावपि तद्धितार्थधर्मान्वयबोधसमये गौर्नित्येत्यादाविव धर्मं विहाय स्वरूपमन्वेतीति न दोष इति भावः। ननु जातिर्गुणः क्रियेत्यत्र न धर्म्युपस्थापकं प्रमाणमस्ति। अनुपस्थितानां च न व्यावर्तकत्वं। न च जात्यादिकमेव तदुपस्थापकं; अनुपस्थापितस्य तस्य तदुपस्थापकत्वायोगात्। उपस्थापनस्य व्यापकधर्म्युपस्थापनाधीनत्वादिति चेत्तत्राह—**निष्कर्षप्रयोगेष्विति**। तत्तच्छब्द एव सहानुभवसामर्थ्यात् स्मारयति, स्मृतानां व्यावर्तकत्वं चेति न विरोध इति भावः॥ ९॥

अक्ष०। पुनरपि धर्मधर्मिभावभङ्गमुखेन द्रव्याद्रव्यान्यतरनिह्नवप्रवृत्तयोर्वादमनूद्य प्रतिक्षिपति– **धर्मइति** यस्त्वया कश्चिद्धर्म इष्यते स इत्यर्थः। तेन स्वमते धर्मस्याभावेपि न व्याघातः। **निर्धर्मकश्चेदिति**। कस्यचिद्धर्मस्य अनाश्रयश्चेदित्यर्थः। ततः किमित्यत्राह–कथमिवेति। **सः** शब्दवाच्यः कथं वा भविता–नैव भवेदित्यर्थः, त्वदीयैरविशिष्टस्य व्युत्पत्यादिगोचरत्वानभ्युपगमादिति भावः। तस्यापि धर्मस्य धर्मान्तराभ्युपगमे त्वाह–धर्मेणेति। तादृशधर्मान्तरस्यापि शब्दवाच्यत्वसम्भवाय धर्मान्तरमभ्युपगन्तव्यमितिरीत्या अनवस्थापत्तिरित्याह – **सच भवतोति**। स च-अन्यो धर्मश्चेत्यर्थः। **तथेति** धर्मान्तरयुक्तश्चेदित्यर्थः। **अव्यवस्थेति** अनवस्थेत्यर्थः। द्वित्रादिधर्ममात्रे विश्रमे नियामकाभावादिति भावः। इति चेदित्याशङ्कामनूद्य परिहरति–**नेति**। सर्वे धर्माः सधर्मका इति वा। सर्वे निर्धर्मका इति वा न ब्रूमः येनानवस्थादयो दोषाः प्रादुष्युः–किन्तु अनुभवानुरोधात् केचिद्धर्माः सधर्माकाः अन्ये निर्धर्मका एव प्रतीतिव्यवहारविषया इत्युपेम इत्याह–**कश्चिद्धर्म इति। धर्मीति**—धर्मान्तरवानित्यर्थः। किमत्र मानमित्यत्राह—**स्फुटमतिमथन इति**।

स्फुटमिति–सम्प्रतिपन्नमिति भावः। (ऐकपद्ये) विशदबुद्धया सावधानं विमर्शे सतीत्यर्थः। अनुभवएव प्रमाणमित्युक्तं भवति। भवद्भिरपि क्षणिकत्वानुमाने साध्यहेतुधर्माणां–पक्षवृत्तित्वादिधर्मोऽभ्युपगन्तव्य एवेति भावः। एवं यत्र अनुभवानुरोधेन अनवस्थाभयाद्धर्मान्तरं नेष्यते तत्र निमित्तान्तरनिरपेक्षौ तद्बुद्धिव्यवहारौ इत्याह–**स्वान्य निर्वाहकत्वमिति**। स्वपरधीव्यवहार व्यवस्थापकत्वमित्यर्थः। गोत्वादेः यथा गवादिव्यक्तौ गोशब्दादि प्रवृत्तिं प्रति निमित्तत्वं **तथा स्वस्मिन्नपि**–गोशब्दादिप्रवृत्तिं प्रति निमित्तत्वं; निमित्तान्तरापेक्षा नास्तीति यावत्। गोत्वादिजातेः–व्यक्तिवदानन्त्याभावेन एकत्वात् तामन्तरेण क्वचिदपि गोशब्दादिप्रवृत्तेरभावात् व्यभिचाराप्रसक्त्या स्वविषये गोशब्दादिप्रवृत्तावपि निमित्तत्वोपगमे न कश्चिद्दोष इति भावः।

ननु "गौश्शुक्लः" इत्यादि धर्मिपर्यन्तोक्तौ तथोपपत्तावपि रूपादिमात्रपर शुक्लादिपदोक्तौ "गोत्वं" "शुक्लत्वं" "एकत्वं" "द्वित्व" मित्यादि भावप्रधानोक्तौ च अनवस्थाभयात् प्रकारीभूतगोत्वाद्यतिरिक्तधर्मानङ्गीकारे 'इदमित्थमिति-हि सर्वाप्रतीति" रिति भाष्यविरोधस्स्यादित्यत्राह–**तन्निष्कर्षप्रयोगेष्विति**। धर्मप्रधानकशब्द प्रयोगेष्वित्यर्थः।

स च शब्दः–अनियतनिष्कर्षकः नियत निष्कर्षकश्चेति द्विविधः। तत्र आद्यश्शुक्लादिशब्दः–कदाचिद्रूपमात्रे, कदाचित्तद्विशिष्टे च प्रयोगात्। द्वितीयस्तु शुक्लत्वादिशब्दः– धर्ममात्रे प्रयोगात्। उभयत्रापि अनुभवानुरोधेन धर्मान्तर भानोपगमेऽपि नानवस्थास्युः। अनुभवविरहे तदनापत्तेः, स्वपरनिर्वाहकसमाधेश्च 'संवेदनसंवेदन शब्दशब्दादौ' सम्प्रतिपन्नतया तद्वत् धर्मान्तरभानानुपगमेऽपि न व्यावृत्यसिद्धिः इत्थंभावतानियमस्य व्यधिकरणस्यापि धर्माणां विशेषणतया भानोपगमेष्वपि संपद्यत इत्याह–**भवतीति तस्य** शौक्ल्यादिधर्मस्य **धर्मी** घटादिः। **विशेषः**—स्वेतरनिष्ठाद्वयावृत्तिधीहेतुरित्यर्थः। "घटस्य शौक्ल्य" मित्यादौ घटादिः स्वगतशौक्ल्यंपटादिशौक्ल्याच्च व्यावर्तयतीति भावः। अत्र धर्मीति कालादेरप्युपलक्षणम्।

तच्छून्ये तस्य वृत्तिः कथमिव घटते तद्विशिष्टे तु वृत्तौ
स्वाधारत्वप्रसङ्गस्तत इह न गुणो नापि धर्मीत्ययुक्तम्।
तद्वृत्तिर्धर्ममात्रे न भवति तत एवास्य तच्छून्यताऽतो
नोक्तौ दोषौ स्वधीवाग्विहतिरितरथा तद्वदन्येऽपि जल्पाः॥ १०॥

सर्वा०। पुनरपि धर्मस्य धर्मिणि वृत्तिं विकल्प्य तदुभयमपह्नुवानं प्रत्याह—**तच्छून्य इति**॥ योऽयं रूपादिः द्रव्यस्य गुणतयेष्टस्स किं स्वशून्ये वर्तते स्वविशिष्टे वा? नाद्यः; व्याघातात्। अन्यथा सर्वेषां सर्वत्र वृत्तिः किं न स्यात्? खपुष्पादीनामपि कथं निषेधः? योग्यानुपलब्ध्येति चेन्न; तदुपलब्ध्यनुपलब्ध्योरपि विरोधाभावात्। किञ्चानुपलब्धिरभावोपस्थापनेन भावं विरुन्ध्यात्; तदा कथं तच्छून्ये तस्य वृत्तिः? न द्वितीयः, आत्माश्रयापातात्। शिष्टं विशेषणविशेष्यतत्सम्बन्धातिरिक्तं न किञ्चित्, तस्मिन् प्रमाणाभावात्। न चोक्तेषु त्रिष्वन्यतममात्रम्, तावति विशिष्टधीव्यवहारयोरभावात्। अतः सम्बन्ध्युभयं विशिष्टशब्दार्थ इति स्यात्। तथा च स्वविशिष्टे वर्तमानो गुणस्स्वविशेष्यमिव स्वात्मानमपि स्वाधारीकुर्यात्। किमत्रानिष्टम्? स्वस्य स्वस्मादन्यत्वम्; अभेदे कथमाधाराधेयभावः? प्रतिसम्बन्धिभेदाभावात्। न चात्र भिन्नाभिन्नत्वं दृष्टं युष्मदिष्टं वा। एवं वृत्त्यनुपपत्त्या वा गुणगुणिनोरन्यतरपरिशेषः स्यात्, उभयपरित्यागो वेति परोक्तमयुक्तम्। कथमित्यत्राह—**तद्वृत्तिर्धर्ममात्र इति**। न वयं तच्छून्ये तद्विशिष्टे वा तस्य वृत्तिं ब्रूमः। अपि तु वस्तुतस्तद्विशिष्टे विशेष्ये तद्विशिष्ट-

वृत्त्यभावे तच्छून्ये वृत्तिस्स्यादेवेति चेत्तत्राह—**न भवति तत एवास्य तच्छून्यतेति।** यत्र यद्वर्तते तस्य कथं तच्छून्यत्वम् ? न च तद्वति वर्तमानस्य तस्मिन्नपि वृत्तिरिति नियमः। घटवति भूतले वर्तमानानां गुणादीनां घटेऽपि वृत्तेरदृष्टेः। एवं घटस्यापि। ननु सर्वत्र वृत्तिविकल्पेन विशिष्टं दूषयतः किं नि[दर्श]दानम् ? किं क्वचिदपि विशिष्टप्रतीतिरेव नास्ति, सत्यपि वा निष्कारिणिका सकारणाऽपि वा दुर्निरूपितकारणा, निरूपितकारणाऽपि वा निर्विषया, सविषयाऽपि वा बाधितविषयेति। नाद्यः, लौकिकपरीक्षकबहिष्कारप्रसङ्गात्। सर्वशून्यवादिनाऽपि हि सम्वृत्त्या विशिष्टधीरिष्यते। न द्वितीयः, कार्यस्य कारणावश्यम्भावात्, तदनभ्युपगमे तु लोकायतावतारात्। इष्यते चाविद्यावासनादिभ्रान्तेरपि निदानं भवद्भिः। अत एव न तृतीयः। नापि चतुर्थः, स्वपरलोकव्यवहारविरोधादेव। कथं किलासौ विशिष्टप्रतीतिः ? कथं च निर्विषया ? न पञ्चमः, अद्यापि बाधस्याशामोदकायमानत्वात्। विकल्पप्रामाण्यं च वक्ष्यते। अतो यथादर्शनं क्वचित्किंचिद्वर्तते न स्वस्मिन्निति व्यवस्थिते त्वदुक्तौ व्याघातात्माश्रयदोषौ न स्त इत्याह—**अतो नोक्तौ दोषाविति।** अन्यथाऽनिष्टमाह—**स्वधीवाग्विहतिरितरथेति।** स्वधीविहतिः स्ववाग्विहतिः स्वधीवाग्विहतिरिति प्रत्येकसमुदायपरं योज्यम्। कथं तवापि विशिष्टधीविरहे तद्विषयव्याहारव्यवहारावुदाहरणोपनयौ च वस्तुतस्तद्धर्मविशिष्टविषयौ ? बुद्धिस्स्वप्रकाशा अभिन्नदेशकालं स्वलक्षणम् कल्पनापोढमभ्रान्तं प्रत्यक्षम् प्रतिवादिवाक्यमसाधकम् विशिष्टं नास्तीत्यपि विशिष्टमात्थ; तच्च विशिष्टविषयस्वधीविरुद्धमिति। ननु सन्त्यन्येऽपि धर्मधर्मिभावभञ्जकाः परेषां प्रसङ्गाः ते कथमुद्धार्या इत्यत्राह—**तद्वदन्येऽपि जल्पा इति।** अन्येऽपि नित्यसमाधिरूपाः शुष्कप्रलापास्तद्वन्निरस्तवाक्यैस्तुल्यं वर्तन्ते। उत्थानपरिहारप्रकारभेदेऽपि स्वव्याघातादिदोषाविशेषादित्यर्थः।

घटकुड्यवदन्यत्वेऽनन्यत्वे तु स्वरूपवत्।
न गुणस्य गुणत्वं स्यादित्यसत्स्वोक्तिबाधतः॥
दूष्यादन्यदनन्यद्वा दूषणं न तु दूषणम्।
गर्दभादिवदन्यत्वेऽनन्यत्वे दूषणीयवत्॥

एवं सम्बद्धत्वासम्बद्धत्वसमानकालत्वासमानकालत्वयुगपद्ग्राह्यत्वायुगपद्ग्राह्यत्वादिविकल्पस्यबाधास्तदुद्धाराश्च विशुद्धबुद्धिभिरवधातव्याः, दूष्येणापि सम्बन्धादिविकल्पदोषसाम्यादिति॥ १०॥ इति धर्मधर्मिभावः॥

आनन्द० ननु पूर्वमेव धर्मधर्मिभावानुपपत्तिमाशङ्क्य समाहितत्वात् पुनस्तत्कथनमयुक्तं इत्याशङ्क्य निरसनीयशङ्काभेदान्न पौनरुक्त्यमित्याह—**पुनरपीति।** एकस्मिन् काले स्वात्यन्ताभावसामाधिकरण्यं विरुद्धमित्याह—**व्याघातादिति। विरोधादित्यर्थः।** अन्यथा—विरोधाभावे। ननु सर्वत्र सर्व स्यादित्ययुक्तं रूपरसयो-

विरोधाभावमात्रेण तेजसि न रसप्रसक्तिः अपि तु तत्सत्ताग्राहकप्रमाणसत्त्वे; सर्वत्र तदनुपलब्धेर्न प्रसक्तिरित्यत्राह–**खपुष्पादीनामिति**। निषेधः–निस्स्वभावत्वनियमः। ननु तत्राप्यनुपलब्ध्या निश्चयोऽस्त्विति शङ्कते–**योग्यानुपलब्धेरिति**। अनुपलब्धिर्न तावत्स्वरूपाभावविषया; अपितूपलब्ध्यभावरूपतया उपलम्भरूपप्रमाणाभावे प्रमेयाभाव इति व्याप्त्या वा प्रत्यक्षसहकारेण वा। उभयथाऽपि नानुपलब्धिमात्रमभावनिश्चयहेतुः घटवति घटानुपलब्धिमतिव्यभिचारात्। किञ्च तयाऽभावनिश्चयोऽस्तु तावतापि रूपज्ञानं रसवत्त्वमिव कथं भावं निरुन्ध्यात् विरोधाभावात् इत्याह–**न तदुपलब्ध्यनुपलब्धियोरिति**। ननु अनुपलब्धिरभावमुपस्थाप्य सत्त्वविरोधी न भविष्यतीत्यत्राह—**किञ्चेति**। तथा सति भावस्याभावविरोधित्वात्स्वशून्ये स्वस्य वृत्तिर्न स्यादित्यर्थः। ननु स्वस्य स्ववृत्तित्वे आत्माश्रय इत्यसङ्गतं उत्पत्तिज्ञप्तिप्रतिबन्धकत्वाभावादित्याशङ्क्य आधाराधेयभावे भेदस्यात् तस्य भेदाधीनत्वादिति परिहरति—**किमत्रेत्यादिना**। ननु प्रमेयत्वे प्रमेयत्वमित्यादावभेदेऽपि दर्शनात्तथाऽत्राप्यस्त्वित्यत्राह—**अभेद** इति॥

कथं स्ववृत्तिरिष्टा चेद्यथाऽन्यत्रेति गम्यताम्।
प्रमाणं कारणं वृत्तौ न भिन्नाभिन्नते यतः॥

इति न्यायेन प्रमाणसद्भावात्तथाऽङ्गीकारः; इह तु न तथा; प्रमाणाभावादिति भावः। नन्वेकस्यैव घटस्य भूतलाधेयत्वं रूपाधारत्वं च दृष्टमित्यत्राह–**प्रतिसम्बन्धीति**। यस्य यदपेक्षया आधारत्वं तस्य तदपेक्षया भेद इति भावः। ननु एकस्य गुणगुणिस्वरूपस्य कौमारिलैराधाराधेयभावोऽङ्गीकृत इत्यत्राह—**न चात्रेति**। तन्मतं प्रामाणविरुद्धमिति भावः। अपसिद्धान्तश्चेत्याह–**युष्मदिष्टमिति**। **वृत्त्यनुपपत्त्या** वेति वाकारःपूर्वश्लोकोक्ततर्कापेक्षया। **अन्यतरपरिशेषस्यादिति** वैभाषिकसौत्रान्तिकमतोपसंहारः। **वस्तुतस्तद्विशिष्टे**—तदाधारे इत्यर्थः **यत्र यद्वर्तत इति**–ततश्च तदाश्रयस्य तच्छून्यत्वं स्वविशिष्टत्वमिति वा विरुद्धं। ततश्च—

तर्तुकामो यथा गर्तं वेदादुत्प्लुत्य मूढधीः।
अन्धः कूपे पतेत्तद्वद् बद्धो व्याप्तिसमर्थनात्॥

इति न्यायानुसरणमिति भावः। किञ्च यत्र रूपं न तत्र रूपाभावः यत्र रूपाभावः तत्र न रूपमिति व्याप्तिं वदता रूपस्य वृत्तिरभ्युपगतेति। ततश्च—

अस्मदुक्तं भवान्वक्ति नान्यत्किञ्चन भाषते।
पिशाच इव कूटस्थः तस्मात्त्वत्तो बिभेभ्यहम्॥

पिशाचन्याय इति भावः। ननु घटवति भूतले इत्यादेर्दृष्टान्तस्यापि पक्षतुल्यत्वात्तदुदाहरणमसङ्गतमिति शङ्कते—**नन्विति**। **निदर्शनं** दृष्टान्तः। क्वचित् किं निदानमिति पाठः। तदा नन्वित्यारभ्य सिद्धान्तिवाक्यं। नन्विति

प्रश्नपरं। उत्तरमाह--**किमित्यादि**। प्रतीत्या ह्यर्थक्लृप्तिर्द्वेधा--कार्यत्वेन कारणतया, विषयत्वेन विषयितया वा; उभयथाऽपि न सम्भवतीति प्रथमः कल्पः। कार्यत्वेन कारणतयाऽर्थकल्पनं च सम्भवतीति द्वितीयतृतीयौ। विषयविषयितया कल्पनं न सम्भवतीति चतुर्थपञ्चमाविति विवेकः। **सम्वृतिर्दोषः** तदधीनकल्पित-विषया विशिष्टधीरित्यर्थः। **लोकायतेति**—चार्वाकमते कार्यकारणभावाभावादिति भावः। नचेष्टापत्तिः अपसिद्धान्तप्रसङ्गापत्तेरित्याह—**इष्यते चेति**। **अविद्या**-दोषः। **वासना** पूर्वपूर्वसंस्कारः। आदिशब्देनालम्बनसमनन्तरसहकार्यधिपति-प्रत्ययादयः। अत एवेति—तत्कारणतयैव निरूपणसम्भवादित्यर्थः। **स्वपरेति**—लोको द्विविधः—स्वः परश्चेति। तद्व्यवहारविरोधादित्यर्थः **कथं चेति** विशिष्ट-विषया प्रतीतिर्विशिष्टप्रतीतिः। तथा च विशिष्टप्रतीतिर्निर्विषयेति स्ववचन-व्याघात इत्यर्थः। —**अद्यापीति**—व्याघातात्माश्रययोर्बाधकयोरद्याप्यलब्धजीवित-त्वादित्यर्थः। ननु सर्वविकल्पानां वासनानिर्मिततया प्रकारद्वयेनापि विषयव्यवस्था-पकत्वमनुपपन्नमित्यत आह—**विकल्पेति**—बुद्धिसर इति शेषः। **स्वधीवाग्विहृति-रिति**—धीश्चवाक्चेतीतरेतरयोगे द्वन्द्वसमासः।

नातो द्वन्द्वाच्चुदषहान्तात्समाहार इति समासान्तः। स्वधिया विहृतिं दर्शयति—**कथमिति**। **तद्विषयेति**। **उक्तिः** व्याहारः। **व्यवहारः**—प्रवृत्त्यादिः। तयोर्विशि-ष्टधीसाध्यत्वादित्यर्थः। स्ववाग्विरोधमाह—**उदाहरणेति**। उदाहरणं दृष्टान्त-वाक्यं। **उपनयः**—संश्च शब्दादिरिति वाक्यं। स्वधीवाग्विरोधं दर्शयति—**विशिष्टं नास्तीत्यपीति**। स्वधीवाग्विहृतिमुपपादयति—**तच्चेति**। अनेन वाक्येन विशिष्टाभावविषयिणी विशिष्टबुद्धिर्जायमाना विशिष्टसाधिकेति। तया वाचा धियो विरोध इति भावः। **नित्यसमादिरूपेति**—क्वचित्साहचर्यदर्शनमात्रेण व्यापकापादनं नित्यसमः। आदिशब्देनोत्कर्षसमादयो गृह्यन्ते। मतुबन्तता भ्रान्ति वारयति—**निरस्तवाक्यैरिति**। ननु कथं तुल्यत्वं ? उत्थानस्य परिहारस्य च भिन्नत्वादित्यत्राह—**उत्थानेति**। व्याघातांशमादाय तुल्यत्वमित्यर्थः। अन्येऽपि जल्पा इत्युक्तांशं दर्शयति—**घटकुड्यवदिति**। धर्मधर्मिणोर्भेदोऽभेदो वा ? आद्ये घटकुड्यवद्धर्मधर्मिभावो न स्यात्। द्वितीये स्वरूपवद्धर्मधर्मिभावो न स्यादित्यर्थः। **स्वोक्तिबाधत इति**—सिद्धचसिद्धिरूपव्याघातादित्यन्ये। अनुमानेन धर्मधर्मिभावखण्डने अनुमानस्य धर्मधर्मिप्रतिपादकोदाहरणोपयरूपस्वोक्तिवि-रोधादित्यर्थ इत्यपरे। जातिरूपतया स्वव्याघातकत्वादित्यप्याहुः। दूषणस्य स्वव्यापकत्वमेव दर्शयति—**दूष्यादन्यदिति**—दूषणं दूष्यादन्यन्न वा ? उभयथाऽपि दूष्यादन्यगर्दभवत् तस्मादनन्यदूष्यवद्वा दूषणं न स्यादित्यर्थः। **एवमिति**—धर्मिणा रूपादिकं सम्बद्धमसम्बद्धं वा ? सम्बद्धत्वे संयुक्तघटपटयोरिव धर्मधर्मिभावो न स्यात्। एवं धर्मिणा धर्मस्समानकालोऽसमानकालो वा ? उभयथाऽपि समान-कालीनासमानकालीनघटपटयोरिव गुणगुणिभावो न स्यादित्यर्थः। एवं धर्मिणा

धर्मो युगपद्ग्राह्यो न वा ? उभयथाऽपि तादृशघटपटवदगुणत्वप्रसङ्ग इति प्रसङ्गो बोध्यः। एवं प्रमेयप्रमेयं वा ? जन्यमजन्यं वा ? घटस्तदन्यो वा उभयथाऽपि न गुण इति प्रसङ्गाः आदिशब्देन विवक्षिताः तदुद्धारक्रममाह— **दूष्येणापीति**। दूषणं दूष्येण सम्बद्धमसम्बद्धं वा ? समानकालमसमानकालं वा ? युगपद्ग्राह्यमयुगपद्ग्राह्यं वा उभयथाऽपि तादृशदूष्यरासभावादिवन्न दूषणमित्यादिप्रसङ्गादिति भावः। केचित्तु सम्बद्धत्वेत्याद्येवं व्याचख्युः—विशेषणस्य विशेष्येण सह सम्बद्धत्वे सोऽपि सम्बन्धस्सम्बद्धो नवा ? आद्ये अनवस्था। द्वितीये—

षण्णामपि पदार्थानामसंघातः प्रसज्यते।

इति न्यायेन असंहतरूपता स्यात्। विशेषणस्य विशेष्येण समानकालीनत्वे सामग्र्यैक्यात्कार्यैक्यप्रसङ्गः। प्रागभावभेदस्य प्रतियोगिभेदाधीनतया तदसिद्धावसिद्धेः। भिन्नकालत्वे तु विशेषणस्य पूर्वत्वे निराधारकार्योत्पत्तिप्रसङ्गः। विशेष्यपूर्वकत्वे तु गुणाश्रयो द्रव्यमिति द्रव्यलक्षणव्याघातः। न च गुणात्यन्ताभावानधिकरणत्वेन निर्वाहः अत्यन्ताभावानधिकरणत्वं नाम अत्यन्ताभावा भावाधिकरणत्वं: तथा च अभावाभावस्य भावात्मकत्वात् गुणाधिकरणत्वमित्यर्थस्स्यात्। तथाचोक्तदोषानतिक्रान्तिः। गुणात्यन्ताभावस्यैकत्वे तत्रैवातिव्याप्तिः। अनेकत्वेऽनवस्थेत्यदिकमूह्यमिति ॥ १० ॥

अक्ष०। पुनरपि वृत्यनुपपत्या धर्मधर्म्यन्यतरपरिशेषमाशंकते **तच्छून्ये इति**। **तच्छून्ये** तद्धर्मशून्ये। **तस्य** तद्धर्मस्य। **वृत्तिः** वृत्तित्वं। **कथमिव घटते**— तच्छून्यत्व तद्वत्वयोरेकत्र विरोधात् न कथञ्चिदपि घटेतेतिभावः।

तद्विशिष्टे तु—तद्धर्मविशिष्टे तु। **वृत्तौ** तद्धर्मस्य वृत्तित्वे। **स्वाधारत्वप्रसङ्ग इति**—विशिष्टं नाम न विशेष्यमात्रं विशेष्यमात्रे विशिष्टव्यवहाराभावात् किन्तु परस्परसम्बन्धिविशेष्यविशेषणोभयं अतः स्वविशिष्टे वर्तत इत्युक्ते विशेषणे स्वस्मिन्नपि वर्तत इत्यर्थलाभादात्माश्रयतापत्तिरित्यर्थः। आधाराधेयभावस्य भेदव्यापित्वात् स्वस्मिन्नपि स्वान्यत्वं दुर्घटमापद्यत इति भावः।

ततः उक्तरीत्या वृत्त्यनुपपत्या। इह रूपघटाद्योः रूपादिर्नगुणः घटादिर्न धर्मीत्याशङ्काशयः। तत्र युक्तिर्नास्तीत्याह—**इत्ययुक्तमिति**। कथमित्यत्राह— **तद्वृत्तिरिति**—धर्मवृत्तिरित्यर्थः। **धर्ममात्रे**-विशेष्यमात्रे नतु तच्छून्ये तद्विशिष्टे वा। तद्विशिष्टवृत्त्यभावे तच्छून्यवृत्तिस्स्यादेवेत्यत्राह—**न भवतीति। ततएव** धर्मस्यात्र वर्तमानत्वादेव। **अस्य** धर्मिणः। **तच्छून्यता**-धर्मशून्यता न भवतीत्यन्वयः यत्र यद्वर्तते तस्य कथं तच्छून्यत्वमिति भावः। नच तद्वति वर्तमानस्य तस्मिन्नपि वृत्तिरिति नियमः, घटवति भूतले वर्तमानानां-गुणानां घटेऽपि वृत्तेरदृष्टेः। अतो धर्मिणः धर्मशून्यत्वस्य धर्मे स्ववृत्तित्वस्य चानभ्युपगमात् **नोक्तौ दोषौ** भवदुक्तौ व्याघातात्माश्रयदोषौ न प्रसज्येते। अन्यथाऽनिष्टमाह— **स्वधीति** स्वधीविरोधः स्ववाग्विरोधश्च स्यातां विशिष्टधीविरहे तवापि विशिष्ट-

व्यवहारविरोधः–"बुद्धिः स्वप्रकाशा अभिन्नदेशकालं स्वलक्षण" मित्यादयो भवदीयव्यवहारा विशिष्टगोचरा हि दृश्यन्त इतिभावः एवमन्येऽपि धर्मधर्मिभावभञ्जकाः परेषां वादा निरसनीया इत्याह—**तद्वदिति** ॥ १० ॥

स्वच्छन्देनागमेन प्रकृतिमहदहङ्कारमात्राक्षसिद्धि-
र्नाध्यक्षेणाप्रतीतेर्न पुनरनुमया व्याप्तिलिङ्गाद्यसिद्धेः ।
सत्त्वाद्युन्मेषभिन्नान्महत इह तथा स्यादहङ्कारभेदः
प्राच्यादक्षाणि मात्राः प्रजनयति परो मध्यमस्तूभयार्थः ॥ ११ ॥

सर्वा०। एवं द्रव्याद्रव्ये सामान्यतः प्रसाध्य द्रव्येषु प्रथमोद्दिष्टं परीक्ष्यते त्रिगुणमादौ परीक्ष्यते तया प्रसिद्धस्सुरगुरुर्लोकायतं शास्त्रमारभ्य पृथिव्यादीनि चत्वार्येव तत्त्वान्याह । अधिकानि तु तावन्मात्रविभागोद्देशादपोढानि, अतिरिक्तचेतननिषेधाच्चेति । अत्र किं लोकायतसूत्राणि स्वयंप्रमाणतयोपादीयन्ते ? तदुपस्थापकतया वा ? नाद्यः; असम्मतेः; गुरूक्तेश्च विरोचनोपदेशवदसुरमोहनार्थत्वात् । न द्वितीयः; उक्तेषु विवादाभावादधिकानां निषेधस्य निष्प्रमाणकत्वात् । अनुपलब्ध्या निषेध इति चेन्नः; योग्यानुपलब्धेरभावादितरस्य निषेधकत्वायोगात् । उपलब्ध्या चेच्चतुर्णामुपादानमाकाशेन किमपराद्धम् ? अस्ति ह्यासंसारं तदुपलम्भः । न चात्रास्पर्शत्वादिभिर्बाधः; अरूपत्वादिना वाय्वादेरपि निह्नवप्रसङ्गात् । शेषं च वक्ष्यामः । अथोपलम्भबलादस्त्वाकाशमपीति चेत्, तथैव भिन्नभवानुभूतार्थप्रतिसन्धाताऽप्यभ्युपगन्तव्यः । अस्तु तर्हि षड्धातुवादः अध्वर्युभिस्तऽथाध्ययनादिति चेत्तर्हुद्गातृभिश्चतुर्णामध्ययनाच्चतुर्धातुवादः स्यात् । अनुक्तमविरुद्धमन्यतो ग्राह्यमिति चेत्समानम्; भूयसां च प्राबल्यादुपबृंहणप्राचुर्याच्च । न चात्र मिथो विरोधान्निरर्थकार्थवादमात्रता, सम्यङ्न्यायानुग्रहमात्रेण बलाबलदृष्ट्या विरोधशान्तेः । केचित्तु प्रकृत्यादिशब्दैरदृष्टादिकं कथ्यत इत्याहुः । यथाऽऽहोदयनः–*इत्येषा सहकारिशक्तिरसमा माया दुरुन्नीतितो मूलत्वात्प्रकृतिरित्यादि, तदेतदपष्ठु; नियतक्रमानुपूर्वप्रकृतिविकृतिपरम्परोपदेशात्, बाधाभावे भाक्तत्वायोगात्; अन्यथा सर्वत्र श्रुतहान्यश्रुतकल्पनाप्रसङ्गाच्च । तदेतत्सर्वमभिप्रेत्याह—**स्वच्छन्देनेति** ॥

साधकबाधकप्रमाणभावे विशिष्टार्थबोधनसामर्थ्यमागमस्य स्वाच्छद्यम् । आगम इह श्रुतिस्मृतीतिहासादिः । कारणदोषबाधकप्रत्ययविरहादस्मदाद्यतीन्द्रियविषयं शास्त्रमपि प्रत्यक्षवच्छ्रद्धेयमेव । अत आगमिकानामपि सद्भावनिश्चय इति सिद्धिशब्दाभिप्रायः । ननु प्रत्यक्षसिद्धं पृथिव्यादितत्त्वं, तच्च कार्यावस्थं प्रकृतिद्रव्यमेवेति ब्रूथ, यथा सति कारणावस्थमपि तदेवेति कथं तस्याप्रत्यक्षत्वम् ? अश्रुतागमैरप्रतिसंहितव्याप्तिभिश्च बालादिभिरपि चक्षुरादिकरणानि व्यवह्रियन्ते । अतः कथं तेषामागमिकत्वम् ? तत्राह—**नाध्यक्षेणेति** । प्रत्यक्षविरुद्धेयं प्रतिज्ञेत्यत्राह—**अप्रतीतेरिति** । नहि प्रकृत्याद्यवस्थस्य प्रत्यक्षतः प्रतीतिरस्ति ।

अवस्थादिभेदैरेकस्यैव प्रत्यक्षत्वाप्रत्यक्षत्वे बहुलं लोकदृष्टे। चक्षुरादिव्यवहाराश्च लौकिकानां तत्तदधिष्ठानमात्रविषयाः। मनसा जानामीत्युक्तिरपि धीविशेषविषया। अहमिति प्रत्यक्षं तु न महत्तत्त्वविषयमहंकारविषयं वा, प्रत्यगात्मन एवाहति भानात्। अध्यवसादयोऽपि वस्तुत आत्मधर्माः; करणभेदायत्ततया तु त [त्त] द्वृत्तित्वोपचाराः। दृष्टेषु पृथिव्यादिष्वपि शास्त्रैकवेद्याः कतिकति न सन्त्याकाराः? किं पुनरन्येषु? अतो लोकोत्तीर्णकारण त्रिगुणस्य शास्त्रवेद्यत्वम्। एषां च तत्त्वानां तदवान्तरभेदानां च यथागमं यथादर्शनं च लक्षणं ग्राह्यम्। केषुचित्क्षीरगुडादिरसभेदवद्दुर्वचा अपि भेदास्त्वनुभवादिसिद्धा दुरपह्नवाः। **सांख्यो** क्तैरनुमानैः प्रधानसिद्धिः स्यादित्यत्राह—**न पुनरनुमयेति**। न त्वनुमानैरित्यर्थः। तत्र हेतुः—व्याप्तिलिङ्गाद्यसिद्धेः—यथासम्भवं व्याप्तिलिङ्गपक्षदृष्टान्तानामसिद्धेरित्यर्थः।

तथा हि—यत्तावदुक्तं कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि सिद्धमिति, अयमर्थः—यत्कार्यं तत्कारणगुणात्मकं यथा तन्त्वादिगुणात्मकं पटादि। तथा महदादिकार्यजातमपि सुखदुःखमोहात्मकतया स्वकारणगतसुखदुःखाद्यत्मकं भवति। अतस्तत्कारणं सुखदुःखाद्यात्मकं प्रधानमिति। तत्र पटादेः किमिदं कारणगुणात्मकत्वम्? किं कारणगुणतादात्म्यमुत कारणं प्रति गुणभूतत्वम्? कारणगुणैर्गुणित्वं वा? तत्सजातीयगुणवत्त्वं वा? अन्यद्वा किंचित्? नाद्यः, असिद्धेः। न खलु तन्त्वादिगुणैः शौक्ल्यादिभिः पटस्य तादात्म्यं दृष्टं, तथा सति गुणवत्तन्तुनिष्पत्तिमात्रेण पटनिष्पत्तिप्रसङ्गात्। न चायमिष्टः प्रसङ्गः; अभिव्यक्तिवादादेरपाकरिष्यमाणत्वात्। अत एव न द्रव्यस्य गुणतादात्म्यम्; शुक्लः पट इति च न पर्यायः। न द्वितीयः, अदृष्टेरेव। तन्तुसमवेतत्वात्पटस्य तन्तुगुणत्वोक्तिरिति चेन्न; अवयविसमवाययोस्त्वयाऽप्यनभ्युपगमात्। पटस्य तन्तुनिष्ठत्वमुपलब्धमिति चेत्, किमतः? कार्यावस्थानां कारणद्रव्यवर्तित्वमात्रसाधनापत्तेः। तथा च न कारणावस्थस्य सुखाद्यात्मकत्वसिद्धिः। कारणमात्रं तु सिद्धत्वान्न साध्यम्। तृतीयेऽपि किमिदं कार्यस्य कारणं प्रत्यप्रधानत्वम्? तत्कार्यत्वमिति चेन्न; सिद्धसाधनात्, साध्याविशेषाच्च। न ह्यकारणेन किञ्चित्कार्यमिच्छामः। कारणसहकारित्वादिसाधनेऽपि न विवक्षितसिद्धिः। न चतुर्थः, अवयविवादे तन्तुपटोदाहरणायोगात्। तत्र हि तन्तुगुणैः पटगुणा जन्याः। द्रव्यनित्यत्ववादे सिद्धसाधनात्; कार्यावस्थस्य कारणावस्थानियतगुणसाधने विरोधात्। पञ्चमस्तु विलक्षणमहत्त्वाद्यधिकरणत्वान्निरस्तः। सजातीयगुणसद्भावमात्रे साध्ये सिद्धसाधनात्, सर्वगुणसजातीयत्वसाधने कार्यकारणयोरविशेषप्रसङ्गात्। मृत्सुवर्णादिवत्कार्यविशेषव्यवस्थापककारणस्वभावसाजात्यविवक्षायां गोमयमाक्षिकाद्यारब्धवृश्चिकादिषु व्यभिचारात्। तदभिप्रायं च सूत्रं *दृश्यते त्विति। नापि

षष्ठः, तस्य त्वद्बुद्धिमात्रारूढस्यादूष्यत्वात्। लोकदृष्टस्य तु कस्यचिदुक्तोत्तर-प्रायत्वात्। अतः कर्मणां स्वविषयस्वरूपफलप्रदत्वानुमानवत्कार्याणां स्वगुणस-रूपगुणकारणत्वानुमानमप्यनैकान्त्यदुःस्थमिति।

ये च *भेदानां परिमाणादित्या दिना हेतव उक्तास्तत्र तावद्यत्परिमितं तत्सकारणमित्यत्र न व्याप्तिर्जीवाणुत्व नित्यत्वयोस्साधयिष्यमाणत्वात्। महदादीनां स्वरूपमनुमानसिद्धं वा पक्षीक्रियते? आगमसिद्धं वा? नाद्यः, तल्लिङ्गासिद्धेः। ननु चिच्छक्तेरेव स्वतो विषयप्रवणतायामनिर्मोक्षप्रसङ्गात् अस्ति किञ्चिद्द्वारम्; तत्तु न चक्षुरादिमात्रं, तदुपरमेऽपि सङ्कल्पाद्युत्पत्तेः। नापि मनोमात्रविश्रमः, तत्प्रशान्तावपि स्वप्ने मनुष्यस्य स्वात्मनि व्याघ्राद्य-भिमानात्। नाप्यहङ्कारे पर्यवसानं, तद्विरामे सुषुप्तौ प्रश्वास निश्वासहेतुभूत-प्रयत्नाधारस्य महतस्सिद्धेः। न च तदवधिस्तत्त्वपङ्क्तिः, तस्यापि परिमितत्वेन कार्यत्वात्; तत्कारणं त्वव्यक्तं न परिमितमित्यत्र प्रमाणमस्ति। तत्कल्पनायां त्वनवस्थापातः, अतोऽव्यक्तमपरिमितमादिकारणमिति वृत्तिभेदसिद्धैर्महदा-दिभिरव्यक्तानुमानं स्यात्। तदेतत्कथामात्रम्। स्वतस्सर्वग्रहणयोग्याऽपि हि पुंसां चिच्छक्तिस्संसारावस्थायां कर्मणा संकुचन्ती कर्मोत्पन्नै रेव द्वारैर्यथाकर्म प्रसरतीति तु **त्रय्यन्तवृद्धाः**।

नापि सङ्कल्पादिभिर्मनःक्लृप्तिः, संस्कारप्रणाड्याऽपि तदुपपत्तेः। अन्यथा मनसाऽपि तदुत्पादनायोगात्। करणस्य च द्रव्यत्वं नावश्यापेक्षितम्। न च स्वप्ने व्याघ्राद्यभिमानादहङ्कारक्लृप्तिः, मनसैव तादृशसंस्कारसधीचा तदुपपत्तेः। निश्वासादिहेतुभूतप्रयत्नाधारतया महत्क्लृप्तिरप्ययुक्ता। अदृष्ट-वशादेव बाह्यस्येवान्तरस्यापि मरुतः क्षेत्रस्यापि न जीवनपूर्वकः प्रयत्नः कल्प्यः। किमुत कस्यचिदचिद्द्रव्यस्य? परिमितत्वं तु महतः कुतस्त्यम्? अन्तर्देहमेव तत्प्रवृत्त्युपलम्भादिति चेन्न; त्वत्पक्षे विभोरप्यात्मनः शरीरावच्छिन्नप्रदेश एव व्यापारावेशवद्विभोरपि महतस्सहकारिविशेषसामर्थ्यात् क्वाचित्कप्रवृत्ति-सम्भवात्। न च वृत्तिभेदमात्रादन्तःकरणभेदक्लृप्तिर्युक्ता। *कामस्सङ्कल्प इत्यादिना मनस्येव बहुविधवृत्तिश्रुतेः। कामादीनां मनस्सामानाधिकरण्यम् *आयुर्घृतमितिवद्भाक्तम्; महतश्च त्वया मिथो विरुद्धभावाष्टकसुख-दुःखाद्याश्रयत्व-स्वीकारात्। बाह्येन्द्रियमनोहङ्काराणामालोचनादिवृत्तिभेदाश्रयणमप्ययुक्तम्, महत एव सहकारिभेदात् सर्ववृत्त्यविरोधात्। अत एव शास्त्रतो महदादितत्त्व-सिद्धावपि तेषां पृथक्करणत्वं वृत्त्याश्रयत्वं वा न कल्प्यम्। एवं चक्षुरादिष्वा-लोचनोक्तिरपि नेया।

न द्वितीयः, महदादीनामागमतस्सिध्यतां साक्षात्परम्परया वा प्रधान-जन्यत्वसिद्धेः, अनुमातव्याभावात्।

एकप्रमाणवेद्यत्वे कार्यकारणयोर्मिथः।
बोध्यबोधकते न स्तः सहदृष्टाग्निधूमवत्॥

विप्रतिपन्नं प्रत्यनुमानं सार्थमिति चेन्न; महदादीनभ्युपेत्यानभ्युपेत्य वा तेष्वव्यक्तकारणकत्वविप्रतिपत्त्ययोगात्।

यदप्याहुः कार्याणां स्वाधिकपरिमाणादुत्पत्तिर्नियतेति, तदप्यसत्; वस्त्रादिषु वैपरीत्यदृष्टेः। अव्यक्तस्य च परिच्छिन्नत्वं * तमसः परस्तान्मृत्युं भिनत्ति इत्यादिशास्त्रशतसिद्धम्। व्याप्तिवचनं तदनन्तमसंख्यातप्रमाणं चेत्यादिकमपि विभुत्वमन्तरेणापि स्यात्। घटादीनामपि स्वन्यूनपरिमाणैः पिण्डाद्यवयवैरेवोत्पत्तिरिति समन्वयश्च कुत्र? केषाम्? कीदृशः? सुखादिरूपेषु कार्येषु सत्त्वादीनां समनुगतिरिति चेत्, किमतः? न हि यद्येष्वनुगतं तत्तेषां कारणमिति नियमः, शौक्ल्यगोत्वादेरनेकानुगतस्य तत्कारणत्वाभावात् अन्यथा व्यक्ताव्यक्तसाधारणधर्माणां तदुभयकारणत्वप्रसङ्गात्। तथा च तत्त्वाधिक्यप्रसङ्गः। एतेन विगीतं स्वानुगतकारणकं कार्यत्वाद्घटशरावादिवदित्यपि निरस्तम्। घटादिष्वनुगतस्य मृत्त्वस्य तत्कारणत्वासिद्धेः, मृद्द्रव्यस्य तु घटाद्यात्मना विभक्तस्याविभक्तस्य वा तेष्वनुगतत्वादृष्टेः।

यदप्येकरूपान्वितत्वादेकोपादानत्वमिच्छन्ति, तदपि स्वपरमतनिर्धूतम्, सर्वथा सारूप्ये हेतौ तत्त्वभेदभङ्गप्रसङ्गात्; यथाकथंचित्सारूप्ये तु व्यभिचारात्, साक्षादेकोपादानत्वसाधने सृष्टिक्रमादिशैथिल्यं स्यात्। मृत्तन्त्वाद्युपादानभेदश्च निह्नूयते। परम्परयेति तु मृद्घटादिनिदर्शनविरुद्धम्। नित्येषु च पुरुषेषु साक्षित्वादयो धर्मास्साधारणा युष्माभिरेव पठ्यन्ते, न तु तेषां हेतव दृष्टाः। व्यक्ताव्यक्तयोश्च * त्रिगुणमविवेकि इत्यादिसाधर्म्यपाठादेकोपादानत्वप्रसङ्गः। कार्यत्वे सतीति विशेषणेऽपि मृत्पिण्डद्वयारब्धघटादिभिर्गोमयादिनानोपादानवृश्चिकादिभिश्चानैकान्त्यम्। [बह्वा] तन्त्वारब्धपटादिभिश्च तेषामपि पक्षीकरणे दृष्टान्तासिद्धिः। [अविदित] व्यतिरेकिहेतुविवक्षायामपि न दृष्टः कारणभेदोऽपह्नोतुं शक्यः। नापि कारणान्तरमेकं विधातुं, दृष्टैरेव हेतुभिरदृष्टघटितैः कार्याणां चरितार्थत्वात्। न च शास्त्रमन्तरेण जगतस्सत्त्वादिगुणसमन्वयसिद्धिः, येन तन्मयं कारणमुन्नीयेत। ननु सुख्यामि दुःख्यामि मुह्यामीति स्वानुभवसिद्धास्तावत् सुखादयः, ते च कार्यभूताः स्वानुरूपं कारणमाक्षिपन्ति। तथातथा तेषुतेषु विषयेषु कालभेदेन पुरुषभेदेन च प्रीत्यप्रीतिविषादजनकत्वं दृष्टम्, तदपि तत्तद्गतविचित्रगुणविशेषहेतुकं युक्तमिति। तन्न; सम्प्रतिपन्नदृष्टादृष्टहेतुशक्त्यैव सर्वोपपत्तौ तदतिरिक्तत्रैगुण्यक्लृप्त्ययोगात्। गुणानां कार्यैकनिरूपणीयत्वभाषणमपि शास्त्रोपज्ञम्। अन्यथा त्रैगुण्योन्मेषभेदस्याप्यतिरिक्तनिर्वाहकत्रैविध्यक्लृप्तावनवस्थाप्रसङ्गात्। सामग्र्यनवस्था तु सिद्धा न क्वापि दोषाय, प्रत्युत गुणायेति सर्वैरेष्टव्या।

गुणत्रयात्मकं च कारणमिच्छतस्ते विश्वस्यैकोपादानत्वं दुर्वचम्। ननु साम्यावस्थानां सत्त्वरजस्तमसां सङ्घातः प्रकृतिः; अतः कारणैकत्वं स्यात्। तन्न, चित्रपटारम्भकशुक्लकृष्णरक्ततन्तुसङ्घातन्यायेन सूक्ष्मदृष्टौ कार्याणां यथास्वं कारणभेदस्यैवाङ्गीकारात्। ततश्च भेदानां भिन्नत्वे सति विका [र] रित्वादभिन्नहेतुकत्वक्लृप्तिश्च निरस्ता; सत्त्वादीनां भिन्नत्वाद्विकारित्वाच्च। अथ तत्त्वाभिन्नकारणान्तरक्लृप्तिः, तथा सति स्वाभीष्टतत्त्वसंख्याविरोधः; सत्त्वादिद्रव्यभेदाभ्युपगमाच्च।

*शक्तितः प्रवृत्तेश्चेत्येतदपि मन्दम्। यदि कारणशक्तितः कार्यं प्रवर्तते कथमव्यक्तसिद्धिः? ननु कारणशक्तिर्नाम सत्कार्यपक्षे न कार्यस्याव्यक्तत्वादन्या। यथा हि तिले तैलस्य। अतस्सर्वकार्योपादानाव्यक्तसिद्धिरिति। मैवम्, यदि तैलाश्रयतिलवदव्यक्तावस्थाश्रयस्वीकारः, तदा पूर्ववत्स्वेष्टतत्त्वसंख्याविरोधः। अथ न, विषमस्तिलदृष्टान्तः। नोदाहरणमादर्तव्यम्; क्षीरादृधिवत्सूक्ष्मावस्थात्स्वस्मादेव जगदुत्पत्स्यत इति। तथाऽपि संप्रतिपन्नावधिस्तत्त्वपङ्क्तिरस्तु। यद्वा तदपि सूक्ष्मं सूक्ष्मान्तरादिति कथं तत्त्वेयत्ता? एतेन सांख्यानां सूक्ष्मशरीरक्लृप्तिश्च निरस्ता। यदाहुः—पूर्वोत्पन्नमव्यक्तमित्यादिना, तन्न; नह्यत्र लिङ्गशब्दोक्तसूक्ष्मशरीरसद्भावे प्रमाणमिति स्थूलवत्प्रत्यक्षम्, कैश्चिदप्यनुपलम्भात्। विभोरात्मनस्स्वर्गादिगत्युपदेशान्यथानुपपत्त्या तत्क्लृप्तिरिति चेन्न; तत्क्लृप्तावपि युष्मन्मते तद्गतेरात्मन्युपचारात्। ततो वरमदृष्टशक्त्या तत्रतत्र देहोत्पत्तिमात्रेण तत्तद्देशगत्युपचारः। ननु स्थूलदेहद्वयान्तरालवर्ती क्षेत्रज्ञस्तत्कालीनदेहवान्, क्षेत्रज्ञत्वात्, यस्तथा स तथा यथा कालान्तरवर्तीत्यनुमीयेत। मैवम्; विपक्षे बाधकाभावात्; गत्युपदेशानुपपत्तेः परिहृतत्वात्। अशरीरत्वे मुक्तत्वप्रसङ्ग इति चेन्न; प्रलयवदविरोधात्। तत्रापि सूक्ष्माचिद्विशिष्ट एव पुरुष इति चेन्न; अत्रापि तावन्मात्रसाधने सिद्धसाधनात्। आगमस्तु गत्यवस्थायां पूर्वशरीराकृष्टसूक्ष्मावयवसङ्घातमात्रेणापि गतार्थः। *सूक्ष्मं प्रमाणतश्च तथोपलब्धेरिति सूत्रमपि तावन्मात्रविषयम्। पुर्यष्टकशरीरोक्तिश्च न शरीरान्तर्वर्तिसूक्ष्मदेहसद्भावपरा। *कारणकार्यविभागादविभागादिति हेतुश्च महदादिपक्षसिद्ध्यसिद्धिविकल्पेन निरस्तः। किंच कार्याणां सतां क्वचित्कारणे विभागाविभागौ नियताविति कृत्वा विचित्रस्य कार्यवर्गस्य विभागाविभागस्थानतया प्रधानं सिषाधयिषितम्। न त्वेवं नियमः; यथा मृदादिषु घटादीनामेतौ दृष्टौ न तथा तन्त्वादिषु पटादीनाम्। न हि तन्त्वेकदेशात्मकः पटः येन घटादिन्यायः स्यात्। एकस्मादनेकोत्पत्तिनियमश्चानेन भग्नः, त्वयाऽपि संहतेस्सत्त्वादिभिर्जगदारम्भोक्तेश्च। यत्र कार्याणां विभागाविभागदृष्टिः न तत्र सर्वत्रोपादानत्वम्, निमित्तेऽपि क्वचित्तद्दृष्टेः अरणेरिवारणेयस्य। न हि काष्ठे पार्थिवांशो वह्नेरुपादानम्। न च वह्नयंशो धूमस्य। एवं सति नाव्यक्तस्यैव सिद्धिः। विश्वनिमित्तस्यापि कस्यचिदेवमनुमातुं शक्यत्वात्, तस्य च विजातीयस्यापि सम्भवात्। किंच यथा मृदवयवसङ्घाते घटादेरविभागादिः, तथा पार्थिवाद्यणुसङ्घाते तत्तद्भूत-

भौतिकानां स किं न स्यात् ? ततश्च का कथा तदतिरिक्ततत्त्वकल्पनायाम्। कृत्स्नैकदेशसंयोगानुपपत्त्याऽणुसङ्घातस्य कारणत्वक्लृप्तिरयुक्तेति चेन्न; सत्त्वादिविभुद्रव्यसङ्घातस्यापि तत्रैव संयोगविकल्पावतारात्। अणूनां मिथः कात्स्न्र्येन संयोगे पृथुकार्यानुपपत्तिस्स्यात्, न तु विभूनामिति चेन्न; तेषामपि मिथः कात्स्न्र्येन संयुक्तानां स्वापेक्षयाऽल्पपरिमाणबहुकार्योत्पत्तौ प्रतिकार्यं कारणस्य कृत्स्नैकदेशवियोगविकल्पे कार्यान्तराणामनुत्पत्तिर्वा कारणस्य सावयवत्वं वा स्यादिति चर्चा स्यात्। श्रौते तूपादाने * श्रुतेस्तु शब्दमूलत्वादिति समाधानं सूत्रितम्। अपि च क्षीरदधिरुचकस्वस्तिकादिन्यायेन स्वस्यैव पूर्वावस्थाविशेषवतस्स्वोपादानत्वे सिद्धे किमन्यत्र कुत्रचिदविभागादिगवेणया ? घटादयोऽपि मृत्पिण्डादिषु तत्तदंशैरेवोपादीयन्ते न तु पिण्डादिभिः। कूर्मावयवदृष्टान्तश्चात्र मन्दः, तत्र ह्याकुञ्चनप्रसारणाभ्यामवयवान्तरावृतानावृतत्वसिद्धया भवत्यव्यक्तव्यक्तावस्थाभेदः, न तूपादानोपादेयभावात्। न च तत्र कस्यचिदवयवनाशोत्पत्तिव्यवहारः। अतो न कथंचिदप्यनुमानादव्यक्तादिसिद्धिः।

आगमेन विना सिद्धिस्तन्मात्राणां च दुर्वचा।
उद्भवानुद्भवाद्यैस्तु लोके सूक्ष्मादिकल्पना॥

अक्षेषु वचनादीनामनुपहतैस्सहकारिमद्भिस्तदवयवविशेषैरेवोपपत्तौ न तावत्कर्मेन्द्रियक्लृप्तिः, रूपादिज्ञानादीनां च तत्तदधिष्ठानभेदैरेव तदनुगुणदशाविशेषितैस्सम्भवात्; तदतिरिक्तकल्पनेऽपि **काणादादिकल्पितन्यायेन** स्मृतिविशेषानुगृहीतेन भौतिकत्वोपपत्तेराहङ्कारिकेन्द्रियसिद्धिरनागमतो न भवति।

कल्पनागौरवभयात्कलाकाष्ठाद्यकल्पयन् ।
अविशेषात्प्रधानादिकल्पनामप्यपास्य तु॥
षड्विंशत्तत्त्ववादश्च यदि युक्त्या समर्थ्यते।
सांख्यवत्प्रतिवक्तव्यो न विस्रम्भस्तदागमे॥
तं षड्विंशकमित्याहुस्सप्तविंशमथापरे ।
इत्यत्र न विरोधस्स्याच्छ्रुतिमात्रानुसारतः॥

एवमागमिकेषु महदादिषु कालभेदनियतविकारभेदाधीनं विशेषमाह— **सत्त्वादीति**। गुणत्रयाश्रयात्प्रधानात्सत्त्वादिगुणोन्मेषभेदेन सात्त्विको राजसस्तामस श्चेति त्रिधा महानुत्पद्यते। त्रिभ्यश्च महद्भ्यस्तथैव त्रिविधोऽहङ्कारः। तत्र प्राच्यादेकादशेन्द्रियाणि। परस्तु भूतादिसंज्ञस्तन्मात्राः क्रमाज्जनयति। मध्यमस्तैजसाख्यः पूर्वापरयोरनुग्राहकतया तदुभयसाध्यसृष्टिद्वयार्थः। तुशब्दो मतान्तराद् व्यवच्छिनत्ति। कल्पितं हि कैश्चित्तन्त्रान्तरनिष्ठैः कर्मेन्द्रियाणां प्रवृत्तिशीलतया राजसाहङ्कारजन्यत्वम्; तच्चायुक्तं शब्दैकगम्येऽर्थे युक्तिभिरन्यथाकरणार्थोगात्॥ ११॥ **इति प्रकृतिमहदाद्यागमिकतासृष्टिप्रकारौ॥**

आनन्द०। प्रकृत्यादौ विप्रतिपत्त्यभावात् तत्र प्रमाणोपन्यासवैफल्यमाशङ्क्याह—**द्रव्याद्रव्ये** इति। **धीमन्निदर्शनतया**—बुद्धिद्दृष्टान्ततया। **लोकायतं शास्त्रमारभ्येति**—'अथ लोकायतं शास्त्रं। पृथिव्यादीनि चत्वार्येव तत्वानि। तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवत्" इत्यादिनेत्यर्थः—**विरोचनोपदेशवदिति**—ब्रह्मणा मोहनार्थं विरोचनं प्रत्युपदेशवदित्यर्थः। **अधिकानामिति**—संख्याविशेषात्तन्मूलभूतप्रमाणेनाधिकनिषेधः कर्तव्यः। आगमबाधे (न) तदनुमानायोगादिति भावः। **इतरस्य**। अनुपलब्धिमात्रस्य। **अस्ति हीति**—इहाकाशे विहगः पततीत्याबालमुपलम्भादित्यर्थः। अरूपत्वादिनेत्यादिशब्दद्वयेन गन्धवत्त्वाभावाज्जलस्य स्नेहवत्त्वाभावात्तेजसश्चेति विवक्षितं। ननु महत्त्वे सत्युद्भूतस्पर्शवत्त्वं बाह्यै (ह्यै के) न्द्रियग्राह्यस्पर्शवत्त्वं वा द्रव्यप्रत्य (क्षे) क्षत्वे तन्त्रं; अनुगतसम्भवे तत्परित्यागायोगादिति चेत्तत्राह—**शेषं चेति**—आकाशनिरूपणे इत्यर्थः। **भिन्नभवो**—जन्मान्तरं-**तत्रानुभूतार्थप्रतिसन्धानं**—स्तन्यपानादीष्टसाधनतास्मृतिः। **अभिन्नभवे**-बाल्ये अनुभूतस्य प्रतिसंन्धानं—तत्स्मृतिः। **षड्धातुवादः**—षट्तत्ववादः। **अध्वर्युभिरिति**—"तस्माद्वा एतस्मादात्मन आकाशस्संभूतः" इत्यादिना यजुर्वेदेऽध्ययनादित्यर्थः। **उद्गातृभिरिति**—"सदेव सौम्येदमग्र आसीत्तत्तेजोऽसृजत ता आप ऐक्षन्त ता अन्नमसृजन्त" इत्यादिवाक्यैरित्यर्थः। ननु विभागेनोद्देशेनेतरव्यवच्छेदाद्विरोध इत्यत्राह—**भूयसां चेति**। भूयसां—चतुर्विंशतितत्वप्रतिपादकानामिति शेषः। विरोधाङ्गीकारेऽपि न तत्प्रतिबन्धीति भावः। भूयस्त्वमसिद्धशेषः। विरोधाङ्गीकारोऽपि न तत्प्रतिबन्धीति भावः। भूयस्त्वमसिद्धमित्यत्राह—**उपबृंहणप्राचुर्यादिति**। तथाच अनुग्राहकप्राचुर्यमपि प्राबल्यप्रयोजकमविशेषादिति भावः। ननु भूयस्त्वमप्रयोजकं; शतमप्यन्धानां न पश्यतीति न्यायादित्यत्राह—**नचात्रेति**। सम्यङ्न्यायबलादुभयोरविरोधस्यैव स्थि(र)तत्वात्। चतुर्धातुवाक्यं चतुर्णां स्वरूपप्रतिपादनमात्रेणापि प्रामाण्यमश्नुते। न तदर्थमितरनिषेधमपेक्षते। चतुर्विंशतिवाक्यं तु न्यूनपरं चेन्न प्रामाण्यं लभते इति न विरोध इति भावः। ननु चतुर्विंशतिवाक्यस्य चतुर्विंशतितत्वपरत्वं नावश्यं वाच्यं;- अन्यथाऽपि प्रमाण्योपपत्तेरिति नैयायिकमतमनुभाषते—**केचित्त्वित्यादिना**। प्रथमादिपदेन महदहङ्कारादिशब्दग्रहणं। द्वितीयादिपदेन बुद्धिविशेषचेतनगुणौ गृह्येते। कुसुमाञ्जलिसंमतिमाह—**यथाऽऽहेति**। **सहकारिशक्तिः** सर्वकार्यसहकारिकारणं, अदृष्टमित्यर्थः। दुरवबोधत्वान्मायाशब्दवाच्यतापीत्याह—**दुरुन्नीतितः**। तस्य प्रकृतिशब्दवाच्यताऽपि युक्तेत्याह—**मूलत्वात्प्रकृतिरिति**।

नियतक्रमेति—प्रकृति विकृति भावस्य द्रव्यधर्मत्वादिति भावः। ननु न प्रकृतेर्महानिति प्रकृतिशब्देनोपादनमुच्यते; अपितु निमित्तमात्रमित्यत्राह—**बाधेति**। बाधाभावे निमित्तत्वस्य प्रकृतिशब्दबोध्यत्वादिति भावः। **अन्यथेति**— तथाच प्रकृतेरिति

पञ्चमीश्रुतस्य तस्माद्वेति पञ्चमीश्रुतस्य जनिकर्तुरित्यनुशासनसिद्धस्य "तमसि लीयते" इति सप्तम्या च श्रुतस्योपादानत्वस्य हानिरश्रुतस्य निमित्तत्वस्य स्वीकार इत्यर्थः। अन्ये तु--प्रकृतिशब्दस्योपादानपरस्य निमित्तत्वे लक्षणास्वीकार इत्याहुः। यद्वा --बाधकाभावेऽपि भाक्तत्वे सर्वत्र तथा प्रसङ्गेन कोऽपि सिद्धान्तो न सिध्येदित्यर्थः। **साधकबाधकेति** साधकसत्त्वेऽनुवादप्रसङ्गाद्बाधकसत्त्वे योग्यविरहादर्थविशेषप्रतिपादनाभावादपुरुषार्थतापत्तेर्विहतं स्वाच्छन्द्य। **श्रद्धेयमेवेति।** 'त त्प्रमाणं बादरायणस्यानपेक्षत्वात्' इति न्यायादिति भावः। ननु नाध्यक्षणेति मूलमसंगतं अभागिप्रतिषेधापत्तेरित्याशङ्क्याचावतारयति—**नन्विति।** नन्विन्द्रियाणामतीन्द्रियत्वात्तद्विषयं शास्त्रमर्थवदित्याह—**अश्रुतागमरिति। अप्रतिसंहितेति।** यथा धर्माधर्मविषयकवैदिकव्यवहारात् व्यवहारविषयत्वेन व्यवहर्तव्यविशेषविषयअनुमीयते तद्वदपि न व्यवहार्यमनुमाय व्यवहार इत्यर्थः। ननु प्रत्यक्षसिद्धत्वं भवतु को दोष इत्यत्राह—**अतः कथमिति।** प्रत्यक्षसिद्धे शास्त्रस्य तात्पर्याभावादिति भावः। ननु पृथिव्यादीनामपि प्रत्यक्षत्वं न स्यात् तदभेदात् इत्यत्राह —**अवस्थेति।** असंयुक्तावस्थस्य केशम्य दूरे न प्रत्यक्षता। तस्यैव सजातीययुक्तावस्थस्य प्रत्यक्षता। प्रत्येकस्य रजसश्चक्षुरगम्यत्वं; तस्यैव राश्यवस्थस्य चक्षुर्गम्यत्वं दृष्टमित्यर्थः। तथाच यदवस्थाविशिष्टस्य शास्त्रप्रतिपाद्यत्वं तदवस्थस्य न प्रत्यक्षत्वमिति भावः। ननु यत्र प्रत्यक्षमधिष्ठानं नास्ति तत्र कथमित्यत्राह—**मनसेति।** सम्भावनारूपधीविशेषविषय इत्यर्थः। ननु अहमिति महत्तत्वस्य अहङ्कारस्य च प्रत्यक्षत्वात् कथं तयोः शास्त्रवेद्यत्वमित्यत्राह—**अहमति।** ननु साङ्ख्यैः 'अध्यवसायो बुद्धिः इत्यत्र बुध्यते अध्यवस्यतेऽनेनेति व्युत्पत्त्या महत्तत्वपरिमाणतयाऽध्यवसायस्य तन्निष्ठत्वोक्तेरध्यवसायाश्रयतया प्रतीयमानोऽहमर्थो महत्तत्वमेव। तथा 'अभिमानोऽहङ्कारः' इत्यत्र अभिमन्यतेऽनेनेति व्युत्पत्त्या तिरस्कारात्मकबुद्धेर्वाऽहङ्कारधर्मत्वात्तदाश्रयतया प्रतीयमानोऽहङ्कार इति चेत्तत्राह—**अध्यवसायादयोऽपीति।** तर्ह्यध्यवसायादेः तद्धर्मत्वे (शास्त्रेषु धर्मितया) तेषु तद्धर्मतया व्यपदेशः कथमित्त्राह—**कारणभेदेति।** करण(रूप)भूत महदाद्यायत्तत्वादित्यर्थः। ननु पृथिव्याद्यवस्थाविशिष्टस्यैव प्रत्यक्षवेद्यत्वात् कथं पृथिव्यादेश्शास्त्रवेद्यत्वम् ? नच तस्य मास्तु तद्वेद्यत्वमिति वाच्यम्; तथा सति चतुर्विंशतितत्वानां शास्त्रवेद्यत्ववचनविरो (धः)धात् इत्यत्राह—**दृष्टेष्विति।** पृथिव्यवस्थाविशिष्टतया प्रत्यक्षत्वेऽपि सलिलादिजन्यत्वब्रह्मपरतन्त्रत्व ब्रह्मकारणकत्वब्रह्मशरीरत्वाद्यैर्धर्मैरप्रत्यक्षत्वेन शास्त्र वेद्यत्वमविरुद्धम्।

द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते।
तेषामैन्द्रियकत्वेऽपि न तादूप्येण धर्मता।
श्रेयस्साधनताप्येषां नित्यं वेदात्प्रतीयते॥

इति न्यायादिति भावः। दृष्टानामेव पृथिव्यादीनां शास्त्रगम्यत्वे अतीन्द्रिय-प्रकृत्यादीनां शास्त्रगम्यत्वं किं पुनर्न्यायसिद्धमित्याह--**किंपुनरिति**। तथाच इदं सुखदुःखमोहात्मकं कार्यजातं तादृशकारणजन्यमित्यानुमानान्न सिध्यतीति भावः। ननु प्रकृत्यादीनामप्रत्यक्षत्वे तल्लक्षणग्रहणमनुपपन्नं; प्रत्यक्षदृष्टानां पृथिव्यादीनां तत्तदवान्तरभेदानां च लक्षणमप्यनुपपन्नं; कार्यकारणयोरभेदेन पृथिव्यादिलक्षण-प्रकृत्यादावतिव्याप्तेश्चेत्यत्राह-**एषां चेति**। अप्रत्यक्षाणामागमबोधितं लक्षणं। तेषु सर्वतत्वकारणत्वं महत्तत्वकारणत्वं च प्रकृतिलक्षणं। प्रकृत्यव्यवधानेन प्रकृतिजन्यत्वं महल्लक्षणं इत्यादिना ग्राह्यम्। पृथिव्यादीनां च प्रत्यक्षतः। नचा-तिव्याप्तिः; यथादर्शनं यथाऽऽगमं तत्तदवस्थाविशिष्टस्य लक्ष्यतया तत्तदवस्था-शून्यकाले लक्षणविरहादतिव्याप्तयभावादिति भावः। ननु पृथिव्यादीनामनुगतस्य धर्मस्य दुर्वचत्वात् न लक्षणं सम्भवतीत्यतआह--**केषुचिदिति**। **भेदाः**—भेदक-धर्मा इत्यर्थः। ननु प्रत्यक्षेणाप्रतीतेरित्यस्यानुषङ्गेऽनुमयेत्यनुपपन्नं; अनुमाशब्द-स्यानुमितिपरत्वेन तज्जन्यप्रतीत्यभावादित्यत्राह—**न पुनरनुमयेति अनुमानै-रित्यर्थः** इति। अनुमाशब्दः करणपरो जात्येकवचन इति भावः। आदिशब्दार्थ-माह--**पक्षदृष्टान्तेति**। साङ्ख्योक्तं प्रकृत्यनुमानं दूषयितुमनुभाषते--**यत्तावदुक्त-मिति**। काकस्य काष्ण्यद्धवलः प्रासाद इतिवदसंगतमित्यत्राह--**अयमर्थ इति**। **सुखदुःखमोहात्मकतयेति**। इत्थं साङ्ख्यप्रक्रिया—सर्वं कार्यजातं सुखदुःखमोहा-त्मकं। यथा स्त्री रूपयौवनकुलादिसम्पन्ना स्वामिनं सुखाकरोति स्वामिनं प्रति सुखात्मकत्वात्। एवं पुरुषान्तरं मोहयति तं प्रति मोहात्मकत्वात्। सपत्नीं दुःखाकरोति तां प्रति दुःखात्मकत्वात्। अनया स्त्रिया सर्वे भावा व्याख्याता इति। तथाचेदं कार्यजातं सुखदुःखमोहात्मकमिति तादृशकारणजन्यं तादृशकार्य-त्वात् यद्यदात्मकं कार्यं तत् तदात्मककारणजन्यं यथा मृदात्मको घटस्तदात्मक-मृज्जन्य इति सुखाद्यात्मकतया परिणतसत्वाद्यात्मकप्रकृतिसिद्धिरिति भावः। ननु शुक्लः पट इति प्रतीतेस्तन्त्वादिगुणैस्तादात्म्यं पटादेरस्त्वित्यत्राह—**तथा सतीति**। तथा च पटाद्यर्थकारकव्यापारवैयर्थ्यमिति भावः। ननु कारकव्यापारो न पटा-द्युत्पत्त्यर्थोऽपितु तदभिव्यक्त्यर्थः इत्यत्राह—**नचायमिति**। ननु शुक्लः पट इति धीभेदव्यवहारबलात्पटगुणयोरभेदसिद्धः। तथा च तन्तुपटयोस्तादात्म्यात्तन्तु-रूपमेव पटरूपमिति कारणगुणतादात्म्यं सिद्धमित्यत्राह—**अत एवेति**। द्रव्य-निष्पत्तिमात्रेण रूपादेसिद्धया रूपाद्यर्थपाकादिरूपकारकव्यापारवैयर्थ्यप्रसङ्गा-देवेत्यर्थः। दूषणान्तरमाह—**शुक्लः पट इति**। अभेदे पर्यायत्वप्रसङ्गादित्यर्थः। न च अभेदेऽपि द्रव्यपटयोः पर्यायत्वाभाववदिहापी (पिने) ति शङ्क्यं; तत्र द्रव्य-त्वादेर्भिन्नधर्मस्य सत्वात्। अत्रापि भिन्नधर्माङ्गीकारे स एव गुणो धर्मि (धर्मीच) भिन्न इति भावः। ननु कारणगुणभूतरूपाद्यात्मकत्वाभावेऽपि रूपादिवत् स्वयमपि गुणान्तरं भवत्विति द्वितीयपक्षं दूषयति—**न द्वितीय** इति तथा च असिद्धिरित्यर्थः।

ननु कारणगुणत्वं नाम कारणसमवेतत्वमेव विवक्षितं; अस्ति च तत् पटेऽपि तन्तुसमवेतत्वादिति शङ्कते—**तन्तुसमवेतत्वादिति**। ननु तन्निष्ठत्वमेव तद्गुणत्वप्रयोजकमस्तु त (त्तु) च्च पटावस्थाया अस्तीति शङ्कते—**पटत्वस्येति**। **किमत इति**। महत्त्वाद्यवस्थाः कारणनिष्ठाः कार्यावस्थात्वात् पटत्वाद्यवस्थावदिति हि तदा प्रयोगो भवेत्। तथा च कारणगुणसामान्यं सिद्धयेत् न तु त्रिगुणात्मककारणविशेष इति भावः। **सिद्धसाधनादिति**—महत्त्वा (हदा) दिकं कारणायत्तं कार्यत्वादिति हि तदा स्यात्; तथा च चार्वाकव्यतिरिक्तं प्रति सिद्धसाधनमेवेति भावः। साध्यविशेषाच्चेति—कारणनियतपश्चाद्भावित्वलक्षणकार्यत्वस्य कारणायत्तत्वस्य च पर्यायत्वादिति भावः। ननु कारणनियतपश्चाद्भावित्वं न कार्यत्वं अपि तु प्रागभावप्रतियोगित्वादिकं; तथा न पर्यायत्वं न सिद्धसाधनं चेत्यत्राह—**न होति**। कार्यमात्रस्य कारणनिरूप्यत्वव्याप्तिग्रहाद्व्याप्तिग्रहसामान्यसिद्धयैव सिद्धया सिद्धसाधनमिति भावः। यद्वा—कारणं विनाऽपि कार्यं (कार्यं कि) मस्त्वित्यत्राह—**न होति**। **अकारणं**—कारणाभावः सहयोगे तृतीया। न हि कारणाभावस्थले कार्यं चार्वाकादन्येऽङ्गीकुर्वन्तीति भावः। **कारणसहकारित्वादोति**—कारणं प्रत्यप्रधानत्वं कारणसहकारित्वमिति निर्वचनेऽपि (तेन) कारणं किञ्चित्सिद्धयेत्। न तु सुखदुःखमोहात्मकमित्यर्थः। आदिशब्देन समवायिविनाशजन्यविनाशप्रतियोगित्वादिकं विवक्षितं।

इदमुपलक्षणं—कारणस्य कार्यजनने सहकारित्वं नाम किं स्वजजने स्वकारणापेक्षया? उत यत्किञ्चित्कार्यजनने तत्कारणापेक्षया? नाद्यः; बाधात्, महदादेः प्रकृत्यादिसहकारित्वा (सिद्धेः) भावात्। न द्वितीयः; सिद्धसाधनादित्यपि द्रष्टव्यम्।

अवयविवादे इति—तथा च असिद्धिरिति भावः। **विरोधादिति**—नित्यत्वाव्यक्तत्वादिसाधने कार्यत्वव्यक्तत्वादिना विरोधादित्यर्थः। ननु कार्यस्य स्वगुणा (णत्वा) वच्छेदेन कारणावस्थवृत्तित्वं साध्यं। तथा च सुखदुःखमोहादीनां महदादिधर्माणां त (द्वति कारणे वृत्त्या) त्कारणवृत्त्या तदात्मकप्रकृतिसिद्धिरिति चेन्न। अहङ्कारादिस्वकार (णा) णवृत्तिशब्दादिगुणवत्तयाऽऽकाशादीनां तत्र व्यभिचार इति भावः। कारणगुणसजातीयैर्गुणवत्त्वमित्यत्र किं तैरेवेत्यवधारणं विवक्षितं उत नेति विकल्पमभिप्रेत्य आद्ये दोषमाह—**विलक्षणेति** द्वितीयं निरस्यति—**स्वसजातीयेति**। किं च किं कारणगुणवत्त्वमात्रं साध्यते यद्वा सर्वगुणसजातीयसर्वगुणवत्त्वं वा उत विशेषगुणसाजात्यं वे (मि)ति विकल्प्याद्ये दोषः काकाक्षिन्यायेनावर्तनीय इति मत्वा द्वितीये दोषमाह—**सर्वगुणेति**। यथा मृद उत्पन्नो घटो मृदात्मकः स्वर्णादुत्पन्नः कटकः स्वर्णात्मकः तद्वदित्यर्थः। तृतीये दोषमाह—**कार्यविशेषेति**। महदादि कार्यं कार्यविशेषधर्मव्यवस्थापक-

कारणगुणसजातीयगुणवत् कार्यत्वात् इति साधने वृश्चिकमाक्षिकादौ व्यभिचारीति भावः। 'न विलक्षणत्वादस्य तथात्वं च शब्दात्' इति व्याससूक्तिसम्मतिमाह—**तदभिप्रायमिति**। कार्यकारणयोर्गोमयवृश्चिकयोर्वैलक्षण्यं दृश्यत इत्यर्थः। **स्वविषयसरूपेति**—स्वस्य हिंसादेर्विषयो वधादिस्तज्जन्यदुःखादिकं वा तत्सरूपफलप्रदानानुमानवदित्यर्थः। वैदिकहिंसा स्वपीडनजनिका परपीडनात्मकत्वादिति वा; वैदिकहिंसा स्वविषयसरूपफलप्रदा क्रियात्वात् इति वा प्रयोगो द्रष्टव्यः। पशुदहनादौ च परस्त्रीगमनादौ च व्यभिचार इति।

भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥
कारणमस्त्यव्यक्तं..... ....।

इति सांख्योक्तानुमानतन्तराण्यापि दूषयितुमनुभाषते—ये **चेति**। भेदानांमहदादिकार्याणां कारणमव्यक्तमस्ति कुतः परिमाणात् परिच्छिन्नत्वात् इति प्रथमो हेत्वर्थः। तद्दूषयति—**तत्रेति**। तत्र परिच्छिन्नत्वात्सकारणकमित्येवानुमानं; न त्वव्यक्तकारणकमिति। 'कारणमस्त्यव्यक्तम्' इति तु पक्षधर्मताबल सिद्धा (लभ्या) भिप्रायम्। तथा च आत्मनि व्यभिचारान्न व्याप्तिरित्यर्थः। **तल्लिङ्गसिद्धेरिति**—तथा चाद्यानुमानस्याश्रयासिद्धिरिति भावः। ननु विष्वक्प्रवणा चिच्छक्तिः किंचिद्द्वारमपेक्ष्य प्रवर्तते स्वतो विष्वक्प्रवणयोग्यत्वे सति कदाचिदेव किंचिद्विषयकत्वात् यत्प्रवणयोग्यत्वेसति तेषु किंचिदेव प्रकाशयति तत्तत्र किंचिद्द्वारमपेक्षते यथाघटस्थदीपालोको बहिरर्थप्रकाशकः इति। तथाच यद्द्वारतया बुद्धि(रस्तीत्य)सिद्धिरित्याशङ्कते—नन्वि(ति)**त्यादिना**—विपक्षे बाधकतर्कमाह—**अनिर्मोक्षेति**। विषयोपराग विरत्य(त्यागा)भावाद्वैराग्याद्यसिद्धेरिति भावः। परिशेषाद्बुद्धिसिद्धिरित्याह—**तन्न चक्षुरादिमात्रमिति**। **तत्प्रशान्तावपीति**—सांख्यैः स्वप्ने इन्द्रियमात्रोपरमस्याविशेषेण साधना (अभिधाना) दिति भावः। तथाच अहङ्कारजन्यस्वाप्नानुभवः। **नाप्यहंकार** इति। सुषुप्तावहमनुभवाभावेनाहङ्कारस्योपरमात् प्रश्वासनिश्वासहेतुभूतप्रयत्नाधारभूतस्य महतस्सिद्धिः। नच तन्मते आत्मनः प्रयत्नाधारत्वं; तस्य त्रिविधान्तःकरणवशादेव (ज्ञातृत्वादि;) प्रतिभासात्। स्वभावतश्चितिमात्ररूपत्वस्य तैरङ्गीकारादिति ध्येयम्। कारणत्वादेव महदादिवत्परिमितत्वमित्याह—**तत्कल्पनायां त्विति**। तथाच अप्रयोजकत्वमिति भावः। **वृत्तिभेदसिद्धेरिति** 'अध्यवसायोबुद्धिः' 'अभिमानोऽहङ्कारः' उभयात्मकमत्र मनः' इत्युक्तेरित्यर्थः। आलोच्य—मयेदं कर्तव्यमिति योऽयं चितिसन्निधानापन्नचैतन्याया बुद्धेर्निश्चयः सोऽध्यवसायः। स च बुद्धेर्महतोऽसाधारणधर्मः, तस्य बुद्धिकार्यत्वात्तदभेदेन निर्देशः। आलोच्यात्राहमधिकृतो मदर्थाएवामी विषयाः अहम-

स्मीति योऽयमभिमानः साऽहङ्कारस्य वृत्तिः चक्षुरादिना सम्मुग्धाकारेण वस्तुग्रहणे इदमित्थमिति विशेषणविशेष्यभावेन ग्रहणं मनसेति तादृशसम्यक्क (ल्प्यं) ल्प्यः सविकल्पाध्यवसायो मनोवृत्तिरिति तदर्थः। **कर्मोत्पन्नैरिति।** तथा च कर्मोत्पन्नचक्षुरादिभिरन्यथासिद्धचार्थं ? कादाचित्कप्रसरबलान्न महदादिसिद्धिरिति भावः। **संस्कारप्रणाड्येति।** संस्कारसहितादात्मन एव वा चक्षुरादितोऽपि वा तदुपपत्तेरित्यर्थः। यद्वा—संस्कारादेवेत्यर्थः। संस्कारस्यावश्यकतामाह—**अन्यथेति।** ननु संस्कारस्य न सङ्कल्पादिकरणत्वं गुणत्वादित्यत्राह—कारणस्य चेति। प्रत्यक्षं प्रतीन्द्रियार्थसन्निकर्षादेरिवानुमि (तौ) त्यादौ व्या(प्ति) प्तचादिज्ञानस्य(क) ? कारणत्वदर्शनाद्व्यभिचार इति भावः। वृत्ति-भेदान्मनः क्लृप्तिं दूषयित्वा तद्भेदादहङ्कारक्लृप्तिं दूषयति—**नच स्वप्न इति।** एवमध्यवसायस्याप्यन्यथा सिद्धचा न महत्तत्त्वसिद्धिरिति द्रष्टव्यं। ननु निश्वासादि हेतुप्रयत्नाधारतया महत्सिद्धिरिति (त्युक्तमितिचेत्) चेत्तत्राह **निश्वासादिहेतुभूतेति।** नन्वस्तु तादृशादृष्टाधारतया महत्सिद्धिरित्यत्राह—**नचादृष्टस्यापीति।** तथा च व्याप्तयसिद्धिरिति भावः कैमुतिकन्यायेनापि महतः प्रयत्नाधारत्वमित्याह—**यदेति।** उच्छ्वासनिश्वासादिकं परप्रयत्ननैव लोहकारभस्त्रिकान्यायेनोपपाद्यमिति भावः। भेदानां परिमाणादित्यनुमाने आश्रयासिद्धिमुक्त्वा स्वरूपासिद्धिमप्याह—

परिमितत्वं (त्वं) चेति। प्रकारान्तरेण लिङ्गसिद्धिं शङ्कते—**अन्तरिति। तत्प्रवृत्तिः**—प्रयत्नाध्यवसायादिः। **व्यापारावेशः** मुखे दर्पणमालिन्यसम्बन्ध इवातात्विकः—कृत्यध्यवसायसंस्पर्शः ? (क्वाचित्कः) ? (तात्विकः) **सहकारिविशेषः**—क्वाचित्कशरीरयोगादिः। अध्यवसायस्य प्रमारूपत्वादिति भावः। संस्पृश्यतेऽनेनेति सहकारि वृत्तिविशेषादन्तः करणकल्पनेऽपि 'अन्तःकरणं त्रिविधमिति' त्रैविध्यकल्पन मनुपपन्नमित्याह—**नचवृत्तीति।** एकस्यैवानेकवृत्तिसम्भवादिति भावः। तत्र श्रुतिबाधमप्याह—'**कामस्सङ्कल्पइति**'। सर्वशब्देनाध्यवसायादीनां धीभेदानां ग्रहः। यद्वा वृत्तिभेदस्याश्रयभेदकत्वे व्यभिचारमप्याह—**कामस्सङ्कल्पइति। आयुर्घृतमितिवदति**—कारणे कार्योपचारः। ननु विरुद्धवृत्ति (बुद्धिवृत्तिः) ? राश्रयभेदिकेत्यत्राह—**महतश्चेति। भावाष्टकं** धर्माधर्मज्ञानाज्ञान वैराग्यावैराग्यैश्वर्यानैश्वर्याणि। **तेषां** बुद्धिधर्मत्वं 'धर्मो ज्ञानं विरागऐश्वर्यम्' इत्यादिना निरूपितं। अत्र वाचस्पतिना व्याख्यातं—धर्मोनाम यागादिजनितोऽष्टाङ्गयोगाभ्यासजनितश्चाभ्युदयनिश्रेयसहेतुभूतो गुणविशेषः। ज्ञानं—तत्त्वज्ञानं विरागो नाम 'दृष्टानुश्रविकविषय वितृष्णस्य वशीकारसंज्ञा वैराग्यमिति' वशीकाराख्यं। ऐश्वर्यं—अणिमादिप्रादुर्भावः। एवं चत्वारस्सात्विका (काख्याता) बुद्धिधर्माः। तामसास्तु तद्विपरीता अधर्माज्ञानावैराग्यानैश्वर्याख्याश्चत्वारः तथाचाष्टविधा अन्योन्यविरुद्धा भावा बुद्धिनामकमहत्तत्वधर्मा इति। वृत्तिभेदेन बाह्येन्द्रियमनोहङ्काराणाम्मह

(त्तत्वाद्भेद) तस्तत्वान्तराद्भेदकल्पनं च न स्यादित्याह— **बाह्येन्द्रियेति। आलोचनं**— सम्मुग्धा कारेण (अस्मीदन्ताकारेण) ज्ञानं आदिशब्दार्थस्तु सङ्कल्पाभिमानौ। **सहकारिभेदात्**— तत्तद्गोलकाधिष्ठानभेदात्। शास्त्रतो महदादीनामसिद्धचङ्गीकर्तुः पृथक्करणत्वं वृत्तिभेदश्चसिद्ध इति। अन्तःकरणत्रैविध्यदूषणं सिद्धान्तिनो ? सङ्गतमित्यत्राह-**अत एव शास्त्रत** इति। एकस्यैव वृत्तिभेदसंभवादिति **भावः। एवं चक्षुरादिष्विति।**

रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः-

इति बाह्येन्द्रियस्यान्तरिन्द्रियभेदकवृत्तिभेदकल्पनमपि नोपपद्यते। आलोचन-**सङ्कल्परूपवृत्त्योरपि** एकत्रैवोपपत्तेरिति भावः। एवं सर्ववृत्तींनामेकाश्रयत्वेसति चक्षुरादिष्वाप्तागमेष्वालोचनाख्यवृत्त्यभेदोक्तिरपि राज्यं सुखमितिवद्-**गौण्यावृत्त्या** नेतव्या स्यादित्याह--**एवं चक्षुरादिष्विवतीत्यप्याहुः**। महदादीनामनुमानसिद्धानां पक्षत्व मागमसिद्धानां पक्षत्वं वेत्याद्यविकल्पे द्वितीयं दूषयति—**न द्वितीय इति। साक्षात्परम्परया वेति।** प्रकृतेर्महान्महतोऽहङ्कार इत्येवंरूपेण सिद्धेरित्यर्थः। तथा च सिद्धसाधनमिति भावः। तदेव कारिकयोपपादयति— **एकेति**। ननु धूमाग्न्योरप्येकप्रमाणवेद्ययोरनुमापकत्वमनुमेयत्वं च दृश्यत इत्यत्राह— **सहदृष्टाग्निधूमवदिति**। एकप्रमाण वेद्यत्वमेकदा निश्चितत्त्वमित्यर्थः।

अत्र **कैश्चिद्**भेदानां परिमाणादित्यत्र भेदानां—कार्याणां परिमाणात्-स्वाधिकपरिमाणकारणजन्यत्वस्य सिद्धत्वान्महदादिकार्यापेक्षयाधिकपरिमाणमव्यक्तं सिद्धं इति व्याचक्षते। तन्मतमाह-**यदप्याहुरिति। वस्त्रादिष्विति**। तथा च विरुद्धमिति **भावः। व्यभिचारमप्याह—अव्यक्तस्यचेति। भिनत्ति**—तरति। **व्याप्तिवचनं**— अपरिच्छिन्नत्ववचनं। अव्यक्ते व्यभिचारप्रदर्शनस्य सिद्धचसिद्धिदोषादुदाहरणान्तरे व्यभिचारमाह—**घटादीनामपीति**। समन्वयादित्युक्तं दूषयितुमुपक्रमते— **समन्वयश्चेति। अत्रैवमनुमानप्रयोगः**— विवादाध्यासिता महदादिभेदाः स्वानुगताव्यक्तकारणवन्तः। समन्वयात्। यानि च यद्रूपसमन्वितानि तानि तत्स्वभावाव्यक्तकारणकानि यथा मृद्धेमरूपसमन्विता घटमकुटादयो मृद्धेमपिण्डाव्यक्तकारणका इति। तथा च सुखदुःखमोहसमन्विता बुद्धयादयस्तादृशाव्यक्तं साधयन्तीति। **सुखादिरूपेष्विति**। भिन्नेष्वेकाकारतानुगतिरिति तैरुक्तेस्सत्वादीनां सुखादिरूपेषु महदादिष्वनुगतिरित्यर्थः। (तत) अव्यक्तकारणकमित्यत्रा (प्य) व्यक्तशब्दस्य कारणपरत्वे सिद्धसाधनात्। येषु यदनुगतं तत्तत्कारणमिति वक्तव्यं तत्राह— **नहीति**। तत्र हेतुमाह-**शौक्लयेति**। तथा च तत्र व्यभिचार (उक्त) ? इति भावः।

सर्वस्यापि कारणत्वमस्त्वित्यत्राह—**अन्यथेति**। 'त्रिगुणमविवेकि विषयः' इत्यादिना त्वया प्रतिपादितानां त्रिगुणत्वादीनामित्यर्थः। इष्टाप (त्त्या)त्ति

परिहरति—**तथाचेति**। त्रिगुणापेक्षयापि कारणं तत्वान्तरं स्यादित्यर्थः। **इदमुपलक्षणं**—प्रकृतेरपि विकृतित्वं स्यादिति 'प्रकृति विकृतयस्सप्त' इत्युक्तं **विरुध्येतेत्यपि ध्येयम्**। ननु कार्यस्य स्वानुगतकारणकत्वमात्रं साध्यं न तु तदनुगतानां यावतां तत्कारणत्वं। तथा च शौक्ल्यादिषु न व्यभिचार इत्यत्राह—**एतेनेति**। एतेनेत्युक्तमेवाह—**घटादिष्विति**। तथा च व्याप्यत्वासिद्धिरिति भावः। **विभक्तस्य**—कार्यावस्थस्य। **अविभक्तस्य**—कारणावस्थस्य। तस्याभेदेन तदात्मकतया तद्वृत्तित्वासिद्धेरिति भावः। ननु समन्वयादित्यस्य एकरूपान्वितत्वादित्यर्थस्य च साध्यमेकोपादानकत्वमिति च कस्य चिन्मतमनूद्य दूषयति—**यदपीत्यादिना**। **स्वपरमतनिर्धूतं**—स्वपरमतानुसारेण घटादिषु व्याप्तिशून्यमित्यर्थः। किं च एकरूपान्वितत्वं नाम सर्वथास्व (सर्वसारूप्यं) रूपैक्यं विवक्षितं उत यत्किञ्चिदाकारेण वेति विकल्पमभिप्रेत्याद्यं दूषयति—**सर्वथेति**। तथा च महदादय इति पक्षबहुत्वासिद्धे (राश्रयसिद्धि) रित्यर्थः। द्वितीयं दूषयति—**यथाकथञ्चिदिति**। द्रव्यत्वेनैकरूपवद्भिर्भिन्नैः मृत्तन्तूपादानकैर्व्यभिचारादित्यर्थः। किञ्चैकोपादानक (त्व) ? मित्यत्र किं साक्षादेकोपादानकत्वं साध्यते उत परम्परया यद्वा सामान्येनेति विकल्पाभिप्रायेणाद्ये दूषणमाह—**साक्षादिति**। सृष्टिक्रमादीति। प्रकृतेर्महान्महतोऽहङ्कारस्ततस्तन्मात्राणीत्यादिक्रम इत्यर्थः। तथाचागमबाध इति भावः। व्यभिचारश्चेत्याह—**मृत्तन्त्वादीति**। द्वितीयं दूषयति—**परम्परयेति**। (तथाच) दृष्टान्ते साध्यवैकल्यमिति भावः। तृतीयं दूषयति- **नित्येषु चेति**।

'तस्माच्चविपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य। कैवल्यं (कैवल्याध्यस्तत्वं) माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च। इत्यनेनेति शेषः।

ननु नास्मन्मतेऽपि नित्यत्वं हेतुमत्त्वविरोधीत्यत्राह—**नतु तेषामिति**। अभिव्यञ्जका अपि तेषां नेष्टा इति भावः। ननु यत्कार्यं येन सहैकरूपं तत्तेन सह समानो (सहैको) पादानकमिति विवक्षितमित्यत्राह—व्यक्ता व्यक्तयोश्चेति। आदिशब्दार्थस्तु ·····विषयस्सामान्यमचेतनं प्रसवधर्मि।

व्यक्तं तथा प्रधानम्' ·· ····· ····· ····· ·····।

इति विवक्षितः तथा च महदादेः प्रकृत्या सह त्रैगुण्यादिसमानरूपवत्त्वात्तया नित्यभूतया सहैकोपादानकत्वाभावाद्व्यभिचार इति भावः। ननु यत्कार्यं येनकार्येण सरूपमिति विवक्षायां न व्यभिचार इत्यत्राह—**कार्यत्वे सतीति**। ननु

कार्यरूपेण नानात्वमभेदः कारणात्मना।
हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा॥

इति तथा च यथा कारणात्मना हेमरूपेणाभेदः। कुण्डलाद्यात्मना भेदः तथा मृत्पिण्डस्वरूपेण भेदेऽपि मृदात्मना कारणतावच्छेदकाकारेण वा अभेदोऽस्तीत्य-

त्राह—**गोमयेति।** एकरूपान्वितवृश्चिकापेक्षया उपादानभूतगोमयवृश्चिकयोः परस्परं विरुद्धधर्मसंसृष्टत्वेन कारणात्मना (प्यभेदस्य) प्यैक्यस्य वक्तुमशक्यत्वादिति भावः। न च एकव्यक्तिदृष्टान्तस्तस्या एकमृत्पिण्डोपादानकत्वादित्यत्राह—बह्विति। तथाचैकं कार्यमेकोपादानकमिति नियम एव नास्ति दूरे बहूनि कार्या (बहुकार्यद्रव्या) प्यैकोपादनकानीति नियम इति भावः। ननु सर्वकार्याणामप्यनेनानुमानेनैकोपादानकत्वं साध्यते। (तथा च) पटादीनां नानोपादानकत्वेऽपि क्षित्यादावेककर्तृकत्वसिद्धिरिव न विरुद्धमिति पटादीनां पक्षकोटिनिक्षिप्तत्वान्न व्यभिचार इत्यत्राह—**तेषामपीति।** तथा च व्याप्यत्वासिद्धिरिति भावः। ननु सर्वं कार्यजातमेकोपादानकं एकरूपान्वितत्वात् यदेकोपादानकं न भवति तदेकरूपान्वितमपि न भवति। यथात्मानात्मानौ यथा वा शशशृङ्ग कूर्मरोमाणीति तत्राह—**अवीतेति**—व्यतिरेकीत्यर्थः। किं दृष्टाना मेवोपादानानामैक्यं साध्यते। उत तदतिरिक्तैकोपादानकत्वमिति विकल्प्याद्यं दूषयति—**न दृष्ट इति।** तथा च बाध्र इति भावः। द्वितीयं दूषयति। **नापीति।** शक्यमिति शेषः। तथाचाप्रयोजकत्वमिति भावः। **न चेति।** तथा च सत्वादिसमन्वितकारणस्य तदैक्यस्य च श्रुत्यैव सिद्धत्वात्किमनुमानेनेति भावः।

ननु (प्रत्यक्षेण तन्मूलकानुमानेन वा) लिङ्गग्रहणे तदर्थं श्रुत्यनपेक्षणान्नानुमानैवयर्थ्यमिति शङ्कते—**नन्वित्यादिना। तथेति।** सर्वे पदार्थास्सुखदुःखमोहात्मकाः। यथैकमेव वस्तु कंचिद्दुःखाकरोति कंचित्सुखाकरोति कंचिन्मोही करोति; तथा कालभेदेनैक (मेव) पुरुषं प्रति यथाग्निः। तत्र सुखं सत्वात्मकं सत्वपरिणामः दुःखं रजःपरिणामः मोहस्तमःपरिणाम इति 'प्रीत्यप्रीतिविषादात्मान' इत्यादिना साङ्ख्यैरुपपादितैः सुखादिभिस्सत्वादिसमनुगतिरनुमीयते। न तदर्थं श्रुत्यपेक्षेति भावः।

विचित्रगुणहेतुकं—सत्वरजस्तमोगुणहेतुकमित्यर्थः। आद्यं दूषयति—**संप्रतिपन्नेति। दृष्टं**—कण्टकवेधादि। अदृष्टं—धातुवैषम्यादि। द्वितीयं दूषयति—**गुणानामिति। भाषणं**—भाष्ये प्रतिपादनमित्यर्थः। 'प्रीत्यप्रीतिविषादात्मानः' 'सत्वं लघु प्रकाशकम्' इत्यादि सांख्यानां भाषणमित्यन्ये। त्रैगुण्यक्लृप्त्ययोगादित्यत्र बिपक्षबाधकमाह—**अन्यथेति।** न सत्वमात्रं सुखं जनयति सन्ततजननप्रसङ्गात् अपितून्मिषितम्। तथाचोन्मेषेऽपि विलक्षणास्त्रयो गुणाः कल्पनीयाः। तथा परापरा (परम्परा) पेक्षायामनवस्था स्यादित्यर्थः। त्रयो गुणास्त्रैगुण्यं स्वार्थे ष्यञ्। **सामग्र्यनवस्थात्विति।** ननु पूर्वत्रापि सामग्र्यनवस्थैवेति चेत्; सत्यं; तथाऽप्यनुमानतः कल्प्यमानेऽपि कारणे तदुन्मेषादिकारणं ज्ञातव्यं; अत्र तु स्वरूपानवस्था **बीजाङ्कुरादिवन्न दोषकरीति भावः।**

केचित्तु—एकपदार्थनिष्ठानेकपदार्थपरम्परा दोषः। सामग्र्यनवस्था तु न तादृशी (त्यदोष इ) त्याहुः। एकोपादानकत्वानुमानं च तव सिद्धान्तविरुद्धं चेत्याह—**गुणत्रयेति**। **यथास्वमिति**—कार्यस्य सुखाद्यात्मकत्वे सत्वरूपत्वरजोरूपत्वतमोरूपत्वांशभेदेन भिन्नत्वात्तत्तदंशे तत्तत्स्वरूपस्य हेतुत्वात्सर्वं प्रत्यपि नैकमुपादानमिति भावः।

नन्वेकमृत्पिण्डेन क्रमेणोत्पन्नानां घटशरावादीनां दर्शनात् विमतमेकोपादानकं भिन्नत्वे सति विकारत्वादेकमृत्पिण्डोपादानकघटशरावादिवदित्यनुमानस्य किं दूषणमित्यत आह—**ततश्चेति**। सत्वादीनामेव त्वन्मते प्रकृतित्वाद्बाधो व्यभिचारश्चेति भावः। ननु तत्र न बाधः। ईश्वरानुमानवत्कारणान्तरस्य सिद्धरित्यत्राह—**तथासतीति**। त्वन्मते न कल्प्यमानेनैव संख्याविरोधः अपि तु क्लृप्तेनापीत्याह—सत्वादीति। यदपि महदादिकार्यं कारणशक्त्या प्रवर्तते कार्यत्वाद्घटवदिति शक्तितः **प्रवृत्तेश्चेति** विवक्षितमनुमानं तदनुवदति—**शक्तितःप्रवृत्तेश्चेतीति**। दूषयति—**कथमिति**। तत्तत्कार्याणां तत्तत्कारणशक्त्या प्रवृत्तावपि महदादिकार्याणां नैकं कारणमव्यक्तं सिद्धचतीति भावः।

ननु सांख्यपक्षे कारणे शक्तिः कार्यमेव; सा चाव्यक्तादनन्यैव शक्तिविशिष्टस्यैवाव्यक्तत्वात्। तथा च महतस्तत्कारणाद (स्यज्ञात्र) भिन्नता। तथाहङ्कारस्यापि महदभिन्नत्वमेवमिन्द्रियादिकार्याणामपि महदभिन्नतया सर्वस्यापि महदुपादानभूतैककारणतया अव्यक्तसिद्धिरिति शङ्कते—**नन्विति**। **मैवमिति**। सत्वाद्यात्मकस्याव्यक्तस्यापि नानात्वान्नैकोपादानसिद्धिरिति भावः।

किंच तैलाश्रयस्य तिलस्यापि शक्त्याश्रयस्य कार्यत्वात्तद्वदेव महदादिशक्त्याश्रयस्यापि कार्यत्वनियमात्तस्य कारणशक्तितः प्रवृत्त्यनङ्गीकारे च तस्य कारणस्यापि द्रव्यान्तरत्वात्तत्वसंख्याविरोध इत्याह—**यदि तैलाश्रयेति**। अव्यक्तावस्थस्याश्रय इत्यर्थः। **अथ नेति**। अव्यक्तावस्थस्याश्रयो यदि न स्वीक्रियत इत्यर्थः। **विषम इति** तिलस्याव्यक्तावस्थाश्रयस्यैक (व कारण) त्वादिति भावः।

यद्यप्ययमुत्कर्षसमभेदः व्यञ्जनवत्त्वापादनवत्; तथाऽपि नियतस्य सहचारस्य सत्त्वे तादृशो नेति भावः। समाधानमाशङ्कते—**नोदाहरणमिति**। तथा च सूक्ष्मावस्थस्यैकस्यैव जगदुपादानत्वाङ्गीकारे न तत्वाधिक्यं; ततोऽवस्थान्तरस्य सूक्ष्मत्वेन यावतीनां तादृशीनामवस्थानामेकत्वेन भेदगणनाप्रयोजकत्वाभावादिति भावः।

संप्रतिपन्नावधिरिति। महत्तत्वावधिरित्यर्थः। यद्यप्यहङ्कारादिकारणस्य महतस्सूक्ष्मत्वमस्ति (तथापि) तदपि सूक्ष्मान्तरसापेक्षं। तस्य च सूक्ष्मावस्थस्य

न तत्रान्तर्भावः इति यद्युच्येत तदा तदप्युपादानत्वात्सूक्ष्मान्तरसापेक्षमिति कथं तत्वपङ्क्तीयत्तेत्याह—**यद्वेति**—यदीत्यर्थः।

केचित्तु—**कथमव्यक्तसिद्धिरिति**—शक्तिसिद्धावपि नाव्यक्तसिद्धिरित्यर्थः। ननु शक्तित एव कार्यं प्रवर्तते। सा चाव्यक्तमेव। तिलेषु तैलमिव। यथा च तत्सूक्ष्मावस्थं तथाचाव्यक्तसिद्धिरिति शङ्कते—नन्विति **यदिति**। तथाच तैलाश्रय-तिलवदव्यक्ताश्रयात्मकशक्त्याश्रयोऽप्यङ्गीकार्य इति सिद्धान्तविरोध इत्यर्थः। **विषम इति**। तिलस्येव शक्त्याधारस्या (त्रा) नभ्युपगमादिति भावः। तर्हि तदुदाहरणं त्यजत इत्याह—**नोदाहरणमिति**। **तथापि संप्रतिपन्नावधिरिति**। सूक्ष्मभूतमहत्तत्वावधिरित्यर्थः।

यद्वा—सूक्ष्मस्यापि सूक्ष्मान्तरसापेक्षत्वात्तत्वेयत्तासिद्धिर्न स्यादिति दूषणं तदवस्थमेवेत्याह—**यद्वेति**। अपिचेत्यर्थ इत्याहुः। ननु कारणेषु (कारणं) सूक्ष्मं कार्यं शक्तिरिति शरीरे सूक्ष्मशरीरवद्वर्तत इत्यत्राह—**एतेनेति यथाहुरिति**। सांख्यां इति शेषः।

नियतं महदादिसूक्ष्मपर्यन्तम्

संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्।

इत्यादिशब्दार्थः। अस्यार्थः—पूर्वं मातापितृजन्यशरीरस्य भस्मकीटान्तत्वेन निवृत्तिः सूक्ष्मशरीरस्य नैयत्यं चोक्तं—

सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते।

इति। पूर्वोत्पन्नं प्रकृतस्थूलभूतोत्पत्तेः पूर्वं प्रकृतित उत्पन्नं प्रतिपुरुषमेकैक-मित्यर्थः। अ (व्यक्तं) सक्तं—अव्याहतं शिलास्वप्यनुप्रवेशसमर्थमिति यावत्। नियतं—आच महासर्गादाच प्रलयादवतिष्ठते। महदादिसूक्ष्मपर्यन्तं—महदहङ्का-रैकादशेन्द्रियपञ्चतन्मात्रपर्यन्तं तेषां समुदाय इत्यर्थः।

नन्वेतदेवास्तु किं षाट्कौशिकशरीरेणेत्यत आह—संसरतीति। उपात्तं षाट्कौशिकं शरीरं जहाति हायंहायं चोपादत्ते; तस्मान्निरुपभोगं—यतः षाट्-कौशिकं विना सूक्ष्मशरीरं निरुपभोगं तस्मात्संसरति।

ननु धर्माधर्मनिमित्तः संसारः; न च सूक्ष्मशरीरस्यास्ति तद्योगः; तत्कथं संसरतीत्यत्राह। भावैरधिवासितं—धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्व-र्याणि भावाः। तदन्विता बुद्धिस्तदन्वितं सूक्ष्मशरीरं तदपि भावैरधिवासितं; यथा सुरभिचम्पकसम्पर्काद्वस्त्रं तदामोदवासितं भवति। तस्मात्संसरति। तस्मात्प्रधा-नमिव महाप्रलये तच्छरीरं न तिष्ठतीत्यत्राह—लिङ्गमिति। **लयं गच्छतीति**

लिङ्गं हेतु (मत्त्वा) त्वादिति भावः। किमत्र सूक्ष्मशरीरसद्भावे प्रमाणं प्रत्यक्षमनुमानमागमो वेति विकल्पमभिप्रेत्य प्रथमं दूषयति। **न हीति स्थूलवत्**—स्थूलशरीर इव। सप्तम्यर्थे वतिः। द्वितीयमाशङ्कते—**विभोरिति** स्वतः स्पन्दात्मकगतेरसम्भवादिति भावः। **तत्तदेशगत्युपचार** इति—यद्यपि लिङ्गशरीरे साक्षाद्गतिरस्ति तथाप्यात्मनो न सेति तत्र गत्युपदेश औपचारिक एव। तथा च देशान्तरशरीरोत्पत्त्याप्यौपचारिकव्यवहारसम्भवान्नोक्तं गतिमत्त्वं लिङ्गमिति भावः। अनुमानान्तरं शङ्कते—**नन्विति** शरीरवत्त्वे साध्ये सिद्धसाधनमिति **तात्कालिकेति**। विपक्षबाधमाशङ्कते **अशरीरत्व इति**। **प्रलयवदिति**। त्वयापि महाप्रलये लिङ्गशरीरनाशस्याङ्गीकारादिति भावः।

तस्मादपिचासिद्धं परोक्षमाप्तागमात्सिद्धम्।

इति न्यायेन तृतीयमाशङ्कते। **आगमस्त्विति**—'वेत्थ कतम्यामाहूतावापः पुरुषवचसो भवन्तीति प्रश्ने; इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति स यथा पेशसा मात्रामुपाददानोऽन्यन्नवतरं कल्याणतरं कल्याणतमं रूपं कुरुते।

अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्।'

इत्यागमस्त्वित्यर्थः। नन्वत्र शरीरपदाभावात्कथं शङ्केति चेन्न। पुरुषशब्दस्य पुरि शेत इति व्युत्पत्त्या लिङ्गशरीरपरत्वात्। तस्यापि स्थूलशरीररूपपुरस्स्थत्वात्। **तत्वार्थ इति** अर्थवानेवेत्यर्थः। गतार्थ इति पाठस्तु सुगमः।

ननु सूक्ष्मशरीरनिराकरणं सूत्रकारविरुद्धमित्यत्राह—**सूक्ष्ममिति**। चन्द्रसंवादादिकं तु तादात्विकशरीरान्तरमादाय नेयं सूक्ष्मशरीरस्यायोग्यत्वादिति भावः।

ननु

बुद्धीन्द्रियाणि खलु पञ्च तथापराणि
कर्मेन्द्रियाणि मनआदिचतुष्टयं च।
प्राणादि पञ्चकमथो वियदादिपञ्च
कामाश्च कर्म च तमः पुनरष्टमी पूः॥

इति। तथा च—

शब्दस्स्पर्शश्च रूपं च रसो गन्धश्च पञ्चकम्।
बुद्धिर्मनश्चाहङ्कारः पुर्यष्टकमुदाहृतम्॥

इति कालोत्तरसंहितादिवचनोपबृंहितया 'देवानां पूरयोध्या। अष्टाचक्रा नवद्वारा' इति श्रुत्या लिङ्गशरीरसिद्धिरिति चेत्तत्राह—**पुर्यष्टकेति**। स्थूलशरीर एव रूपकमात्रत्वात्तस्याश्रुतेरिति भावः।

भेदानां परिमाणादित्यु (त्याद्यु) क्तहेतुपञ्चकमध्ये त्रयो हेतवो निरस्ताः । परिशिष्टं हेतुद्वयं निराकर्तुमनुवदति । **कारणकार्यविभागादिति** ॥

सिद्धयसिद्धिविकल्पेनेति सिद्धिः श्रुत्यैवेति तयैव प्रकृतिसिद्धेस्सिद्धसाधनं असिद्धावाश्रयासिद्धिरिति भावः । व्याप्यत्वासिद्धिमप्याह—**किंचेति** । यथा मृत्पिण्डाद्विभज्य तदेकदेशो घटः क्रियते । पुनस्तदुपम (र्दन) र्दने मृत्पिण्ड एव निविशते न तथा पटस्तन्तोरेकस्माद्विभज्योत्पद्यते । न च स्वोपम (र्दन) र्दने निविशते इत्यर्थः । तत्र हेतुर्नहीति । तन्तूनामेव तदेकदेशत्वादिति भावः । **अनेनेति**-पटनिदर्शनेनेत्यर्थः । प्रत्येकं पटानामनेकतन्त्वारब्धत्वादिति भावः ।

जगत एकप्रकृत्युपादानकत्वसाधने स्वमते बाधो विशेषविरुद्धश्चेत्याह—**त्वयाऽपीति** । पूर्वोक्तानुमाने व्यभिचारमप्याह—न **तत्र सर्वत्रोपादानत्वमिति**—उपदानत्वनियमो नेत्यर्थः । **आरणेयस्य**—अरणिजन्यस्य । शुभ्रादित्वादपत्यार्थे ढक्प्रत्ययः । व्यभिचारस्थलान्तरमप्याह—**न च वह्न्यंश इति । अव्यक्तस्य**—प्रकृतेः । उभयथा विभागाविभागदर्शनान्निमित्तोपादानयोरुभयोरप्यनुमानप्रसङ्गेन तत्वसंख्याव्याघातः; तत्परिहारार्थमन्यतरानुमाने निमित्तमात्रस्यैव सिद्धिप्रसङ्गे-नार्थान्तरमित्याह—**विश्वनिमित्तस्येति** ।

नन्वस्त्वेकं निमित्तं सैव प्रकृतिरित्यत्राह—**विजातीयस्यापीति** । कार्यस्य सत्वाद्यात्मकतया तदात्मिका प्रकृतिस्त्वया सिषाधयिषिता; निमित्तत्वे कार्यगत-सत्वाद्युपपादकत्वाभावादप्रयोजकतेति भावः ।

किंचाणुसंघात एव घटादीनां विभागाविभागदर्शनान्महदादीनामपि तेष्वेव विभागाद्यनुमानस्योचितत्वान्न तदतिरिक्तस्यैकस्य विभागाविभागभूमित्वानुमानं युज्यत इत्याह—**किंचेति** । तथा च महदादि (तत्वमेव) कमेव प्रमाणाभावात् पक्षीकर्तुं न शक्यत इति भावः । अर्थान्तरपरिहारमाशङ्कते—**कृत्स्नेति** । समौ चोद्यपरिहाराविति परिहरति **नेति** । वैषम्यमाशङ्कते—**अणूनामिति** । पुनस्सम-तामाह—**नेति** । बहुकार्योत्पत्तावित्यनन्तरमनुपपत्तिस्स्यादिति पदमनुषञ्जनीयम् । तथा च पृथुकार्यानुपपत्तिवदल्पपरिमाणानेकानुपपत्तिस्समेति भावः ।

अनुपपत्तिमेवोपपादयति । **प्रतिकार्यमिति** कृत्स्नविनियोगपक्षे कार्यान्तराणाम नुत्पत्तिःएकदेशविनियोगपक्षे सावयवत्वमित्यन्वयः । कार्यान्तराणामनुत्पत्तिरित्यत्र स्वल्पपरिमाणानामप्यनुत्पत्तिर्बोध्या । पक्षद्वयानुपपत्तौ प्रकृत्युपादानत्वं वा तद्विशिष्ट ब्रह्मोपादानत्वं वा कथं युष्माभिरङ्गीक्रियते इत्यत्राह—**श्रौते त्विति** । श्रुतान्यथा-नुपपत्त्या यागादावदृष्टकल्पनावदत्राप्यव्यापिपरिणामहेतुसंयोगकल्पनासम्भवादि-त्यर्थः । **अपिचेति** ननु महदादेरेव सूक्ष्मरूपावस्थाङ्गीकारे सैव प्रकृतिरिति चेन्न; तन्मते महदादीनां सूक्ष्मरूपेण स्थित्यङ्गीकारेण प्रकृतेस्ततो भिन्नत्वात् ।

ननु घटादयो हि स्वभिन्नमृत्पिण्डादुपादीयमानास्ततो विभक्ता अविभक्ताश्चेति व्याप्तिरस्तीति चेत्तत्राह— **घटादयोऽपीति** एवं च तत्तदंश एवोपादानं न तु ततो विभक्तांश इति भावः। अत्र यदुक्तं वाचस्पतिना विभागाविभागनिदर्शनतया—'यथा हि कूर्मस्याङ्गानि कूर्मशरीरे निविशमानानि तिरोभवन्ति निस्सरन्ति चाविर्भवन्ति; न तु कूर्मस्तदङ्गानि वोत्पद्यन्ते ध्वंसन्ते चेति' तद्दूषयति **कूर्मावयवेति** तत्र व्यक्ताव्यक्तावस्थाभेदो नोपादानोपादेयभावात् किं त्वावृतत्वानावृतत्वाभ्यां। ततश्च दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमिति भावः। **नचेति**। उपादानोपादेयस्थले नाशोत्पत्त्यव्यवहारादिति भावः।

त्रिगुणपरीक्षायां प्रकृत्याद्यनुमाननिरासःप्रकृत्यादेरागमिकत्वं च

पूर्वं महदादीनां स्वरूपं किमागमेनानुमानेन वा सिद्धमिति विकल्प्य स्वरूपासिद्धिरुक्ता। इदानीं तन्मात्राणां महदादिवद्वृत्तिभेदरूपलिङ्गाभासोऽपि नास्तीत्याह—**आगमेनेति**।

ननु तन्मात्राणां यदि सूक्ष्मत्वेनाप्रत्यक्षत्वं तथा सति लौकिकानां तद्ग्रहणाभावेन क्वचिदपि सूक्ष्मादिव्यवहारो न स्यादित्यत्राह—**उद्भूवानुद्भूवाद्यैस्त्विति**। उद्भूवः स्फुटतरप्रकाशः। अनुद्भूवस्तदभावः। न्यूनपरिमाणाधिकपरिमाणादिकमादिशब्दार्थ इत्यन्ये।

ननूद्भूतशब्दादिकं भूतं अनुद्भूतशब्दादिकं तन्मात्रं उद्भूवोऽनुद्भूवश्च लोकसिद्धावित्यत्राह—**उद्भूवेति** सिध्यतां नामोद्भूवानुद्भूवौ लोके; तथाऽपि एकस्मिन्नेव तत्वे तौ सूक्ष्मस्थूलविभागं कुरुतः न तु तत्वान्तरत्वमापादयेतामिति भाव इत्यपरे।

इन्द्रियाणामप्यागमैकगम्यत्वमाह— **अक्षेष्विति**। वचनादिक्रिया करणसाध्या क्रियात्वात् भिदि (क्रिया) वदित्यनुमानमपि तालवाद्यवयवातिरिक्तेन्द्रियसाधकं न सम्भवतीत्याह—**वचनादीनामिति**। सहकारि-बलोत्साहादिदशा बाल्यादि। अभ्युपगम्याप्याह-**तदतिरिक्तेति**।

यत्तावद्वाचस्पतिराह—'कालश्च वैशेषिकाभिमतोऽनागतादिभेदं प्रवर्तयितुं स्वतो नार्हति। ततश्च तपनपरिस्पन्दाद्युपाधिभेदेनानागतादिभावः प्रतिपाद्यते। सन्तु त एवोपाधयोऽनागतादिव्यवहारहेतवः कृतं कालेनेति साङ्ख्याचार्याः' इति। तदन्यायेन प्रधानादिकल्पनायां अपि युष्याभिर्भेतव्यमित्याह—**कल्पनेति**। कलाश्च कालश्च-उपाध्यधीनः कालःकलाः शुद्धस्तु कालशब्दार्थः।

केचित्तु कलाकाष्ठादीति पाठः। तदर्थस्तु कालदिशाविति वदन्ति। प्रसङ्गाच्छैवमतमप्युक्तन्यायेन दुष्टमिति सूचयति। **षट्त्रिंशदिति**। तदुक्तं श्रीकरभाष्ये—

पृथ्व्यादि पञ्चभूतानि तन्मात्रपञ्चकं तथा।
बुद्धीन्द्रियाणि पञ्चापि पञ्च कर्मेन्द्रियाणि च॥

मनो बुद्धिरहङ्कारः कला कालौ (काष्ठा) तथैव च ।
नियती रागविद्ये च प्रकृतिस्तद्गुणास्त्र (श्र) यः ॥
धर्माधर्मौ तथा जीवः ईशस्तत्वानि बुध्यतु ।

इति । (अन्यत्रापि तेषां) शैवतत्वसंग्रहे च—

शैवागमेषु मुख्यं पशुपतिपाशा इति क्रमात्त्रितयम् ॥
तत्र पतिश्शिव उक्तः पशवो ह्यणवोऽर्थपञ्चकं पाशः ।

इति ।

मलं कर्म च माया च मायोत्थमखिलं जगत् ॥
तिरोधानमयी शक्तिरर्थपञ्चकमिष्यते ।

इति पाशविभागः ।

शुद्धानि पञ्च तत्वान्याद्यन्तेषु स्मरन्ति शिवतत्वम् ।
शक्तिसदाशिवतत्वे ईश्वरविद्याख्यतत्वे च ॥
पुंसो ज्ञकर्तृतार्थं मायातस्तत्वपञ्चकं भवति ।
कालो नियतिश्च तथा कला च विद्या च रागाश्च ॥
अव्यक्तान्मायातो गुणतत्वं तदनु बुद्धयहङ्कारौ ।
चेतो धीकर्मेन्द्रियतन्मात्राण्यनु च भूतानि ॥

इति । एतानि युक्त्या समर्थ्यन्ते आगमेन वेति विकल्पं मनसिकृत्याद्ये आह— **यदि युक्त्येति** । सांख्यमतवत् दूषितव्यमित्यर्थः ।

द्वितीय आह—**न विस्रम्भ इति** । तादृश्याः श्रुतेरभावात्तदागमस्य सूत्रकृद्विद्विष्टत्वादिति भावः ।

नन्वौपनिषदपक्षेऽपि—

तं षड्विंशकमित्याहुः सप्तविंशमथापरे ।

इत्यादिना ह्यव्यवस्थया गणनान्न तत्वव्यवस्थेत्यत्राह—**तं षड्विंशकमिति** । सप्तविंशमिति यदि पाठस्तदा छान्दसो दीर्घः । यदा व्यक्तमादाय गणना क्रियते तदा षड्विंशकत्वं । यदा तत्पूर्वावस्थयोरक्षरतमसोरन्यतरदप्यादाय तदा सप्तविंशत्वमिति श्रुतमात्रस्वीकारान्न कल्पनादोषो नाप्यव्यवस्थितिरिति भावः ।

पद्यशेषं व्याख्याति-**एवमित्यादिना** । कालभेदः सर्गादिकालविशेषः । **तथैवेति** सात्विकादिभेदेनेत्यर्थः । प्राच्यात् सात्विकाहङ्कारात् भूतादिसंज्ञस्तामसाहङ्कारः । **तैजसाख्यः** राजसः अनुग्राहकतया प्रवृत्त्युत्पादनेनेति शेषः । **तन्त्रान्तरनिष्ठैरिति**-शैवशास्त्रनिष्ठैरित्यर्थः ।

ज्ञानेन्द्रियकर्मेन्द्रियभूतान्यहङ्कारतः क्रमशः । इत्युक्तेः ।

केचित्तु—मायिनस्तन्त्रान्तरनिष्ठाः इन्द्रियाणां भौतिकत्वेऽपि तन्मध्ये सात्विकांशैः भूतैर्ज्ञानेन्द्रियाणि राजसांशैः कर्मेन्द्रियाणि तामसांशैर्भूतानीत्युक्तेरित्याहुः। प्रमाणशून्यत्वादयुक्तं तदित्याह-**तच्चायुक्तमिति** ॥ ११ ॥

त्रिगुणपरीक्षायां तन्मात्रादेरागमिकता महदाद्युत्पत्तिप्रकारश्च

अक्ष०। एवं द्रव्याद्रव्ये उभे अप्यभ्युपगन्तव्ये इत्युक्तम्। अथ द्रव्येषु प्रथमोद्दिष्टं त्रिगुणमादौ निरूप्यते। तत्र प्रत्यक्षगम्यानि पृथिव्यादीनि चत्वारि पञ्च वा भूतान्येव तत्वानीति केचिदाहुः। ततोऽधिकान्येकोनविंशतितत्वान्यपि अतीन्द्रियाणि स्वतन्त्रेण शास्त्रेणैव सिद्धयतीत्याह—**स्वच्छन्देनेति**—साधकबाधकप्रमाणाभावे सति इतरनिरपेक्षं विशिष्टार्थबोधनसामर्थ्यमागमस्य स्वाच्छन्द्यम्। आगम इह श्रुतिस्मृतीतिहासादिः। कारणदोषबाधकप्रत्ययविरहादतीन्द्रियविषयक शास्त्रमपि प्रत्यक्षवद्विश्वसनीयमेवेति भावः। तत्र कानि तत्वानि अधिकानीत्याह—**प्रकृतीति** 'प्रकृतिः" "महान्" "अहङ्कारः" "तन्मात्राणि पञ्च" "एकादशेन्द्रियाणि"इति एकोनविंशतितत्वानामपि सिद्धिरित्यर्थः। प्रत्यक्षसिद्धपञ्चभूतसाहित्येन चतुर्विंशति रिति भावः।

ननु पृथिव्यादेरव्यक्तावस्थाविशेषरूपतया प्रत्यक्षतस्सिद्धौ अव्यक्तादेरपि प्रत्यक्षत एव सिद्धिस्स्यात् किं शास्त्रेणेत्यत्राह—**नाध्यक्षेणेति**। **अप्रतीतेरिति** प्रकृत्याद्यवस्थस्य प्रत्यक्षेण प्रतीत्यभावात् न प्रात्यक्षिकसिद्धिरव्यक्तादेर्वक्तुं शक्येति भावः। दृश्यते हि लोकेऽपि एकस्य तन्तोर्दूरस्थस्य तन्तुपटावस्थाभेदेन दृश्यत्वादृश्यत्वे अपि। अतः कार्यावस्थायां दृश्यस्य कारणावस्थायामदृश्यत्वं नानुपपन्नम्।

ननु साङ्ख्योक्तानुमानतः प्रधानादिसिद्धिस्स्या दित्यत्राह-न पुनरनुमयेति। "कारणगुणात्मकत्वा त्कार्यस्या व्यक्तमपि सिद्ध" मित्युक्तेनानुमानेन नाव्यक्तमनुमातुं शक्यमित्यर्थः। कुत इत्यत्राह **व्याप्तीति** महदादि-स्वगुणसजातीयगुणककारणकं कार्यत्वादित्यनुमाने गोमय वृश्चिकादौ सजातीयगुणकत्वाभावेन व्यभिचाराद्व्याप्तिविरहः। अतीन्द्रियमहदादिपक्षस्वरूपासिद्धया आश्रयासिद्धिः तस्याप्यनुमानतस्सिद्धौ – लिङ्गासिद्धिः। एवं भेदानां परिमाणा" दित्यादिना परोक्तानुमानान्तराणामपि चेतनादौ परिमितत्वादिहेतोर्व्यभिचारदर्शनेन-व्याप्त्याद्यभावात् नानुमानमव्यक्तसाधकं स्यादिति भावः। एवमागमादेवाधिगतेषु महदादिषु सत्वगुणाद्युन्मेषभेदेन सात्विको राजसस्तामसश्चेति त्रिविधो महानुत्पद्यते त्रिभ्यश्च महद्भ्यः तथैव त्रिविधोऽहङ्कार इत्याह—सत्वादीति। **ततः परं प्राच्यात्** प्राथमिकात् सात्विकाहंकारादेकादशेन्द्रियाण्यप्युत्पद्यन्ते। **परः**-अन्तिमस्तामसाहङ्कारः भूतादिसंज्ञकः। **मात्राः**—शब्दादितन्मात्राः। क्रमाज्जनयति। **मध्यमस्तु**—तैजसाख्यो राजसाहङ्कारस्तु। **उभयार्थः** पूर्वापरसात्विकतामसाहंकारयोः यद्यत्कार्यं तत्रानुग्राहको भवतीत्याह—**प्राच्यादिति**।

तत्राहङ्कारजन्यं भजति परिणतेः शब्दमात्रं नभस्त्वं
तद्वत्तन्मात्रपूर्वास्तदुपरि मरुदग्न्यम्बुभूम्यः क्रमात्स्युः ।
सूक्ष्मस्थूलस्वभावस्वगुणसमुदयप्रक्रियातारतम्यात्
तन्मात्राभूतभेदः कललदधिनयात् कल्पितस्तत्त्वविद्भिः ॥ १२ ॥

सर्वा० । एवं प्रकृत्यादीनामागमगम्यत्वं सृष्टिप्रकारं च संजगृहे । अथ तेषु तन्मात्रसृष्टौ श्रुतिस्मृतिविप्रतिपत्तेस्संशयं विपर्ययं वा निरस्यति–**तत्रेति**॥ श्रूयते हि* **तन्मात्राणि** भूतादौ लीयन्त इति । नच श्रुतिविरुद्धा स्मृतिरुदीयेत; अतः **पञ्चानामपि** तन्मात्राणां तामसाहङ्कारादुत्पतिः । बहुवचनात् बहुत्वस्य च प्रसिद्धितो **नियमः** । भूतानां तु यथास्वं तन्मात्रेभ्यः क्रमादुत्पत्तिरिति कश्चिन्मन्यते । तं प्रति ब्रूमः—न ह्यनुपबृंहणा श्रुतिराप्ततमा । अन्योन्यघटितानेकोपबृंहणविरोधे तदनुगुणं नेतव्या । अतः पाशवद्बहुवचनमनादरणीयम् । अंशभूयस्त्वव्यक्त्यर्थं वा । तस्माच्छब्दतन्मात्रमेकमहङ्कारजन्यम्, तच्च परिणतिविशेषादाकाशत्वं भजते । एतेन सर्वत्र सृष्टौ द्रव्यानुवृत्तिस्सूच्यते । तद्वत्—आकाशवत् । तन्मात्रपूर्वाणि वाय्वादिभूतानि स्युः । ननु यदि शब्दाद्याश्रयतया तत्तद्भूतत्वं तर्हि कथं तत्र पञ्चकद्वयकल्प्तिरित्यत्राह—**सूक्ष्मेति** । स्वगुणा इह शब्दादयः, तेषां समुदय उत्पत्तिः । तत्प्रक्रियातारतम्यं सूक्ष्मस्थूलस्वभावतयैव । तच्च शास्त्रगम्यम् । **कललशब्दोऽत्र** दुग्धदधिमध्यावस्थाविषयः । तत्र हि निवृत्तभूयिष्ठमाधुर्यमीषदम्लत्वमुपलभ्यते तथा स्यात् ॥ १२ ॥ **इति तन्मात्रभूतसृष्टिप्रकारः ।**

आनन्द० । सत्वाद्युन्मेषभिन्नादित्यादिना सृष्टिरुक्ता । पुनस्तदुक्तौ पौनरुक्त्यं (मिति शङ्कां परिहरन्नवसरसङ्गतिं दर्शयति) माशङ्क्यावतारयति—एवं **प्रकृत्यादीनामिति** । **श्रुतिस्मृतिविप्रतिपत्तेरिति**—'तन्मात्राणिभूतादौ लीयन्ते' इत्याथर्वणश्रुतिः ।

प्रधानं तत्वमुद्भूतं महत्तत्वं समावृणोत् ।

इत्यारभ्य—

विकुर्वाणानि चाम्भांसि गन्धमात्रं ससर्जिरे ।
संघातो जायते तस्मात्तस्य गन्धो गुणो मतः ॥

इत्यन्ता विष्णुपुराणरूपा स्मृतिः । **नचेति** । विरोधाधिकरणन्यायादित्यर्थः । ननु पञ्चत्वस्याश्रवणाद्विरोधो नास्तीत्यत्राह—**बहुवचनादिति** । नन्वेवं आकाशाद्वायुरित्यादिकं विरुध्येत तत्राह—

भूतानामिति । तत्र पौर्वापर्यमात्रे तात्पर्यं न त्वव्यवधानांशोऽपि स्वीकार्यः । **तथा सत्यथर्वणश्रुतिबाधापत्तेः** । न च स युक्तः; अबाधेनोपपत्तौ बाधस्यान्याय्यत्वात् । अत एव भट्टपादैर्विरोधाधिकरणे —

यदि द्वित्राङ्गुलं मध्ये विमुच्योत्तरभागतः।
वेष्टचेतौदुम्बरी तत्र किं नाम न कृतं भवेत् ॥

इति। श्रुतिस्मृत्योरविरोधोऽङ्गीकृतश्चेत् किं पुनश्श्रुत्योरिति भावः। **कश्चित्**—साङ्ख्यः। **अनुपबृंहणेति**—त्रिवृत्करणादिश्रुतिवदिति भावः।

तर्हि बहुवचनस्य का गतिरित्यत्राह—**पाशवदिति**। अग्नीषोमीये एकपशुके पाशबहुत्वाभावात् 'अदितिः पाशानिति' बहूवचनमविवक्षितं अंशबहुत्वपरं वा तत्र निर्णीतं। तथात्राप्यविवक्षा शब्दतन्मात्राणामनेकत्वज्ञापनेन चरितार्थं वेति भावः। उपसर्जनस्यापि तात्पर्यात्परामर्शस्तच्छब्देनेत्याह—**आकाशवदिति**।

मूले कललदधिनयादित्यत्र नाडौमुष्टचोश्चेति ज्ञापकादुपपत्तिरिति भाव, ॥ १२ ॥

त्रिगुणपरीक्षायां तन्मात्रभूतयोरुत्पत्तिः श्रुतिस्मृतिविप्रतिपत्तिनिरासश्च।

अक्ष० मात्राः प्रजनयति पर इति पूर्वमुक्तं। तत्र किमविशेषात् सर्वाणि तन्मात्राणि साक्षादेव जनयत्यहङ्कारः उत किञ्चित्साक्षादन्यानि परम्परयेत्यत्राह **तत्रेति**। तन्मात्रेष्वित्यर्थः। **अहङ्कारजन्यमिति** साक्षात्तामसाहङ्कारजन्यमित्यर्थः। **शब्दमात्रमिति** शब्दतन्मात्रमात्रमित्यर्थः। **नभस्त्वमिति** आकाशत्वमित्यर्थः। **परिणतेः भजतीति**–परिणामात्प्राप्नोतीत्यर्थः। अहंकारात्साक्षाच्छब्दतन्मात्रमेव जायते "तन्मात्राणि भूतादौ लीयन्ते" इति प्रलयश्रुतौ अनेकोपबृंहणपुराण स्मृत्याद्यनुरोधेन बहुवचनमविवक्षितं अवयवबहुत्वपरं वाऽश्रयणीयं शब्दतन्मात्रमेव स्थूलावस्थाविशेषेण आकाशरूपं भवति कारणद्रव्यस्वरूपमेव हि सर्वत्र कार्यात्मना परिणमत इति भावः।

तद्वदिति शब्दतन्मात्रात् आकाश इव। **तन्मात्रपूर्वाः** स्पर्शरूप-रस-गन्ध-तन्मात्रकारणकाः। **तदुपरि** आकाशोत्पत्तेः पश्चात्। **मरुदिति वायु**-तेजो-जल-पृथिव्य इत्यर्थः। **क्रमात्स्युः** उत्पद्यन्त इत्यर्थः।

तन्मात्राणां भूतानांच को भेद इत्यत्राह-**सूक्ष्मेति** शब्दादितन्मात्रासु—सूक्ष्मस्वभावाः—शब्दादयो गुणा उत्पद्यन्ते भूतेषु स्थूलस्वभावा-इत्येवं प्रकारतारतम्यात्। तन्मात्राभूतभेदः—तत्वपङ्क्तौ परिगण्यत इत्यर्थः। भूतगुणस्य तन्मात्रे सूक्ष्मरूपत्वे तत्पूर्वतत्वएव तदन्तर्भावस्स्यादित्यत्राह—**कललेति** कललशब्देनात्र निवृत्त भूयिष्ठ माधुर्यं ईषदम्लत्वमापन्नं दुग्धदधिमध्यावस्थं पूर्वोत्तरवैलक्षण्यात्-तत्वान्तरं कल्पितं तत्वज्ञैरित्यर्थः ॥ १२ ॥

अद्भ्योऽग्निस्तेजसस्ता इति न हि वचसोर्बाधितुं युक्तमेकं
निर्वाहः कल्पभेदाद्यदि न दृढमितात्तत्त्वसृष्टयैकरूप्यात् ।
व्यष्टौ ताभ्यः कदाचित्तदुपजनिरतो व्यत्ययस्तत्समष्टौ
आदावप्सृष्टिवादश्रुतिमितमितरन्न प्रतिक्षेप्तुमीष्टे ॥ १३ ॥

सर्वा० । एवं तन्मात्रभूतसृष्टिप्रकार उक्तः । तत्र तोयतेजसोः सृष्टौ प्रमाणविप्रतिपत्तिं शमयति–**अद्भ्योऽग्निरिति** ॥ अबाधेन गतिमत्त्वे श्रुतिविरोधप्रतीतावपि स्मृतिस्तद्वदबाध्येति भावः । गत्यन्तरं निवारयति—निर्वाह इति । स्वेष्टां गतिमाह—* **व्यष्टाविति** । निमित्तभूताभ्य इति भाव्यम्, अतश्शब्दो हेतुमवधिं वा ब्रूते । ननु * आपो वा इदमग्रे * अप एव ससर्जादावित्यादिश्रुतिस्मृतिदर्शनादन्यादेस्सर्वस्याद्भ्यस्सृष्टिस्स्यादित्यत्राह—**आदाविति** । महदादीनामिवाग्नेरप्यद्भ्यः पूर्वभावित्वं बहुश्रुतिस्मृतिसिद्धमतस्तदविरुद्धं दुर्निवारमित्यर्थः । श्रुतिषु च न्यूननिर्देशेष्वनुक्तमधिकमन्यतो ग्राह्यम्; श्रुतहानायोगात्, अव्यवस्थितन्यूनाधिकसृष्टिकल्पने गौरवाच्च ॥ १३ ॥ **इति अप्तेजसोर्व्यष्टिसृष्टिविशेषः ॥**

आनन्द०। सृष्टौ श्रुतिस्मृति (विप्रतिपत्तः) विरोधः पूर्वश्लोके परि (हृता) हृतः अत्र स एव परिह्रियत इति पौनरुक्त्यं वारयन् पूर्वसङ्गतत्वान्न पृथक् संगतिरित्याह—**एवं तन्मात्रेति । तोयतेजसोरिति** । 'अग्नेराप' इति श्रुत्या तेजसस्सकाशादपामुत्पत्तिरुच्यते ।

अबावृतमिदं सर्वमद्भ्योऽग्निरुदपद्यत ।

इति स्मृत्या अद्भ्यस्तेजसस्सृष्टिः प्रतिपाद्यत इति श्रुतिस्मृत्योर्विप्रतिपत्तिः । न च श्रुत्या स्मृतिबाधः अबाधेनापि सम्भवे बाधस्यान्याय्यत्वादित्याह—**अबाधेन गतिमत्त्व इति । तद्वदिति**—श्रुतिवदित्यर्थः । तदुक्तं—

परस्परविरुद्धत्वं श्रुतीनां न भवेद्यदि ।

स्मृतेः श्रुतिविरुद्धायास्ततो मूलान्तरं भवेत् ॥

इति । यथा श्रुत्योर्विरोधे निर्वाहस्तथा विरुद्धाया अपि स्मृतेरिति भावः । **निमित्तिभूताभ्य** इति । 'अद्भ्योऽग्निरिति' वचनं व्यष्टिसृष्टौ तेजः प्रति निमित्तकारणत्वमाह यथा तप्ततैलेऽग्निमुत्पादयन्त्यापः । 'अग्नेराप' इति तु समष्टिसृष्टौ उपादानत्वमाहेति न विरोध इत्यर्थः । पञ्चीकृतेभ्यः (भूतत्वापन्नेभ्यः) उत्पत्तिर्व्यष्टिसृष्टिः ततः प्राक्तनसृष्टिस्समष्टिसृष्टिः । न्यायत ? इत्यनेनैव हेतुत्वस्य सिद्धत्वादत इति शब्दवैयर्थ्यमिति पक्षान्तरमाह—**अवधिमिति** । अतस्तेजसस्सकाशादित्यर्थः । श्रुतिस्मृतिभ्यामपामेवादावुत्पत्तिश्रवणादुक्तनिर्वाहो नोपपद्यत इत्याशङ्क्य समाधत्ते—**नन्वित्यादिना** 'आपो वा इदमग्रे सलिलमासीत्' । 'अप एव

ससर्जादाविति' श्रुतिस्मृती। इदमबादिकं कार्यं सलिलं प्रकृतिरासीत्प्रलयकाल इत्यर्थः।

आचार्यैस्सलिलशब्दस्य प्रकृतिपरत्वस्य परमतभङ्गे प्रदर्शितत्वात्। न ह्यापां सर्वपूर्वभावः प्रतिपादयितुं शक्यः महदादीनां तत्पूर्वभाविनां दुरपह्नवत्वात्। नापि तेजःपूर्वभावः। नियामकाभावात्। तथा च "अग्नेरापः। तत्तेजोऽसृजत। आपस्तेजसि लीयन्ते। प्रधानं तत्वमुद्भूतमिति" बहुश्रुतिस्मृत्यन्तरानुगुण्येन पृथिवीसृष्टेःव्यष्टितः पूर्वभावः प्रतिपाद्यत इति न विरोध इति भावः।

नन्वेतच्छ्रुतिस्मृत्यनुसारेणैव श्रुत्यन्तराणां वा नयनं कुतो न स्यादित्यत आह—**श्रुतिषु चेति**। न्यूननिर्देशानुसारेणाधिकश्रुतेर्नयने विरोधादधिकश्रुत्यनुसारेण नयने शाखान्तराधिकरणन्यायेन विरोधाभावादिति भावः।

नन्वन्यतरानुसारेण किमर्थमन्यतरा श्रुतिर्नेया ? विकल्पितयोः व्रीहियवयोः प्रयोगभेदेनेव कल्पभेदेनोभयोरुपपत्तेरित्यत आह—**अव्यवस्थितेति** 'धाता यथापूर्वमिति' व्यवस्थायाः सर्वकल्पेषु श्रुतत्वादिति भावः ॥१३॥

त्रिगुणपरीक्षायां तोयतेजसोः परस्परहेतुताप्रमाणगतिव्यवस्था।

अक्ष० सृष्टिक्रमे प्रमाणविरोधं शमयति—**अद्भ्योऽग्निरिति** "अद्भ्योऽग्निरुदपद्यत" इतिस्मृत्या अद्भ्यस्तेजसोऽग्ने रुत्पत्तिः स्मर्यते "अग्नेरापः इति तेजसएवापामुत्पत्तिः श्रूयते अनयोर्वचनयोरेकमपि न बाधितुं युक्तमित्याह—**नहीति**। वस्तुनि विकल्पायोगात् कथमुभयोरबाध इत्यत्रकथञ्चिन्निर्वाहमाह—**निर्वाह इति**। तन्निरस्यति **नेति**। कुत इत्यत्राह—**दृढ़मितादिति** दृढमितत्वात् बहुप्रमाणसिद्धत्वेन बह्वीषु श्रुति स्मृतिषु तत्वसृष्टेरैकरूप्यस्याधिगमात् यत्किञ्चिदेव स्मृतिमात्रानुसारेण कल्पभेदेन तद्वैरूप्यकल्पनं न युक्तमिति भावः। तर्हि—"अद्भ्योऽग्निरित्यस्य कथं निर्वाह इत्याह—**व्यष्टाविति**। पञ्चीकरणात्पश्चाद्भाविनी सृष्टिः व्यष्टिः तत्र। **ताभ्यः**—अद्भ्यः। **कदाचित्**—अग्नितापदशायां तैलादावग्नेरुत्पत्तिर्भवतीत्यर्थः।

तप्ततैलादौ जलप्रक्षेपे सति अग्न्युत्पत्तिरूपमग्निज्वलनं दृश्यते। तत्र निमित्तभूता आपः तत्परा तत्स्मृतिरिति भावः। **अतोव्यत्यय** इतिएतद्विपरीत इति भावः। **यत्समष्टौ**—अग्निजलयोः समष्टिसृष्टौ। अग्नेरेवापां सृष्टिरिति भावः।

तर्हि "आपो वा इदमग्रे सलिलमासीत्" "अपएव ससर्जादा" वितिश्रुतिस्मृती कथमुपपद्येते इत्यत्राह-आदाविति। **श्रुतिमितमिति** "तत्तेजोऽसृजत" "तदपोऽसृजत" इतिश्रुत्या समधिगतं पूर्वभावितत्वान्तरं। **प्रतिक्षेप्तुं** प्रतिषेद्धुं **नेष्टे** न प्रभवतीत्यर्थः।

यथा—छान्दोग्यादावादौ तेजस्सृष्टिवादः तैत्तिरीयकोक्ताकाशादिसृष्टिक्रमं न प्रतिषेद्धुमीष्टे श्रुतहानायोगेन अनुक्तस्याधिकस्या न्यतोग्राह्यत्वावश्यंभावात् तथा प्रकृतेऽपि महदादीनामिवाग्नेरप्यद्भ्यः पूर्वभावित्वस्यानेकश्रुतिसिद्धत्वान्न बाधा शक्येति भावः।

पृथ्व्यास्स्पर्शादिभेदो द्रवमृदुकठिनीभावभेदश्च दृष्ट-
स्तद्वत्पृथ्वोजलाग्निश्वसनपरिणतिर्लाघवायेति जैनाः।
तत्र द्रव्यैक्यमिष्टं क्रमजनिविलयौ त्वागमादप्रकल्प्यौ
तर्कैकालम्बिगोष्ठ्यां भजतु बहुमतिं तादृशी लाघवोक्तिः ॥१४॥

सर्वा०। ननु कथमेवं तोयतेजसोर्व्यष्टिसमष्टिसृष्टिव्यवस्था, विचित्रपरिणामशालिनस्त्रिगुणस्य कालभेदेनानियतपरिणामोपपत्तेः। उक्तं च **जैनैः**—पुद्गलाख्यमेकजातीयद्रव्यं तत्तत्सामग्रीभेदैरव्यवस्थितक्रमान् भिन्नाभिन्नस्वभावान् विचित्रपर्यायान् भजत इति यथा **काणादप्रभृतीनामेकैकभूतपरमाणवः**; यथा च सांख्यादीनामेकैकं भूतम्। अतो न शाश्वतभूतभेदक्लृप्तिः। वाय्वादिचातुर्विध्योक्तिरपि पर्यायभेदनिबन्धना; नियतक्रमभूतसृष्टिकल्पना च लाघवयुक्तिविहता; तदेतदनुभाषते—**पृथ्व्या इति**। दूष्यांशव्यक्त्यै शेषमनुमनुते—**तत्र द्रव्यैक्यमिति**। त्रिगुणद्रव्यमेव हि वाय्वाद्यवस्थमिति भावः। नियतक्रमत्वे कल्पनागौरवमागमबलादपनयति—**क्रमेति**। लाघवतर्कस्य का गतिरित्यत्राह—**तर्केति**। गुरुकल्पनाप्रवृत्तं प्रति हि लाघवोक्तिः शोभत इति भावः॥ १४ ॥ **इति पुद्गलानामनियतपृथिव्यादिपरिणामवादभङ्गः॥**

आनन्द० आक्षेपिकीं संगतिमाह—कथमिति। व्यष्टिसमष्टिसृष्टिव्यवस्था—व्यष्टावनियता समष्टौ नियतेति व्यवस्थेत्यर्थः। **उक्तं च जैनैरिति**—विद्यानन्दादिभिरित्यर्थः। पुद्गलो नाम स्पर्शरसगन्धवर्णवद्द्रव्यं। तद्द्विविधं—परमाणुरूपं स्कन्धरूपं चेति। परमाणुसंयोगात् द्व्यणुकादयः स्कन्धा उत्पद्यन्ते। स्कन्धभेदनात्परमाणवः' इत्यादिभिरनियतवाय्वादिरूपपर्याया उत्पद्यन्त इत्युक्तमिति भावः। भेदनात्परमाणवः' इत्यादिभिरनियतवाय्वादिरूपपर्याया उत्पद्यन्त इत्युक्तमिति भावः। **यथाकणादप्रभृतीनामिति**। अनियतमृत्पाषाणाद्युत्पत्तिरित्यर्थः। **न शाश्वतभूतभेदक्लृप्तिरिति**। तैर्नित्यत्वानभ्युपगमादिति भावः। ननु—

वायुस्तेजो जलं भूमिरिति भिन्नश्च पुद्गलाः।

इति चातुर्विध्योक्तिः कथमित्यत्राह—**वाय्वादीति**। **पर्यायः**—परिणामः **अवस्था** इति यावत्। एकजातीयस्यैव परिणामभेदनिबन्धनेत्यर्थः **दूष्यांशेति**।

ननु जैनैरप्येकजातीयद्रव्यस्य परिणामभेदोऽङ्गीकृतः। सिद्धान्तेऽपि प्रकृतेः

परिणामभेद इति तन्मतात्कोभेदः ? इति चेत्, न, सिद्धान्ते क्रमनियमस्याङ्गीकाराद्भेद इति भावः। **गुरुकल्पनेति**। न तर्कावकाश इति भावः।

मूलस्यायमर्थः--यथा पृथ्व्याः स्पर्शभेदः शूकशिम्बुपरिणामे द्रवत्वं घृतपरिणामे मृदुत्वं नवनीतपरिणामे काठिन्यं पाषाणादिपरिणामे दृष्टं तन्न्यायेनैकस्यैव द्रव्यस्य पृथ्व्यादिपरिणतिर्लाघवाय स्वीकार्येति जैनमतस्था आहुः। **तत्र**—तदुक्तेषु एकस्य परिणतिरिष्टा। सा च क्रमनियता तथा लयश्च तथा दृढतरागमतः प्रतिपादनात्। या तु लाघवोक्तिः सा तर्कैकालम्बिगोष्ठ्यां बहुमतिं केवलानुमानतस्तत्वक्लृप्तिगोष्ठ्यां—साङ्ख्यगोष्ठ्यां भजत्विति ॥१४॥

इति त्रिगुणपरीक्षायां जैनोक्तशाश्वतभूतभेदक्लृप्तिभङ्गनिरासः।

अक्ष० जैना; पुनरेकस्मादेव पुद्गलाख्यात् स्पर्शरस गन्ध वर्णवद्द्रव्याद्भिन्नसामग्रीसहकृतादव्यवस्थितक्रमाः पृथिव्यादयो विचित्रस्वभावा जायन्ते नतु विभिन्नस्वभावेभ्यः नानाभूतेभ्यः कारणेभ्यः इति लाघवमवलंबमाना वदन्ति तन्मतमनूद्य तत्र निरसनीयमंशं निरस्यति **पथ्व्या** इति। यथा एकस्या अपि पृथिव्याः स्पर्शरसादयः परस्परविजातीया भेदाः द्रवमृदुकठिनीभावभेदाश्च जाता दृष्टाः तद्वदेकस्यैव पुद्गलस्य पृथ्वी-जलाग्नि-श्वसन-परिणतिर्लाघवाद्युक्तेति जैना वदन्तीत्यर्थः। एकमेव पुद्गलं पृथिव्यप्तेजोवाय्वात्मना परिणमत इत्युपगमे लाघवसंभव इति भावः। तत्र सिद्धान्तिनोप्यभिमतमंशमाह—**तत्रेति** सिद्धान्तेपि प्रकृतेरेव सर्वकार्येष्वनुवृत्युपगमादिति भावः।

निरसनीयमंशमाह—**क्रमेति**। व्यवस्थितेन महदहङ्कारादिक्रमेण प्राकृतानां सर्वेषां पृथिव्यादीनामुत्पत्तिः तद्विपरीतक्रमेण लयश्च आगमसिद्धत्वान्न लाघवयुक्तिमात्रेण बाधितुं शक्यावित्यर्थः। आगमसिद्धनियतस्वभावक्रमादिना अव्यवस्थितस्वभावक्रमादिना जननलयादिकं निरसनीयमिति भावः। तर्हि लाघवतर्कस्य क्वावकाश इत्यत्राह **तर्केति**। युक्तिमात्रेण गुरुकल्पनाप्रवृत्तौ तन्निरसनाय लाघवोक्तिः प्रभवतीति भावः।

तत्त्वेष्वाथर्वणेऽष्टौ प्रकृतय उदिताः षोडशान्ये विकारा
निष्कर्षेदंपरेऽस्मिन् वचसि तदितरत्सर्वमावर्जनीयम्।
दृष्ट्वा सांख्यं पुराणादिकमपि बहुधा निर्वहन्त्येतदेके
चिन्तासाफल्यमान्द्याच्छ्रमबहुलतयाऽप्यत्र तज्ज्ञैरुदासि ॥ १५॥

सर्वा०। ननु तत्त्वसृष्टौ क्रमनियमो न संभवति * आकाशमिन्द्रियेष्विन्द्रियाणि तन्मात्रेष्विति सुबालोपनिषदाम्नानात्। अव्यवस्थिताश्च सृष्टिव्यवहाराः पृथ्व्यादिषु दृश्यन्ते। अतो यथाश्रुतं कल्पभेदात् सृष्टिभेदः स्यादित्यत्राह—**तत्त्वेष्विति**॥

अधीयते हि केचिदाथर्वणिकाः ❀ अष्टौ प्रकृतयः षोडश विकारा इति। अत्र तावदव्यक्तमहदहङ्कारतन्मात्राणां प्रकृतित्वमविगीतम्। इन्द्रियेभ्यस्तत्त्वान्तरोत्पत्तिः श्रुत्यन्तरेषु वा न क्वचिद्दृश्यते। सौबाले च लयानुक्रमे पूर्वापरवाक्यवदिन्द्रिय-तन्मात्रवाक्ययोर्न लीयत इति पदमावृत्तम्। एवं वाक्यवैरूप्ये सत्यनुषङ्गात् वरम-धिकरणविभक्त्याऽपि संसर्गमात्रग्रहणमिति स्थिते प्रकरणान्तरैककण्ठ्यं भवतीति केवलविकृतित्वमिन्द्रियाणां युक्तम्। भूतानां चाकाशादीनां चतुर्णां साक्षात् तन्मात्रद्वारेण वा तत्त्वान्तरोपादानत्वे प्रकृतयो विकृतयश्च पृथग् द्वादश स्युः।

ननूपबृंहणविशेषानुसारादिन्द्रियाणि शब्दादिगुणाश्च षोडशविकराः, भूततन्मात्रभेदानादरेण प्रकृतयश्चाष्टावभ्युपगम्यन्ताम्। मैवम्; द्रव्यतत्त्वप्रकरणे गुणपरिगणनानौचित्यात्, गुणशब्देन च क्वचिद्गुणाश्रयविवक्षा स्यात्। गत्यभावे गुणविवक्षायामप्यत्र द्रव्यविवक्षोपपत्तेः। * आकाशाद्वायुरित्यादीन्यपि स्थूलसूक्ष्मभेदानादरेणेति समाधानम्। एवं स्थिते तामसाहङ्कारोत्पन्ने तन्मात्र-पञ्चके भूतान्येकद्वित्रिचतुः पञ्चभिस्तन्मात्रैरारभ्यन्त इति **सांख्याः**। पूर्वपूर्वतन्मा-त्राणि उत्तरोत्तरतन्मात्रमेकैकं भूतं जनयन्ति इति **पौराणिकाः**। अत्राप्युत्तरोत्तर-भूतसृष्टौ पूर्वपूर्वेषां तन्मात्राणां भूतानां वा सहकारित्वमिति पक्षभेदः। एवम-न्योऽपि यथामति। तदिदमाह—**दृष्ट्वेति**। एतत्—इतरत्सर्ववाक्यजातमित्यर्थः। किमिति पूर्वाचार्यैरत्रोपेक्षितं तत्राह—**चिन्तेति**।

न प्रधानविरोधः स्यादीदृशानवधारणे।
इति शिक्षयितुं शिष्यान्प्राचां क्वचिदनिश्चयः॥ १५॥

॥ इति प्रकृतिविकृतिविभागचिन्ता ॥

आनन्द० आक्षेपिकी संगतिरित्याह—**ननु तत्वसृष्टाविति। सुबालोपनिषदीति।** 'पृथिव्यप्सु प्रलीयते आपस्तेजसि लीयन्ते तेजो वायौ लीयते वायुराकाशे लीयते आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ लीयन्ते' इत्यादिलया-नुक्रमणात् लयस्थानस्योपादानत्वप्रतीतेरिति भावः। पूर्वोक्तगत्यन्तरमेव ज्याय इत्याह—**अत इति**। ननु सुबालोपनिषद्वाक्यमस्तीत्याह—**सौबाले चेति**। न च तत्र साक्षादुपादानत्वश्रुतिः। न च लयो वा तत्र श्रुतः येन तदन्यथानुपपत्त्योपा-दानत्वं सिध्येदिति भावः। ननु वाक्यवैरूप्यपरिहारायानुषङ्गः कल्प्यतामित्यत्राह—**अनुषङ्गाद्वरमिति**। श्रुतमात्रादेवोपपत्तेरिति भावः। अनुषङ्गपक्षे पूर्वापरवाक्य-योर्लयश्रवणं व्यर्थं सर्वत्रानुषङ्गादेवोपपत्तेः; अतो नानुषङ्ग इति व्यनक्ति—**प्रकरणान्तरैककण्ठ्य**—सृष्टिप्रकरणैककण्ठ्यं।

अयं भावः—घ्राणादीनामिन्द्रियाणां पृथिव्यादिभूतैराप्यायनं श्रुतिषु प्रसिद्धं। तत्र तत्र पृथिव्यादिषु वायुपर्यन्तेषु प्रलीनेषु तत्तदाप्यायकभूतानामपि

प्रलीनतया तेषामाकाशदशापन्नत्वात् सर्वैरपीन्द्रियैः स्वान्तर्गतेतरभूतचतुष्टयस्याकाशस्यात्र लयं वक्तुं तस्य तन्मात्रावस्थापन्नस्येन्द्रियसंसर्गमनुवदति "इन्द्रियाणि तन्मात्रेष्विति"। पूर्वमाकाशे संसृष्टानीन्द्रियाणि पश्चाच्छब्दतन्मात्रेषु संसृष्टानीति।

अथ सेन्द्रियाणां तन्मात्राणां स्वकारणे लयमाह 'तन्मात्राणि भूतादौ' इति। भूतादिशब्देनाहङ्कारमात्रं विवक्षितं। आकाशादेव वायुः वायोरेवाकाशसहितात्तेजः तेजस एवापः अद्भ्य एव पृथिवीत्यद्वारकपक्षः। शब्तन्मात्रादाकाशमाकाशात् स्पर्शतन्मात्रं ततो वायुरिति सद्वारकपक्षः। तौ न युक्तावित्याह—**भूतानां चाकाशादीनामिति**। तथाचाथर्वणविरोध इति भावः।

अत्र यदुक्तं भट्टपराशरपादैः सुबालोपनिषद्विवरणे—'यदि भूतानामपि प्रकृतित्वं तर्हि 'अष्टौ प्रकृतयष्षोडश विकाराः' इति श्रुतेः का गतिरिति चेत्; वेदोपबृंहणनिपुणतरपरमर्षिसन्दर्शितैव गतिः; नास्माभिस्तदिरुद्धनिर्वहणेऽभिनिवेष्टव्यमित्यारभ्य; तदपि स्वारस्याभावाद्दूषयति—**नन्विति**त्येके।

विरोधपरिहारं शङ्कते नन्विति बहवः। मोक्षधर्मे याज्ञवल्क्यजनकसंवादे—

अष्टौ प्रकृतयः प्रोक्ताः विकाराश्चैव षोडश।
अव्यक्तं च महांश्चैव तथाऽहङ्कार एव च॥
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम्।
एताः प्रकृतयस्त्वष्टौ विकारानपि मे शृणु॥
श्रोत्रं त्वक्चैव चक्षुश्च जिह्वा घ्राणं च पञ्चमम्।
वाक्च हस्तौ च पादौ च पायुर्मेढ्रं तथैव च॥
एते विशेषा राजेन्द्र महाभूतेषु पञ्चसु।
मनष्षोडशमित्याहुस्तथैव गतिचिन्तकाः॥

इत्याद्युपबृंहणानि द्रष्टव्यानि। आथर्वणवाक्यस्य द्रव्यतत्वप्रकरणस्थत्वादत्र गुणविवक्षा न सम्भवतीति परिहरति—**मैवमिति**। तर्हि द्रव्यतत्वप्रकरणस्थोपबृंहणविशेषस्य का गतिरित्यत्राह—**गुणशब्देनेति**। 'त्रीणि रूपाणि सत्यं' 'गन्धविक्रयिकस्तथा' इत्यत्रेव गुणवाचकशब्दे तदाश्रयविवक्षेत्यर्थः। नन्वाकाशाद्वायुरित्यादिश्रुतिविरोध इत्यत्राह—**आकाशाद्वायुरित्यादीति**। तथाचाकाशादित्यादिपञ्चम्यन्तास्तन्मात्राकाशादिपराः! वाय्वादिशब्दाः प्रथमान्ताः स्थूलसूक्ष्मोभयपराः। तथाचायमर्थः—आकाशात्तन्मात्राकाशाद्वायुः। सूक्ष्मद्वारा स्थूल उत्पद्यत इत्यर्थः। एवमन्यत्रापि द्रष्टव्यम्।

एकद्वित्र्यादीति—भूतादितः पञ्चतन्मात्राणि। तत्राकाशमेकस्माच्छब्दतन्मात्रादुत्पद्यते। वायुः शब्दस्पर्शगुणयोगाच्छब्दस्पर्शतन्मात्राभ्यामुत्पद्यते। तदु-

भयसहिताद्भूतन्मात्रादगुणत्रयवत्तेजः। तत्त्रयसहिताद्रसतन्मात्रात्तद्गुणवज्जलं। तथा पञ्चभ्यस्तन्मात्रेभ्यः पञ्चगुणा पृथिवीति सांख्यसप्ततिव्याख्याने वाचस्पतिना प्रतिपादितत्वादित्यर्थः। **तत्राप्युत्तरोत्तरभूतसृष्टाविति** ।

यदि भूतानां सहकारित्वं तदा तन्मात्राणामुपादानत्वमिति केचित्। अन्ये तदुभयस्यापि निमित्तत्वमेवेति वदन्ति।

एवमन्योऽपीति—आकाशात् स्पर्शतन्मात्रं तस्माद्वायुः वायोः रूपतन्मात्रं तस्मात्तेज इत्यादिरूपः। मूलश्लोकस्यायमन्वयः—केचित्—सांख्यादयः सांख्यं योगं पुराणादिकं च दृष्ट्वेत्यत्रान्वयः। निर्वहन्ति—सृष्टिक्रमं वदन्ति। तदितरत् सर्वं—आथर्वणवाक्यादितरत् सर्वं। निष्कर्षेदम्परेऽस्मिन् निस्सन्देहं प्रकृतिविकृतिविभागेदम्परे आथर्वणवचने। आवर्जनीयं—आथर्वणोक्तानुसारेण नेतव्यमिति। औदासीन्यस्य प्रयोजनमाह—**न प्रधानेति**। तत्वहितपुरुषार्थप्रमितिविरोधाभावादीदृशावधारणे नावश्यं यत्नः कर्तव्य इत्यर्थः। अत्र पौराणिकः पक्षः आथर्वणिकाभिमतत्वाद्ग्रन्थकारस्याभिमत इति द्रष्टव्यम्। न्यायसिद्धाञ्जने तु द्वादशप्रकृतिपक्षाङ्गीकारः प्रतीयते। तथा च पक्षान्तरमप्यस्तीत्याहुः॥ १५ ॥

इति प्रकृतिविकृतिविभागपरीक्षा तद्गणनपरीक्षाच।

अक्ष०। ननु सुबालोपनिषदि लयप्रकरणे "पृथिव्यप्सु प्रलीयते" "आपस्तेजसि लीयते" इत्यारभ्य "आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेषु" इत्याकाशस्य इन्द्रियेषु लयाभिधानाल्लयस्थानस्यैवोपादानत्वप्रतीत्या आकाशस्येन्द्रियोपादानकत्वावगमेन तन्मात्रोपादानकत्वपरवचनान्तरविरोधे कल्पभेदेन क्रमभेदस्यैवाश्रयणीयतया "क्रमजनिविलयावप्रकम्प्या"दिति पूर्वमुक्तमयुक्तमित्यत्राह—**तत्वेष्विति**। चतुर्विंशतितत्वानां मध्ये इत्यर्थः। **अष्टौ प्रकृतयः अन्ये षोडशविकारा इति—"उदिताः निष्कर्षेदम्पर इति—"अष्टौ** प्रकृतयः षोडशविकाराः" **इत्याथर्वणे** शाखाविशेषे। **उदिताः**—आम्नाता इत्यर्थः। अन्यत्रान्यथाप्याम्नाता इत्यत्राह **निष्कर्षेदम्पर इति। अस्मिन्वचसि**–आथर्वणवचसि। **तदितरत्सर्वं** वचनं। **आवर्जनीयं**?अनुगुणं नेतव्यम् अस्य वचनस्य निष्कर्षेदम्परत्वादित्यर्थः।

अत्रैवहि प्रकृतितद्विकाराणां इयत्ता निष्कृष्याभिधीयते नत्वेवमन्यत्र; अनिदम्परवचनानां इदम्परवचनानुसारेणार्थवर्णनं–हि–न्याय्यं अतोऽन्यत्सर्वं मेतद विरुद्धमेव व्याख्येयमिति भावः। सौबालञ्च "आकाशमिन्द्रियेष्वि"ति वचनं न विरुद्धमभिधत्ते पूर्वापरवाक्येष्विव तत्र लयपदाश्रवणात्सप्तम्याअधिकरणत्वाभिधानस्य सम्बन्धसद्भावतोप्युपपत्तेराप्यायक भूतसम्बन्धस्य चेन्द्रियेष्वपि सत्वाच्च लयपदानुषङ्गस्याकल्पनीयत्वादनुषङ्गतात्पर्ये अवादिवाक्येषु लयपदाम्नानस्य अनर्थकत्वापाताच्च। अतस्तत्र लयाप्रतिपादनान्नेन्द्रियोपादनकत्वप्रसक्ति रिति न विरोधगन्ध इति भावः।

"आकाशाद्वायु" रित्यादिकमपि स्थूलसूक्ष्म भेदानादरेण तन्मात्ररूपात्सूक्ष्माकाशात्सूक्ष्मस्थूलरूपो वायुरित्येवं पञ्चम्यन्तानां सूक्ष्मपरतया प्रथमान्तानां सूक्ष्मस्थूलपरतया च निर्वाहसम्भवान्नाथर्वणवाक्यविरुद्धमिति ध्येयम् ।

एवं स्थिते तामसाहङ्कारादेवोत्पन्ने तन्मात्रपञ्चके एक द्वित्रि चतुः पञ्चतन्मात्रैः क्रमेण भूतान्युत्पद्यन्त इति पक्षः पूर्वपूर्वतन्मात्राणि उत्तरोत्तरतन्मात्रामेकैकं भूतं च जनयन्ति" इत्यादि पक्षभेदाश्च कथं परिदृश्यन्ते, तत्रान्यतमस्य साधुत्वं च प्राचीनैः कुतो न व्यवस्थाप्यते इत्यत्राह—**दृष्ट्वा सांख्यमिति**—सांख्याद्युक्तिमनुरुद्धय—उक्ताथर्वणोक्तिं बहुधा ते ते निर्वहन्ति । तत्र सर्वत्र प्रधानविरोधाभावेन अन्यतमनिर्णयार्थंविचारे प्रयोजनमान्द्येन श्रमाधिक्येन च तत्राभिज्ञैरपि प्राचीनैरौदासीन्यमवलंबित मित्यर्थः ।

निश्शेषं कार्यतत्त्वं जनयति स परो हेतुतत्त्वैश्शरीरी
तत्तत्कार्यान्तरात्मा भवति च तदसौ विश्रुतो विश्वरूपः ।
तेजोबन्नाभिधेये बहुभवनमभिध्यानलिङ्गं च दृष्टं
तस्मादीशाननिघ्नाः प्रकृतिविकृतयस्स्वस्वकार्यप्रसूतौ ॥१६॥

सर्वा० । प्रक्रान्तेषु प्रकृत्यादिकारणेषु * पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणमिति वदत**स्सांख्यस्यानन्यथासिद्धैः** श्रुत्यादिभिर्बाधमाह—**निश्शेषमिति** ॥ * यत्किंचित्सृज्यते येन*जगत्सर्वं शरीरं ते इत्यादिभिरेतत्सिद्धम् ।* तत्सृष्ट्वा तदेवानुप्राविशदित्यादेश्चार्थमाह—**तत्तदिति** । **अन्तर्यामिब्राह्मणसुबालोपनिषदादि**प्रसिद्धिमपि संवादयति—**तदसाविति** । विश्रुतः प्रधानपुरुषविलक्षणत्वेन विश्वशरीरकतया प्रत्यक्षश्रुतिसिद्धः, क्वचिद्विश्वरूपशब्देनापि । * तत्तेज ऐक्षत, बहु स्यां * ता आप ऐक्षन्त बह्व्यः स्याम इति वाक्यविशेषाभिप्रेतं तद्व्यनक्ति—**तेज इति** । न ह्यचेतनमात्रस्यानुत्पन्नकरणकलेवरस्य कर्मिणो वा तदानीं बहुभवनसङ्कल्पाश्रयत्वं युक्तम्, गौणत्वं चात्रापि * गौणश्चेन्नात्मशब्दादिति सूत्रन्यायेन निरस्तम् । प्रकृतं हि मुख्यमीक्षणम्; अत्रापि तत्संभवे नान्यथा गतिर्युक्तेति भावः उक्तनिगमनव्याजेन—

* विकारजननीमज्ञामप्टरूपामजां ध्रुवाम् ।
ध्यायतेऽध्यासिता त्तेन तन्यते प्रेर्यते पुनः ॥
सूयते पूरुषार्थं च तेनैवाधिष्ठिता जगत् ॥

* मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम् । यत्किंचिद्वर्तते लोके सर्वं तन्मद्विचेष्टितम् ॥ इत्यादिकमपि प्रख्यापयति—**तस्मादिति** ॥ १६ ॥ **इति सर्वतत्त्वानामीश्वराधिष्ठानेन कार्यकरत्वम् ॥**

आनन्द०। उत्तरपद्येन तत्वानामीश्वरनिघ्नताकथनस्य का सङ्गतिः ? विवादाभावेन व्यर्थं चेत्यत्राह—प्रक्रान्तेति। प्रसङ्ग एव सङ्गतिर्विवादश्चास्तीति भावः। सांख्यपद्यं पठति—**पुरुषार्थ इति**। करणं चक्षुरादिकं सर्वं तत्त्वजातं केनचिदधिष्ठात्रा न कार्यते। कथं तर्हि तेषां प्रवृत्तिः ? पुरुषार्थं एव हेतुः—स्वर्गापवर्गलक्षणः पुरुषार्थं एवानागतावस्थालक्षणसिद्धये प्रवर्तयतीत्यर्थः। चैतन्याभावेऽपि पुरुषार्थस्य प्रवर्तकत्वं संभवति—

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।
इत्युक्तेः। **एतत्सिद्धमिति**—शरीरत्वं सिद्धमित्यर्थः।
यत्किञ्चित्सृज्यते येन भूतं स्थावरजङ्गमम्।
तस्य सृज्यस्य सम्भूता तत्सर्वं वै हरेस्तनुः॥

इति शरीरत्वोक्तिरिति भावः—**अन्तर्यामीति**। 'यस्य पृथिवी शरीरं यस्यापश्शरीरम्' इत्यादिनाऽन्तर्यामिब्राह्मणादिषु शरीरत्वोक्तेरित्यर्थः। **क्वचिद्विश्वरूपेति**—'विश्वात्मन्' 'विश्वरूपाय वै नमः'। 'सर्वात्मन' 'विश्वरूप' इत्यादावित्यर्थः। एवं तेज ऐक्षत आप ऐक्षन्त इत्यादिश्रुत्या बाध इत्याह—**तत्तेज ऐक्षतेत्यादि**। तथा च चेतनाधिष्ठिता प्रकृतिः कारणमिति भावः। नन्वत्रेश्वराधिष्ठितत्वं न प्रतीयत इत्यत्राह—**अभिप्रेतमिति**। ननु प्रकृतेरचेतनायास्सङ्कल्पाश्रयत्वाभावेऽपि जीवस्य सम्भवाज्जीवस्स्रष्टाऽस्त्वित्यत्राह—**अनुत्पन्नकरणकळेबरस्येति**। नन्वैक्षतेतीक्षणं प्रवृत्तिमात्रं। तच्चाचेतनायाः प्रकृतेः सम्भवतीत्युक्तमित्यत्राह—**गौणत्वं चेति प्रकृतमिति**। 'सेयं देवतैक्षत' इत्यादिनेत्यर्थः। अष्टरूपां—अष्टौ प्रकृतय इत्युक्ताष्टरूपां। ध्रुवां—विनाशरहितां। तेन...ब्रह्मणा। अध्यासिता—अधिष्ठिता पुरुषार्थं जगच्च सूयते॥ १६॥

इति त्रिगुणपरीक्षायां प्रकृतिविकृतीनामीश्वराधिष्ठानेन कार्यकरत्वम्।

अक्ष० उक्तानां प्रकृत्यादितत्वाना मीश्वराधिष्ठानेनैव कार्यकरत्वमाह—**निश्शेषमिति** निखिलं कार्यं प्रकृत्यादिकारणतत्वशरीरकः सः परमात्मैवोत्पादयतीत्यर्थः।

"यत्किञ्चित्सृज्यते येन भूतं स्थावरजङ्गमं।
तस्य सृज्यस्य सम्भूतौ तत्सर्वं वै हरेस्तनुः॥
जगत्सर्वं शरीरं ते"

इत्यादि पुराणादिवचनबलात् "पुरुषार्थ एव हेतुः न केनचित्कार्यते करण" मिति सांख्योक्तिरनादरणीयेति भावः। न केवलं हेतुतत्वैरेव शरीरी अपि तु कार्यतत्वैरपीत्याह—**तत्तदिति** "तत्सृष्ट्वा तदेवानु प्राविशत्" इत्यादिश्रुतिसिद्धोऽयमर्थ इति भावः। अत एवासावन्तर्यामिब्राह्मणादौ विश्वशरीरकः प्रसिद्ध इत्याह—**तदसाविति**।

"तत्तेज ऐक्षत बहु स्यां प्रजायेय ता आप ऐक्षन्त बह्व्यस्स्यांप्रजायेमही" ति वाक्येषु ईक्षणबहुभवनश्रवणादपि कार्यकारणशरीरकत्वं स्फुटमित्याह—**तेज इति**। अभिध्यानमीक्षणम्। तत्र अचेतनमात्राभिधाने जीवमात्राभिधानेऽपि तदानीं करणकलेबराद्यभावेनेक्षणाद्यनुपपत्ते: तत्तच्छरीरकपरमात्मा तत्तच्छब्दाभिधेय इत्यभ्युपगन्तव्यमिति भाव:। "गौणश्चेन्नात्मशब्दा" दितिन्यायादत्रापि गौणत्वं न गणनीयम्। तस्मादीश्वराधीना एवप्रकृतिविकृतय: स्वस्वकार्यप्रसूतौ प्रभवन्तीति निगमयति—**तस्मादिति**। कार्यकारणानामीश्वरशरीरत्वादित्यर्थ:।

द्वेधा भूतानि भित्त्वा पुनरपि च भिनत्त्यर्धमेकं चतुर्धा
तैरेकैकस्य भागैः परमनुकलयत्यर्धमर्धं चतुर्भिः।
इत्थं पञ्चीकृतैस्तैर्जनयति स जगद्धेतुरण्डादिकार्या-
ण्यैदंपर्यं त्रिवृत्त्वश्रुतिरधिकगिरामक्षमैका निरोद्धुम् ॥१७॥

सर्वा० तत्त्वान्तराणामीश्वराधीनत्वं व्यष्टचाद्यारम्भवृत्तान्तैरपि व्यनक्ति—**द्वेधेति**॥ स खल्वादिकर्ता स्वसृष्टानि पञ्च भूतानि द्विधा कृत्वैकैकं भागं स्थापयित्वाऽर्धान्तराणि चतुर्धा विभज्य तत्तद्भागैश्चतुर्भिर्भूतान्तराणामविभक्तान्यर्धान्तराण्य नुकलयति यथोक्तम्—

एवं जातेषु भूतानि प्रत्येकं स्युर्द्विधा तत:।
चतुर्धा भिन्नमेकैकमर्धमर्धं तत: स्थितम्॥
व्योम्नोऽर्धभागाश्चत्वारो वायुतेज:पयोभुवाम्।
अर्धानि यानि वायोस्तु व्योमतेज:पयोभुवाम्॥ इति।

तत: पञ्चधा विभक्तानां भागानां पञ्चस्वर्धान्तरेषु योजनमिति परोक्तं निरस्तम्। एवं पञ्चीकृतानां व्यष्टिकार्येषु विनियोगमाह—**इत्थमिति**। महदादिमिश्चेति भाव्यं * महदाद्या विशेषान्ता इत्याद्युक्ते:। ननु * हन्ताहमिमास्तिस्रो देवता इत्याद्यारभ्य * तासां त्रिवृतंत्रिवृतमेकैकां करवाणि, * त्रिवृतंत्रिवृतमेकैकामकरोत् इति त्रिवृत्करणे श्रुते पञ्चीकरणादिस्मृतिरन्यपरा स्यादित्यत्राह**ऐदंपर्यमिति**। तात्पर्यमित्यर्थ:। अत्रानन्यपराणां भूयसां च बलीयस्त्वमनुक्तानामविरुद्धानामपेक्षितानामन्यतोऽपि ग्राह्यत्वं स्थापितम्। अभाष्यत च त्रिवृत्करणं पञ्चीकरणप्रदर्शनमिति॥१७॥ **इति पञ्चीकरणप्रक्रिया॥**

आनन्द० पूर्वशेषत्वात्तत्संगतिरेव संगतिरित्याह—**तत्वान्तराणामिति**। यद्यपि पञ्चधा विभागस्सिद्धान्तेऽपि; तथापि एकस्य भूतस्य समतया न पञ्चधा विभाग:। अपि तु द्विधा विभागे तत्रैको भागश्चतुर्धा विभज्यते इति ध्येयं। पञ्चीकरणमपि सप्तीकरणोपलक्षणमित्याह—**महदादिभिश्चेति**।

नानावीर्या: पृथग्भूतास्ततस्से संहतिं विना।
नाशक्नुवन् प्रजास्स्रष्टुमसमागम्य कृत्स्नश:॥

समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः ।
एकसंघातलक्षास्तु संप्राप्यैक्यमशेषतः ॥
महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते ।

तत इति महदादिसंसर्गस्यापि प्रतिपादनादिति भावः । **विशेषाः**—स्थूलभूतानि । **ऐदम्पर्यमिति;** पञ्चीकरण इति शेषः । **अनन्यपराणामिति—**

यद्यपि श्रुतिस्मृत्योर्विरोधे भूयसीनामपि स्मृतीनां बाध एव; तथाप्यबाधेनोपपत्तौ बाधस्यान्याय्यत्वादन्यतरस्यान्यतरानुसारे वाच्ये अविरोधेन वक्तुं च शक्येऽनन्यपरस्मृत्यनुसारो युक्तः; तथा हि श्रुत्यर्थस्य वाच्यस्य त्रिवृत्करणस्य सहस्रे शतन्यायेन सम्भवाद्वचवच्छेदस्तु संख्याश्रवणकल्प्यः । स च श्रुतिमूलेऽपि भूयसां स्यादिति न्यायेन बाधित इत्यर्थः । **अनुक्तानामिति**—आचमनादीनां स्मार्तानामपि दर्शादिविधिना (ग्राह्यत्वं) ग्रहणं क्रमविरोध्यपि कर्मकाण्डे स्थापितमित्यर्थः । **अभाष्यतेति** । 'वैशेष्यात्तु तद्वादस्तद्वादः' 'त्र्यात्मकत्वात्तु' इत्यादिसूत्रभाष्ये ।

"महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।

इति । क्षेत्रारम्भकद्रव्याणीत्यादिकमुक्त्वा प्रकृत्यादिपृथिव्यन्तद्रव्यारब्धमिन्द्रियाश्रयभूतमिच्छाद्वेषसुखदुःखविकारि भूतसंघातरूपं चेतनसुखदुःखोपभोगाधारत्वप्रयोजनं क्षेत्रमित्युक्तं भवतीति" गीताभाष्ये चोक्तमित्यर्थः । मूलश्लोकस्यायमर्थः—भूतानि द्वेधा भित्वा तत्र एकस्मिन् स्थित एव अपरमर्धं पुनश्चतुर्धा भिनत्ति । तैः पुनः भिन्नस्यार्धस्य भागैः स्थि (स्थापि) तेनार्धेन संयोजनार्थं (तु) परमर्धं अनुकलयति—सम्पादयतीत्यर्थः ॥ १७ ॥

इति त्रिगुणपरीक्षायां पञ्चीकरणस्थापनम्

अक्ष० अथ भूतानां पञ्चीकरणप्रकारमाह—द्वेधेति । एकैकं भूतं द्वेधा विभज्येत्यर्थः । एवं विभक्तयोः द्वयोरर्धयोः एकमर्धमखण्डं तथैव स्थापयित्वा अपरमर्धं चतुर्धा विभजतीत्याह—**पुनरपीति** । **भिनत्ति**—विभजतीत्यर्थः । अतः परं कर्तव्यमाह—**तैरिति** । चतुर्धा विभक्तैरित्यर्थः । **एकैकस्य** भूतस्याष्टमांशे चतुर्भिः **भागैः । परं अर्धमर्धं**—भूतान्तरीयप्रत्यर्धं अखण्डितमपरमेकैकमर्धम् । **अनुकलयति**—संयोजयतीत्यर्थः । चतुर्धाकृतेषु भागेषु एकैकं भागं स्वेतरभूतार्धेषु चतुर्षु योजयतीति यावत् । तत्तद्भूतेष्वखण्डितमर्धं तदितर भूतचतुष्टयाष्टमांशमिश्रणसंपन्नमर्धं च एकीकृत्य एकैकं भूतं पूर्णमविकलं पञ्चीकृतं करोतीति भावः ।

तत्प्रयोजनमाह—इत्थमिति । **तैः**—भूतैः । **अण्डादिकार्याणि**—व्यष्टिसृष्टिरिति यावत् । **सः** परमात्मा जगत्कारणभूतः । **जनयति**—उत्पादयति । अपञ्चीकृतैः भूतैस्तदुत्पादनासंभवात्पञ्चीकरणं क्रियते । तदुक्तम्—

नानावीर्याः पृथग्भूता स्ततस्ते संहतिं विना।
नाशक्नुवन्प्रजास्स्रष्टु मसमागम्य कृत्स्नशः॥

इति। छान्दोग्ये—"त्रिवृतमकरोत्" इति त्रिवृत्करणस्यैवश्रवणात् पञ्चीकरण-श्रवणमन्यपरं स्यादित्यत्राह **ऐदम्पर्यमिति**—तात्पर्यमित्यर्थः। **एका** त्रिवृत्करण-श्रुतिः। **इतरगिरां** भूयसीनामनन्यपराणां पञ्चीकरणवचनानाम् तात्पर्यं पञ्चीकरणविषयं। **निरोद्धुम्**—असमर्था। "भूयसां स्याद्बलीयस्त्वम्" "अनुक्त-मन्यतो ग्राह्य" मिति न्यायादन्यपरत्वासंभवाच्चेति भावः।

इदञ्च "अनुक्तमन्यतोग्राह्य" मिति न्यायात् महदादिसृष्टिश्रवणानुरोधात् सप्तीकरणस्याप्युपलक्षणम्। तत्र अर्धस्य चतुर्धाकरणस्थाने षोडाकरणं षण्णां भागानां एकैकस्येतरार्धेषु त्रिगुणञ्च समानन्यायादधिगन्तव्यम्। एवं व्यष्टि-सृष्टिरपीश्वराधीनेति सूचितम्।

कार्यं नैवारभेरन्समधिकमणवस्सर्वतस्संप्रयुक्ता
दिक्संयोगैकदेश्यान्न घटत इह ते दिक्कृतोऽप्यंशभेदः।
बुद्धेस्त्वंशानपेक्षा स्फुरति विषयिता विश्रमस्त्वस्तु दृष्टे
नो चेदारम्भकांशप्रभृतिषु नियता दुर्निवाराः प्रसङ्गाः॥१८॥

सर्वा० ननु पञ्चीकरणाभिधानात्पञ्चसु भूतेषु स्वतस्सभागत्वम्, व्यष्टिसमष्टि-भावः, भूतांशानां चात्यन्नतभिन्त्वं समानन्यायतया प्रकृतिपर्यन्तेषु तत्त्वान्तरेष्वपि तत्सर्वं सिद्धम्। भूतभागानां चात्यन्तभेदो वेणुरन्ध्रश्लोकेऽभाष्यत। एवं सत्य-णुसमाहार एव प्रकृतिरिति स्थिते * महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामित्यौलूक्यो-पालम्भो न युक्त इत्यत्राह—**कार्यमिति**॥

अयं भावः—अनन्यपरशास्त्रसिद्धेष्वर्थेषु * श्रुतेस्तु शब्दमूलत्वादिति न्यायेन गत्यन्तराभावे काचिद्गमनिका स्वीकार्या। अनुमेयेषु तु यथा दृष्टान्तं सिद्धिः, अन्यथाऽतिप्रसङ्गात्। ततश्चावयविवादिनामवयवास्स्वभागैर्मिथस्संयुज्यावयविन-मारभन्त इति सिद्धान्तः। एतच्च द्व्यणुकावधि निर्विघातं, द्व्यणुकारम्भे तु निर-वयवा अणवोऽवयवा इति कल्पितम्; तत्रैवं प्रसङ्गावतारः—यदि परमाणवस्स्वां-शतस्संयुज्यावयविनमारभेरन्, तदा तदंशोऽवयवरूपस्तदन्यो वा? आद्ये तस्यापि तथेत्यनवस्था। अन्यस्तु स्वाभाविकः औपाधिको वा? पूर्वत्र भिन्नाभिन्नता स्यात्। उत्तरत्रोपाधिसंबन्धेऽप्यंशभेदो दुर्वचः। परिशेषात्तन्निरपेक्षसंयोगैरन्योन्यानाघ्रात-भागभेदरहितैरणुभिरारम्भः स्यात्। त्यक्तस्तर्हि सप्रतिधत्वविरोधः। सर्वेषु च परमाणुष्वेकपरमाणुप्रदेशमात्रावस्थितेषु स्वाधिकदेशव्यापिकार्यारम्भो न [सिध्येत्] स्यात्, न खल्ववयवास्पृष्टे कुत्रचित् प्रदेशेऽवयवी तिष्ठेत्, अदृष्टेर-निष्टेश्च। अवयवनाशादयविनाशे क्षणमानाधारोऽवयवीति चेत् तथा

कल्पयताऽपि त्वया पूर्वं तन्तुसंघानवच्छिन्नप्रदेशे पटस्य वृत्तिर्न कल्पिता। एवमधिकारम्भानुपपत्तौ मेरुसर्षपादिविचित्रभेदासिद्धिः। सेयमसिद्धं सिषाधयिषतः सिद्धहानिः; तथा चासिद्धसाधनं निर्मूलम्।

ननु परिमितानां सर्वेषां दिग्भेदेन भागभेदे दृष्टे परमाणुष्वपि तथाङ्गीकारो दुर्वार इत्यत्राह—**दिक्संयोगेति**। दिक्संयोगायत्तोऽपि हि भागभेदस्सावयवेष्वेव दृष्टः, त्रसरेणोरपि त्वया सावयवत्वक्लृप्तेः। निरवयवेषु तु विश्वव्याप्तैकदिक्कत्ववादिनस्ते तन्निबन्धना भागक्लृप्तिरशक्या। तदुपाधिसंयोगात्तु स्यादपि यदि तत्राप्यंशानंशविकल्पक्षोभोऽतिलङ्घ्येत। अतस्सर्वदिगुपाधिसंयोगानां परमाणुषु पृथक्प्रदेशरहितानां कथमौपाधिकभागभेदापादकत्वम्? यदि चानंशभेदेन संयुक्ता उपाधयः क्वचिद्भागभेदकास्तर्हि परमाणव एव तथा किं न स्युः? वृथा चैवमंशक्लृप्तिरभागेन संयोगावस्थितेरिति। तदिदं सर्वमभिप्रेत्याहुः—

ष [ट्केन] ट्कोणयुगपद्योगात् परमाणोष्षडंशता।
षण्णां समानदेशत्वे पिण्डः स्यादणुमात्रकः॥ इति॥

ननु बुद्धिस्तावत्सर्वतन्त्रसिद्धा। सांवृतीत्यपि हि तां माध्यमिको मन्यते। सा चैकाऽप्यनेकविषया दृष्टेष्टा च। निरंशा च सा प्रत्येकं कात्स्न्र्येनांशतो वा विषयीकुर्यात्? नाद्यः; अन्यानुल्लेखप्रसङ्गात्। न द्वितीयः, निरंशत्वादेव। तत्र चेत् कश्चित्समाधिः अणुष्वपि तथा स्यात्। तत्राह—**बुद्धेस्त्विति**। तुश्शङ्कानिवृत्त्यर्थः। विषयित्वं ह्यंशानपेक्षतयैव दृष्टम्, मह्यन्यतोऽपि तस्यान्यथादृष्टिः, अतो यथोपलम्भमेकवदनेकोऽपि विषय एकस्या बुद्धेः। एवमेकस्य निरंशस्यानेकबुद्धिविषयत्वमपि निरूढम्। अवयव्यारम्भकसंयोगस्तु त्वयाऽपि न क्वचिदंशनिरपेक्ष उक्तः; क्वचिद्विशेषाङ्गीकारे नियामकाभावः।

अथ संघातारम्भकसंयोगेऽपि समः प्रसङ्ग इति, न समः; संयोगसाध्यसंघाताभावात्। तत्स्वीकारे ह्यवयविवाद एव वरम्। संयोगस्तर्ह्यकोऽनेकवृत्तिस्सन्नंशानंशविकल्पदौस्थ्यं नातिक्रामेत्। न ह्यसौ नास्त्येव सिद्धयोस्साध्यतया दृष्टेरिति, तदपि न; विषयित्ववन्निस्तारात् सोऽपि हि द्वयोर्न स्वांशाभ्यां वर्तत इति दृश्यते। एवं स्वामित्वादयोऽपि न प्रतिबन्दिः। अस्तु तर्हि संयुक्तप्रतिबन्दिः। मूर्तैर्विभूनां संयोगोऽस्ति न वा? न चेदन्यतरकर्मजसंयोगलोपः; अविशेषात्। अस्ति चेत् यदि कात्स्न्र्येन विभुद्रव्यमेकेन स्पर्शवता संयुज्यते, कथं स्पर्शवदन्तरेण तस्य संयोगः स्यात्? अंशतश्चेत् सावयवत्वप्रसङ्गः। न हि विभुद्रव्यस्यावयवित्वं संघातत्वं वा सुवचं, पूर्वत्र स्पर्शवत्त्ववृत्तत्वकार्यत्वानित्यत्वादिप्रसङ्गात्। उत्तरत्र नानात्वभेदाभेदयोरन्यतरापातात्। तत्र च विभुद्रव्यांशानां मिथस्संयोगोऽस्ति न वा? अस्ति चेत् तत्रापि स एव प्रसङ्गः; नास्ति चेदसंहतरूपता स्यात्। औपाधिको विभूनामंशभेद इति चेन्न। उपाधिसंयोगेऽपि अंशादिविकल्पानपायात्। निरंशेऽपि

संयुज्यमानं स्वरूपेण तद्भेदोपाधिरिति चेन्न । स भेद उपाधिना च्छिन्ने चेदवयव-विश्लेषात्मा स्यात्, अच्छिन्ने तु भेदाभेदवाद एव शरणम् ।

अत एव स्वसमानपरिमाणेषु विभुप्रदेशेषु तत्तदुपाधिसम्बन्धव्यवस्थेति निरस्तम्, तत्प्रदेशभेदस्यैव मृग्यमाणत्वात् । विभुद्रव्यमेव तत्तन्मूर्ततुल्यपरिमाणं जायत इति चेन्न; विरोधादुक्तदोषानतिक्रमाच्च । काल्पनिकांशभेदेन मूर्तसंयोग इति चेत्तर्हि वस्तुतस्त्वखण्डेनेत्युक्तं स्यात् । अंशभेदकल्पना च किं विभुद्रव्यस्वरूप-मात्रे उत तदंशे एवेति दुस्तरो गर्तः । निरंशानामपि स्वभावत एव विभूनामनेकमू-र्तसंयोगक्षमत्वमिति चेदणूनामपि एतदस्तु; अविशेषात् । एवं त्रसरेणुप्रतिबन्दिश्च भाव्येति ।

अत्रोच्यते–यदि वयं प्रदेशवर्तिगुणनिह्नवाय प्रवर्त्स्यामस्तदा विभुप्रतिवन्द्याऽ-णुष्वपि तत्सम्भवः प्रदर्श्येत । किं त्ववयव्यारम्भकाणामवयवैरेव संयोग इति नियमस्य त्वयैवान्येषु सर्वेष्वङ्गीकारात् कल्प्येष्वपि तत्प्रसङ्गो दुर्वार इति ब्रूमः । न चान्यत्रैवायं नियम इति स्थाप्यम्; तादृशानामणूनामदृष्टेः, अनन्यथासिद्ध-लिङ्गाभावाच्च । यदि विभज्यमानेष्वभावपरिशेषायोगात् परमाणुरपि सत्त्वरज-स्तमसां सर्वापकृष्टस्संघात इति सांख्यमतस्य निर्मूलत्वात्, महत्परिमाणतारतम्य-विश्रान्तिवत् परिमाणतारतम्यत्वादणुपरिमाणतारतम्यविश्रान्तिरपि क्वचि-त्कल्प्येत; तत्राह—**विश्रमस्त्वस्तु दृष्ट इति** । दृष्टे त्रसरेणौ विश्रमसम्भवे न मृग्यं ह्यन्यत् । तथा च सिद्धसाध्यता । यदि त्रसरेणुरेव परमाणुस्स्यादप्रत्यक्षस्तर्हि स्यादिति चेत्, हन्त कुत्रैषा व्याप्तिः ?

सिद्धो ह्यन्यत्र दृष्टान्तस्साध्ये त्वन्योन्यसंश्रयः ।
त्रसरेणुः परागुस्सन् किं नाध्यक्षोऽपराणुवत् ॥

चाक्षुषत्वप्रकर्षनिकर्षयोर्महत्त्वप्रकर्षनिकर्षानुविधानात् द्रव्यस्य चाक्षुषत्वं महत्त्वनियतमिति चेत्, चाक्षुषावयवकस्यैव द्रव्यस्य चाक्षुषत्वनियमदर्शनादचाक्षुषा-वयवकस्य त्रसरेणोरप्यचाक्षुषत्वप्रसङ्गे कस्ते निस्तारः ? अगत्येति चेत्, भवतु कुत-श्चित् महत्त्वाभावेऽपि क्वचिदेवम् । अत एव मूर्तत्वे सति महत्त्वात् त्रसरेणुः कार्यद्रव्या-रब्ध इति कल्पनाऽपि निरस्ता । अस्तु बाह्येन्द्रियग्राह्यत्वादेव तत्साध्यमिति चेन्न; विपक्षे बाधकाभावाद् । अन्यथा त्रसरेण्वारम्भकस्यापि कार्यद्रव्यारब्धत्वकल्पनाया निवारकाभावात् । तत्र विपक्षे बाधकं नास्तीति चेदत्रापि तथेत्युक्तमेव । अतो न व्यणुकमित्यपि किंचित् । एवमारम्भकपरम्परायास्सावयवत्वं तद्व्यापकतयाऽ-भिमतमनित्यत्वं कुतश्चिन्महत्त्वं च प्रसज्यमानमनिवारणीयं स्यात् । एतत्सर्वम-भिप्रेत्याह—**नो चेदिति** । अणुषु स्वाभावसमानाधिकरणसंयोगसिद्धेरौपाधिकांशव-त्त्वस्वीकारात् इष्टप्रसङ्गतां परिहर्तुमारम्भकशब्दः ॥ १८ ॥

आनन्द० ननु परमाणुकारणत्वनिराकरणं प्रकरणे न सङ्गतमित्याक्षेपसङ्गतिमाह—ननु **पञ्चीकरणाभिधानादिति**। **स्वतस्सभागत्वमिति**—अन्यथा विभागकरणासम्भवादिति भावः। **भूतांशानामिति**—भूतानामंशसंघातरूपत्वात्समष्टित्वं। अंशानां व्यष्टित्वं। **समानन्यायतयेति**—अन्यथा भूतानां सभागत्वं नानात्वं च न स्यादिति भावः। **तत्सर्वं सिद्धमिति**—सभागत्वादि सिद्धमित्यर्थः।

अभाष्यतेति—प्रथमसूत्रभाष्ये महासिद्धान्ते अभेदव्यापिनो वायोः वेणुरन्ध्रभेदेनांशभेदोऽभ्यधायि इति भावः। **महद्दीर्घवद्वेति**। ह्रस्वपरिमण्डलाभ्यां—व्यणुकपरमाणुभ्यां महद्दीर्घवत् व्यणुकत्र्यणुकोत्पत्त्यनुपपत्तिवत् तदुक्तप्रक्रियान्तरमप्यनुपपन्नमिति सूत्रार्थः।

ननु पृथक्कार्यारम्भाद्यनुपपत्तिः सिद्धान्तेऽपि समेत्यत आह—**अयं भाव इति**। यागस्य स्वर्गसाधनताबोधकश्रुतिबलाददृष्टकल्पनावदित्याहुः। **श्रुतेस्त्विति**—जगत्प्रति ब्रह्मणः कात्स्न्र्येन कारणत्वमेकदेशेन वेति विकल्पे 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा' इति सूत्रेण पूर्वपक्षं कृत्वा समाहितं 'श्रुतेस्तु शब्दमूलत्वात्' इति। श्रुतेः—श्रुतिप्रामाण्यस्य सत्त्वान्नोक्तदोषः; कुतः ? शब्दमूलत्वात्—इतरविसजातीयतया शब्दवेद्ये लोकदृष्टव्याप्त्यभावादित्यर्थः। अनुमानेन तु दृष्टसजातीयमेव साधनीयं न विजातीयं व्याप्त्यभावादिति भावः।

अतिप्रसङ्गादिति। धूमादिना नित्यवह्निसिद्धिप्रसङ्गादित्यर्थः। **एतच्चेति**—सिद्धान्त इत्येतदित्यर्थः। तदन्यो वेति विकल्पं विकल्पयति—**अन्यस्त्विति**। **स्वाभाविक इति**। तद्द्रव्यस्वरूपमेवांश इत्यर्थः। स्वभावेन स्वरूपेणागतं संजातं वा। स्वार्थिको वा। स्वरूपमेवांशांशिभावापन्नमित्यर्थः **उत्तरत्रेति**—उपाधिसम्बन्ध एवांशांशिभावं भजत इति भावः।

नन्वंशाभावेऽपि स्वरूपेण संयुक्ताः परमाणव आरम्भका भवन्त्वित्यत्राह—**परिशेषादिति**। **अन्योन्यानाघ्रातेति**—अन्योन्यासंयुक्तांशरहितैः—कृत्स्नसंयुक्तैरित्यर्थः। **त्यक्त इति**—एकपरमाण्ववष्टब्धे प्रदेशे परस्या (परेणा) प्यवष्टम्भस्य वक्तव्यतया स्पर्शवद्द्रव्यस्य सप्रतिघत्वनियमत्यागप्रसङ्गः; अन्यथा सर्वव्यापिसंयोगासम्भवादित्यर्थः। दूषणान्तरमाह—**सर्वेष्विति**। तदेवोपपादयति—**न खल्विति**। तथात्वे घटादेरपि परमाणुतारतम्यं नियामकाभावान्न स्यात्। सर्वकार्यद्रव्यस्यापि विभुत्वं च स्यादिति भावः। नन्ववयवं विनाऽप्यवयवी तिष्ठत्येव विनश्यदवस्थायां. तथाचावयवाभावप्रदेशेऽप्यविनश्यन्नपि तिष्ठ (ति) तु; अतिप्रसङ्गस्तु यथाकथञ्चिन्नेय इत्याशङ्क्य समाधत्ते—**अवयवनाशादिति**। अन्यथा विन्ध्यभागेऽवयवनाशे हिमवद्भागेऽवयविनाशप्रसङ्गादिति भावः।

सेयमित्यादि—असिद्धं परमाणुं तदपेक्षयाऽधिकपरिमाणं व्यणुकं च साधयतः विचित्रपरिमाणत्वेन सिद्धस्य मेरुसर्षपादेस्सिद्धिर्न स्यादित्यर्थः। निर्मूलं—

निष्प्रमाणकमित्यर्थः। ननु घटस्य परिमितस्य पूर्वो भागः दक्षिणो भागः पश्चिम-मुत्तरमूर्ध्वमित्यादिदिगधीनो भेदो दृष्ट इति परमाणुष्वपि तत्कृतभागकल्प्तिर-स्त्वित्याशङ्कते **नन्विति**। **दिक्संयोगेति**-संयोगभेदादेव भागकल्प्तिः कल्प्या; नच संयोगभेदः; प्रतियोगिभेदाभावादिति भावः।

ननु दिगुपाधीनां भिन्नत्वात्संयोगभेदस्स्यादित्यत्राह—**तदुपाधीति। यदि तत्रापीति**—परमाणवः स्वांशैरुपाधिभिः संयुज्यन्ते उपाधयो वा तथा तैस्संयुज्यन्ते उत स्वरूपेणेति विकल्पेन पूर्वदोषानतिवृत्तेरिति भावः। दिगुपाधीनां परमाणु-भिरेकदेशेन संयोगाभावे दोषमाह—**अत इति**। ननु स्वांशभेदेन विनाऽप्यु (विना संसृज्यमाना उ) पाधयः स्वसंयोगिनि परमाणावंशभेदकल्पका भवन्तु इति चेत्; मैवं; तथा सति परमाणूनामेवांशभेदकल्पकत्वमस्तु कृतमुपाधिभिः ? तदङ्गीकारेऽपि तत्संयोगस्य परमाणौ व्याप्य (परमाणाव) विद्य मानस्य अंशभेदकल्प्तावनुपयो-गादित्याह—**यदि चानंशभेदेनेति। षट्केनेति**—षड्भिः परमाणुभिरेकस्य परमाणो-ष्षट्सु पार्श्वेषु योगे परमाणोः षडंशत्वं यदि पार्श्वभेदमन्तरेण सम्बन्धस्तदाऽ-धिकपरिमाणं न स्यादिति भावः। **अणुमात्रक** इति। स्वार्थे कः। अणुपरिमाण इत्यर्थः।

ननु सर्वशून्यवादिनः सा न सिद्धेत्यत आह—**सांवृतीति**—दोषसिद्धेत्यर्थः। प्रतिबन्दीमुपपादयति—**निरंशा चेति। अन्येति**—एकविषय एव कृत्स्नसंविदोऽ-प्युपयुक्तत्वादिति भावः। **उल्लेखो**—विषयीकरणं। **अंशानपेक्षयेत्यत्र** अंशस्यापेक्षा न विद्यते यस्येति गमकत्वात्समास इति ध्येयम्। **न ह्यन्तत इति**—उपाध्यधीनांश-भेदकल्प्त्या वा बुद्धेर्विषयता दृष्टा नेत्यर्थः। **यथोपलम्भमिति** एकविषयत्ववदनेक-विषयत्वस्यापि दर्शनानुसारादुपपत्तिः; वस्तुव्यवस्थाया उपलम्भानुसारित्वा-दित्यर्थः। **निरूढमिति**—उपपन्नमित्यर्थः। **अवयव्येति**—परमाणुव्यतिरिक्तस्थल इति शेषः।

ननु परमाण्वारब्धस्सङ्घात इत्यङ्गीकारेऽपि तत्रोक्तविकल्पदोषस्स्यादिति प्रतिबन्दिमाशङ्कते—**अथेति**। परिहरति—**न समं इति**—संयोगस्यैव सङ्घातत्वा-दिति भावः।

ननु निरंशस्संयोग उभयवृत्तिरङ्गीक्रियते। तत्र स्वांशेन वर्तते उत कात्स्न्येन ? नान्त्यः, एकत्र वृत्तावन्यत्राभावप्रसङ्गात्। न प्रथमः; अंशाभावादिति प्रतिबन्दीं शङ्कते—**संयोगस्तर्हीति। सिद्धयोरिति**—इदं वस्तुद्वयं दूरस्थं मया संयुक्तमिति सिद्धयोर्वस्तुनोः **साध्यतया**—जन्यतया संयोगस्य दर्शनादित्यर्थः। यथादर्शनमङ्गीकारादुभयवृत्तिताया नानुपपत्तिरित्याह—**तदपि नेति**। तदेवोप-पादयति—**सोऽपीति**-संयोगोऽपीत्यर्थः। दासत्वादिरादिशब्दार्थः। **न प्रतिबन्दिः**—न प्रतिबन्दियोग्य इत्यर्थः। **अविशेषादिति**—यदा पक्ष्यादेरन्यतरस्य कर्मसत्वेऽपि

विभुषु संयोगो नोत्पद्यते तदा तत्र व्यभिचारादन्यतरकर्म न संयोगकारणमिति कुत्रापि ततस्संयोगो न स्यादित्यर्थः। **कथमिति**—सप्रतिघत्वविरोधादित्यर्थः। इष्टापत्ति निराचष्टे—**न (हि) च विभुद्रव्यस्येति**। अवयवित्वावयवसङ्घातत्वे मतभेदेन **उत्तरत्रेति तत्रचेति**—नानात्वाङ्गीकारे एकस्यैव सङ्घातत्वार्थं भेदाङ्गीकारे भेदाभेदप्रसङ्ग इत्यर्थः। अंशभेदमङ्गीकृत्याह—**स तत्रचेति**। विभुद्रव्यस्यांशवत्त्व इत्यर्थः। स **एवेति**—स्वांशभेदेन संयुज्यते न वेत्यादिप्रसङ्ग इत्यर्थः। **असंहतरूपता स्यादिति**—एकं वस्तु विभुद्रव्यं न स्यादित्यर्थः। **अच्छिन्ने**—अखण्डिते। **भेदाभेदेति** अखण्डितस्याभिन्नत्वादिति भावः। **स्वसमानपरिमाणेषु** उपाधिसमपरिमाणेषु। **विभुप्रदेशेषु**—विभुद्रव्यस्य प्रदेशेषु। **तत्प्रदेशभेदस्यैवेति**—उपाधिसमपरिमाणविभुप्रदेशस्यैवासिद्धेरित्यर्थः। **विरोधादिति**—विभुनः कार्यत्वाभावात्तथात्वे विभुत्वव्याघातादित्यर्थः। **उक्तदोषेति**—तत्तुल्यपरिमाणमप्यंशभेदेन जायते उत न ? उपाधिना विच्छिन्नं न तत्तुल्यपरिमाणं जायते अविच्छिन्नं वा ? इत्यादि दोषानतिक्रमादित्यर्थः। **तर्हीति**—काल्पानिकांशस्य वस्तुनः पारमार्थिकवस्तुनिर्वाहकत्वाभावादित्यर्थः। कल्पनापेक्षेऽप्युक्तदोषानिस्तार इत्याह—**अंशभेदेति**। सिद्धान्ते त्रसरेणूनां निरंशत्वात्तत्संयोगप्रतिबन्दिमप्याह—**एवमिति**। **प्रदेशवर्तीति**—प्रदेशवर्तिसंयोगापह्नवायेत्यर्थः। **विभुप्रतिबन्द्येति**।

यद्यपि विभूनां तन्न्यूनपरिमाणसंयोगः स्वाश्रयभूतन्यूनपरिमाणद्रव्याभावे न संभवति आश्रयरहितप्रदेशे संयोगासंभवात्। यद्येकाश्रयसत्त्वमात्रात् प्रतियोग्यन्तराभावप्रदेशेऽप्याश्रयान्तरे संयोगस्स्यात् तथा सति प्रदेशान्तरवर्तिवह्निना पटस्य कात्स्न्येन संयोगस्स्यात् अविशेषादिति कृत्स्नपटदाहेनैकदेशेन पटदाहः कुत्रापि न स्यादिति युक्तमाकाशादावव्याप्यवृत्तिसंयोगवत्त्वं। परमाणौ तु तन्न्यूनपरिमाणप्रतियोग्यन्तराभावान्नाव्याप्यवृत्तिसंयोगसम्भवः; तथाऽप्यभ्युपगम्यैतदुक्तमिति द्रष्टव्यम्।

तत्सम्भवः—अव्याप्यवृत्तिगुणसम्भवः। **अवयव्यारम्भकाणामिति**। यद्यपि द्व्यणुकस्य परमाणुरवयवः; तथाऽप्यवयव्यारम्भकाणामवयवानां संयोगः स्वावयवाच्छिन्नो दृष्ट इति त्वयाऽपि द्व्यणुकातिरिक्तकार्यस्थलेऽङ्गीकारादित्यर्थः। अत्र प्रत्यक्षदृष्टेस्संकोच उतानुमानादिति विकल्प्याद्यं दूषयति—**तादृशानामणूनामदृष्टेरिति**—अप्रत्यक्षत्वादित्यर्थः।

द्वितीयं दूषयति—**अनन्यथेति**। लिङ्गं शङ्कते—**यदीति**। **सर्वापकृष्टस्संघात इति**—प्रकृतिकार्यत्वादिति भावः **निर्मूलत्वात्**—निष्प्रमाणकत्वात्। **महत्परिमाणेति**। अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् महत्परिमाणतारतम्यवदिति प्रयोगो द्रष्टव्यः। यत्र विश्रमस्स निरवयोऽणुरिति भावः।

न मृग्यमिति—अन्यत्परमाणुद्रव्यं न कल्प्यमित्यर्थः। **यदीति**—परमाणोरतीन्द्रियत्वनियमादिति भावः। **कुत्रेति**—गृहीतेति शेषः। प्रत्यक्षसिद्धो दृष्टान्त उतानुमानिक इति विकल्पमभिप्रेत्याद्यं दूषयति—**सिद्ध इति**। नात्र प्रत्यक्षसिद्धिरितिभावः। द्वितीयं दूषयति—**साध्ये त्विति**। तस्यापि दृष्टान्तापेक्षायामनुमानान्तराधीनस्य दृष्टान्तत्वे चक्रकानवस्थाप्रसङ्गात्प्राथमिकानुमानगम्यस्यैव दृष्टान्तत्वेऽन्योन्याश्रय इत्यर्थः। त्रसरेणोः परमाणुत्वेऽपि प्रत्यक्षत्वं साधयति—**त्रसरेणुरिति**। **परमाणुस्सन्**—परमाणुस्थानापन्नः। त्रसरेणुरध्यक्षः अणुत्वात् तदपेक्षया स्थूलजालमरीचिमध्यभासमानाणुवत्। इन्द्रियस्याणुत्वं नास्तीति 'अणवश्चेति' सूत्रे प्रत्यपादीति भावः।

महत्त्वस्य बहिर्द्रव्यप्रत्यक्षव्यापकत्वात्त्रसरेणौ तन्निवृत्तिमाशङ्कते—**चाक्षुषत्वेति**। बहिर्द्रव्यप्रत्यक्षत्वेत्यर्थः। यद्वा चाक्षुषत्वनिवृत्तिमाशङ्कत इत्यर्थः। साहचर्यमात्रं न व्याप्तिग्राहकमप्रयोजकत्वादित्याह—**चाक्षुषावयवस्यैवेति**। तथाचात्र त्रसरेणौ विश्रामानङ्गीकर्तुस्तदतिरिक्तपरमाण्वभ्युपगन्तुरपीत्यर्थः। **कुतश्चित्**—कारणान्तरात्। **क्वचित्**—त्रसरेणौ महत्त्वरूपपरिमाणाभावेऽपि। **एवं**—प्रत्यक्षत्वमित्यर्थः। तथाच—महत्त्वोत्कर्षस्य चाक्षुषप्रत्यक्षोत्कर्षप्रयोजकत्वेऽपि न चाक्षुषप्रत्यक्षमात्रहेतुत्वमिति भावः।

अत एवेति—त्रसरेणोः परमाणुत्वादित्यर्थः। तथाच स्वरूपासिद्धिरिति भावः। **एतत्साध्यं**—कार्यद्रव्यावस्थत्वरूपं साध्यं। **त्रसरेण्वारम्भकस्येति**। द्व्यणुकस्येत्यर्थः व्याप्तिरविशेषादित्याह—**निवारकाभावादिति**। इष्टापत्तिमाशङ्क्य नित्यनिरवयवाणुत्वसिद्धिर्न स्यादित्याह—**एवमारम्भकेति**। संयुक्तविभुप्रतिबन्ध्याऽणुत्वव्याप्यवृत्तिसंयोगौपाधिकांशवत्त्वस्वीकारसम्भवादेकदेशेन संयुज्यते उत नेत्यादिविकल्पमुखेन प्रवृत्तानामिष्टप्रसङ्गतामाशङ्क्यारम्भकांशपदविशेषणेन परिहरतीत्याह—**अणुष्विति**। आरम्भकसंयोगानामवयवावच्छिन्नानामेव जनकत्वनियमादिति भावः। परमाणुस्सांशस्स्यात् आरम्भकत्वात् परमाणुरनौपाधिकदेशेन संयोगवान् स्यादारम्भकसंयोगवत्त्वादित्यादिप्रयोगो द्रष्टव्यः ॥१८॥

अक्ष० एवं शास्त्रीयं प्रकृतिविकृतिक्रमादिकमुपपाद्य महद्दीर्घाधिकरणोक्तमानुमानिकपरमाणुकारणवादासामञ्जस्यमुपपादयति—**कार्यमिति**। सर्वांशेन संयुक्ताः **णवः** न्यूनपरिमाणाः न्यूनदेशवर्तिनः। **समधिकं**—अधिकपरिमाणं—स्वापेक्षया अधिकदेशव्यापिकार्यं नैवारभेरन्नित्यर्थः।

अयं प्रसङ्गः परमाणुकारणवादे कृतः अनवस्थाभयात्परमाणूनामवयवा नेष्यन्ते-अवयवाभावे च पार्श्वमध्यादिप्रदेशभेदस्य न प्रसक्तिः प्रदेशभेदाभावे च द्व्यणुकारम्भकसंयोगः परमाणोः पार्श्वादिभागमात्रे इति न वक्तुं शक्यं सर्वत्र संयोगे असंयुक्तप्रदेशाभावेन नैकस्मात्परमाणोरधिकदेशवर्तित्वं द्व्यणुकस्य

कार्यस्य स्यात्। दृश्यते हि त्र्यणुकादावयवसत्वात्पार्श्वादिभागमात्रे संयोगेन असंयुक्तभागस्यापि सत्वात् पृथुतरचतुरणुकादिकार्यारम्भो यथादृष्टान्तं च अनुमेयेषु सिद्धिस्स्यात्। ननु शास्त्रैकगम्येष्विव लोकदृष्टविजातीयस्यापि सिद्धिरिति भावः। तथाचोक्तं—"षट्केन युगपद्योगात्परमाणोष्षडंशता" इति। स्वाभाविकभागभेदाभावेऽपि दिक्संयोगादिकृतप्राच्योदीच्यादिभागकल्पित्स्यादित्यत्राह—**दिक्संयोगेति** दिक्संयोगाधीनो हि प्रदेशभेदः सावयवेष्वेव दृष्टः अत इह निरवयवे परमाणौ दिक्संयोगानामैकदेश्यात्प्रदेशभेदाभावात् दिक्कृतोऽप्यंश भेदः। **ते**—दृष्टानुसारेण कल्पयतो न घटत इत्यर्थः। अतष्षण्णां समानदेशत्वे "पिण्डस्स्यादण्डमात्रकः" इत्येव स्यादिति भावः। अत्र षट्कं चतुःपार्श्व ऊर्ध्वाधोदेशषट्कं।

ननु निरंशा—बुद्धिः सात्रैकाऽप्यनेकान् विषयानवगाहमाना–दृश्यते तस्याः अंशाभावेन अंशानपेक्षापि, एकैकविषयावगाहनं न कात्स्न्र्येन भवति कात्स्न्र्येन तदवगाहने विषयान्तरोल्लेखानापत्तेः तद्वदंशानपेक्षत्वेऽपि परमाणुसंयोगस्य न कृत्स्नप्रतिसम्बन्धिकत्वावश्यम्भाव इत्यत्राह - **बुद्धेस्त्विति स्फुरति**—प्रकाशते–उपलम्भानुरोधात्—बुद्धेरंशानपेक्षा विषयिता उपगम्यते। नचैवमुपलम्भः परमाणोरस्ति नवा त्र्युणकादेरारम्भक संयोगः अंशानपेक्षो कुत्रचिद्भ्रवद्भिः परमाणु कारणवादिभिरपि दृष्टचरः तन्निदर्शनेन साध्यमानः परमाणोरारम्भकसंयोगः अंशापेक्ष एव स्यादिति भावः।

महत्परिमाणतारतम्यविश्रान्तिवदणुपरिमाणतारतम्यविश्रान्तिरपि क्वचित्कल्प्येत्यत्राह—**विश्रम इति**। दृष्टे त्र्यणुक एव विश्रमो भवतु द्व्यणुकमपि माभूत्–त्र्यणुकसाधने च सिद्धसाधनमिति भावः। अन्यथा बाधकमाह—**नोचेदिति**। अप्रयोजकाख्यानावलम्बेन त्र्यसरेणौ विश्रमानङ्गीकारे-त्र्यसरेणूः-कार्यद्रव्यारब्धः बाह्येन्द्रियग्राह्यत्वादित्यादिना तदवयवानुमाने। **आरम्भकांशप्रभृतिषु**—आरम्भकावयवप्रभृतिषु। **नियताः**—व्याप्ताः। **प्रसङ्गाः**–परमाणुरपि सावयवस्स्यात् आरम्भकत्वात्—कपालादिवत् अत एवानित्यस्स्यात् तत एव किञ्चिदपेक्षया महानपि स्यादित्यादिप्रसङ्गाः। **दुर्निवाराः**–अनिवार्या इति भावः।

स्याद्भागानन्त्यसाम्ये परिमितिसमता सर्षपक्ष्माभृतोश्चे-
न्मैवं भागेष्वनन्तेष्वपि समधिकता स्थौल्यहेतुर्गिरेः स्यात्।
व्यक्त्यानन्त्येऽपि जात्योः परतदितरता पक्षमासाद्यनन्तं
श्रौतोपादानसौक्ष्म्यं न भवदभिमतं तत्प्रथिम्नश्श्रुतत्वात् ॥ १९॥

सर्वा०। नन्वेवं सर्वत्रावयवानन्त्यप्रसङ्गे सर्षपमहीधरादिपरिमाणवैचित्र्यं न स्यादिति शङ्कते—**स्यादिति**॥ प्रसञ्जकस्याप्रयोजकत्वमित्या [त्वा] भिप्रायेण प्रतिवक्ति—**मैवमिति**। आनन्त्यसाम्येऽप्यवयवानां न्यूनाधिकभावेन परिमाण-

वैषम्योपपत्तिमाह—**भागेष्विति**। एतच्चोत्तरमनन्तभागाभ्युपगन्तॄणां तत्प्रसञ्जकानां च समानम्।

अण्वंशानामनन्तत्वे गन्तॄणां तदतिक्रमः।
कदाऽपि न स्यात्किं न स्याद्वेगातिशयवैभवात्॥

द्युमणेरातपस्सर्पन्नुदयाद्रिशिखामणेः ।
तत्क्षणं किं न निर्भाति पश्चिमाद्रिशिखण्डकः॥

आनन्त्याविशेषे कथं न्यूनाधिकभाव इत्यत्राह—**व्यक्तीति**। सत्ताप्रभृतिघटत्वादिपर्यन्तानां सर्वासां जातीनां त्रैकालिकानन्तव्यक्तिवृत्तित्वमविशिष्टं, तथापि न्यूनाधिकवृत्त्यैव परापरभावो युष्माभिः कल्पितः, तद्वदिहापि स्यादिति भावः। निदर्शनान्तराण्यप्याह—**पक्षेति**। अनन्ताः पक्षा मासाश्च, तथाऽपि मासापेक्षया द्वैगुण्यं पक्षाणामेष्टव्यम्। आदिशब्देन क्षणप्रभृति परार्धादिसंग्रहः। अन्यच्च, घटसमुदयाद्घटपटसमुदायोऽधिकः. हिमवद्दक्षिणदेशान्मेरुदक्षिणदेशः; एकात्मदुःखजातादनन्तात्मदुःख जातमित्यादि स्वयमूह्यम्। * नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीरा इति जगदुपादानं निरतिशयसूक्ष्मं श्रूयते, अतोऽस्मदाद्यग्राह्योदुस्त्यजः परमाणुरित्यत्राह—**श्रौतेति**। न हि सर्वन्यूनपरिमाणत्वं तत्सूक्ष्मत्वम्, पूर्वोक्तसर्वगतशब्देन श्रुत्यन्तरैश्च विरोधात्। न च जात्यभिप्रायोऽसौ; एकस्य सर्वोपादानत्वोक्तेः, सर्वव्यापिस्वतस्सर्वज्ञजगत्कर्तृविषयत्वाच्च वाक्यस्य। सूक्ष्मशब्दश्च न परिमाणविशेषनियतः। उक्तं च विष्वीं प्रकृतिं महीयसश्च महदादीन् प्र[कृत्य]क्रम्य **साङ्ख्यैः** ❀सौक्ष्म्यात्तदनुपलब्धिरिति।

ननु त्रसरेणोरष्टमः षष्ठो वा भागः परमाणुरिति सर्वानुमतैश्शिल्पिनां शास्त्रैर्धर्मशास्त्रैस्तन्मूलश्रुत्या च परमाणुसिद्धिः स्यात्। तन्न; शिल्पादिशास्त्राणां परमाणावतत्परत्वात्; मानोन्मानादिविशेषनिर्धारणं हि तत्र विधित्सितम्। ततो हैतुकोक्तानुवादमात्रमिह स्यात्। तत्र च त्रसरेणुतः किंचित्सूक्ष्मं भवतु, मा वा भूत्, दृष्टोपक्रमं विवक्षितसिद्धिरित्यत्राकूतम्। शास्त्रतश्च कचिदनन्यथासिद्धात् परमाणुसिद्धावपि तदनुमानभङ्गात्परस्य मानमङ्गः, यथा प्रकृत्याद्यनुमायिनस्साङ्ख्यस्य।

शास्त्रैकविषयत्वे च परमाणोर्न सिध्यति।
नित्यस्पर्शादियोगित्वं भूतानां विकृतित्वतः॥

अस्पर्शाण्वंशसंघत्वात्कतिचित्प्रकृतेरतः ।
एकैकाण्वंशभागेऽपि भागानन्त्यं प्रचक्षते॥

निरंशा प्रकृतिस्सैव परिणामविभागिनी।
अनन्तांशात्मिका चेति व्याहतं साङ्ख्यभाषितम्॥

अत्यन्तभिन्नसत्त्वादिद्रव्यसंघात्प्रधानतः ।
यथांशं विश्वसृष्टौ च न स्यात्तिगुणता क्वचित् ॥ १९ ॥

इति परमाणुकारणतावादभङ्गः ॥

आनन्द० मुखान्तरेणानवस्थापरिहारेण निरवयवपरमाणुसाधनमाशङ्क्य-परिहरतीत्याह—**नन्वेवमिति** । आक्षेपसङ्गतिर्बोध्या ।

एतच्चोत्तरमिति । अधिकावयवारब्धत्वं न्यूनावयवारब्धत्वं च परिमाणतारतम्यप्रयोजकमित्युत्तरमित्यर्थः अनवस्थया अनन्तभागाभ्युपगन्तॄणां तत्प्रसञ्जकानां क्वचिदवयवारब्धत्वमनभ्युपेत्य नित्यपरमाणुवादिनां नैयायिकानां च समानमित्याह—**अनन्तभागेति** । प्रकारान्तरेण परमाणुसाधनमाशङ्क्य निराकरोति—**अण्वंशानामिति** । **तदतिक्रमः**—अण्वतिक्रमः- । **न स्यादिति**—अनन्तावयवत्वेन परमाणोरपि गगनादिवदनन्तत्वादतिक्रमणं न स्यादित्यर्थः । घटादीनामतिक्रमो न स्यादित्येतत्कैमुत्यन्यायसिद्धमिति द्रष्टव्यम् । परिहरति—**किं न स्यादिति** । स्यादेवेति भावः । तत्र हेतुः—**वेगातिशयेति** । तत्र दृष्टान्तमाह—**द्युमणेरिति** । **सर्पन्**—गच्छन् । **उदयाद्रिशिखामणेः**—उदयं गतस्य । **पश्चिमाद्रिशिखण्डकः**—पश्चिमाद्रिशिखरगतः ।

मासापेक्षयेति—एकैकस्य मासस्य पक्षद्वयात्मकत्वादिति भावः । मूले 'व्यक्तयानन्त्येऽपि जात्योः परतदितरता पक्षमासाद्यनन्तम्' इत्यनन्तरं तथाऽपि न्यूनाधिकभावो दृष्ट इति शेषः । **सर्वगतशब्देनेति**— विभुशब्देनापीत्यर्थः । **असाविति**—सर्वगतशब्द इत्यर्थः । **एकस्येति**—अजामेकामित्यादिनेत्यर्थः । वस्तुतस्तु नेदं वाक्यं प्रकृतिपरं येन परमाणुसिद्धिमाशङ्केतेत्याह—**सर्वव्यापीति** । **उक्तं चेति**—

सामान्यतस्तु दृष्टात् अतीन्द्रियाणां प्रसिद्धिरनुमानात् ।

इत्यादिना प्रकृत्यादिसिद्धिमुक्त्वा तेषामनुपलब्धिवाधात्सिद्धिर्न स्यादित्याशङ्क्य अनुपलब्धिमात्रं न बाधकं; अपि नु योग्यानुपलब्धिः; प्रकृते सा नास्ति । कुतः ?—

सौक्ष्म्यात्तदनुपलब्धिः नाभावात् कार्यतस्तदुपलब्धेः ।

इति महत्स्वपीन्द्रियाग्राह्यत्वमात्रेण सूक्ष्मपदं प्रयुक्तमित्यर्थः । ननु देवताविग्रहादिप्रमाणनिर्णयार्थम्—

जालसूर्यमरीचिस्थं सूक्ष्मं यत्परिदृश्यते ।
तस्याष्टमो वा षष्ठो वा भागोऽणु परिकीर्तितः ।

इति । तथा स्वर्णस्तेयादिनिर्णयार्थं स्मृतावपि—

जालसूर्यमरीच्यां यद्भाति सूक्ष्मं त्रुटेः परम् ।
भागोऽष्टमस्तृतीयो वा परमाणुरितीरितः ॥

इत्यादिना शिल्पशास्त्रधर्मशास्त्रेषूक्तेः कथं निराकरणम् ? इति शङ्कते—**नन्विति । अतत्परत्वादिति**—परमाणुविषयतात्पर्याभावादित्यर्थः । तात्पर्याभावमेवोपपादयति—**मानोन्मानादीति । तत्रेति ।**

इदमुपलक्षणं—त्रसरेणुतस्सूक्ष्मभागपरिकल्पना च स्यादिति द्रष्टव्यम् । तदिदमाह—**भवतु मा वा भूदिति**—तावतैव माननिर्णयसम्भवादिति भावः । परमाणौ शास्त्रप्रमाणकथनं विवक्षितमित्याह—**शास्त्रतश्चेति ।** ननु यथाकथञ्चित्परमाणुसिद्धिरेवालमित्यत्राह—**शास्त्रैकविषयत्व** इति । परमाणोर्नित्यस्पर्शरूपरसगन्धवत्त्वं च तदङ्गीकृतं न सिध्यतीत्यर्थः । तत्र हेतुमाह—**भूतानामिति ।** अणूनां भूतविकृतित्वादित्यर्थः ।

यद्वा भूतानां परमाणुविकृतित्वाद्विकृतिवत्परमाणुरप्यनित्यरूपादिमानित्यर्थ इत्याहुः ।

इतरे तु स्पर्शादीनां भूतविकारत्वात्प्रकृतिभूतपरमाणौ स्पर्शादयो न स्युरित्यर्थं इति वदन्ति ।

किञ्चाणूनां निरवयवत्वमपि न सिध्यतीत्याह—**अस्पर्शेति । कतिचित्**—केचन । **अस्पर्शाण्वंशसङ्ख्यत्वात् अतः प्रकृतेः** सकाशात् ।

एकैकाण्वंशस्य पृथक्करणेऽपि तस्मिन्नंशेऽपि **भागानन्त्यं प्रचक्षते** तस्याप्यनन्तावयवत्वं वदन्तीत्यर्थः । तथाच क्वचिदपि पर्यवसानाभावान्निरवयवपरमाणुसिद्धिर्न स्यादिति भावः ।

साङ्ख्यास्तु प्रकृतिर्निरंशैव परिणामवशाद्विभक्ता सत्यनन्तांशा चेति वदन्ति । तदयुक्तं; सांशत्वनिरंशत्वविभागानां व्याहतत्वादित्याह—**निरंशा प्रकृतिरिति ।** तैरेव साङ्ख्यैरत्यन्तभिन्नसत्वरजस्तमसां सङ्घातः प्रकृतिरित्युक्तं; तदपि दूषयति—**अत्यन्तेति । यथांऽशं विश्वसृष्टौ चेति ।** सत्वांशस्सत्वरूपं कार्यं सृजति रजोंऽशो रजोरूपं तमोंऽशस्तमोरूपं चेत्यर्थः । **न स्यादिति । क्वचिदपि** कार्ये **त्रिगुणता**—सत्वादिरूपता न स्यादित्यर्थः ।

ननु त्रयाणामेकैकस्मिन्नेव कार्ये शुक्लकृष्णादितन्तूनामिव जनकत्वमस्त्विति चेत् **मैवं**; तैः प्रत्येकं तत्तदंशजनकत्वोक्तेः । किञ्च तथासत्यत्यन्तभेदाङ्गीकारो व्यर्थः । त्रयाणामेकात्मत्वस्य लाघवेनाभ्युपगन्तुं युक्तत्वात् ॥ १९ ॥

इति त्रिगुणपरीक्षायां परमाणुकारणतावादभङ्गः ।

अक्ष० आरम्भकपरम्परायाः सावयवत्वप्रसङ्गे बाधक माशङ्क्य परिहरति—**स्याद्भागेति। भागानन्त्यसाम्य इति।** अवयवानन्त्यसाम्य इत्यर्थः। **परिमिति समतेति** परिमाणसाम्यतेत्यर्थः। अवयवबहुत्वस्यैव अवयविपरिमाणकारणत्वेन सर्षपावयवानां महीधरावयवानाञ्च बहुत्वसाम्येन सर्षपमहीधरयोः समपरिमाणत्व प्रसङ्गः इत्यर्थः। अत्र प्रसञ्जकम प्रयोजकमित्याशयेनाह—**मैवमिति। भागेष्विति** अवयवेषु। **अनन्तेष्वपि**—सर्षपावयवापेक्षया महीधरावयवानामानन्त्ये समधिकत्वमस्ति तत्र अन्यूनानधिकत्वमेव अवयविपरिमाणसाम्यप्रयोजकं इह तदभावान्न साम्यापादनं सुकरं अतोऽधिकत्वमिह गिरेः स्थौल्यहेतुस्स्यादिति भावः। आनन्त्याविशेषे कथं न्यूनाधिकभाव इत्यत्राह—**व्यक्तीति।**

सत्तादिजातीनां त्रैकालिकानन्तव्यक्तिवृत्तित्वाविशेषेऽपि सत्ताजातिः अधिकदेशवृत्तित्वात्परा घटत्वादिजातिः न्यूनदेशवृत्तित्वादपरेति सत्ता-घटत्वादिजात्योः परापरभावो युष्माभिरेव कल्पितः तद्वदिहापि स्यादिति भावः। स्वाभिमतं दृष्टान्तमाह—**पक्षेति।** पक्षामासाश्चानन्ताः तथापि मासापेक्षया द्वैगुण्यं पक्षाणामिष्यते तथा प्रकृतेऽपीति भावः।

ननु श्रुतावेव "सुसूक्ष्मं यद्भूतयोनिं परिपश्यन्ति धीराः" इति जगदुपादानस्य सुसूक्ष्मत्वश्रवणात् परमाणुकारणत्वमेवाभिप्रेतमित्यत्राह—**श्रौतेति।** श्रुत्युक्तमुपादानकारणसौक्ष्म्यं **भवदभिमतं न** –सर्वन्यूनपरिमाणत्वं न भवितुमर्हतीत्यर्थः। कुतइतिचेदाह—**तत्प्रथिम्न इति**—तस्मिन्नेव वाक्ये अव्यवहितपूर्वं "नित्यं विभुं सर्वगतं सुसूक्ष्मम्" इति जगदुपादानस्य परममहत्परिमाणस्य श्रुतत्वादित्यर्थः। परममहत्वे सुसूक्ष्मत्वं कथमिति चेत् परममहतोऽपीन्द्रियाग्राह्यत्वादिना सुसूक्ष्मत्वोपचार इत्यवधेयम्। अत एव विभ्व्याः प्रकृतेस्सौक्ष्म्यात्तदनुपलब्धिरिति साङ्ख्याः।

कार्योपादानभेदे न कथमधिकतो गौरवादेस्स्वकार्यं
नान्यत्व नामसंख्याव्यवहृतिधिषणाकारकालादिभेदैः।
द्रव्याभेदेऽप्यवस्थान्तरत इह तु ते पत्रताटङ्कवत्स्युः
नोचेदंशांशिनोस्स्यात्प्रतिहतिरुभयोः स्पर्शवत्त्वाविशेषात् ॥२०॥

सर्वा०। एवं पृथिव्याद्युपादानं चिन्तितम्। अथोपादानातिरिक्तं कार्यंद्रव्यं नास्तीति साध्यते; तत्रावस्थाभेदमात्रं स्वीकृतम्। अयमेव च सत्कार्यवाद **आरम्भणाधिकरणसाध्यः।**

विसृष्टचुल्लासविशेषाः कार्याणां कथिताः क्वचित्।
कल्पनीया न सर्वत्र परिणामोक्त्यवाधतः॥

आविर्भावतिरोभावजन्मनाशविकल्पवत् ।
नित्यं जगदिति स्मृत्या व्यवस्थाद्वयमीरितम् ॥

तदिह प्रत्यक्षागमबलादेकस्यैव द्रव्यस्यावस्थाभेदादुपादानोपादेयभाव इति स्थिते द्रव्यान्तरं प्रागसदागन्तुकं वदतः प्रतिवक्ति—**कार्यति** ॥ कार्यद्रव्यस्य स्वोपादानद्रव्याद्भेदे सति द्विपलकैकपलन्यायेन तन्तुगुरुत्वम्, समं न्यूनमधिकं वा पटगुरुत्वं च सम्भूय पतनातिरेकं कथं न कुर्यात् ? तदकरणे कश्चिदपि हेतुर्न सिध्येदित्यर्थः—

तथा हि—न तावदवयविनि गुरुत्वं न जायते, परमाणुगुरुत्वपरिशेषप्रसङ्गात् तथा च त्वयाऽनभ्युपगमात्, अयुक्तेश्च । कार्यगुरुत्वादेव ह्यणुगुरुत्वं कल्पयसि । जातस्य च न स्वाभावतः पतनहेतुत्वाभावः । प्रतिबन्धात्कार्यानतिरेक इति चेत्, किमयं प्रतिबन्धोऽवयविगुरुत्वस्य ? उतावयवगुरुत्वस्य ? नाद्यः; परमाणुगुरुत्वस्यैव [प्र] पतनहेतुत्वप्रसङ्गात् । तथा सति गुरुत्वात् पतनं द्रवत्वात्स्यन्दनमिति तत्तत्क्रियावन्निष्ठगुरुत्वादिकल्पनभङ्गापाताच्च । अतो वरमवयविनि गुरुत्वाद्यनुत्पत्तिकल्पनम्; तत्र चोक्तो दोषः ।

न द्वितीयः, कदाचिन्निष्कम्पेऽवयविनि शाखाफलहस्तादिलम्बनाभावप्रसङ्गात् । तथा च कथमवयव्यपि तत्र लम्बेत ? संयोगान्तरादर्शनात् लम्बमानोऽवयवी स्वावयवमपि लम्बयतीति चेन्न; सर्वावयवलम्बनप्रसङ्गात् । सङ्घातवादिनस्तु यथार्हं प्रतिब[न्धां]द्धांशेऽलम्बनोपपत्तिः । कार्यगुरुत्वोत्पत्तौ कारणगुरुत्वं नश्यतीति चेन्न; अपसिद्धान्तात्, रूपादिष्वपि तथात्वप्रसङ्गात् । अथ कार्यगुरुत्वस्यातिमन्दत्वात्सूक्ष्मं पतनवैषम्यं दुर्ग्रहमिति, तदपि न; मान्द्यकारणादृष्टेः, कल्पकासम्भवाच्च । अतस्तन्तुतत्कार्यपटसमुदायोन्माने पटद्वयोन्मान इव गुरुत्वान्तरकार्यं दुस्त्यजम्, आदिशब्देन द्रवत्वगन्धादिसंग्रहः **स्वकार्यं** त[त्त]दुचितं कार्यमित्यर्थः । तथाऽप्यनन्यथासिद्धभेदकभूम्ना भेदसिद्धौ गुरुत्वान्तरकार्यादर्शनं कथंचिदन्यतरप्रतिबन्धेन नेयमित्यभिप्रायेण शङ्कमानं प्रत्याह—**नान्यत्वमिति** ।

यद्यपि नामभेदाभेदावर्थभेदाभेदयोरप्रयोजकौ, तथापि पर्यायातिरिक्तो विशेषणविशेष्यभावानर्हो वाचकभेद इह नामभेदः । स च सिंहव्याघ्रशब्दवत् स्ववाच्यं भिन्द्यात् । संख्याभेदोऽप्येकस्यैव द्वितीयादियोगाद्यद्यपि स्यात्, तथाऽपि मैवमत्र; बहवस्तन्तवः, एकः पट इति विभजनात् । व्यवहृतिरिहार्थक्रियासिद्ध्यर्थो व्यापारः । पटाद्यर्थं तन्त्वादय उपादीयन्ते, पटादयस्त्वाच्छादनाद्यर्थम् । न च तन्त्वादिमात्रे पटादिधीः, पटादिषु वा तन्त्वादिधीरिति धिषणाभेदः । आकारभेदश्च व्यवस्थिताश्रयो वृत्तचतुरश्रत्वादिः । पूर्वकालीनास्तन्त्वादयः पटादयस्तु पश्चाद्भाविन इत्येवंविध इह कालभेदः । आदिशब्देन कारणभेदादिसंग्रहः । अंशुप्रभृतयस्तन्त्वादीनां पटादीनां तु तन्त्वादय इति नियतोऽत्र कारणभेदः । कार्यभेदश्च एवं

नियत एव। कारणस्यैव च कार्यत्वे कारकव्यापारवैयर्थ्यं स्यादिति भेदहेतवः। एषामन्यथासिद्धिमाह—**द्रव्याभेदेऽपीति**। तुशब्दोऽवधारणे। उपादानोपादेयतयावस्थाद्वयवति द्रव्ये घटपटवद्भेदंसाधयितुं न शक्नुवन्तीत्यर्थः अत्र दुस्तरप्रतिबन्ध्यभिप्रायेण दर्शयति—**पत्रताटङ्कवदिति**। पत्रस्य हि कुण्डलितस्य नियतं नामान्तरं दृष्टम्। सफलश्चावस्थान्तरेण कारकव्यापारः, न ह्यत्रावयव्यन्तरोत्पत्तिः। आकुञ्चनप्रसारणपद्मसंकोचविकासादिष्वपि तत्कल्पनाप्रसङ्गात्।

न चैकेनावयवेनावयव्यारम्भः, असमवायिकारणासम्भवात्। अवयवावयवसंयोगस्तत्रासमवायिकारणमिति चेन्न; तस्यान्यार्थत्वात्। अन्यथा अंशूनां तन्तुवत् पटाश्रयत्वमपि स्यात्। न च तद्युक्तम्; आरब्धकार्यैरवयवैस्तदैवावयव्यन्तरारम्भानभ्युपगमात्। तत्र हि सप्रतिघत्वविरोधाद्बिभेषि। एवं संप्रतिपन्नावस्थाभेदमात्रानादरेण द्रव्यान्तरकल्पनेऽपि तमेव विरोधं प्रसञ्जयति—**नो चेदिति**। अंशांशिनोः—अवयवावयविनोरित्यर्थः। उक्तप्रसङ्गे तदभिमतमेव हेतुमाह—**उभयोरिति**। द्वयोर्द्रव्ययोरन्यतरस्य वा स्पर्शहीनत्वे मिथः प्रतिरोधो नास्ति। इह तु न तथेत्यभिप्रायेणोभयोरित्युक्तम्। अवयवावयविनोरेकत्र वृत्तिर्नास्तीति चेत्, समवायिदेशैक्याभावेऽपि संयोगिदेशैक्यमङ्गीकरोषि, तत्र कथं तन्त्ववष्टब्धनभःप्रदेशे पटसंयोगः, माभूदिति चेत् मूर्तामूर्तसंयोगविलोपप्रसङ्गः। मेरुमन्दरादीनामप्यविभक्ताकाशप्रदेशवृत्तावविरोधः स्यात्; नीरक्षीरादिमेलने का वार्ता? हन्त! स्वसिद्धान्तं प्रस्मृत्य पृच्छसि। एतेन भूमावुन्मज्जति, निमज्जतीत्यादिसिद्धिनिदर्शनमपि निहतम्। तस्मादवयवावयविव्यतिरिक्तविषय एव सप्रतिघत्वविरोधव्यवस्थापनमपि निर्मूलमिति॥ २०॥

आनन्द० प्रसङ्गात्मिकां सङ्गतिमाह—**एवमिति**। नन्ववस्थारूपकार्यभेदाङ्गीकारे तस्यावस्थावतो भेदात् 'तदनन्यत्वमारम्भणशब्दादिभ्य' इत्यधिकरणविरोधः; तत्र कार्यमात्रस्याभेदाङ्गीकारादित्याह—**अयमेवेति**। तत्रापि कार्यद्रव्यस्यैवाभेदस्साधित इत्यर्थः।

ननु कार्यं कारणमिति विभाग एव नास्ति; सतामेव द्रव्याणां विसृष्टचुल्लासविक्षेपैः पुराणादिष्वाविर्भावमात्राङ्गीकारादुत्पत्त्यभावात्साङ्ख्यपक्ष एव युक्त इत्यत्राह—**विसृष्टीति**। विसृष्टिः—विसर्गः; यथा कूर्मादेराकुञ्चितानामवयवानां प्रसारणम्। उल्लासः—विकसनं; यथा मुकुलीभूतस्य (पद्मादेः) करवीरादेः। विक्षेपः—यथा पिण्डीभूतस्य रजसः सर्वतः स (सम) र्पणं (जलादेः विस्तारकारणम्)। यद्यपि क्वचिद्विसृष्टचादय उक्ताः; तथाऽपि ते न सर्वत्र कार्येषु; किन्तु कूर्माद्यङ्गप्रकाशनमिव पूर्वं विसृष्टप्रच्छन्नेष्वेव। तथा च क्वचित्पूर्वमुत्पन्नस्य नित्यस्य वा भगवद्विग्रहादेराविर्भाव इत्यर्थः। तत्र प्रमाणमाह—**परिणामेति** 'सदेव

सोम्येदमग्र आसीत्' 'तत्सृष्ट्वा' 'प्रकृतेः परिणामास्ते' 'महदाद्या विशेषान्ताः' इत्यादौ परिणामवचनाबाधाय विसृष्टयादेः क्वाचित्कताकल्पनमिति भावः।

ननु परिणामवचनमेव विसृष्टयादिपरं भवत्वित्याह—**आविर्भावेति।** व्यवस्थाद्वयं—आविर्भावः जन्मेति व्यवस्थाद्वयमित्यर्थः। तथा च सर्वत्र विसृष्टयाद्यङ्गीकारे आविर्भावस्यैव सार्वत्रिकत्वान्व्यवस्था न स्यादिति भावः। **तदिहेति**—मृदयं कुम्भः तन्तवः पट इति प्रत्यक्षं, सदेवेत्याद्यागमः। **कार्यद्रव्यस्येति**—तस्मिन्नपि कारणगुणप्रक्रमेण गुरुत्वाङ्गीकारादिति भावः। **सम्भूय**—संहत्य। **न सिध्येदिति**—सम्भावनायां लिङ्। **परमाणुगुरुत्वेति**—द्व्यणुकादीनामवयवित्वादिति भावः। इष्टापत्तिं निरस्यति—**तथाचेति**। अयुक्तिमेवाह—**कार्यगुरुत्वादेवेति। जातस्य चेति**—कार्ये उत्पन्नस्य गुरुत्वस्येत्यर्थः। **परमाणूगुरुत्वस्येवेति**—द्व्यणुकादिगुरुत्वानामवयविगुरुत्वत्वादिति भावः। इष्टापत्तिं निरस्यति—**तथा सतीति। ततो वरमिति**—गुरुत्वकार्याभावादिति भावः। इष्टापत्तौ बाधकमाह—**तत्र चोक्तो दोष इति**। परमाणुगुरुत्वकल्पना न स्यादिति दोष उक्त इत्यर्थः। **तथा चेति**—अवयवलम्बनाभावे तत्समवेतावयविनो लम्बनासम्भवादिति भावः। अप्रतिबद्धगुरुत्ववद्द्रव्यान्तरसंयोगात् बद्धपाषाणलतान्यायेनावयवी लम्बतामित्यत्राह—**संयोगान्तरेति**। संयोगान्तरादृर्शनादिति क्वचित्पाठः। तदा सम्बन्धविशेषादवयवी स्वावयवमपि लम्बयतीति कल्प्यते प्रत्यक्षदर्शनादित्यर्थः। **सर्वावयवेति** अविशेषादिति भावः। **रूपादिष्विति**।

नन्वस्तु रूपादिष्वापादितः प्रसङ्गः को दोषः? इति चेन्न; तथा सति तन्तूनां विभागेन पटनाशे उत्पादकाभावाद्रूपादिकं न स्यात्। न च कारणगुणप्रक्रमेणोत्पत्तिः; परमाणावपि नाशात्। न च नित्यत्वात्परमाणुगतानां न नाश इति वाच्यं; तथा सति पटदशायां तन्तूनां प्रत्यक्षता न स्यात्। न चेष्टापत्तिः; अस्मिन् पटे त एव तन्तव इति सर्वानुभवविरोधादिति भावः। **कल्पकासम्भवाच्चेति**—नन्ववयव्यतिरेक्यकल्पकमेव कल्पकमिति चेत् न; तस्यैवासिद्धेरिति भावः। रसादिरादिशब्दार्थः। कल्पकमाशङ्कते—**तथापीति**। **अत्र**—तन्तुपटस्थले। **नैवं द्रव्यान्तरयोगनिमित्तव्यवहारो न भवतीत्यर्थः**। तदेव दर्शयति—**बहव इति**।

कारणभेदादीत्यनेन कार्यभेद उच्यते। **कार्यभेदश्चैवमिति**—पटस्याच्छादनरूपं कार्यम्; तन्तूनां पटादिरूपं कार्यमियर्थः। एतेषामनुग्राहकं तर्कमाह—**कारणस्यैवेति**। अनुकूलतर्काभावान्न साधक इत्याह—**एषामिति। दुस्तरेति**—तथा च तत्र व्यभिचारोऽपीति भावः। व्यभिचारस्थलान्तरमप्याह—**आकुञ्चनेति। असमवायिकारणेति**—अन्यथा द्व्यणुकमेकस्मादेव परमाणोरुत्पद्येतेति भावः। **अवयवावयवेति**—अवयवस्य चेदवयवास्तेषां संयोग इत्यर्थः। **अन्यार्थत्वादिति**—अवयवजनकत्वेन

पटरूपवदन्यथासिद्धत्वादित्यर्थः। **अन्यथेति**—कार्यद्रव्यस्यासमवायिसामानाधिकरण्यनियमादिति भावः।

आरब्धकार्यैरिति—द्रव्यासमवायिकारणाश्रयस्य समवायिकारणत्वनियमादवयवावयवानां आरब्धावयव्यात्मकावयवतया तत्काल एवावयव्यन्तरजनकत्वं न सम्भवतीत्यर्थः। अनभ्युपगमे हेतुमाह—तत्रेति। यद्वा—नचैकावयवेत्यारभ्य पत्रताटङ्कादिस्थलपरिहाराशङ्कापूर्वकं नो चेदित्यस्यावतारिकाग्रन्थः।

नन्ववयवस्य स्वावयववृत्तित्वं अवयविनोऽवयववृत्तित्वमिति **नैकत्र वृत्तित्वमिति** शङ्कते—**अवयवावयविनोरिति। संयोगिदेशक्यमिति**—एकत्र नभस्थलेऽवयवावयविनोस्संयोगसम्बन्धवृत्तिरिति भावः। **मूर्तामूर्तेति**—यद्यपि कार्यानारम्भकाले परमाण्वाकाशसंयोगे न विरोधः; तथाऽपि घटादीनां मूर्तानाममूर्तैस्संयोगं ब्रवीषि संयोगजसंयोगं स न स्यादिति भावः। यदि स्पर्शवतोस्सप्रतिघत्वविरोधो न स्यात्तत्राह—**मेरुमन्दरेति**।

ननु सप्रतिघत्वविरोधे नीरक्षीरयोरेकनभः प्रदेशवृत्तिः कथं ? भूमौ सिद्धादीनां विमज्जनं कथम् ? तस्मात् स्पर्शवतां सप्रतिघत्वव्याप्तिरवयवावयविव्यतिरिक्तस्थले नीरक्षीरादिस्थल इव संकुचिता न वर्तत इत्यत्राह **नीरक्षीरेति। स्वसिद्धान्तं प्रस्मृत्येति**—नीरक्षीरादिष्ववयवविभागेन परस्परानाक्रान्त प्रदेश एव परस्परावयवानां वृत्तिस्सिद्धा। निमज्जनादावपि भूविभागेन प्रवेशः; झडिति जलनिमज्जने विभक्तजलसन्धानन्यायेन पुनस्सन्धानम्। तच्च सूक्ष्मकालत्वात् ज्वालानाशन्यायेन न प्रतीयते इति किरणावल्लघादौ प्रतिपादितमित्यर्थः। **तस्मादिति**—तथा च संकोचे न प्रमाणमिति भावः॥ २०॥

अक्ष० इत्थं पृथिव्याद्युपादानं निरूपितं। अथ उपादानातिरिक्तमवयविकार्यद्रव्यं नास्तीति निरूप्यते—**कार्यति**। घटकपालादिरूपकार्यद्रव्योपादानयोर्भेदे कपालादिरूपोपादाने तद्भिन्नं घटादिरूपमवयविकार्यं समवेतमस्तीत्युपगम इति यावत्। किमत्रानुपपन्नमित्यत्राह—**नेति** केवलकपालादिरूपोपादानगुरुत्वापेक्षया घटकपालादिरूपकार्योपादानोभयगौरवस्याऽधिकतया तदुचितकार्यस्य कपालादिपतनापेक्षया पतनातिरेकस्यावश्यकत्वेन तददर्शनमेवात्रानुपपन्नं स्यादिति भावः[1]।

अधिकतद्गौर वादेरिति। अत्र तयोः कार्योपादानयोः मेलने यद्गौरवं तदधिकमित्यन्वयः अथवा तस्य कार्यत्वस्य गौरवादेरित्यन्वयः। अधिकश्चतत् तद्गौरवादि चेति समासः। अत्र पतनातिरेको नाम तुलायां धरणे उन्माने

---

१. **अधिकतो गौरवादेरिति** उ० प्र० को० पाठः श्रीचरणैस्तु अधिक तद्गौरवादेरित्येवपाठः आदृतः।

एकपलद्रव्यपार्श्वापेक्षया द्विपलद्रव्यपार्श्वस्येव उपादानद्रव्यमात्रपार्श्वापेक्षया अवयविद्रव्यपार्श्वस्य अधिको यो देशसंयोगसमुदायः। अत्रादिशब्दः द्रवत्वादिपरः। तथापि भेदकभूम्ना भेदसिद्धौ गुरुत्वान्तरकार्यादर्शनं केनचित्प्रतिबन्धादप्युपपद्यत इत्यत्राह—**नान्यत्वमिति**। अवयवावयविनोर्नामभेदः पर्यायातिरिक्तो वाचकशब्द भेदः। संख्या भेदः—एकोऽवयवी बहवोऽवयवाः इति व्यवहृतिभेदः। व्यवहृतिरिह स्वसिद्ध्यर्थो व्यापारविशेषः तद्भेदः। अवयविसिद्ध्यर्थमवयवा उपादीयन्ते तत्सिद्ध्यर्थन्तु तदवयवा इति धिषणा बुद्धिः तद्भेदः अवयविनि घटः पट इति बुद्धिः नैवमवयवेषु किन्तु कपालाः तन्तवः इति। आकारभेदः अवयविनः **पृथुबुघ्नोदरत्व**—चतुरश्रत्वादिः नैवमवयवानां। कालभेदः—पूर्वभाविनोऽवयवाः अवयवीत्वनन्तर भावी। सन्तोऽप्यमी भेदाः नावयविनं भिन्द्युरिति भावः। कथमितिचेत्तत्राह—**द्रव्याभेद इति**। द्रव्यभेदाभावेऽपि अवस्थाभेदमात्रेणाऽपि। **इह**—अवयविनि। **ते** उक्तनामादिभेदाः उपपन्नास्स्युरित्यर्थः। तत्र दृष्टान्तमाह—**पत्रेति**। यथा एकस्य तालपत्रस्यैव कुण्डलीकरणे ताटङ्कमिति नामादिभेदः नहि तत्र तालपत्राद तिरिक्तं ताटङ्कमुत्पद्यत इति भवन्तोऽपि मन्यन्ते तालपत्रस्यैकत्वेन तत्रारम्भकसंयोगस्य दुर्वचत्वात्। एवमनभ्युपगमे बाधकमाह—**नोचेदिति**। **अंशांशिनोः**। अवयवावयविनोः। उभयोरपि स्पर्शवत्वसाम्यात्। **प्रतिर्हतिः**—प्रतिघातः द्वयोर्घटयोरिव एकघटस्यापि अवयवभिन्नस्य तत्सहभावेन एकस्मिन्भूतलादिदेशे संयोगस्य प्रतिरोधस्स्यादिति भावः।

इत्थं वृत्त्यादिखेदो न भवति न च नः कल्पनागौरवं स्या-
द्वस्त्रे दीर्घैकतन्तुभ्रमणविरचिते वस्त्रधीर्नापि बाध्या।
देशाधिक्यं समेतेष्वणुषु न हि ततः स्थूलधीबाधशङ्का
संसर्गादेर्विशेषादवयविपरिषद्राशिवन्यादिवादः ॥ २१ ॥

सर्वा०। परपक्षे प्रसञ्जितानां दोषाणामभावात् स्वपक्षस्य सम्यक्त्वमाह—**इत्थमिति** ॥ इत्थम्—अवस्थाभेदमात्रेण निर्वाहे सतीत्यर्थः। यद्वा, त्वत्पक्षवदिति। उक्तस्सप्रतिघत्वविरोध इह वृत्तेः खेदः, अवयवेषु वृत्यनुपपत्तिर्वा। यदि प्रत्यवयवमविभागेनावयवी वर्तते तदैकावयवदर्शनेऽप्यवयव्युपलभ्येत, जातिरिव प्रत्याधारम्। अथ विभज्य, अवयवातिरिक्तांशभेदेनानवस्थापातः। बलवत्प्रमाणोपनीतेऽर्थे संप्रतिपन्नवद्वृत्त्यनुपपत्तिर्विलीयत इति चेन्न; प्रमाणबलस्यात्र निरस्तत्वात् आदिशब्देनोत्पत्तिनाशानुपपत्तिस्संगृह्यते। तथाहि—पृथुतरपटनिर्माणप्रक्रमे द्वितन्तुकादिपटपङ्क्तिरुत्पद्यते नवा? न चेत्, बुद्धिशब्दान्तरादिरवस्थाभेदादेवेति सिद्धं स्यात् उत्पद्यते चेत् त्रितन्तुकाद्यारम्भदशायां पूर्वपूर्वं तिष्ठति न वा? पूर्वत्र तदनारम्भः, आरब्धकार्यैस्तदानीमवयव्यन्तरानारम्भात्। न च द्वितन्तुकादिस्त

न्त्वन्तरसहितस्त्रितन्तुकाद्यारम्भक इति युक्तम् । इह तन्तुषु पट इत्यादिस्वाभिमत-व्यवहारविरोधात् ।

पूर्वसिद्धपटैस्सार्द्धं तन्तुभिः पटसम्भवे ।
पटपङ्क्तिस्समीक्ष्येत क्रमादाधिक्यशालिनी ॥

प्राक्सिद्धानां पटादीनामुत्तरोत्तरजन्मनि ।
अहेतुको विनाशश्च स्थिरपक्षे न युज्यते ॥

न चेदुपलम्भविरुद्धनाशसन्ततिकल्पनाप्रसङ्गः । एवमेकद्वित्र्यादितन्त्वपकर्षणदशायामपि खण्डपरम्परोत्पत्तिनाशपरम्पराक्लृप्तिः क्लिष्टतरा । लाघवशालिनि सङ्घातमात्रपक्षे राशिन्यायान्नासौ दोषः ।

ननु गौरवभयादवयविपरिहारे सौगतवत्स्वरूपविशेषमालम्ब्य तन्त्वादीनां संयोगोऽपि त्यज्यतामित्यत्राह—**न चेति** ।अत्र हि परैरप्यसमवायिकारणतयाऽभिमता दृष्टा च संयुक्तावस्था स्वीकृतेति नास्माकमिह काचित्कल्पना । कुतस्तद्गौरवं सम्भवेदिति भावः । स्वलक्षणसमुदायवादिनाऽपि नैरन्तर्यरूपोऽतिशयः कश्चिदिष्यते; अन्यथा दूरस्थवदेकताभ्रान्तिः पुञ्जबुद्धिर्वा न स्यात् । त्वमपि विभूनामणूनां च नित्यानामपि हेतुभेदैरवस्थान्तरापत्तिमङ्गीकरोषि; सर्वद्रव्यस्वरूपनित्यत्वं तदवस्थाभेदं च वदतामपि तथा किं न स्यात् ? संयुक्तावस्थाऽपि हि परिणामः । कथं तर्हि नित्यानित्यविभागः ? इत्थम्—द्रव्यतदवस्थयोस्तथाभावादेव, द्रव्यविवक्षायां त्ववस्थाविशिष्टवेषेणानित्यत्वव्यवहार इति ।

ननु तन्तव एव व्यतिषङ्गविशेषविशिष्टाः पट इति भवतां राद्धान्तः ❀ पटवच्चेति सूत्रे दर्शितः । तथा सति दीर्घैकतन्तुपरिवर्तनविशेषनिष्पादितेऽवयविनि कथं पटबुद्धिः स्यात् ? अनेकतन्तुसङ्घातासिद्धेरित्यत्राह—**वस्त्र इति** । नहि वयं तन्तुगतमेकत्वं द्वित्वबहुत्वादिकं वा पटधीनिबन्धनं नियच्छामः; यथादृष्टि सर्वसम्भवात् । त्वंतु स्वपक्षदोषमस्मत्पक्षस्थं मन्यसे । प्रदर्शितं हि पत्रे तादङ्निष्पत्तावेकस्यावयवस्यानारम्भकत्वम्; अतस्तवैव तत्र पटधीबाधः । एकस्यारम्भकत्वेऽतिप्रसङ्गोपि तवैव । स्यादेतत्, अवयविनमनभ्युपगच्छतामन्ततः पर्वतादयोऽपि परमाणव एव संहताः स्युः । ते न प्रत्यक्षाः; अतः * सर्वाग्रहणमवयव्यसिद्धेरित्यक्षपादोक्तमनतिक्रमणीयं स्यात्, स्थूलद्रव्याभावे चाणुसंहतौ स्थूलत्वाध्यासोऽपि न सिध्येदिति; तत्राह—**देशाधिक्यमिति** ।

अयंभावः—स्थूलधीरित्यवयविधीर्वा ? परिणामविशेषधीर्वा ? प्रत्यक्षयोग्यत्वधीर्वा ? प्रत्येकदेशादधिकदेशत्वधीर्वा ? नाद्यः, तदभावप्रसक्तेरिष्टप्रसङ्गात्। न द्वितीयः, संहतैरेवावयविवत्परिणामान्तरस्य सृष्ट्युपपत्तेः । अणुष्वेव कथं विरुद्धं स्थूलत्वं स्यादिति चेदेकत्वाद्याश्रयेष्वेव कथं द्वित्वादिकमिच्छसि ! अपेक्षाबुद्धि-

संगृहीतान्यानुबन्धसामर्थ्यादिति चेद्बहुद्व्यणुकेषु सम्भेदसामर्थ्यादेव परिमाणान्तरमपि पश्यन्तु भवन्तः। न तृतीयः, एकैकस्याप्रत्यक्षत्वेऽपि समुदायवशाद्दृश्यत्वोपपत्तेः यथैकैकस्य दवीयसः केशहिमादेरदर्शनेऽपि संहतानां दृश्यत्वम्; एकैकस्याप्यासत्तौ दर्शनाद्योग्यत्वमस्तीति चेदणूनामपि त्रसरेणुमात्ररूपाणां सामग्रीसम्भवे तथैव स्यात्। न चतुर्थः, माषादिराशिषु संहतिभेदैर्देशतारतम्यदृष्टेः।

ननु तत्तत्परिमाणावयविद्रव्याभावे तत्प्रयुक्तदेशन्यूनाधिकत्वं दुर्निरूपं स्यात्। मैवम्; न ह्यवयविनिरूपणेनैव देशाधिक्यादिनिरूपणम् सुरभित्वगन्धत्वादेरिव सम्बन्धिन्यूनाधिकभावेनापि तदुपपत्तेः। द्व्येषु नैवमिति चेत् न, द्व्यणुकोत्पत्तेः पूर्वक्षणे संयुक्ताणुद्वयस्य प्रत्येकदेशादधिकदेशत्वावश्यंभावात्। अन्यथा सर्वपरमाणूनां समानदेशत्वे प्रागुक्तदोषप्रसङ्गात् द्व्यणुकान्तरपरिच्छिन्नस्स देश इति चेन्न; सहवृत्त्ययोगात्, अन्यथा परिच्छेदासिद्धेः। समवायिनस्संयोगिनो वा देशस्याभावे कथं तत्र देशाधिक्यमिति चेन्न; आकाशाद्यंशभेदेन तदुपपत्तेः। कथं निरवयवस्यांश भेद इति चेदात्मानं पृच्छ। कर्णशष्कुल्याद्युपाधिपरिच्छित्त्या नभसि नानाश्रोत्राणि कल्पयसि। भेर्यादिशब्देषु श्रूयमाणेषु तरङ्गवृत्त्या तत्तदनन्तरदेशेषु शब्दोत्पत्तिं साधयसि। वेणुरन्ध्रादिविशेषभागाश्च प्रसिद्धाः। आकाशादेरप्रत्यक्षत्वात्तदंशतारतम्यं दुर्ग्रहमिति चेन्न; प्रत्यक्षाकाशवादिनं प्रति हेत्वसिद्धेः। त्वयाऽपि माषादवयविनो महीधरस्याधिकदेशत्वं गृह्यते। आलोकमण्डलांशभेदैस्तत्र देशाधिक्यमिति चेन्न; आलोकस्यापि नभसि न्यूनाधिकदेशवृत्तित्वदृष्टेः। परिमाणाधिक्यमात्रमेव पर्वतादिषु गृह्यत इति चेदगृह्यमाणमपि देशाधिक्यं तत्रास्ति न वा? अस्ति चेत्सङ्घातेऽपि कश्चोद्यावकाशः? न चेत्तत्तद्देशेषु चक्षुःप्रसरादिनिरोधकत्वं न स्यात्। अन्यथाऽल्पदेशवर्तिनः सर्वत्र निरोधकत्वप्रसङ्गात्। अतः परस्पराक्रान्तदेशावष्टम्भेन संहन्यमानेषु त्रसरेणुषु सुग्रहमेव देशाधिक्यम्, देशस्त्वालोकाकाशादिर्यः कश्चिद्यथायोग्यमस्तु। अत एव प्रधानाभावादणुषु स्थौल्यारोपोऽपि न स्यादिति चोद्यमपि निस्तीर्णम्।

तथाऽपि यदि संसृष्टास्तन्तव एव पटस्ततस्तन्तुराशिमात्रेऽपि पटधीः स्यादित्यत्राह—**संसर्गादेरिति**। न हि त्वयाऽपि तन्तुसंसर्गमात्रं पटस्यासमवायिकारणमिष्यते; तथा सति कुविन्दादेव्यापारनैरपेक्ष्यप्रसङ्गात्। अतो यादृशात्संसर्गं विशेषादवयवी तवोत्पद्यते तादृशसंसर्गविशिष्टास्तन्तवः पट इति क्वातिप्रसङ्गः? आदिशब्देन संसर्गिद्रव्याणि देशकालौ च गृह्यन्ते। द्वितीयेन त्वादिशब्देन यूथपङ्क्तिमण्डलसेनाव्यूहपूर्णचतुरश्रादिसंग्रहः। परिषदाद्युपादानं दृष्टान्तार्थम्। मत्वर्थीयमपि शूरवती सेनेतिवत् प्रत्येकसमुदायभेदविवक्षया स्यादिति।

भिन्नानामेव संश्लेषे संघातैक्यानुसारतः।
संयुक्तौ द्वाविति प्रख्या राशिद्वित्वनयाद्भवेत्॥

महत्त्वैकत्वयुक्तत्वप्रभृतेरपि राशिवत् ।
संयुक्तद्रव्यनिष्ठत्वान्न संयोगे प्रसञ्जनम् ॥
घनत्वश्यामतादीनां वनैकाधिकरण्यतः ।
न स्याद्वृक्षबहुत्वादेर्घनत्वाद्यैर्विशेषणम् ॥
तन्तवः सितरक्ताद्याः पटचित्रानुयायिनः ।
अवयव्यनपेक्षत्वं चूर्णसंहतिचित्रवत् ॥
रूपादीनामचित्रेऽपि वदन् वैषम्यदर्शनम् ।
अपह्नुवीत वैयात्यात्खपुष्पादेरदर्शनम् ॥
या चासौ धारणाकृष्टचोरुपपत्तिरसूत्र्यत ।
तादृग्भूतावयव्यर्थे संवाते सा भविष्यति ॥
गाढावयवसंश्लेषरहितेऽवयविन्यपि ।
धारणाकर्षणे न स्तस्तथा चाभ्युपगच्छसि ॥
धारणाकर्षणे चात्र धृताकृष्टानुबन्धतः ।
दृढावयवसंश्लेषसहितेऽवयविन्यपि ॥
अंशान्तरेषु तेऽस्माकं सिद्धे जतुगृहीतवत् ।
तृणोपलादिजतुसंगृहीतं यदुदाहृतम् ॥
तत्राप्यवयवी नेष्टः कश्चिज्जतुतृणादिषु ।
पाशाद्यैरपि पश्वादेर्धारणाकर्षणे क्षमे ॥
किं तत्र पशुपाशादिष्ववयव्यभ्युपेयते ।
संग्रहप्रभवं चात्र धारणाद्यनुभाष्य तु ॥
पक्षिलस्तन्मतस्थो वा नोत्तरं सम्यगब्रवीत् ।
आरब्धकार्यैरारम्भो मिथस्सप्रतिघत्वतः ॥
न्यायवार्तिकटीकादौ क्षिप्तस्संमतिरत्र नः ।
प्रत्यक्षातीन्द्रियोपात्ते प्रत्यक्षत्वं च दुर्भणम् ॥
चाक्षुषाचाक्षुषद्रव्यसंयोगे चाक्षुषत्ववत् ।
मुधा चोदाहृतं कैश्चिद्धिमवत्परमाणुकम् ॥
टीकाकारस्तु तत्राह सूक्ष्मद्रव्योपलक्षणम् ।
विशेषानुपलम्भेऽपि राश्येकत्वमतिर्यथा ॥
वृक्षादिष्वपि तद्वत्स्याद्यथादृष्टि व्यवस्थितेः ।
एकदेशे समस्ते च वृक्षलक्षणसंभवे ॥

वृक्षधीरुपपद्येत संग्रहाच्चापृथङ्मतिः ।
* सर्वाग्रहणमवयव्यसिद्धेरिति सूत्रयन् ॥
प्रत्यक्षव्यतिरिक्तान्तक्लृप्तिदौस्थ्यपराहतः ।
* सेनावनवदित्यादावप्रत्यक्षाणुसूत्रणम् ॥
त्रसरेण्ववधिस्थाणुस्थापकेषु न शोभते ॥ २१ ॥

आनन्द० संगतिं दर्शयति–**परपक्ष इति** । दृष्टान्तपरत्वे स्वारस्यादाह–**यद्वेति** । अथ प्रत्यवयवं अविभागेन वर्तते उत विभागेन ? इति विकल्पमभिप्रेत्य आद्यं दूषयति—**यदि प्रत्यवयवमिति** । द्वितीयं दूषयति—**अथेति** । वि (अवि) भागस्त्ववयवमादायैव । पूर्वावयववृत्त्यर्थमवयवान्तरस्वीकारे तस्मिन्नप्यवयवसम्बन्धस्य वक्तव्यतया तत्राप्युक्तविकल्पेनावयवान्तराङ्गीकारे अनवस्थेति भावः । **सम्प्रतिपन्नवदिति**—संयोगादिवदित्यर्थः । आरब्धकार्यैरिति–तथा सति कार्योत्पत्तेरविरामप्रसङ्गादिति भावः ।

नचेति—द्वितन्तुकपटादेस्तन्त्वन्तरस्य चानारब्धकार्यत्वादिति भावः । इहेति—इह पटः तन्तौ च पट इति व्यवहारप्रसङ्गादिति भावः । द्वितन्तुकपटादिभिः पटान्तरोत्पत्त्यङ्गीकारे उपलम्भविरोधोऽपीत्याह—**पूर्वसिद्धेति । समीक्ष्येतेति**—न दृश्यत इत्यर्थः । क्रियातिपत्तौ लिङ् । ननु पूर्वपूर्वेषां द्वितन्तुकानां त्रितन्तुककाले नाशात् पटपङ्क्त्यनुपलम्भो न दोष इत्याशङ्क्याह—**प्राक्सिद्धानामिति । स्थिरपक्षे इति**–तथा च बौद्धपक्षपरिग्रहप्रसङ्ग इति भावः । द्वितीयं दूषयति—**न चेदिति** । न युज्यते इत्येतन्न चेदित्यर्थः—युज्यते चेदिति यावत् । **तथा च** नाशसन्ततिरनुपलम्भबाधितेति भावः ।

केचित्तु–प्राक्सिद्धानामित्यारभ्य न युज्यते इत्यन्तं पूर्वशेषतया व्याख्याय; द्वितीयं दूषयति–न चेदितीत्याहुः ।

एवमिति—अनुपलम्भबाधितेऽपीत्यर्थः । कल्पनीयेति शेषः । **लाघवशालिनीति**–अतिरिक्तद्रव्याभावेन लाघवादिमतीत्यर्थः । अवयविवादिभिरपि तन्त्वादिसंयोगाङ्गीकारान्नास्माकमेव संयोगाङ्गीकारे गौरवमित्याह **अत्र हीति** । किंचात्र संयोगस्य प्रत्यक्षसिद्धत्वान्न कल्पनेत्याह—**दृष्टा चेति** । स्वलक्षणवादिनाऽपि स्वलक्षणातिरिक्तं संयोगस्थानिकं व्यवहारार्थमङ्गीकृतमित्याह–**स्वलक्षणेति । दूरस्थवदिति**–दूरस्थपदार्थेष्विव समीपस्थपदार्थेष्वपि पुञ्जबुद्धिर्न स्यादित्यर्थः ।

नन्ववस्था विकारः । नच सा नित्यानां युक्ता । तथात्वे विनाशित्वप्रसङ्गेन नित्यताव्याघातादित्यत्राह–**त्वमपीति** । बहूनामाकाशादीनामपि शब्दादिरूपविकारवत्त्वं अणूनामपि द्व्यणुकसंयोगपाकजरूपादिविकारवत्त्वमङ्गीकरोषीत्यर्थः । **तथेति**–त्वदङ्गीकृतप्रकारेणेत्यर्थः । ननु परिणामो विकारः । सैवावस्था । नच

नित्यानां सा अङ्गीकार्येत्यत्राह–**संयुक्तावस्थाऽपीति**। तद्वद्भवदभिमतासमवायिकारणसंयोगावस्थाऽपि न विरुद्धेत्यर्थः। ननु भवत्पक्षे नित्यस्यापि कार्यत्वान्नित्यानित्यव्यवस्था न स्यादित्याशङ्क्ते–**कथं तर्हीति**। **इत्थमिति**–नामान्तरभजनावस्थाभावादेव नित्यत्वव्यवहार इत्यर्थः। **द्रव्यविवक्षायामिति**—द्रव्यस्य (द्रव्ये) ह्यनित्यताव्यवहारः स्वर्गिन्यानेन विशिष्टवेषेणेत्यर्थः। **यथादृष्टीति**—संयोगविशेषरूपावस्थाबलाद्व्यवहारः। तथा च तादृशावस्थाया अत्रापि सत्त्वात् पटव्यवहारादिसम्भव इत्यर्थः। प्रत्युत तवैव तत्र पटबुद्ध्याद्यनुपपत्तिरित्याह–**त्वं त्विति**। संयोगासम्भवेन तव कारणाभावात्; मम त्ववयवानामेव संयोगादिति भावः। **ते च–परमाणवः। सर्वाग्रहणम्**–परमाणुवत् पर्वतादेरग्रहणम्। अतिरिक्तस्य प्रत्यक्षयोग्यस्यावयविनोऽसिद्धेस्संघातस्याप्यणुवदग्राह्यत्वात्। **स्थूलत्वाध्यासोऽपीति**—आरोप्यस्यान्यत्र सत्त्वनियमात्। तथा च सर्वसिद्धस्थूलधीः क्वचिदपि न स्यादिति भावः।

ननु देशाधिक्यं वा कथं भवेत्? भवतु वा आधिक्यम्; तथाऽप्यणुभूतस्य स्थौल्यं प्रत्यक्षं वा कथं भवेदित्यत्राह–**अयं भाव इति**। **तदभावप्रसक्तेरिति**–अवयव्यभावापादनस्येत्यर्थः। **एकत्वेति**–नच 'अणोरणीयान् महतो महीयान्' इत्यादिश्रुत्या ब्रह्मणि परपक्षवत् स्वाभाविकाणुत्वमहत्त्वप्रसङ्गः इति चेत्; यथैकव्यक्तिगतैकत्वसमनियतं द्वित्वं विरुद्धं तथैकपरिमाणसमनियतं परिमाणान्तरं विरुद्धमिति व्याप्तेः; भगवति तन्महत्परिमाणसमनियततदणुत्वं विरुद्धमिति न तत्स्वाभाविकमिति ध्येयम्।

अन्यानुबन्धः व्यक्त्यन्तरानुबन्धः–सम्बन्धः। **एकैकस्यापीति**–तथा च सर्वथा दर्शनायोग्यत्वाभावात् दृष्टान्तवैषम्यमिति भावः। वैषम्याभावमाह–**अणूनामिति**। **तथैव स्यात्**—दर्शनयोग्यत्वं स्यादित्यर्थः। त्रसरेणुविश्रमादणुपरिमाणस्येति भावः। **नन्विति**—न्यूनाधिकपरिमाणद्रव्याव्यावच्छिन्नस्यैव न्यूनाधिकदेशत्वादिति भावः। **सुरभित्वेति**—यथा कर्पूरधूलिषु पुष्पेषु वा सौरभ्यं न्यूनमधिकं वाऽऽश्रयन्यूनाधिकभावाद्भवति; तथा अत्रापि संयुक्तद्रव्यन्यूनाधिकभावेन अवयव्यभावेऽपि तारतम्यं संभवतीत्यर्थः। **गन्धत्वमित्यत्र** गन्धशब्दो द्रव्यपरः। तथा च गन्धत्वतारतम्यं—परिमलतारतम्यमित्यर्थः। **द्व्यणुकोत्पत्तेःपूर्वमिति**—देशविशेषापादकावयविनोऽभावादिति भावः। **द्व्यणुकान्तर(रावच्छि)परिच्छिन्नेति**—एतद्द्व्यणुकोत्पत्तेः पूर्वं द्व्यणुकान्तरस्य सम्भवेन तस्य देशावच्छेदकत्वेन नानुपपत्तिरित्यर्थः। **सह वृत्त्ययोगादिति**—द्व्यणुकान्तरावच्छिन्नप्रदेशे परमाणुद्वयस्य सप्रतिघत्वविरोधात्सहवृत्त्ययोगादित्यर्थः।

ननु सहवृत्तिर्मास्तु; द्व्यणुकस्य देशतया तत्र वृत्यङ्गीकारे दोषाभावादिति चेत्; **सह वृत्त्ययोगादिति**—परमाण्वन्तरेणापि सहवृत्त्ययोगादित्यर्थः। **अन्यथेति**—

तथाचैकपरमाणुदेश एव परमाण्वन्तरस्यापि वृत्तेः द्व्यणुकस्याप्यधिकदेशावच्छेदकत्वाभावादित्यर्थः।

ननु न्यूनाधिकपरिमाणद्रव्यं देशः। स च संयोगी समवायी वा? तदभावे कथं देशाधिक्यम्? इति शङ्कते—**समवायिन** इति। **आकाशेति**—आकाशाद्यंशभेद इत्यर्थः। प्रदेशभेदाश्च सर्वसिद्धा इत्याह—**वेणुरन्ध्रेति**। **प्रत्यक्षेति**—सिद्धान्ते प्रत्यक्षत्वादिति भावः। प्रतिबन्द्या समाधत्ते—**त्वयापीति**। आकाशाप्रत्यक्षवादिनाऽपि माषावयवापेक्षया महीधरस्योपरिभागेऽधिकदेशत्वं ग्राह्यम्। तत्राकाशव्यतिरेकेणान्यस्याभावादिति भावः। **आलोकस्यापीति**—आलोकमण्डलान्तराभावादिति भावः।

ननु माषापेक्षया महीधरस्योपरिभागे परिमाणाधिक्यमेव (दृश्यते) गृह्यते न देशाधिक्यमिति शङ्कते—**परिमाणाधिक्यमिति**। **न चेदिति**—तत्तद्देशाधिकदेशकत्वाभावादितिभावः। ननु तत्तदधिकदेशकत्वाभावेऽपि तत्तद्देशे चक्षुःप्रवृत्तिनिरोधकत्वमस्त्वित्यत्राह—**अन्यथेति**। अविशेषादिति भावः। तथाचावयव्यनङ्गीकारेऽप्यवयवसंघात एव न्यूनाधिकदेशत्वमित्युपसंहरति—**अत इति**। **देशस्त्विति**—तन्निर्धारणं व्यर्थमित्यर्थः। **अत एवेति**—देशाधिक्यरूपप्रधानस्योपपादितत्वादित्यर्थः। ततः स्थूलधीबाधशङ्केति मूलस्यार्थः—स्थूलधियो या बाधशङ्का—स्थूलधीः कुत्राऽपि नास्तीति या शङ्केति यावत्। सा ततः देशाधिक्यरूपस्थौल्यस्योपपादनान्नेति। **क्वातिप्रसङ्ग इति**-तन्तुराशिमात्रे पटधीप्रसङ्गो नास्तीत्यर्थः। ननु तन्तूनामेवावस्थायोगिनां पटत्वे पटस्तन्तुमानिति न प्रयोगो न स्यादित्यत्राह—**मत्वर्थीयमपीति**। मतोरर्थ इवार्थो यस्येति बहुव्रीहिः। 'मत्वर्थाच्छः' इति स्वार्थिककृत्प्रत्ययः।

ननु घटादीनां संघातात्मकत्वे परस्परसंयोगे सत्येकसंघातत्वापत्त्या एकस्मिन्नेव संयुक्ताविमाविति च द्वाविति च बुद्धिर्न स्यादित्यत्राह—**भिन्नानामेवेति**। भिन्नानामवयवानां **संश्लेषे**—संयोगविशेषे **संघातैक्यानुसारतः**—पृथक् संघातक्लृप्तया संघातद्वयस्य संयोगेऽपि संयोगविशेषावस्थाभेदघटितैकसंघातात्मकत्वाभावात् **संयुक्तौ द्वाविति** बुद्धी राशिद्वय इव सम्भवतीत्यर्थः। अन्यथा महत्त्वादि राश्यादावपि न स्यादिति भावः।

ननु संयोगविशेषावस्थात एव घटादिव्यवहाराः; तर्हि महत्त्वादिकं संयोगस्य स्यादिति तस्यैव द्रव्यत्वापत्तिः; अवस्थाश्रयस्य त्वया द्रव्यत्वाभ्युपगमात्। तथा च घट्टकुट्यां प्रभातमित्यत्राह—**महत्त्वैकत्वेति**। राशिसंयोगादेः द्रव्यनिष्ठतया न संयोगस्य द्रव्यत्वमिति भावः। ननु त्वन्मते संयोगस्यैव घटाद्यवस्थारूपतया महत्त्वैकत्वद्वित्वयुक्तत्वादीनां संयोगविशेषघटादिनिष्ठत्वाभावे महान् घट इत्यादिविशेषणविशेष्यभावप्रतीतिर्न स्यादित्यत्राह—**घनत्वेति**। घनत्वं निबिडत्वं

संयोगविशेषः महत्त्वं वा। **वनैकाधिकरण्यतः**—वनसामानाधिकरण्यात्। वननिष्ठत्वाभावात्तत्रापि घनं वनं नीलं वनमिति प्रतीतिर्न स्यादित्यर्थः। **वृक्षबहुत्वादेः**—वनस्येत्यर्थः।

केचित्तु –वनैकाधिकरण्यतः—घनं वनं श्यामं वनमिति प्रतीत्या वननिष्ठत्वस्य सिद्धेः वृक्षबहुत्वादेः—घनत्वाद्यैस्सह बहवो वृक्षाः घनाः श्यामा इति सामानाधिकरण्यप्रतीतिरित्यर्थः। आदिशब्देन देशसंयोगो विवक्षितः। ननु वननिष्ठमेव घनत्वादिकमित्यत्राह—**वृक्षबहुत्वादेरिति**। ततोऽतिरिक्तस्य वनस्य भवताऽप्यनङ्गीकारात्; तस्य गुणत्वात् तत्र घनत्वादीनामसंभवादिति भावः।

ननु सितरक्तादितन्त्वारब्धे पटे चित्ररूपधीरस्ति; तन्तूनामेव पटत्वे प्रत्येकतन्तुव्यतिरेकेण चित्ररूपाधिकरणपटस्याभावात्तन्तूनां तदधिकरणत्वाभावादाश्रयाभावेन चित्ररूपाभावप्रसङ्गेन चित्रधीर्न स्यादित्यत्राह—**तन्तव इति**। सितरक्ताद्यास्तन्तव एव पटचित्रानुयायिनः। व्यतिषङ्गवशेन पटावस्थापन्नेषु सितरक्तादितन्तुषु विद्यमाननानारूपेष्वेव चित्ररूपव्यवहार इत्यर्थः। तथा च चित्ररूपाश्रयतया नावयव्यभ्युपेयमित्याह—**अवयव्यनपेक्षत्वमिति**। अनपेक्षत्वं—अनपेक्षा। तत्र दृष्टान्तः—**चूर्णसंहतिचित्रवदिति**। सितरक्तादिचूर्णसंहतावयव्यनभ्युपगमादिति भावः।

ननु चूर्णचित्रापेक्षया विशेषात्तन्तुरूपातिरिक्तमेव चित्ररूपम्। नच तन्तवस्तदधिकरणं; युगपद्विजातीयरूपासंभवादित्यत्राह—**रूपादीनामिति**। तन्तुरूपपटरूपादीनामचित्रेऽपि—वैचित्र्याभावेऽपि भेदाभावेऽपीत्यर्थः। **वैषम्यदर्शनं**—**वैषम्योपलम्भनं वदन्**—खपुष्पादेरप्युपलम्भं वदेदित्यर्थः।

नन्ववयव्यनभ्युपगमे एकावयवधृतेऽन्येषामवयवानां धारणं न स्यात्; एकावयवाकृष्टेऽन्येषामाकर्षणं न स्यात्; दृश्यते च मूले धृते वा कृष्टे वाऽग्रादीनां धारणमाकर्षणं च। अवयव्यङ्गीकारे तु एकत्वात् सर्वावयवेष्ववयविनस्तत्संभवादिति चेत् तत्राह—**या चासाविति**। 'धारणाकर्षणोपपत्तेश्च' इति गौतमेनासूत्रयतेत्यर्थः। अत्र विपर्यये पर्यवसानेनावयव्यङ्गीकारे धारणाकृष्टी उपपद्येते इत्युपपत्तिरेव सूत्रेण प्रतिपादितेत्यर्थः। **तादृगिति**—धारणाकृष्टियोग्यावयव्युत्पादकसंघातमात्रादेव तदुपपद्यत इत्यर्थः। धारणाकर्षणयोरवयविसाध्यताऽपि नेत्याह—**गाढावयवेति**। अवयव्युत्पादकासमवायिकारणसंयोगो यत्र दृढो न भवति कोमललतादौ तत्र धारणाकर्षणे प्रति न प्रयोजकमवयवि; नच तत्रावयव्यभावः। **तथाचेति**—धारणाकर्षणाद्यभावेऽपि तत्रावयव्यभ्युपगच्छसि। कुत्र तर्हि धारणाकर्षणे अभ्युपगम्येते इत्यत्राह—**धारणेति**। अवयविन्यपि सति गाढावयवसंश्लेषे सत्येव **धृताकृष्टानुबन्धतः**। धृताकृष्टसंबन्धेन धारणकर्षणे भवत इति वक्तव्यम्;

तथाऽवान्तरेषु दृढतरसंश्लिष्टदृढाकृष्टावयवानुबन्धतो धारणाकर्षणे भवत इति नावयव्यपेक्षा। **जतुगृहीतवदिति** तृणोपलायस्कान्तादीनामप्युपलक्षणम्। जतुगृहीतिस्थले एकस्य धारणाकर्षणमात्राज्जतुगृहीतयोरुभयोर्धारणाकर्षणवदित्यर्थः।

ननु जतुगृहीतादिष्ववयव्यस्तु इत्यत्राह—**तृणोपलेति**। तृणग्राही उपलस्तृणोपलः, शाकपार्थिवादिः। **यदुदाहृतं**—यद्दृष्टान्ततयोक्तं तृणोपलादिकं तत्र जतुतृणाद्यवयवेषु तव कश्चिदवयवीष्टोऽपि न; तथापि धारणाकर्षणे वर्तेते इत्यर्थः। अपिस्त्वर्थः। स्फुटतरव्यभिचारस्थलमाह—**पाशाद्यैरिति। धारणाकर्षणयोरीक्षणे**—दर्शने सतीत्यर्थः। धारणाकर्षणे क्षमे इति पाठान्तरम्। किं **तत्रेति**—किमिति नाभ्युपेयत इत्यर्थः।

ननु जतुसंगृहीत्यादिस्थलेषु पक्षिलभाप्यादिषु व्यभिचारः परिहृत इत्यत्राह—**संग्रहप्रभवं चेति**। संग्रहप्रभवं—जतुसंगृहीतिजन्यमित्यर्थः। एवं सप्रतिघत्वविरोधोऽपि द्वितन्तुकपटाद्युत्पत्तिस्थले टीकाकारादिभिः शङ्कितो न सम्यक्परिहृत इत्याह—**आरब्धकार्यैरिति क्षिप्तः**—आक्षिप्तः। अवयव्यारम्भपक्षे प्रतिक्षणं पृथिव्यादीनां परमाणुसंयोगविभागाभ्यां पूर्वविनाशोऽपूर्वोत्पत्तिश्चावश्यकाविति। प्रत्यक्षं खण्डपृथिवी अतीन्द्रियः परमाणुः ताभ्यामुत्पन्नायाः पृथिव्याः प्रत्यक्षातीन्द्रियोपात्ततया तादृशगगनघटसंयोगवत् प्रत्य(क्षत्वं)क्षं न स्यादित्याह—**प्रत्यक्षातीन्द्रियेति**।

न्यायवार्तिकादौ हिमवत्परमाणुकमेवाप्रत्यक्षमित्याशङ्कितं न तु पृथिव्यादिकमित्यत्राह—**मुधा चोदाहृतमिति** हिमवत्सहितः परमाणुरस्येति बहुव्रीहिः; 'तदस्य परिमाणम्' इति वा निर्वाहमाहुः। 'स एषां ग्रामणीः' इति मान्याः, हिमवत्परमाणू ग्रामण्यौ निर्वाहकौ—कारणे इति निर्वहन्ति। व्रीह्यादित्वात् मत्वर्थे इनिरिति केचित्। पृथिव्यादिकं परित्यज्याविमृश्य विशेषत उदाहरणं व्यर्थमित्यर्थः। अत एव टीकाकारस्तदुदाहरणमुपलक्षणमित्युक्तवानित्याह—**टीकाकारस्त्विति**।

ननु अवयव्यनभ्युपगमे संघातस्य बहुत्वात्कथमेकत्वधी व्यवहारावित्यत्राह—**विशेषानुपलम्भेऽपीति**। विशेषोऽवयवी तस्य राश्यादिष्वभावेऽपीत्यर्थः। **वृक्षादिष्वपीति**—स्कन्धपलाशादिव्यतिरिक्तावयव्यनभ्युपगमेऽपि वृक्षधीः राश्यादाविव स्यादित्यर्थः। ननु संघातस्यैव वृक्षत्वे समुदायप्रतीतावेव वृक्षधीस्स्यात् न त्वेकदेशशाखादिप्रतीतावित्यत्राह—**एकदेश** इति। एकदेशस्यापि जलावयवस्य जलवत् वृक्षत्वादित्यर्थः। तर्हि शाखादीनामपि वृक्षलक्षणयोगाद्वृक्षत्वे वृक्षकत्वधीर्न

स्यादित्यत्राह—**संग्रहाच्चेति**। सर्वेषां शाखाद्यवयवानां जलराशिवद्दृढतरसंश्लेषादेकवृक्षबुद्धिरित्यर्थः।

यदुक्तमक्षपादोक्तमनतिक्रमणीयं स्यादिति; तद्दूषयति—**सर्वाग्रहणमिति**। प्रत्यक्षव्यतिरिक्तपरमाण्वन्ततत्वपाङ्क्तिक्लृप्ताविदं दूषणं स्यात्; नच तदन्तक्लृप्तिः; दौस्थ्यपराहतत्वात्; तथाच तत्कल्पकोऽक्षपादोऽपि पराहत इत्यर्थः। किञ्च 'सेनावनवद्ग्रहणमिति चेन्न अतीन्द्रियत्वादणूनाम्' इति अवयव्यभावमाशङ्क्य अप्रत्यक्षत्वप्रसङ्गादवयविसाधनं चायुक्तमित्याह—**सेनेति** ॥ २१ ॥

अक्ष०। परपक्षे प्रसञ्जितानां दोषाणां स्वपक्षे न प्रसक्तिरित्याह—**इत्थमिति**—अवस्थाभेदमात्रेण नामादिभेदनिर्वाहे सतीत्यर्थः। यद्वा—त्वत्पक्षवदित्यर्थः। **वृत्यादिखेदः**—अवयवावयविनोरेकत्र वृत्तौ सप्रतिघत्वविरोधः अथवा अवयवेषु अवयविनो वृत्यनुपपत्तिः—कात्स्न्येन वृत्तौ एकावयवदर्शनेप्यवयव्युपलम्भप्रसङ्गः अंशभेदेनेति चेत् अवयवातिरिक्तांशभेदकल्पनादनवस्था स्यादिति अतिरिक्तावयव्युनभ्युपगमादयं दोषो न भवतीतिभावः।

ननु गौरवभिया अवयव्यनुपगमे संयोगोऽपि त्यज्यता मित्यत्राह—**नचेति**—अवयवसंयोगः प्रत्यक्षसिद्धः युष्माभिरपि असमवायिकारणतयाऽभ्युपगम्यते अतो नास्माभिरेव कल्प्यते। कल्पनायां खलु गौरवावकाशः। संप्रतिपन्नत्वान्न कल्पना। अतएव **नः** अस्माकं। न गौरवमिति भावः।

अथ दीर्घैकतन्तुपरिवर्तनविशेषनिष्पादिते पटे अनेकतन्तुसंयोगाभावात्पटबुद्धिर्न स्यादित्यत्राह—**वस्त्र इति**। अस्मन्मते पटसत्वे तन्त्वनेकत्वनियमानङ्गीकारादबहूनामिव एकस्यापि तन्तोरवस्थाविशेषे यथादृष्टि पटधीरवितथैव भवितुमर्हतीति न तद्बाधः। भवन्मत एव तन्त्वैक्ये आरम्भकसंयोगायोगेन पटानुत्पत्या तथैव भवेदिति बाधिता भवेदिति भावः।

ननु अवयव्यभावे सर्वेषां परमाणुरूपत्वापत्या ग्रहणमेव न स्यात् स्थूलद्रव्याभावे च अणुसंहतौ स्थूलत्वाध्यासोऽपि न सिद्ध्येदित्यत्राह—**देशेति**। जालसूर्यमरीचिदृश्यत्र्यसरेणुरेव परमाणुरित्युपेयते तत्समुदाये आश्रयदेशाधिक्यात्स्थूलपरिमाणमुत्पद्यते ततस्तत्र जायमानायाः स्थूलधियो न बाधो भवितु मर्हतीति भावः। तथापि यदि संसृष्टास्तन्तव एव पटः तदा तन्तुराशिमात्रेऽपि पटधीस्यादित्यत्राह—**संसर्गादिविशेषादिति**। भवन्मते असमवायिकारणतयाऽभिमतात्संसर्गविशेषादित्यर्थः। आदिशब्देन संसर्गिद्रव्यपरिग्रहः। द्वितीयेन तेन यूथपङ्क्त्यादि परिग्रहः ॥ २१ ॥

द्रव्यैक्यं प्रत्यभिज्ञा प्रथयति परिमित्यन्तरेऽन्याप्रतीते-
रंशूत्कर्षक्षयादिक्षममपि च ततो राशिवत्स्थूलमेकम् ।
नो चेदश्रान्तचण्डानिलजलधिधुनीदन्तिदावानलाद्यैः
क्षोणीयं क्षुद्यमाना क्षणमपि चरमामण्ववस्थां न जह्यात् ॥ २२ ॥

सर्वा० । एवं तन्तुपटादीनां भेदे बाधकं तत्साधकानामन्यथासिद्धत्वं चोक्तम् । तथाऽप्यभेदे किं प्रमाणमिति वदन्तं प्रति स्थिरत्वे प्रमाणमेवात्र प्रमाणमित्याह—**द्रव्यैक्यमिति** ॥ परिमित्यन्तरे, सत्यपीति शेषः । इदं च भेदसाधकानामुपलक्षणम्, यथा प्रसारितस्याकुञ्चितस्य दीर्घत्वह्रस्वत्वे, यथा च घनीकृतस्य विरलीकृतस्य च तूलपिण्डस्याल्पत्वविपुलत्वे दृश्येते, एवं वृत्तचतुरश्रत्वादिविशेषे दृष्टेऽपि स्यात् । कुतः ? अन्याप्रतीतेः, द्रव्यान्तरस्यादर्शनादित्यर्थः । अन्यथा सर्वत्र यत्किंचिदवस्थाभेदमात्रेऽपि द्रव्यभेदो दृश्यत इति धृष्टवादे का प्रत्युक्तिः ? पद्मसंकोचविकासादिषु च द्रव्यान्तराभावो **न्यायवार्तिकटीकायामुक्तः** ।

किञ्चान्त्यावयवित्वं पटादीनामिष्यते । तैरनेकैरच्छिन्नावयवैरेकपटादिनिर्माणेऽवयव्यन्तरमुत्पद्यते नवा ? पूर्वत्र तेषामन्त्यावयवित्वव्याघातः । उत्तरत्र तन्त्वादिभिरपि तथा स्यात्; अविशेषात् । अन्यस्तर्ह्यन्त्यावयवी भवत्विति चेन्न । सर्वत्रैवं कस्यचित्कार्यस्य सहकारिभेदैः सम्भवात् । सन्ति चास्मदाद्यशक्यस्रष्टारः केचित्, अन्तत ईश्वरश्च । किं च योऽसौ गोपुरादिरन्त्यावयवी तत्र यदि कश्चित्सुधाभिरवयवान्तरं संघटयेत् तदा तत्पूर्वं गोपुरं तिष्ठति नश्यति वा ? पूर्वत्र कथमन्त्यः ? उत्तरत्रानन्यथासिद्धोपलम्भविरोधः । नाशकारणाभावे नाशानुपपत्तिः । अपि च तूलपिण्डमध्यस्थमंशुं यदि कश्चित्सूच्याऽपकर्षेत्, तदा तस्य परिमाणह्रासो न दृश्यते; न च तस्य नाशः । अथापि तत्र ते नाशः कल्प्यः, असमवायिविनाशात् समवायिविगमाच्च । संघातवादे त्ववयवोत्कर्षापकर्षवादमात्रान्न किंचिद् द्रव्यमुत्पद्यते, नश्यति वा; केवलमाषादिराशिष्विवोपचयापचयमात्रमेव । अतो यथोपलम्भं संघातपक्ष एव साधीयानित्याह—**अंशूत्कर्षेति** । आदिशब्देनांशविदारणसन्धाने गृह्येते । यदि क्वाचित्कावयवभेदमात्रात्पूर्वद्रव्यनिवृत्तिरवयव्यन्तरोत्पत्तिः स्यात्; तत्रानिष्टमाह—**नो चेदिति** । अव्यवस्थितेषु प्रदेशभेदेषु तैस्तैर्भेदकैरणुद्वयविघटने व्यणुकविनाशादिक्रमेण महापृथिवीपर्यन्तनाशे सति अवस्थितसंयोगैरपि पुनस्तदारम्भावसरो न सेत्स्यति । तदेतत्समुद्रादिषु कैमुत्यसिद्धम् ।

यदप्येवं कल्प्यते—द्वाभ्यामेवाणुभ्यामाद्यं कार्यद्रव्यमारभ्यते, एकस्यानारम्भकत्वादसमवायिविरहात् । संयोगो हि न स्वेन; स्वस्य बहुभिरारब्धत्वे महत्त्वप्रसङ्गेन प्रत्यक्षत्वापातात् । बह्वारब्धस्याप्यणुत्वेऽतिप्रसङ्गः; तत्परिमाणं चावयवसंख्याविशेषेणावयवमहत्त्वप्रचययोरसम्भवात्, नित्यपरिमाणस्यानारम्भकत्वात्, स्वातिशयपरिमाणारम्भकत्वनियमेनाणुतरपरिमाणारम्भकत्वप्रसङ्गाच्च । सा च

द्वित्वसंख्या सर्वज्ञापेक्षाबुद्धिजन्या तद्विनाशकाभावेऽपि कार्यत्वादनित्या। एवं त्रिभिरेव व्यणुकैस्त्रसरेण्वारम्भः, तावतैव महत्त्वलाभात्; द्वाभ्यामारम्भे त्ववयव-प्रचयमहत्त्वरूपकारणान्तराभावेन महत्त्वानुत्पत्तावदृश्यत्वप्रसङ्गात्। स च त्रसरेणुः अप्रत्यक्षावयवकतद्रूपोऽपि स्वयं प्रत्यक्षः प्रत्यक्षरूपश्च। यद्वा अन्यरूपारोपेणा-लोच्यते; यथाऽऽह्रोदयनः—*दृश्यमेव ह्यालोकरूपमारोप्य पिञ्जरस्त्रसरेणुश्चा-लोच्यत इति। उत्तरावयविनां त्वनियतसंख्यैरारम्भः। भावरूपस्य सर्वस्य समवाय्यसमवायिनिमित्तसापेक्षत्वेऽपि प्रध्वंसस्तु निमित्तमात्रजन्य इत्यादि। एतादृशं कल्पनाजातं न विद्यावृद्धा बहुमन्यन्ते। तथा च सूत्रम्—* अपरिग्रहाच्चा-त्यन्तमनपेक्षेति २२ ॥ **इत्यवयविवादभङ्गः** ॥

आनन्द० उत्तरश्लोकेनाप्यवयविखण्डनं क्रियते इति पौनरुक्त्यं (परिहरन्) पूर्वशेषत्वात् (संगत्यन्तरंवा) नास्तीत्यभिप्रायेणाह—**तन्तुपटादीनामिति। स्थिरत्वे** प्रमाणमेवेति—बाधकाभावे प्रत्यभिज्ञायाः जातिविषयत्वादिना अन्यथासिद्धिर्वर्णनम-युक्तम् अन्यथा कस्यापि वस्तुनः स्थैर्यं न सिद्धचेदिति भावः। **भेदसाधकानामिति**-नामसंख्यादीनामित्यर्थः। **यथा च घनीकृतस्येति**- यद्यपि द्रव्यान्तरोत्पत्तिस्तूल-पिण्डादौ प्रचयस्य परिमाणहेतुत्वं वदताऽङ्गीकृता; तथाऽपि पद्मसंकोचविकासादि-स्थले न्यायवार्तिकादावनारम्भस्योक्तत्वा(त्तुल्यत्वा) न्नात्राऽप्यवयव्यारम्भ इति सिद्धवत्कृत्योक्तिः।

नन्ववयव्यन्तरसाधकबलात् प्रत्यभिज्ञा जातिविषया भवतु इत्याशङ्क्य; किं द्रव्यान्तरमुपलब्ध्या वदसि उत लिङ्गात्? इति विकल्प्य आद्यं दूषयति—**अदर्शनादिति**। नन्ववस्थाभेदस्थले घटपटादौ भिन्नद्रव्यप्रतीतिनियमादत्राप्युपल-म्भोऽस्त्येव; तन्तुपटावस्थाभेदात् इत्यत्राह—**अन्यथेति**। तथाच अवस्थाभेदस्थले भिन्नद्रव्यप्रतीतिनियमो नास्तीत्यर्थः। ननुचेष्टापत्तिरिति चेत्तत्राह—**पद्मसंकोचेति**। तत्र द्रव्यान्तराभावात्तत्प्रतीतिर्दूरे इति तत्र व्यभिचार इति भावः।

द्वितीयं दूषयति—**किञ्चेति**। तत्र लिङ्गं सामग्र्येव उतान्यत्? नान्त्यः; तथाविधस्यानुपलम्भात्। न प्रथमः; अवयवसंयोगो हि सामग्री; तस्याः पद्मा-दिस्थले व्यभिचारादलिङ्गत्वमिति दूषणे सत्येव दूषणान्तरमाह—**अन्त्यावयवित्वं घटादीनामिष्यते इति। उत्तरत्रेति**—तन्त्वादिस्थलेऽपि द्रव्यन्तरारम्भकाभावात् द्रव्यान्तरं न स्यादित्यर्थः।

ननु अन्त्यावयविस्वीकारो मत्सिद्धान्ते; नतु पटादिरेवान्त्यावयवीति निर्बन्ध इत्याह—**अन्यस्तर्हीति सर्वत्रैवमिति**—सर्वत्राप्यवयव्यन्तरोत्पत्तौ न किञ्चिदप्यन्त्यावयवि सिध्येदित्यर्थः। ननु कार्यस्य कर्तृसापेक्षत्वाद्यदवयव्यन्तमादा-यास्मदादीनां द्रव्यान्तरसृष्टिसामर्थ्यं नास्ति तत्रैवान्त्यावयवि; तत्र द्रव्यान्तरोत्प-

त्यभावात् इत्यत आह—**सन्ति चेति**। ननु गोपुरादिभिः पटादिभिर्बृहत्पटादिवद्द्रव्यान्तरारम्भासंभवात् अन्त्यावयवि गोपुरादिकं भवतु ! इत्यत्राह–**किञ्च योऽसौ गोपुरादिरिति**।

केचित्तु—'त्वदभिमतद्रव्या(न्तरा)रम्भकस्य व्यभिचारस्थलान्तरमप्याह--किञ्चेति' इत्याहुः।

पूर्वत्रेति—सप्रतिघत्वविरोधेन पूर्वगोपुरावयवानामनारम्भकतया तस्यैवोत्तरगोपुरारम्भकत्वेन तत्समवायित्वादिति भावः। ननु दीपप्रभान्यायेन उपलम्भविरोधो नेत्याह—**नाशकारणेति। तदा तस्येति**—अवयविवादिमते द्रव्यनाशेन पूर्वपरिमाणनाशात् पुनरारब्धद्रव्यस्य तन्नचूनावयवप्रशिथिलसंयोगकत्वेन न्यूनपरिमाणनियमात् तद्दर्शनप्रसङ्गः। **अथाऽपीति**—पूर्वपरिमाणोपलम्भेऽपि आश्रयनाशकल्पनं साहसमिति भावः। ननु तत्र नाशो मास्त्वित्यत्राह—**असमवायीति**। त्वदुक्तनाशसामग्रीसत्त्वान्नाशकल्पनायास्तवावश्यकत्वादिति भावः। सघातवादे न दोष इत्याह—**संघातवादे** इति। **उपचयापचयौ**–अवयवाधिक्यन्यूनते। **अशुविदारणं**—अवयवविच्छेदः। **संधानं**—योजनम्।

तथाच मूलस्यायमर्थः—भवतामवयविस्थाने स्थूलसंघातमेकम्। राशिवत्–राशिन्यायेन। अंशूत्कर्षात् क्षयः—अपचयः। आदिशब्दादुपचयः। तत्क्षमं—तद्योग्यमिति संघातपक्षे न दोष इति। अतिरिक्तावयविवादिनोऽप्यतिरिक्तावयव्यारम्भकां (म्भावता) शाभावात् अणुत्वावस्थाया अपरित्यागात् तद्व्यतिरिक्तद्व्यणुकाद्यभावात् द्रव्यमात्रं प्रत्यक्षं न स्यात् इति गौतमोक्तदूषणप्रसङ्गात् अकामेनापि सिद्धान्त्युक्तरीत्या संघातपक्ष एवाश्रयणीय इत्यनिष्टप्रसञ्जनव्याजेनाह—**यदीति। न सेत्स्यतीति**—द्रव्यान्तरोत्पादकानामपि विनाशसामग्रीनियतत्वेन तदुत्पादनसमये समवायिनाशस्यैवोत्पत्तेरित्यर्थः।

मूलस्यायमर्थः—नोचेत्—संघात एवेत्यनङ्गीकारे। अनवरतचण्डवाय्वादिभिः अवयवशोऽभिघातेन विभज्यमाना क्षणकालमप्यवयवस्थां न परित्यजेत्—सर्वदा अणुसंघातरूपैव स्यादिति। खननादिरादिशब्दार्थः। ननु पृथिव्यवयव्यभावेऽपि जलावयव्यस्तु ! इत्यत्राह—**तदेतत् समुद्रादिष्विति**।

'कार्यं नैवारभेरन्' इत्यादिपद्यत्रयेण दूषणं तन्मते क्वचिदर्थे दूषणोक्तिः वेदान्तविरुद्धार्थेषु सर्वत्र दूषणस्योपलक्षणमित्याह–**यदपीति। आद्य कार्यं** द्व्यणुकमित्यर्थः। **एकस्येति**—परमाणोरिति शेषः। **संयोगो हीति**—स्वस्य स्वेन नेत्यर्थः। **बहुभिरिति**—कारणबहुत्वस्य महत्त्वप्रयोजकत्वादिति भावः। **अतिप्रसङ्ग इति**—त्र्यणुकमप्यणु स्यात्; तथा च महदेव न स्यादित्यर्थः। **तत्परिमाणं चेति**—द्व्यणुक परिमाणमित्यर्थः। **(संख्याविशेषेण)** आरभ्यते इति शेषः। **अवयवमहत्त्वं**—

कार्यगत (परमाणुपरिमाणातिरिक्त) परिमाणं । परिशेषात् संख्याविशेषो द्वित्वसंख्येत्याह—**सा चेति** । कार्यत्वादिति—भावकार्यत्वादित्यर्थः । **अप्रत्यक्षेति**—अप्रत्यक्षत्वमवयवतद्रूपयोर्विशेषणम् । प्रत्यक्षरूपारब्धरूपस्यैव प्रत्यक्षत्वात् त्रसरेणुरूपमप्रत्यक्षमिति पक्षमवलम्ब्याह—**यद्वेति** । **आलोच्यते इति**—पीतश्शङ्ख इतिवत् चक्षुषा गृह्य (दृश्य) ते इत्यर्थः । **पिञ्जरः**—पीतरूपः । **विद्याबृद्धाः**—पाराशर्यादयः । पाराशर्यवचनमुदाहरति—**अपरिग्रहादिति** । महद्भिः सांख्यपक्षः क्वचित् त्यक्तोऽपि प्रायेण परिगृह्यते काणादपक्षस्त्वत्यन्तं त्यज्यते इत्यर्थः । यद्यपि 'ब्रह्मनैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्'—'इति लक्षणात् प्रथयति परिमि' इत्यत्र यतिभङ्गः; तथाऽपि—

स्वरसन्ध्याप्तसौन्दर्ये यतिभङ्गो न दोषभाक् ।

इति वृत्तरत्नाकरव्याख्यानोक्तेरदोष इति ध्येयम् । एवमुत्तरत्राऽपि समाधेयम् ॥ २२ ॥

अक्ष० । इत्थमवयवावयविनोर्भेदबाधकं तत्साधकानामन्यथासिद्धत्वञ्चोक्तम् तथाप्यभेदे किं प्रमाणमित्यत्राह—**द्रव्यैक्यमिति** । अवयवावयविनोरभेद मित्यर्थः । **प्रत्यभिज्ञेति** । मृदयं घटः इति प्रत्यभिज्ञेत्यर्थः । **प्रथयति** । ख्यापयति । **परिमित्यन्तरे** । सत्यपीति शेषः । इदमुपलक्षणम् । भेदसाधकनामादिभेदे सत्यपि प्रत्यभिज्ञा अभेदं साधयतीति भावः । कुतः । **अन्याप्रतीते** द्रव्यान्तरस्याऽदर्शनादित्यर्थः । अन्यथा यत्किञ्चिदवस्थाभेदमात्रेण द्रव्यान्तरमिति धृष्टवादः अपरिहार्यस्स्यादिति भावः ।

अपि च तूलपिण्डमध्यस्थस्यांशोस्सूच्याऽपकर्षे केनचित्कृतेऽपि तूलपिण्डस्य परिमाणह्रासो वा नाशो वा न दृश्यते अथाऽपि तत्र तव मते नाशः कल्पनीयः । असमवायिकारणनाशात्समवायिकारणविभागाच्च ।

सङ्घातवादे तु माषादिराशिष्विव अवयवोत्कर्षापकर्ष मात्रान्न किञ्चिदुत्पद्यते नश्यति वा अतस्संघातपक्ष एव साधीयानित्याह—अंशूत्कर्षेति । आदिशब्देन अंशुविदारणसंधानयोः ग्रहः । यदि यत्किञ्चिदवयवभेदमात्रात्पूर्वद्रव्यनिवृत्यादिरिष्यते तदा अनिष्टमाह—**नोचेदिति** । यत्किञ्चिदवयवभेदादिना अवयविनाशोपगमे अव्यवस्थितेषु प्रदेशभेदेषु क्वचिन्महावातेनान्यत्र समुद्रतरङ्गास्फालनेन अपरत्र प्रवाहेण एकत्र दन्तिदन्ताघातेन वनप्रदेशे दावानलेन आदिपदगृहीतेन सार्वत्रिकमहिषवृषभाजादियुद्धेनचाविरतं क्षुद्यमाना पृथिवीयं—क्षणकालेऽपि चरमाण्ववस्थां परमाणुरूपतां न परित्यजेत् । तैस्तैर्भेदकैरणुद्वयविघटने महा पृथिवीपर्यन्तनाशे सति पुनरणुद्वयसंयोगादेरविरतविघटकभूम्ना अवसर एव न सेत्स्यतीति भावः ॥ २२ ॥

संघातोऽनेकभूतैरपि भवति यथा ह्येकभूतस्य भागै-
र्देहादिः पञ्चभूतात्मक इति निगमाद्युक्तिभिश्च प्रसिद्धम् ।
न त्वेवं संकरः स्याद्व्यवहृतिनियमस्सूत्रितस्तारतम्या-
द्देहादौ येन भूतान्तरयुजि भवतो भौमतादिव्ययस्था ॥ २३ ॥

सर्वा० । या चान्या कल्पना शरीरादिषु पृथिव्याद्यनेकभूतसद्भावेऽप्येकमेव भूतमुपादानमन्यत्संसर्गिमात्रमिति, तामपि निरस्यति—**संघात इति** ॥ अवयविसद्भावे ह्येकप्रकृतित्वं नियन्तव्यं न वा त्वया ? संघातवादे तु यथादर्शनं सर्वमुपादानम् । न च विजातीयानां संहतिर्नास्ति दृष्टविरोधात् युष्मत्सिद्धान्तविरोधाच्च । अन्यथा कथं तैजसत्वाभिमते काञ्चनादौ गुरुत्वादिक्लृप्तिः ? किंच *त्रिवृत्करणं नामरूपव्याकरणार्थं चतुर्विधाहारमयं शरीरमिति च **गर्भोपनिषत्** । *पञ्चभूतात्मकं वपुरित्यादि च स्मर्यते । तदिदमाह—**देहादिरिति** । यथा विजातीयवृक्षपोतव्यतिषक्तोपचये वृक्षैकत्वधीः, एवमेकस्मिन्ननेकभूतारब्धे विरुद्धजातिसमावेशगन्धोऽपि न स्यादित्याह—**न त्विति** । एवंशब्द उक्तहेतुपरो वा; अपूर्वद्रव्यानुत्पादादित्यर्थः । तदुत्पादेऽपि न जातिसङ्कर इत्याशयः । नरसिंहादिन्यायेनोभयविलक्षणावयव्युत्पत्तिसम्भवात् । कल्प्यते च युष्माभिश्चित्रं रूपान्तरम् ।

एतेन तज्जातीयोपात्तं कथमतज्जातीयमित्यपि प्रत्युक्तम्, तन्त्वादिजातीयैरतन्त्वादिजातीयोत्पत्त्यभ्युपगमाच्च । भवतु वा पृथिवीत्वतोयत्वादीनामेकत्र समावेशः, तथाऽपि का हानिः ? परस्परपरिहार्युपाधिद्वयसमावेशन्यायेन दर्शनादर्शनाभ्यामेव सर्वातिप्रसङ्गशान्तेः । ननु पाञ्चभौतिकेषु कथमेकभूतशब्दस्तत्तदर्थक्रियानियमश्च ? वर्णितो हि भवद्भिरेव भूतान्तरोपष्टब्धेष्वपि देहादिषु पार्थिवाप्यादिविभागः । कथं च मन्त्रार्थवादेषु * पृथिवी शरीरमित्यादिविशेषव्यपदेश इत्यत्राह—**व्यवहृतोति** । सूत्रितो ह्यसौ * वैशेष्यात्तु तद्वादस्तद्वाद इति * त्र्यात्मकत्वात्तु भूयस्त्वादिति च । अत्र प्रतिबन्दीं प्रथयति—**देहादाविति** । येनेति तारतम्यपरामर्शः । तवाप्यनारब्धावयवकेषु विजातीयराशिषु भूयसा व्यवहारो लोकसिद्धस्संमन्तव्यः । विजातीयदारुशिलाद्यारब्धेषु च खट्वागोपुरादिषु किंचिज्जातीयत्वनियमः, तत्रावयव्यनारम्भे सर्वत्रैवमस्मन्मतसिद्धिः ।

विभागादविभागाच्च भूतभौतिकभेदधीः ।
सत्येव यदि वा द्रव्ये सिद्धसाध्यदशाद्वयात् ॥
एकत्वं च बहुत्वं च मृत्पिण्डकरकादिवत् ।
समष्टिव्यष्टिनीत्यैव त्रिगुणे वदति श्रुतिः ॥
ईदृक्सत्कार्यवादश्च वैदिकैः परिगृह्यते ।
द्रव्यस्य पूर्वसिद्धस्य साध्यावस्थाविशेषतः ॥

ननु यदि पूर्वं नित्यं सत् द्रव्यं, तत्कथं सांख्यमतमुज्झतः कार्यं स्यात् ? या त्वागन्तुक्यवस्था सा न प्राक्सती । अतः कथं सत्कार्यवादं ब्रूथ ? इत्थम्—प्राक्सदेव द्रव्यमवस्थान्तरविशिष्टवेषेण कार्यम्; तथैव लोकवेदव्यवहारस्थितिरिति ॥ २३ ॥ **इति देहादेः पाञ्चभौतिकत्वम् ॥**

आनन्द०प्रसङ्गसंगतिमाह–या चान्या कल्पनेति । अनेकप्रकृतित्वेऽपि बाधकाभावस्य उत्तरत्र वक्ष्यमाणत्वादिति भावः । **संघातवादेत्विति**–अत्रानेकप्रकृतिकत्वमेकप्रकृतिकत्वमिति विचारस्यैवानुत्थानमित्यर्थः । **दृष्टविरोधादिति**–नीरक्षीरादिसंहतिदर्शनादित्यर्थः । दृष्टिविरोधादिति क्वचित्पाठः । सिद्धान्तविरोधमेवोपपादयति—**अन्यथेति ।** उपष्टम्भकपार्थिवांशगुरुत्वं स्वर्णे प्रतीयते इति युष्मत्कल्पितिः । आदिशब्देन रूपादिर्गृह्यते । निगमाद्युक्तिभिश्चेत्यस्यार्थमाह—**किंचेति ।** ननु त्रिवृत्करणश्रुतिर्न देहस्य पाञ्चभौतिकत्वं वदतीत्यत्राह—**त्रिवृत्करणमिति ।** रूपवत्त्वाच्छरीरस्येति भावः ।

साक्षाद्विवक्षितार्थप्रतिपादिकां श्रुतिमाह—**चतुर्विधाहारमर्यमिति ।** यद्यपि पेयं लेह्यं चोष्यं खाद्यमिति चतुर्विधाहाराणामप्यपार्थिवरूपवत्त्वमेव; तथाऽपि भूतद्वयमयत्वे शरीरस्य भूतान्तरमयत्वमपि तद्वद्भवतीति भावः । **वृक्षैकत्वधीरिति**–यथा चूतवटाश्वत्थव्यतिषक्ताङ्कुरजन्ये नानोपादानके एकोऽवयवीति धीरित्यर्थः । व्यतिषक्तवृक्षपोतोपचयस्यासन्निहितत्वात्तत्परामर्शो न युक्त इति पक्षान्तरमाह—**एवंशब्द इति ।** पूर्वश्लोके प्रतिपन्नत्वात् । एवं च पाञ्चभौतिकत्वे शरीरस्य नियतजातिर्न स्यात् नियामकाभावात् । नाऽपि नाना; साङ्कर्यप्रसङ्गात्; नापि तद्रहितम्; द्रव्यत्वावान्तरजातिरहितस्य कार्यस्याद्रव्यत्वापातात् । नापि जात्यन्तरम्; अधिकद्रव्यापत्तेः इत्याद्यनुपपत्तयः परोत्प्रेक्षिताः अवयव्यनभ्युपगमपक्षे **न प्रभवन्तीति** भावः ।

अवयव्यङ्गीकारेऽपि नैते दोषाः स्युरित्याह—**तदुत्पादेऽपीति ।** ननु तर्हि कल्पितानन्तर्भावाद्द्रव्यान्तरतापत्तिरित्यत्राह– **कल्प्यते चेति ।** कल्पितानन्तर्भावे रूपन्यायादतिरिक्तत्वमिति भावः । द्रव्येष्वयं नियम इत्यत्राह—**तन्त्वादीति ।** ननु जातिसंकराङ्गीकारे गवां क्षीरं पातव्यं नोष्ट्रादेरिति शास्त्रार्थनियमो न स्यात्; गव्यप्युष्ट्रत्वजातिसम्भवादित्यत्राह—**परस्परेति ।** यथा स्वादुत्वरसवत्त्वकाश्यादिदेशप्रभवत्वादिरूपोपाधिसाङ्कर्येऽपि गोपयस्त्वोष्ट्रपयस्त्वादेः साङ्कर्याभावात् शास्त्रार्थनियमः; यथा गृहस्थत्वयतित्वादेरेककाले न साङ्कर्यं यथा वा शूद्रान्नत्वब्राह्मणान्नत्वादेरसाङ्कर्यं दर्शनबलादङ्गीकार्यम्; तथाऽत्रापि यथादर्शनं व्यवस्थासम्भवान्न दोष इत्यर्थः ।

ननु शरीरस्य पाञ्चभौतिकत्वे कथं पार्थिवत्वव्यपदेशः ? इत्याशङ्क्याह—**नन्वित्यादिना । तत्तदर्थक्रियानियमः**–पार्थिवत्वप्रयुक्तगुरुत्वकाठिन्यादिहेतुकक्रियैव ।

न तु सेचनदहनादिक्रियाः। **वर्णितो होति**—अस्थित्वगादिकं पार्थिवं रुधिरादिकमाप्यामित्यादिविभाग इत्यर्थः। **मन्त्रार्थवादेष्विति**–निरूढपश्वङ्गहोमकरणमन्त्रार्थवादे इत्यर्थः। तत्र यद्यपि; 'पृथिव्यै शरीरम्' इति पाठो दृश्यते; तथाऽपि अन्तरिक्षमात्मा' इत्यादिसाहचर्यात् विभक्तिव्यत्ययेनार्थतोऽनुवादः। तथैव पाठ इत्येके। शाखान्तरे तथा पाठ इत्यपरे। **वैशेष्यादित्यादि**—एकभूतांशस्याधिक्यात्तद्भूतव्यवहार इत्यर्थः। द्विरुक्तिरध्यायपरिसमाप्तिद्योतिका। **त्र्यात्मकत्वादिति**–त्रित्वमुपलक्षणम्; पञ्चभूतात्मकस्यापि त्र्यात्मकत्वात्। कथमेकभूतव्यवहारः? इति शङ्कायामेकांशस्य भूयस्त्वात्तद्व्यवहार इत्यर्थः। **तारतम्यपरामर्श** इति—तथा च मूलस्यायमर्थः—भूतान्तरयुजि—पञ्चभूतानां देहारम्भात्पूर्वकाले संहतानां सत्त्वात् शरीरं पृथिव्यारब्धमेव कुतः अप्यं वा भवतु? इति शङ्कायां पृथिव्यवयवानां बहुत्वात्तस्या एव शरीरारम्भकत्वमित्यादि किञ्चिद्व्यवस्थापकं वक्तव्यम्; तदत्रापि समानमिति।

आदिशब्दद्वयार्थमप्याह— **तवापीति। विजातीयराशिषु**—अधिकैकजातीयमाषतिलादिराशिषु। **अस्मन्मतसिद्धिरिति**–तत्रातिरिक्तावयव्यभावेऽपि शब्दान्तरादिसर्वकार्यसिद्धौ सर्वत्राऽपि तथा शब्दान्तरादिसम्भवात् अवयवी न स्यादित्यर्थः। ननु अवयव्यभावे सर्वेषां भूतसंघातमकत्वेन भूतत्वात् भूतभौतिकभेदधीरसत्या स्यात् इत्याशङ्क्य विभागाविभागाभ्यां वा सिद्धसाध्यावस्थायोगेन वा सत्या सम्भवतीत्याह–**विभागादिति**। नन्वतिरिक्तावयविनिरासे प्रकृतेरेकत्वात् बहुरूपप्रजारूपता न सम्भवतीत्यत्राह–**एकत्वं चेति**।

केचित्तु-अजामेकां बह्वीं सरूपां प्रजां जनयन्तीमिति प्रकृतिविशेषणं बहुत्वमित्याहुः। ननु आगन्त्ववस्थायोगित्वमेव कार्यत्वं द्रव्यस्य; न त्वसत उत्पत्तिः; अत एव शरीरस्यापि पाञ्चभौतिकत्वमिति इयता प्रतिपन्नम्; तदयुक्तम्; ईदृशसत्कार्यवादस्य साङ्ख्यैरनङ्गीकारे सत्कार्यवादत्वाभावात् इत्यत आह–**ईदृक्सत्कार्यवादश्चेति**। ननु आगन्तुक्योऽवस्थाः; तथाऽपि तद्वत्त्वेन सत्कार्यपक्षो नोपपद्यते इत्याशङ्कते–नन्विति। **साङ्ख्यमतमुज्जहत** इति—अभिव्यक्तिपक्षमनभ्युपगच्छत इत्यर्थः॥ २३॥

इति त्रिगुणपरीक्षायां देहादेः पाञ्चभौतिकत्वं
सद्द्रव्यवादनिगमनं च.

अक्ष०। अतिरिक्तावयविकल्पनानिरासेन देहादेस्संघातरूपतया अनेकभूतैरपि तदुत्पत्तिर्भवतीत्याह–**संघात इति**। तत्र दृष्टान्तमाह—**यथाहीति**—एकभूतस्य भागैरिव नानाभूतैरपि देहादिसंघातो भवितुमर्हति कथमन्यथा तैजसत्वाभिमते काञ्चनादौ गुरुत्वादिक्लृप्तिरिति भावः। किञ्च देहादेर्नानाभूतात्म-

कत्वे श्रुत्यादिकमप्यस्तीत्याह—**देहादिरिति**। आदिशब्देन सङ्घातान्तरपरिग्रहः। नामरूप व्याकरणाय त्रिवृत्करणं श्रुतं "चतुर्विधाहारमयं शरीर" मिति च गर्भोपनिषदि श्रुतं—"पञ्चभूतात्मकं वपु" रिति च स्मर्यते। एवं निगमाद्युक्तिभिः श्रुति स्मृत्युक्तिभिश्च पञ्चभूतात्मको देहादिरिति प्रसिद्धमित्यर्थः। एवमवयव्यनभ्युपगमेन संघातस्य अनेकभूतारब्धत्वोपगमेऽपि न जातिसङ्कर इत्यत्राह—**नत्वेवमिति**। अपूर्वद्रव्योत्पत्यनुपगमेन नानाजातीनां नानाभूतेष्वेव वर्तमानतया समावेशाभावान्न सङ्करइत्यर्थः। अपूर्वद्रव्योत्पादेऽपि नरसिंहादिन्यायेन उभयविजातीयावयव्युत्पत्तेस्संभावान्न जातिसङ्करस्स्यादिति भावः।

ननु शरीरस्य नानाभूतात्मकत्वे "पृथिवी शरीर" मिति शरीरस्य पृथिवीमात्राप्ययव्यवहारः (श्रवणं) कथमुपपद्यत इत्यत्राह—**व्यवहृति नियम इति। सूत्रित इति**। "वैशेष्यात्तु तद्वादः" "त्र्यात्मकत्वाच्च भूयस्त्वा" दिति च सूत्राभ्यां अनेकसत्वेप्येकस्य आधिक्यनिबन्धनो व्यपदेश इत्युक्तमितिभावः। भवतापययमुपगन्तव्य इत्याह—**देहादाविति। येनेति**। तारतम्यपरामर्शात्। **भूतान्तरयुजीति**। भूतान्तरप्रकृतिकत्वानुपगमेऽपि भूतान्तरसंसर्गस्योपगमादिति भावः। **भौमतादिव्यवस्थेति**—पार्थिवत्वव्यवस्था भूतान्तरापेक्षया पार्थिवाधिक्येनैवोपपादनीयेति भावः॥ २३॥

सन्ति प्रागप्यवस्थास्सदितरकरणाप्राप्तनिष्पत्त्यदृष्टेः
शक्ताशक्तप्रभेदादिभिरपि यदि न स्वोचितात्कार्यदृष्टेः।
तस्मिन्सत्येव तस्माञ्जनिरपि नियता तन्निमित्तादिनीते-
र्व्यक्तिर्व्यक्ताऽनवस्थां भजति न च कृतामात्थ नैवं कृतौ नः॥२४॥

सर्वा०। ईदृशसत्कार्यवादमसहमानस्य **सांख्यस्य** नित्यैकान्तवादनियतान् प्रयोगानन्वाह—**सन्तीति**॥ द्रव्यपक्षीकारेऽस्मान् प्रति सिद्धसाध्यता; अतोऽवस्थेत्युक्तम्। यदाहुस्सांख्याः—

❀ असदकरणादुपादानग्रहणात्सर्वसंभवाभावात्।
शक्तस्य शक्यकरणात्कारणभावाच्चसत्कार्यम्॥ इति॥

तत्रायं सदितरकरणादृष्टेरित्येको हेतुः। अप्राप्तिनिष्पत्त्यदृष्टेरिति द्वितीयः। सदितरशब्देन प्रागसत्त्वमिह विवक्षितम्, न ह्यसत्खपुष्पादि क्रियेत; माभून्नित्यासतः करणम्। अत्र प्रागसत्त्वमात्रमिति चेन्न; तद्वदेव कदाचिदसतस्सर्वदैवासत्त्वापातात्। न चासतः कदाचित्सत्त्वापत्तिः; विरोधात्। न हि चिच्छक्तेः कदाचिदपि जडत्वम्; जडस्य वा चित्त्वम्। एवं यद्यतोऽन्यत् न तत्सर्वं कदाचिदपि तत्स्यात्; प्रमाणादेरपि कदाचिदप्रमाणत्वप्रसङ्गात्। न चातीतादेर्वर्तमानतादिरीश्वरेणापि सुनिष्पादः। असत्त्वं सत्त्वं च वस्तुनोऽव-

स्थेति चेत्, वस्तुनस्तर्ह्यनादितैव। नच सन्निवासन्घटः प्रागुपलभ्यते, अस्माकं त्वव्वक्तावस्थयाऽनुपलब्धिरप्युक्ता। न ह्यसन् घटादिर्न घटादिरिति त कस्यचिद्वचनं बालप्रतारणम्, अभावप्रतियोगिवचने विवक्षितविरुद्धोक्तेः, अभावमात्रविवक्षायां विरोधादिति। उपादानग्रहणादित्यनेन विवक्षितं हेतुं व्यतिरेकेण व्यनक्ति—**अप्राप्तनिष्पत्त्यदृष्टेरिति**। न हि घटादिकार्यमप्राप्तैरन्यत्र दण्डचक्रादिभिस्तस्योत्पत्तिः, तन्त्वादिभिर्वा पटादेः। अतोऽवगम्यते स्वकार्यं प्राप्तैरेव निमित्तैरुपादानैश्च स्वसाध्यसाधनमिति। प्राप्तिश्च द्विनिष्ठेति साध्यस्यापि साधनवत्पूर्वभावित्वात्, सदेव साध्यमिति। शक्तस्य शक्यकरणादित्युक्तहेत्वभिप्रायेण शक्ताशक्तप्रभेदवचनम्। असतोऽप्यप्राप्तस्यापि सृष्टिः, हेतुशक्तिनियमात्स्यादित्यस्योत्तरमेतत्।

अयं भावः— यदि कारणेष्वसत्तदप्राप्तं च कार्यमुत्पद्येत, तदा तिलेभ्य एव तैलं किमुत्पद्यते, न सिकतादिभ्यः ? शक्ताशक्तभेदादिति चेत्, सिद्धं नस्समीहितम्। तिलानां तैलोत्पादनशक्तिर्हि तद्गर्भत्वमेव, अन्यादर्शनात्; तदशक्तिश्च सिकतानां तदभावः। तथा सति तद्वतस्तन्निष्पत्तेः प्रागपि तत्सिद्धिरनिवार्येति। आदिशब्देन कारणभावात्, सर्वसम्भवाभावादिति हेतुद्वयग्रहणम्। कारणभावात्—कार्यस्य कारणात्मकत्वादित्यर्थः। प्रागेव सति कारणे कथं तदा तदभिन्नं कार्यमसद्भवेत् ? नन्वस्तु प्रागसदेव कार्यं मा च भूवन् हेतुप्राप्तितद्वन्नितदैक्यानि. तथाऽपि कस्यचिदेव किंचित्कार्यमित्यत्र सर्वसंभवाभावादिति प्रसङ्गतद्विपर्ययाभ्यां प्रत्युक्तिः।

तथा हि—यदि प्रागसत् हेतुभिरप्राप्तं हेतुवृत्तितादात्म्यरहितं च तत उत्पद्यते, सर्वस्मात्सर्वसम्भवः स्यात्, नचासावस्तीति। पञ्चानामप्याभासत्वाभिप्रायेण प्रतिवक्ति—**नेति**। तत्र प्रथमस्य प्रतिक्षेपे हेतुः—**कार्यदृष्टेरिति**। शेषाणां तु स एव स्वोचितादिति विशेषितः। न तावत्कार्यमिति किमपि न दृष्टम्, सर्वलोकवेदविरोधात्; व्यक्तिसाधनस्यापि निराश्रयत्वप्रसङ्गाच्च। न च दृष्टमपि न सत्यं, **माध्यमिकादि**मतानां निराकरिष्यमाणत्वात्। न च सत्यमपि न कारणाद्व्यतिरेकेण गृह्यते, उक्तोत्तरत्वात्, प्रकृतिविकृतीत्यादिविभागभङ्गप्रसङ्गाच्च। अतः कारणाद्भिन्नत्वेन दृष्टं कार्यं तेनाकारेण पूर्वं नासीदिति त्वयैवाकामेनापि स्वीकर्तव्यम्। न हि घटाकारेण निष्पन्नस्य पुनरपि दण्डादिव्यापारनिष्पाद्यत्वमस्ति। किंच कार्यव्यङ्ग्यशब्दौ च व्यवस्थितविषयौ लोके दृष्टौ। कारकव्यञ्जकभेदश्च। कारकं समग्रमप्येकमुत्पादयति। व्यञ्जकं तु सहकारिसंपन्नं समानेन्द्रियग्राह्याणि समानदेशस्थानि तादृशानि सर्वाण्यपि व्यनक्ति। तदत्र घटादिव्यक्तिसामग्र्यैव तद्वन्मृत्पिण्डगतानां करकादीनामपि व्यक्तिः स्यात्। व्यञ्जकत्वे सिद्धे ह्यवान्तरव्यङ्ग्यभेदप्रतिनियतव्यञ्जकभेदव्यवस्थाक्लृप्तिः। न चेह तथाः आगन्तुकाभावे च पुरुषवत्प्रकृतिरपि ते निर्व्यापारैव स्यात्। तथा च गतं सृष्टिप्रलयादिवादैः सिद्धान्तसृष्ट्यादिभिश्च।

किंच सत्कार्यमिति कार्यस्य सत्त्वमात्रे साध्ये सिद्धसाध्यता; कारकव्यापारात्प्रागपि सदिति साध्ये कार्यस्य कारकव्यापारस्य प्रागसत्त्वमङ्गीकृतं स्यात्। असदकरणात्, शक्तस्य शक्यकरणादिति हेत्वोश्च करणशब्देनापूर्वोत्पादने विवक्षिते स्ववचनव्याघातः। व्यक्तिविवक्षायां तु व्यज्यमानत्वात्प्रागपि सदिति स्यात्; तदा अन्यतरासिद्धो हेतुः।

ननु सतोऽभिव्यक्तौ घटतैलतण्डुलादिनिदर्शनमस्ति, असत उत्पत्तौ न किंचिदिति चेत्, किमतः ? न हि निदर्शनमेव प्रमाणं, हेतुर्नैष्फल्यप्रसङ्गात्। न च निदर्शनाभावो बाधकः, सर्वत्र प्रतिनियतस्वभावलोपप्रसङ्गात्। अपि च असदकरणादित्यत्र कार्यस्य प्राक्सत्त्वे क्रियमाणत्वादित्येव हेतुः स्यात्, तथा च प्रतिज्ञाहेतुविरोधः। विपक्षात् खपुष्पादेः सपक्षाच्च सर्वस्मात् व्यावृत्तत्वेन हेतोरसाधारणत्वप्रसङ्गश्च। भावत्वेन तु प्राक्सत्त्वं साधयाम इति चेत्, तथाऽपि प्रत्यक्षविरोधः। अन्यथा नित्यासतोऽपि कुतश्चिन्नित्यसत्त्वसाधने निवारकाभावात्। असतः सत्त्वापादनमशक्यमित्युक्तमिति चेन्न; अत्यन्तासत्त्वे विवक्षिते कार्येषु तदभावात्; प्रागसत्त्वे तु सृष्ट्यनुगुणस्यैव तद्विरुद्धत्वोपन्यासात्।

प्रागसत्तुच्छमेव स्यात् सच्च नित्यं सदित्यसत्।
अयथादृष्टि निर्णेतुरशेषाभीष्टविप्लवात्॥

अन्योऽपि घटवान्कालः कालत्वादिति वादिनः।
पक्षदृष्टान्तबाधादिप्रसङ्गः प्रणिधीयताम्॥

यच्च कारकाणां कार्यं प्राप्तानामेव तदुत्पादकत्वमिति; व्याहतमेतत्। किंच किं दृष्टत्वादेवमङ्गीक्रियते ? अव्यवस्थाभयाद्वा ? नाद्यः; अनन्यथासिद्धनियतपूर्वभावित्वादतिरिक्तायाः कार्यप्राप्तेः कारणानां मिथः प्राप्तिवत् त्वयाऽप्यदृष्टत्वात्। तदिहानङ्गाङ्गीकारो युक्ताङ्गहानिश्च, प्रागसत्त्वस्य युक्तस्योपेक्षणात् अविषयवृत्तित्वं वा, कारकाणां सम्बन्धस्य विरुद्धस्थले संचरणात्। समश्च प्राप्तावप्यतिप्रसङ्गः। न हि प्राप्तयोरपि रज्जुघटयोर्जन्यजनकता। तत्र नित्यप्राप्तिर्नास्तीति विशेष इति चेत्, निमित्तानामपि घटादिभिर्नित्यप्राप्त्यसंभवात्। उपादाने तु स्यादिति चेन्न; निमित्तवदेव नित्यप्राप्तिनैरपेक्ष्यात्। त्वत्पक्षेण च यद्येन नित्यप्राप्तं न तत्तस्योपादेयम्; यथा पटस्य तन्तुः, तथा च पटः, तस्मान्न तन्तूपादेय इति प्रसङ्गात्। प्रकृतिपुरुषयोर्नित्यप्राप्तयोर्नोपादानोपादेयभावः। अतो यद्येन नित्यप्राप्तं न तत्तस्योपादेयं यथा प्रकृतिपुरुषयोरन्योन्यमिति, पटादिकमपि येन नित्यप्राप्तं कथं तत्योपादेयं स्यात् ; तयोरन्योन्यप्राप्तिर्नास्तीति चेन्न. * पङ्ग्वन्धबदुभयोरपि संयोगस्ततकृतः सर्ग इति स्वसमयविरोधात्। अजसंयोगपक्षे विभूनामपि नित्यप्राप्तेः।*व्याप्तिरूपेण संबन्धस्तस्याश्च पुरुषस्य च। दारुण्यग्निर्यथा—इत्यागमविरोधाच्च। * जहात्येनां भुक्तभोगामिति श्रुत्या

मुक्तस्य प्रकृतिप्राप्तिर्निवर्त्स्यतीति चेन्न; तदाऽपि परस्परधर्माध्यासाधिकारभूत-दर्शनमात्रनिवृत्तेः त्वदिष्टत्वात् ।

यद् ब्रूथ—*या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्येति । अतः कार्य-प्राप्तिः कारणानङ्गम् । उक्तं **चाक्षपादेन** * घटादिनिष्पत्तिदर्शनात्पीडने च व्यभि-चारादप्रतिषेध इति । अत्र कार्यमप्राप्तैः इत्युपस्कार्यम् । एतेन—

*असत्त्वान्नास्ति सम्बन्धः कार[कै]णैः सत्त्वसङ्गिभिः ।
असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः ॥

इति साङ्ख्यवृद्धगाथाऽपि प्रत्युक्ता । इह तु स्वोचितात्कारकचक्रात् तत्संबन्धतश्च कार्यदृष्टेरित्यव्यवस्थामूलघातः । एतेन विमतं पूर्वापरकालयोरपि सत् प्रमेयत्वात् सत्त्वाद्वा, आत्मवत्; विगीतः काल एतद्घटादिमान्, कालत्वात्, एतत्कालवदित्यादिर्निरस्तः; सर्वलोकप्रत्यक्षादिबाधात् ।

कारकव्यञ्जकानां च व्यवहारव्यवस्थितिः ।
किंनिमित्तेति वक्तव्यं सर्वनित्यत्ववादिना ॥
न हि व्यक्तौ विशेषोऽस्ति न चावरणवारणम् ।
तयोरपि भवत्पक्षे नित्यत्वात्साध्यता कथम् ॥
आवारकं च नित्यं चेन्नित्यमावरणं भवेत् ।
अन्यथा त्वपसिद्धान्तस्तत्तिरोधिश्च दुर्वचः ॥
तिरोधिं तन्निवृत्तिं च नानित्यौ तस्य मन्यसे ।
मिथश्चाभिभवाद्युक्तिर्गुणेष्वेवमनर्थिका ॥
समानदेशकालत्वमभावप्रतियोगिनोः ।
सहन्ते क्वाप्यगत्यैव न तथाऽत्रान्यथा गतेः ॥
अपि चाशेषनित्यत्वे पौर्वापर्यं न कुत्र चित् ।
व्यक्तिभोगापवर्गादिसाध्यतोक्तिरतो मुधा ॥
स्वप्रवृत्त्यादिनैष्फल्यं शास्त्रादेरप्यनुत्थितिः ।
सांख्यचार्वाकयोस्स्यातां साध्यसाधनबाधनात् ॥
अयोग्यत्वं तिरोधानं योग्यत्वं व्यक्तिरित्यपि ।
तन्नित्यानित्यताभ्यां ते विवक्षितविघातकृत् ॥
इन्द्रियप्रतिघातेन भागैर्भागान्तरावृतिः ।
यथाऽन्यत्र तथा नात्र कादाचित्कदशात्यजः ॥
असम्भवनिरस्तं च ग्रसनोद्ग्रसनादिकम् ।
मृत्पिण्डादिषु दुस्साधं शास्त्रमप्यनिदम्परम् ॥

अप्राप्तावव्यवस्थोक्ता प्राप्तावपि तवापतेत् ।
व्यक्तिवादोऽत एवेत्यप्ययुक्तं तन्निरासतः ॥

सत्त्वादिगुणभूयिष्ठभागभेदाव्यवस्थितेः ।
त्रिगुणद्रव्यसम्बन्धः प्रवाहानादिरात्मनाम् ॥

सार्वज्ञ्यप्रागभावात्मा तिरोधिरपि कर्मिणाम् ।
संविद्विकाससङ्कोचप्रवाहान्नातिरिच्यते ॥

तत्तत्कर्मप्रवाहेण तयोरेवं व्यवस्थितेः ।
न हि स्वरूपतोऽनादेर्हेतुरस्माभिरिष्यते ॥

यत्तु कारकशक्तिर्नाम तद्गतं सूक्ष्मं कार्यमिति कल्प्यते तत्प्रतिबन्ध्या प्रतिरुणद्धि **तस्मिन्निति**। तस्मादित्यत्रापि स्वोचितादिति विशेषणीयं, यथा सर्वेषु द्रव्येषु तिला एव तैलगर्भाः स्वकारणशक्त्या सृज्यन्ते, तथा तत्तत्कार्यनियतपूर्वभावितया तत्तदुत्पादकस्वभावास्ते ते भावास्तथैवेति स्वीकार्यम्; अन्यथा दृष्टहानमदृष्टकल्पनं च। प्रतिबन्धन्तराणि स्वव्याघातं चाभिप्रेत्याह—**तन्निमित्तेति**। निमित्तादीनां कार्योत्पादनशक्तिरस्ति वा न वा? न चेत्कथं तन्निमित्तत्वम्? अन्येषां वा कथमतन्निमित्तत्वम्? अस्ति चेत्सा किं कार्यस्य सूक्ष्मावस्था? अन्या वा? न पूर्वः; अपसिद्धान्तात्। उपादाने हि तत्सत्त्वमङ्गीकरोषि, अन्यथा प्रकृतेरिवात्मनोऽपि प्रपञ्चगर्भत्वेन प्रकृतित्वप्रसङ्गात्। आत्मा खल्वयस्कान्तवन्निर्व्यापारोऽपि सन्निधिमात्रेण निमित्तमिष्यते, तथा सति निमित्तोपादानवैषम्यविलयाच्च। नाशकेषु च नाश्यवृत्तिरस्ति वा न वा? अस्ति चेद्वह्नौ तूलवद्विरोधः। न चेत्कथं तदेव तस्य नाशकम्? न ह्यतद्वृत्तिस्तेन नाश्यते, शुक्तावविद्यमानस्य रूप्यस्य तया नाशप्रसङ्गात्, सर्वत्र वाऽतिप्रसङ्गात्। दूषणेषु च दूष्यं वर्तते न वा? पूर्वत्र दूषणत्वादेरिव तद्वृत्तेस्तेन दूषणायोगः। उत्तरत्र तद्वृत्तिरहितस्य घटादेरिव तद्दूष्यत्वं न स्यात्। अथैतेषु यथादर्शनं व्यवस्थेष्यते। प्रकृतेऽपि तथा स्यात्। एवं निमित्तादिप्रतिबन्ध्यैव कार्यस्य कारणभावः सर्वत्र सर्वसंभवप्रसङ्गश्च निरस्तः।

यानि च सांख्यानामवस्थातद्वतोरभेदसाधकानि, तेषु यदेतत् पटस्तन्तुभ्यो न भिद्यते तद्धर्मत्वादिति; अत्र तावत्प्रतिज्ञाहेतुविरोधः स्पष्टः। दृष्टान्ताभावेन व्याप्तिश्च नास्ति। यद्यतो भिद्यते न तत्तस्य धर्म इति व्यतिरेकव्याप्तिरस्तीति चेन्न; सपक्षेभ्यस्तन्तुभ्योऽपि व्यावृत्तत्वेन केवलव्यतिरेकित्वायोगात्।

यदपि तदुपादेयत्वात्तदभिन्न इति, एतदपि पूर्ववदेव। तदुपादेयत्वं च तज्जन्यत्वमात्रं वा, तद्विकारत्वं वा, तत्संबन्धित्वं वा, तद्धर्मत्वं वा, तदभिन्नत्वं वा, अन्यद्वा यत्किञ्चिदिति। नाद्यः; निमित्तैरप्यभेदप्रसङ्गात्। न द्वितीयः, तद्धर्मत्वहेतूक्तदोषादेव। उभयत्र पटावस्था तन्त्वात्मा न भवति तन्तुभ्यो भिन्नत्वात्

घटवदिति प्रतिप्रयोगस्य शक्यत्वाच्च। इष्टो हि त्वयाऽपि तत्र भेदोऽपि। न तृतीयः, कारणेषु परस्परसंबन्धिषु व्यभिचारात्, त्वत्पक्षेणासिद्धेश्च। न हि धर्म-धर्मिणोस्तादात्म्यवादिनः तत्संबन्धित्वसंभवः, समवायस्यानभ्युपगमात् अन्यतर-स्याद्रव्यत्वे तु संयोगायोगाच्च। न चतुर्थः, प्रागेव दूषितत्वात्। न पञ्चमः, तस्यैव साध्यत्वात्। न षष्ठः, अभेदव्याप्यस्य कस्यचिदन्यस्य त्वयाऽप्यदर्शनात् इति। यच्चैतत्पटस्तन्त्वात्मकः तत्संयोगतदप्राप्तिरहितत्वात्, तादात्म्याभावे हि कुण्डबदरयोरिव संयोगो वा स्यात्, हिमवद्विन्ध्ययोरिवाप्राप्तिर्वा, तदुभयमिह निवर्तमानं तादात्म्यविरहमपि निवर्तयति इति।

तदपि मन्दम्; तादात्म्यविरहेऽप्यन्यतरस्याद्रव्यत्वात् संयोगाभावः; तद्धर्म-स्वभावत्वादेवाप्राप्तिपरिहार इत्यन्यथासिद्धस्यासाधकत्वात्। अन्यथा तादात्म्य-भाव इव भेदसद्भावेऽपि घटपटयोरिव धर्मधर्मिभावो न स्यादिति प्रसज्येत। गुरुत्वान्तरकार्यादर्शनं तु द्रव्यान्तरोत्पत्ति प्रतिरुन्ध्यात्, न त्ववस्थातद्वतोरभेदं विदधीत। ननु जनिरपि व्यक्तिरेव, * जनी प्रादुर्भावे इति धात्वर्थपाठात्। न; जनिव्यक्तिशब्दयोरर्थभेदेनैव निरूढेः। प्रादुर्भावपाठोऽप्युत्पत्तिपरस्यात् निर्वर्त्य-प्राप्यभेदसिद्धेश्च। जन्यं हि निर्वर्त्यम्, व्यङ्ग्यं तु प्राप्यम्। अभूततद्भावादिषु प्रागसतस्सत्त्वमनुस्मृतमेव। भवतु वा जनिशब्दो व्यक्तिपरः।

न व्यक्तिरुपलब्धिस्ते दृष्टादृष्टदशान्वयात्।
अथोपलब्धियोग्यत्वं न तदव्यापकत्वतः॥
सत्स्वलक्षणपूर्तिश्चेदभिव्यक्तिस्तदप्यसत्।
साऽपि वः प्राक्तनी नो चेन्न सिध्येद्धेतुरप्यसन्॥

किं च व्यक्तिरपि नित्या कार्या वा? पूर्वत्र कारकाणामिव व्यञ्जकानामपि नैष्फल्यम्। उत्तरत्रार्धजरतीयः सत्कार्यवादः। व्यक्तेरपि व्यक्त्यर्थं कारकापेक्षति चेत् तत्रानवस्थाप्रसङ्गमाह—**व्यक्तिरिति**। व्यक्तेः कार्यत्वपक्षे अपसिद्धान्तमसद-करणादित्यादिहेतुविरोधं चाभिप्रेत्याह—**न चेति**।

ननु कार्यस्य कृतिस्तावन्न कार्यस्वरूपमेव; कार्यं क्रियते घटः क्रियत इति सामान्यतो विशेषतश्च सहप्रयोगात्। अतिरिक्ता च सा। तथा सति कार्यव्यक्तौ कः प्रद्वेषः? कृतिरपि कृता वा व्यक्ता वा? पूर्वत्रानवस्था; उत्तरत्र कारकनैष्फ-ल्यापसिद्धान्तौ। व्यक्तिरपि कृता व्यक्ता वेत्युभयधाऽप्यनवस्था। तत्राह—**नैवमिति**। कृतिर्हि कारकाणां व्यापारः, स चागन्तुस्वकारणव्यापारेण जन्यते। सोऽपि तथेति सिद्धाऽनवस्थैषा। सा च सर्वसंमता न दोषः। त्वयाऽप्यभिव्यञ्जकव्यापारो व्यञ्जकान्तरव्यापारव्यङ्ग्य इति वाच्यम्। ननु व्यक्तिर्न व्यज्यते न क्रियते च, अव्यक्तैव नित्यं स्वयं व्यक्तैव वा कार्याणां व्यक्तिः स्यात्। न स्यात्, तदर्थकारक-व्यापारवैयर्थ्यप्रसङ्गात्, कार्याणां नित्यव्यक्तिप्रसङ्गाच्च।

ननूत्पत्तिर्नाम सत्तासमवायो वा, स्वकारकसमवायो वा ? स च नित्यः न तदर्थश्च कारकव्यापारः कृतिरिति समा नश्चर्चा। न; समवायस्यास्माभिरनभ्युपगमात्। तदेतदस्मच्छब्दान्वादेशेन सूचितम्। का तर्ह्युत्पत्तिः ? कृतिरेव। अन्यधर्मः कर्मन्यस्योत्पत्तिरिति चेत्तादर्थ्येन तद्धर्मतोपचारात्। यदा हि तन्त्वादयो व्याप्रियन्ते तदा पट उत्पद्यत इति व्यवहरन्ति, आद्यक्षणावच्छिन्नपटत्वावस्थैव वा पटोत्पत्तिरुच्यते। * सैव तदवस्थस्योत्पत्तिरिति भाष्यमपि तदभिप्रायमेव स्यात्। अत एव हि सहप्रयोगोपपत्तिः। न चेदृश्या उत्पत्तेरीदृशमुत्पत्त्यन्तरमस्ति। तथाऽपि प्रागसिद्धस्वरूपलाभादुत्पत्तिशब्द उपचाराद्भवतु वा मा वा। तदा कार्योत्पत्त्यर्थः कारकव्यापार इति सिध्यति। स एव यदोत्पत्तिर्विवक्षिता, तदा कार्यार्थः कारकव्यापार इत्येव वक्तव्यम्, अन्यथा तूपचारः।

क्रियैव कारकाणां स्यात् प्रतिसंबन्धिनीत्यसत्।
प्राक्सत्त्वासत्त्वसंक्षोभस्तस्यामपि हि दुस्तरः॥
क्रियावद्भिः पटादेश्च कारकैस्तादृशोऽन्वयः।
प्रधाने भागनिष्पत्त्या भागैरैक्याच्च भागिनः॥
प्राक्सत्त्वं सर्वभावानां मिथश्चैक्यमिति त्वसत्।
भिन्नांशपूर्वसत्वे हि नाभिन्नाद्भेदसंभवः॥
भिन्नाभिन्नाद्यदि व्यक्तिर्भेदानां प्राक्तनी भवेत्।
एकस्य प्रागसन् भेदो यदि स्यादस्मदिष्टवत्॥
प्राक्सतोऽस्याप्यवस्था चेत्तथाऽप्यस्मदभीष्टवत्॥ २४॥

॥ इति सांख्यसत्कार्यवादभङ्गः॥

आनन्द० आक्षेपिकी संगतिरित्यभिप्रायेणाह—**असहमानस्येति**। नित्यैकान्तवादित्वात्तस्य देहादेः पञ्चभूतोपादानकत्वायोगादित्यर्थः। **एकान्तता** चैकरूपता। तथाच सर्ववस्तूनामेकरूपत्वान्नागन्तुकावस्थाऽपीति भावः। **असदकरणादिति**। कार्यं—कार्यत्वेनाभिमतं घटपटाद्यात्मकमिति पक्षः। सदिति साध्यम्; सर्वदा सदित्यर्थः। एवमपरमपि द्रष्टव्यम्।

उपादानग्रहणादित्यस्य उपादानेन संबन्धात्कार्यस्येत्यर्थः। कार्यं सत् उपादानेन सम्बद्धत्वात् इति द्वितीयः। तमपि व्यतिरेकव्याप्तिप्रदर्शनमुखेन व्याख्याति—**अप्राप्तनिष्पत्त्य (सिद्धेः) दृष्टेरिति**। तथा च मूलेऽपि सदितरजननाप्राप्तनिष्पत्त्ययोगात् इति व्यतिरेकव्याप्तिप्रदर्शनमुखेन उक्तहेतुद्वयमभिप्रेतमन्यथा वैयर्थिकरण्यप्रसङ्गात्।

कारणभावात्—काणात्मकत्वः दिति तृतीयो हेतुः। सर्वसम्भवाभावात् शक्तस्य शक्यकरणात् इति आद्यद्वयस्यानुग्राहकम्। तथा च प्रथममुक्तं तर्कतद्धेतुद्वयं

दूषयितुं हेतुद्वयं व्याख्यातमिति द्रष्टव्यम्। व्यतिरेकव्याप्तौ नित्यासत्त्वं साधनावच्छिन्नसाध्यव्यापकमुपाधिरिति शङ्कते—**माभूदिति**। साध्यस्यासत्त्वमात्रस्य अनुकूलतर्कबलाद्व्याप्तिग्रहे साधनाव्यापकता नास्तीत्याह—**नेति**। साधनाव्यापकत्वभङ्गमेवोपपादयति—**नचासत इति**। कालभेदेनाऽप्यविरोधासम्भवादित्यर्थः।

ननु एकस्यानेकधर्मवत्त्वमविरुद्धम्; तथाच सत्त्वासत्त्वे धर्मौ घटस्य सत एवेति शङ्कते—असत्त्वं **सत्त्वं** चेति। तर्हि सत्त्वासत्त्वाश्रयस्यानादितया सत्त्वकाले सत्तयेवासत्त्वकालेऽप्यसत्तया चोपलब्धिः प्रसज्येत; नचेष्टापत्तिः; अनुभवविरोधादित्याह—**वस्तुनस्तथेति**। ननु सर्वदा सत्त्वे तवाऽपि सर्वदा सत्त्वेन प्रतीतिस्स्यादित्यत्राह—**अस्माकं त्विति**।

यद्यप्यव्यक्तावस्थाव्यक्तावस्थयोर्विरोधात् कथं व्यक्तस्यैवाव्यक्तत्वम्? कालभेदेनाविरोधेऽप्यव्यक्तावस्थस्याप्रतीतिवदसत्त्वावस्थस्याप्यप्रतीतिरिति वक्तुं शक्यम्; तथाऽप्येकस्यैव व्यञ्जकसन्निधानासन्निधानाभ्यां समावेशो दृष्टः, न तथा सत्त्वासत्त्वसमावेश इति भावः।

सत्त्वविशिष्टस्य कारणत्वखण्डनाय; 'किञ्च स्वरूपसत्त्वं स्वरूपाद्वटाद्यात्मनो नाधिकम्। असतोऽपि च स्वरूपं स्वरूपमेव। न ह्यसन् घटादिर्न घटादिः। तथा सति घटादिर्नेत्यपि न स्यात्; असतोऽघटादित्वात्, इति खण्डनोक्तमनुवदति—**न ह्यसन् घटादिरिति**। असत्त्वेन स्वरूपेण व्यवह्रियमाणं घटादि घटादिरूपं न भवतीति न स्वरूपमेव सत्त्वमिति यावत्। तत्र प्रतिबन्दिः—तथा सति स्वरूपसत्त्वाभावे घटादिसत्ताऽपि स्वरूपं न स्यात्; तथा च सत्त्वं न स्यात्। तत्र हेतुः असतोऽघटादित्वात्—स्वरूपत्वाभावात्; तथाच निषेधो न स्यात्। प्रतियोगिनोऽभावादिति भावः। तथाच सत्त्वस्य घटरूपत्वे असत्त्वस्यापि घटरूपत्वमविशेषादिति सत्त्वासत्त्वात्मकत्वयोर्विरोधात् सदसद्विलक्षणत्वरूपानिर्वचनीयत्वं पर्यवस्यतीति असन् घटादिः—असत्त्वेन व्यह्रियमाणघटादिः न घटादिः—स्वरूपमेव नास्तीति वक्तुं न शक्यत इत्यर्थः। कुतः? तथा सति घटादिस्वरूपं न स्यात्। तत्र हेतुः—असतोऽघटादित्वात् घटादिस्वरूपस्यातद्रूपत्वादित्यर्थः।

तथाचायं निर्गलितार्थः—सत्त्वस्य घटरूपत्वे असत्त्वस्यापि घटरूपत्वमविशेषादिति सत्त्वासत्त्वात्मकत्वयोर्विरोधात्। अन्यतरपरिशेषे स्वरूपशून्यतायां पर्यवस्यतीति खण्डनतात्पर्यम्।

किमत्र असत्त्वमभावप्रतियोगित्वं विवक्षितं उताभावात्मकत्वमिति विकल्पमभिप्रेत्य आद्यं दूषयति—**अभावेति**। अभावप्रतियोगित्वेऽपि सत्त्वविरोधाभावेन असत्त्वासिद्धेरित्यर्थः द्वितीयआह—**विरोधादिति**। भावात्मकत्वेन घटादेरुपलम्भादभावात्मकत्वाभावा (त्वविरोधा) दित्यर्थः।

ननु सांख्यकारिकायां उपादानग्रहणादित्युक्तम्; मूलेऽप्राप्तनिष्पत्त्ययोगादित्यनुवादोस्ति; स न युक्त इत्यत्राह—**उपादानग्रहणादित्यनेनेति**। उपादानग्रहणमुपलक्षणमित्याह—**दण्डचक्रादिभिरिति**। **सदेव साध्यमिति**—पूर्वमपि सदेव कार्यं साध्यमित्यर्थः। ननु शक्ताशक्तप्रभेदादिभिरित्यनुवादो न युक्तः कारिकायामदृष्टेरित्याशङ्क्याह—**शक्तस्येति**।

ननु घटादिकार्यं प्रागपि सत् शक्तकारणजन्यत्वादित्यत्र व्याप्तिरसति गाह्या; तत्र जन्यत्वादित्येव हेतुस्स्यात्; तथाच प्रथमहेत्वभेद इत्याशङ्क्य पूर्वहेतौ विपक्षे बाधकस्तर्क इत्याह—**असतोऽपीति**। ननु शक्तस्य जनकत्वं कथमप्राप्तस्योत्पत्त्यभावव्याप्तौ बाधकस्तर्क इत्यत्राह—**अयं भाव इति**। **तद्गर्भत्वमेवेति**—तैलगर्भत्वमेवेत्यर्थः! **तदभावः**—सिकतादिषु तैलाभावः। **तद्वतः**—कार्यरूपशक्तिमतो हेतोः। **तन्निष्पत्तेः**—कार्यनिष्पत्तेः; प्रागपि तत्सि (द्धिरनिवार्येत्यर्थः) द्धिः कार्यसत्ताऽस्तीत्यर्थः। **हेतुद्वयं**—तर्कमूलभूतव्याप्ति (र्के आपादक) द्वयमित्यर्थः। प्रसङ्गतद्विपर्ययावेवोपपादयति—**तथाहीति**। **सर्वस्मात्सर्वसंभवस्स्यात्**—सर्वकारणादपि सर्वं कार्यं स्यादिति प्रसङ्गः। न चासौ सर्वकार्यसम्भवोऽस्तीति विपर्ययः। **पञ्चानामिति**—साधकानिष्टापादकरूपाणामनुमानतर्काणामित्यर्थः। विशिष्टस्य सर्वहेतुदूषणपरत्वे विशेषणवैयर्थ्यमाद्यहेताविति्यभिप्रायेणाह—**तत्रेति**। किञ्चिद्विशेषस्य किञ्चद्विशेषं प्रति अन्वयव्यतिरेकवशात् कारणत्वोक्तौ नोक्तदूषणमिति शेषाणां दूषणमाह **शेषाणां त्विति**। **स्वोचितत्वं**—कार्यानुकृतान्वयव्यतिरेकित्वम्। कार्यदृष्टेरित्येतदुपपादयति—**न तावदिति**। तथाच सत उत्पत्तिदर्शनाद्बाध इत्यर्थः। न चासत उत्पत्तौ शशशृङ्गस्याप्युत्पत्तिः। अन्वयव्यतिरेकसिद्धकारणाभावात्। **निराश्रयत्वप्रसङ्गाच्चेति**—तथाच आश्रयासिद्धिरिति भावः। लोकविरोधपरिहारमाशङ्कते—**न च दृष्टमपीति**। परिहरति—**माध्यमिकादिमतानामिति**। बाधादर्शनेऽप्यसत्यत्वे सर्वत्राप्येवं प्रसङ्गेन माध्यमिकमतप्रसङ्गः; स च निराकरिष्यत इत्यर्थः। **उक्तोत्तरत्वादिति**—पूर्वं घटो नासीदिदानीमासीदिति कारणाद्व्यतिरेकेण लोकदृष्टेरित्यर्थः। **प्रकृतीति**—असदवस्थाया अभावे सर्वेषां स्वस्वावस्थाविशिष्टानां प्राक्सत्वात् किंचिन्न कस्यचिद्विकृतिरित्यर्थः।

न च यद्यतः कदाचिदभिव्यक्तं तत्तद्विकृतिरिति विभागः; अभिव्यक्तेः प्रकाशात्मकत्वे प्रकृतेरपि कदाचिच्छब्दादिभिः प्रकाशात्तद्विकृतित्वप्रसङ्गात्। आपरोक्ष्यविवक्षायां प्रकृत्यादि (त्यादीनां) (प्रति) महदादि विकृतिर्न स्यात्। तस्या (तेषामा) परोक्ष्याभावात्। न च यद्यस्माद्विभज्यते सा तस्य प्रकृतिरिति विभागः; विभागस्य प्राक्सत्त्वे असत्त्वे च (उक्तदोषात्) असाध्यत्वप्रसङ्गात्। न चाभिव्यक्तिरन्या; तस्याः पराभिमतोत्पत्तेरन्यस्या दुर्वचतया आद्यक्षणसम्बन्धात्मिकायाः प्रागसत्त्वनियमादिति भावः।

अवस्थायाः प्राक्सत्वे कारकव्यापारवैयर्थ्यमित्याह—**नहीति । निष्पन्नस्य**—सिद्धस्य निष्पाद्यत्वायोगात्; अन्यथा घटस्योत्पन्नस्य सर्वदोत्पादप्रसङ्गादिति भावः। ननु न कारकव्यापारस्य वैयर्थ्यं, तेषां व्यञ्जकत्वादित्यत्राह—**किञ्चेति** । कारक-व्यञ्जकयोर्व्यापारभेदादपि नैक्यमित्याह—**कारकं समग्रमिति । व्यञ्जकं त्विति**—एकस्य दीपस्य युगपद्घटपटादिव्यञ्जकत्वदर्शनादिति भावः। कारकस्य व्यञ्जक-त्वमेव यदि तदा बाधकमप्याह—**तदत्रेति** । न च मृत्पिण्डे करकाद्यभावः; क्रमेणो-त्पद्यमानानां दर्शनादिति भावः।

ननु व्यञ्जकानां स्वभावभेदः कल्प्यते; केषांचिद्युगपदनेकव्यञ्जकत्वं केषांचित् किञ्चिज्जातीयव्यञ्जकत्वं; तथा च नोक्तदोष इत्यत आह - **व्यञ्जकत्वे सिद्धे इति ।**

ननु आगन्तुकं नास्ति; सर्वं पूर्वमेव सत्; तथाच तदनुरोधाद्घटादिकारणानां दण्डादीनां व्यञ्जकत्वमङ्गीकरणीयमित्याशङ्क्य प्रत्यक्षादिभिरागन्तवस्सन्त्येवेत्य-भ्युपगन्तव्यम्; अन्यथा दोषमाह - **आगन्तुकाभाव इति** । व्यापारस्यागन्तुक-स्याभावादित्यर्थः। तस्यापि पूर्वसत्त्वाङ्गीकारे सृष्टिप्रलयादिकं युगपत्स्या (सर्वदा स्या) दिति भावः—**सिद्धान्तसृष्टचादिभिश्चेति** । सिद्धान्तकल्पनयेत्यर्थः। यद्वा त्वत्सिद्धान्तसृष्टचादिक्रमादिभिश्चेत्यर्थः—**कारकव्यापारात्प्रागिति** । प्राक्त्व-(प्राक्सत्त्व) स्य तदभावघटितत्वादिति भावः—**अपूर्वोत्पादने इति** । उत्पादनस्यो-त्पत्तेः पूर्वमविद्यमानस्य विवक्षितत्वे इत्यर्थः। व्यक्तिविवक्षायामिति । अभिव्यक्ति-विवक्षायामित्यर्थः। विपर्ययमुखेन पर्यवसितं हेतुमाह—**व्यज्यमानत्वादिति । हेत्विति**—व्याप्तं लिङ्गमित्यर्थः। **सर्वत्रेति** । तेजस उष्णस्पर्शः पृथिव्या गन्ध इत्यादिलोपप्रसङ्गादित्यर्थः। अपूर्वोत्पादनविवक्षायां विरुद्धत्वमपीत्याह—**अपिचेति** । सपक्षाच्चेति—नित्यत्वेनाभ्युपगतादात्मादेरित्यर्थः—**अन्यथेति ।** शशशृङ्गादेरप्युत्पत्त्यभावादिना नित्यसत्त्वसाधनप्रसङ्गादित्यर्थः—**भागसत्त्वे त्विति** । तस्योत्पत्तियोग्यतावच्छेदकत्वात् उत्पत्तेश्च आद्यसमयसम्बन्धरूपायाः प्रागसत्त्वस्यानुकूलत्वात् तस्य तद्विरुद्धत्वोपन्यासो व्याहत इत्यर्थः। अन्यथा अनभिव्यक्तस्य शशशृङ्गवदभिव्यक्तिसम्पादन (मशङ्क्यम्) मप्यशक्यं; अतिप्रसङ्गात्।

ननु प्रागसत्त्वे चासत्त्वाविशेषात् शशशृङ्गवत् तुच्छता स्यात्; कदाचित्सत्वे सत्त्वाविशेषात् आत्मादिवत् सर्वदा सत्त्वमेव स्यादित्यत्राह—**प्रागसदित्यादिना ।** प्रागसत एव घटादेः कदाचित्सत्वस्य सत एव घटादेः पश्चादसत्त्वस्य च प्रत्यक्षदृष्टेः दहनानुष्णत्वानुमानवद्बाधितमिति भावः। अनुभवातिक्रमे बाधकमाह--**अयथेति ।** आत्मा जडो विकारी वस्तुत्वात्; प्रकृतिरपि स्वोपादाननिष्ठा जडद्रव्यत्वात्; प्रकृत्यादि प्रत्यक्षं स्यात् उपादानद्रव्यत्वात् इत्यादिप्रसङ्गादित्यर्थः। सत्त्वसाधका-

नुमानान्तरं दूषयति—**अन्योऽपीति**। घटवत्त्वेन वादिद्वयसंप्रतिपन्नकालान्यः काल इत्यर्थः—**इतिवादिनः**—सांख्यस्य। भवद्भिः कालरूपपदार्थानङ्गीकारात् पक्षासिद्धिरित्यर्थः—**प्रणिधीयतां**—प्रतिसन्धीयताम्। परसिद्धस्य पक्षत्वे तु बाध इति ध्येयम्।

द्वितीयमपि हेतुं विशिष्य दूषयति—**यच्चकारकाणामित्यादिना**। **व्याहतमेतदिति**—कार्यस्या (स्यासिद्धत्वनियमात्) सिद्धत्वे सिद्धं प्रत्युत्पादकत्वस्यासम्भवादित्यर्थः—**अनङ्गाङ्गीकार इति**। अनपेक्षितस्वीकारो निग्रह इत्यर्थः—**युक्ताङ्गहानिः**। सिद्धत्वस्य प्रतिबन्धकतया तदभावरूपस्यासिद्धत्वस्योत्पत्त्यनुकूलतया तत्त्यागो युक्ताङ्गहानिर्निग्रह इत्यर्थः। **अविषयवृत्तित्वं चेति**। अविषये—स्वविषयतानर्हे स्वव्यापारफलप्रतिकूल एव वृत्तित्वं वेत्यर्थः। **विरुद्धस्थले**—स्वव्यापारफलप्रतिबन्धकस्थले। एवं च तव निग्रहत्रयमिति भावः।

अव्यवस्थाभयादिति द्वितीयं दूषयति—**समश्चेति**। तदेव दर्शयति—**न होति**। **निमित्तवदेवेति**—निमित्ते अतिप्रसङ्गपरिहारवदुपादानेऽपि सम्भवादिति भावः। प्रतिपक्षमाह—**त्वत्पक्षेण चेति**। **तथाच पट इति**—नित्यप्राप्त इत्यर्थः। व्यभिचारमप्याह—**प्रकृतिपुरुषयोरिति**। विरुद्धत्वमप्याह—**अतो यद्येनेति**। तयोः—प्रकृतिपुरुषयोः। **पङ्ग्वन्धवदिति**—

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।

इति पूर्वार्धम्। अत्रेत्थं वाचस्पतिना व्याख्यातम्—'ननु चेतनोऽहं चिकीर्षन् करोमी'ति कृतिचैतन्ययोः सामानाधिकरण्यमनुभूयते तन्नोपपद्यते चैतन्यस्याकर्तृत्वात् कर्तुश्चाचैतन्यात् इति शङ्कायाम्;—

तस्मात्तत्संयोगात् अचेतनं चेतनावदिव लिङ्गम्।

इति परस्परसंयोगाधीनो भ्रम इत्युक्त्वा; अवच्छिन्नयोस्संयोगोऽपेक्षां विना न सम्भवति; अपेक्षा चोपकार्योपकारकभावं विना नेति अपेक्षाहेतुमुपकार्योपकारकभावं पूर्वार्धेन प्रतिपाद्य पङ्ग्वन्धवदित्यनेन संयोगउक्तः इति। तत्कृतस्सर्गः—महदादिसर्गस्संयोगकृत इत्यर्थः। **अजसंयोगपक्षे इति**—विभूनामात्मनां परस्परसम्बन्धाव्यभिचार इत्यर्थः। प्रकृतिपुरुषयोस्संबन्धानङ्गीकारे आगमबाधमप्याह—**व्याप्तिरूपेणेति**।

ननु प्रकृतिपुरुषयोर्न नित्यस्संयोगः; मुक्तस्य तन्निवृत्तिश्रवणात्। तथा च यावद्द्रव्यं सम्बन्धोऽत्र विवक्षितो नास्तीति शङ्कते—**जहात्येनामिति**। **निवर्त्स्यतीति**—'न वृद्भ्य' इति इडभावः। **तदाऽपीति**—जहातीति परस्पराध्यासरूपभ्रान्तेरेव निवृत्तिर्भवदभिमता न तद्धेतुभूतसंयोगनिवृत्तिरिति व्यभिचारस्तदवस्थ इत्यर्थः। **उक्तेऽर्थे तदुक्तिं संवादयति—यद्ब्रूथेति**—

प्रकृतेस्सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति ।

'प्रकृतेस्सुकुमारतत्वं—पुनर्दर्शनासहत्वम् । अतिमन्दाक्षवैलक्ष्यमन्धरा प्रमादाद्विगलितवसना चेदालोक्यते वधूः पुरुषेण पुनस्सा दर्शनं न याति तथा प्रकृतिरपि पुनर्न द्रक्ष्यते इत्यर्थः' इति वाचस्पतिना व्याख्यात इत्यर्थः । उक्तेऽर्थे अक्षपादसम्मतिमाह—उक्तं चेति । अप्राप्तैरेव घटादिनिष्पत्तिदर्शनानुरोधेनैवाति-प्रसङ्गभङ्गात् । पीडने च—सम्बन्ध आवश्यक इति निर्बन्धकरणे च उक्तरीत्या व्यभिचारात्—सम्बद्धादपि रज्वादेरुत्पत्त्यदर्शनात् असंबद्धोत्पादनेऽपि न विरोध इत्यर्थः । **उपस्कार्यं**—अध्याहार्यम् । एतेनेत्यस्यार्थमाह—इह त्विति ।

एतेनेति—पूर्वं कालपक्षकानुमानस्य परपक्षानुसारेण दूषणमुक्तम् । इदानीं प्रत्यक्षादिभिर्बाधोऽपीति वक्तुं (कार्यप्राप्तकारणानामेवोत्पादकत्वमिति सत्त्वसाधक रूपस्य निरस्तत्वात् प्रत्यक्षादिभिर्बाधोऽपि सिद्ध इति विशेष इति दूषितस्यापि) पुनरनुवादः । अन्यथा आदिशब्दोक्तानुमानादीनां तुल्यतया प्रतिपक्षत्वप्रसङ्ग इति ध्येयम् । व्यञ्जकत्वमेवोत्पादकत्वं तदतिरेकेणोत्पादकत्वाभावात् । तत्र सिद्धत्व-मनुकूलमेव । न च कारकव्यञ्जकव्यवस्थिती न स्यातामिति वाच्यम्; तारतम्य-मादाय व्यवस्थासम्भवात् । तथा च पूर्वोक्ता दोषा इत्याह—**कारकव्यञ्जकानां चेति ।**

किमभिव्यक्तिरावरणनिवृत्तिः तदनुकूलव्यापारो वा ? नोभयत्र तारतम्य-मस्तीत्यर्थः । तत्तारतम्याङ्गीकारेपि तदादाय न व्यवस्था सम्भवतीत्याह—**तयोरपीति ।** अभिव्यक्त्यावरणयोरित्यर्थः । आवरणतद्वारणयोरित्यन्ये । सर्वनि-त्यत्ववादिनः आवरणनिवारणमेव न स्यात्; दूरे तत्तारतम्यमिति भावः । आवर-णतन्निवृत्त्योर्यौगपद्ये विरोधमप्याह—**आवारकं चेति । अन्यथा**—अनित्यत्वे सर्वनित्यत्ववादिनः कादाचित्कसत्त्वप्रसङ्गेन अपसिद्धान्त इत्यर्थः ।

तत्तिरोधिश्चेति—तिरोधानं नाम ज्ञानप्रतिबन्धो वा तत्सामग्रीरूपसन्नि-कर्षप्रतिबन्धो वा ? उभयत्र ज्ञानसन्निकर्षौ स्तो न वा ? आद्ये विद्यमानयोस्सर्वदा सरवेन नित्यतया निवृत्त्यनुत्पत्तिप्रयोजकत्वरूपप्रतिबन्धासम्भवात् । द्वितीये असतस्तव सर्वदैवासत्त्वान्निवृत्त्यनुत्पत्तिप्रयोजकत्वं शशशृङ्गादेरिव न सम्भवती-त्यर्थः । तिरोधानतन्निवृत्त्योरनित्यत्वे चासत उत्पत्तिप्रसङ्गः । तन्नित्यत्वाङ्गीकारे दूषणान्तरमाह—**तिरोधिमिति** । अनित्यश्चानित्या चानित्यौ । 'पुमान् स्त्रिया' इति पुंसश्शेषः ।

अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥

इति सृष्ट्यर्थं सत्वरजस्तमसामन्योन्याभिभवोक्तिरनुपपन्नेत्यर्थः । सत्वं रजस्तमसी अभिभूय शान्तात्मनो वृत्तीर्लभते । रजस्सत्वतमसी अभिभूय घोरा-

त्मनो वृत्तीः। तमस्सत्वरजसी अभिभूय मूढात्मनो वृत्तीरिति सृष्टयर्थमन्योन्याभिभवोक्तिर्व्यर्था अभिभवस्य नित्यत्वेन स्वतस्सिद्धत्वादित्यर्थः। केचित्तु—तिरोधेर्दुर्वचत्वमेवाह—**तिरोधिं तन्निबृत्तिं चेति**। भावाभावयोरेकत्र वृत्त्यसम्भवा (वृत्त्ययोगा) दिति भावः। एवं च सति दूषणान्तरं च भवतीत्याह—**मिथश्चेतीत्याहुः**।

भावाभावयोरेकदैकत्र वृत्तिस्संयोगतदभावयोरिवोपलब्ध्यन्यथानुपपत्त्या साधयितव्या। तथा च तिरोधितदभावयोर्नित्यत्वेऽपि तिरोधेर्न दुर्वचत्वमित्यत्राह—**समानदेशेति**।

यद्वा तिरोधितदभावयोर्नित्यत्वाङ्गीकारे भावाभावात्मकयोस्तयोस्समानदेशकालत्वं विरुद्धमङ्गीकरणीयमिति दूषणान्तरमाह—**समानेति**। असदुत्पत्त्यङ्गीकारेणापि निर्वाहसम्भवान्नान्यथा गतिरिति भावः। किञ्चाशेषनित्यत्वे पौर्वापर्याभावात्तव्यवहारोच्छेदः; अभिव्यक्त्यादीनां साध्यतोक्तिश्चार्थशून्येत्याह—**अपिचेति**। साध्य साधनभावस्य सर्वनित्यत्वमते बाधात् प्रवृत्तिनिवृत्तिवैधट्यं शास्त्राप्रामाण्यं च स्याच्चार्वाकस्येवेत्याह—**स्वप्रवृत्तीति**। प्रथम आदिशब्दो निवृत्तिपरः;। अपगोरणादेर्नित्यस्य निवृत्त्या परिहारसम्भवादिति भावः। कृष्यादेर्ज्योतिष्टोमाद्यपूर्वस्य प्रयत्नसाध्यत्वासम्भवाच्च साध्यताबोधकानुमानादिकं द्वितीयस्यार्थः। **अनुत्थितिः**—अनन्तरस्थितिः। प्रमाणा (अनुमाना) पेक्षया पश्चात् स्थितिः—अप्रामाण्यमिति यावत्। केचित्तु अनुत्थितिः—व्यर्थप्रवृत्त्यनुसरणमित्यर्थ इत्याहुः।

साङ्ख्यचार्वाकयो-रित्यत्र चार्वाकग्रहणं दृष्टान्तार्थम्। यथा चार्वाकमते कार्यकारणभावस्य साधनाभावात् प्रवृत्त्यादिवैफल्यं शास्त्रादेरप्रामाण्यं च तथा साङ्ख्यस्यापि स्यादित्यर्थः। **अयोग्यत्वमिति**—प्रत्यक्षायोग्यत्वं तद्योग्यत्वं चेत्यर्थः। **विवक्षितविघातकृदिति**—अनभिव्यक्तस्य कदाचिदभिव्यक्त्यर्थं प्रवृत्त्यासाफल्यसमर्थनभङ्गकृदित्यर्थः। ननु परेषां यस्तिरोधानपदार्थस्तदभावश्च तावेवास्माकमपि स्त इत्यत्राह—**इन्द्रियेति**। **इन्द्रियप्रतिघातः**-इन्द्रियप्रवृत्तिनिरोधः। **अन्यत्र**—अन्येषां पक्षे। **अत्र**—त्वत्पक्षे। **कादाचित्केति**—इन्द्रियप्रवृत्तेर्नित्यत्वे तत्प्रतिघातायोगात् तत्प्रतिघाताङ्गीकारे प्रतिघातस्य नित्यतयाऽनभिव्यक्तस्य कदाचिदभिव्यक्त्ययोगादित्यर्थः।

ननु दन्तिकपित्थादिग्रसनोद्ग्रसनादिवन्मृदादिभिर्घटादेर्ग्रसनोद्ग्रसनादिकं तिरोध्यभिप्यक्तिशब्दार्थौ भवत इत्यत आह—**असम्भवनिरस्तं चेति**। मृत्पिण्डापेक्षयाऽधिकपरिमाणस्य घटादेः मृदादिभिः ग्रसनोद्ग्रसनासम्भवादित्यर्थः। ननु "यथोर्णनाभस्सृजते गृह्णते च' 'ग्रसते च चराचरम्' इत्यादिशास्त्राणां का गतिरित्यत्राह—**शास्त्रमपीति**। तत्राप्यवस्थाविशेषोत्पत्तिलयावादायोपपत्तिरि(पपन्नमि)ति भावः।

नन्वप्राप्तानां जनकत्वे अतिप्रसङ्गात् प्राप्तस्य जनकत्वायोगादकामेनाप्यभिव्यक्तिर्वक्तव्या; दोषाश्च यथाकथंचित्परिहार्या इत्याशङ्कते—**प्राप्ताविति। अत एव तव व्यक्ती**—त्यन्वयः। अभिव्यक्तिं प्राप्याप्राप्य वा करोतीति विकल्पक्षोभस्य समानत्वादित्याह—**इत्यप्ययुक्तमिति**। ननु भवन्मते प्रकृतिसम्बन्धोऽनादिरित्युच्यते स च कर्मसाध्य इत्यपि; तद्वत् कार्याणां पूर्वसत्त्वेऽपि साध्यत्वमस्तित्वत्यत आह—**सत्त्वादिगुणभूयिष्ठेति**। सत्वरजस्तमोभूयिष्ठभागानामंशानां देहादिरूपेण परिणतानां **अव्यवस्थितेः**—अनियतत्वात् सम्बन्धस्याप्येकत्वाभावेन भिन्नभिन्नत्वात् बीजाङ्कुरन्यायेन पूर्वपूर्वेषां प्रकृतिसम्बन्धानामुत्पत्तिरित्यर्थः।

नन्वेवमनादित्वोक्तिः कथम्? इत्यत्राह—**प्रवाहानादिरिति**। ननु जीवानां ज्ञानं संसारदशायां तिरोहितमितीष्यते। तिरोधानं चास्य तत्प्रागभाव एव। स चानादिः। स च कर्मणेति कर्मकृतत्वं कथम्? इत्याशङ्क्य प्रवाहानादि(तया) सविद्विकाससङ्कोचरूपसंतन्यमानकादाचित्कावस्थारूपत्वात्प्रागभावस्य कर्मसाध्यता न विरुद्धेत्याह—**सार्वज्ञेति। कर्मिणां**—जीवानां। सूल एव 'शक्तस्य शक्यकरणात्' इत्युक्तहेतुं विशिष्य दूषयतीत्याह—**यत्त्विति**। प्रतिबन्दिमेवोपपादयति—**यथेति**। तिलकारणपरम्पराया एव तैलादिरूपशक्तिमत्त्वं न तु सिकतातत्परम्पराया इत्यत्र किं निदानम्? इति शङ्कायां तथा दर्शनादिति व्यवस्थापनीयं; तथा मृदादीनामेवान्वयव्यतिरेकदर्शनात् घटादिजनकत्वं नान्येषामिति वक्तुं शक्यत्वादित्यर्थः। **दृष्टहानं**—दृष्टयोरन्वयव्यतिरेकयोर्हानम्। **अदृष्टस्य** कार्यगर्भत्वस्य। **अन्येषां**—कारणाद्भिन्नानामित्यर्थः। सिद्धान्तातिक्रमे त्वत्पक्षे शक्तिमत्त्वाविशेषादिदं निमित्तमेव नोपादानमिति व्यवस्था न स्यादिति दूषणे सत्येव दूषणान्तरं वक्तुं विकल्पयति—**सा किमिति**। दूषयति—**न्यथेति**। आत्मनो निमित्तत्वं नास्तीत्यत आह **आत्मा खल्वति**। किञ्च नाशकेषु नाश्यमस्ति नवेति विकल्पमुखेन प्रतिबन्ध्यन्तरमाह—**नाशकेष्वित्ति**। वह्नौ नाशके तथा तूलं विरुद्धं तथा नाशकान्तरेऽपि नाश्यं विरुद्धमित्यर्थः। **कथं तदेवेति**—वह्निरेव तूलस्य नाशकः न जलमिति नियमः कथमित्यर्थः। परापादितातिप्रसङ्गमिहापि दर्शयति—**न ह्यतद्वत्तोति**। **शुक्ताविति**—अनिर्वचनीयरजतपक्षेऽपि अधिष्ठानतया रजतनाशनिमित्तत्वात् प्राप्तरजतनाशकत्वं दृष्टं नाप्राप्तमिति प्रतिबन्ध्यन्तरमित्यर्थः।

केचित्तु—साङ्ख्यमत एव भ्रमस्थले रजतस्य शुक्ताववियमानस्य दोषादिघटितसाग्र्याऽभिव्यक्तिरिति वक्तव्यम्, अन्यथाख्यात्यङ्गीकारे तस्या नित्यत्वप्रसङ्गेनानिर्मोक्षप्रसङ्गात्। तथाच तस्य भ्रमत्वमधिष्ठानसाक्षात्कारमात्रस्य निवर्त्यत्वात्। निवृत्तिश्च तिरोधानमेव। तथा च प्राप्तनिवर्तकत्वे-शुक्तौ रजतसत्त्व

प्रसङ्गः। तथाऽङ्गीकारे च सर्वं सर्वत्र वर्तेत; सर्वत्र भ्रमसम्भवात्। तथाच अप्राप्तमेव रजतम(मित्य)भिव्यक्तं तिरोहितमिति वाच्यं; तदा शुक्तिरूप्यतत्तुल्यता प्रसजेत्; तथा(एवं) च आपणस्थरजतस्यापि (सत्यरूप्यस्य शुक्तिभावस्यान्निवर्तनमिति न्यायेन) शुक्तिरूप्यवन्निवृत्तिस्स्यादित्यर्थः। प्रतिबन्ध्यन्तरमाह **दूषणेष्विति**। अनेन सर्वसम्भवाभावादिति विवक्षितहेतुश्च दूषित इत्याह—**प्रतिज्ञाहेतुविरोध इति**। धर्मत्वस्य भेदघटितत्वादिति भावः। **सपक्षेभ्य इति**—तथाच असाधारणानैकान्तिकत्वमिति भावः।

'पटस्तन्तुभ्योऽभिन्नः तदुपादेयत्वात् यदुक्तसाध्यं न तदुक्त साधनं न यथा घटः' इत्यनुमानान्तरं दूषयति—**यदपीति**। अभेदस्तादात्म्यं। **पूर्ववदेवेति**—व्याप्यत्वासिद्ध्यादिदूषणदुष्टमित्यर्थः। दूषणान्तरं च वक्तुं विकल्पयति—**तदुपादेयत्वमिति**। **तत्सम्बन्धित्वं वेति**—संयोगसमवायान्यतरवत्त्वमित्यर्थः। **निमित्तैरिति**—तत्र व्यभिचार इति भावः। **तद्धर्मत्वहेतूक्तेति**—दृष्टान्तासिद्ध्यादिदोषादेरित्यर्थः। उभयत्र—विकल्पद्वयेऽपि। हेत्वसिद्धिं परिहरति—**इष्टोऽपीति**। भवता कारणे सत्त्वं हि कार्यस्याङ्गीकृतं! तस्य तदभेदाभावे तत्र सत्त्वायोगादिति भावः। तथाच अत्रानुमाने भिन्नत्वे सति अभिन्नसत्ताकत्वं तादात्म्यं साध्यमिति ध्येयम्।

असिद्धिमेवोपपादयति—**न होति**। **तत्र** हेतुमाह—**समवायस्येति**। **तस्यैव साध्यत्वादिति**—साध्याविशेषो दोष इत्यर्थः। तदुक्तमनुमानान्तरं दूषयति—**यच्चैतदित्यादिना**। **तत्संयोगेति**—तत्संयोगरहितत्वे सति तदप्राप्तिरहितत्वादित्यर्थः। तत्संयोगरहितत्वादित्युक्तौ हिमवद्विन्ध्ययोर्व्यभिचारः। तदप्राप्तिरहितत्वादित्युक्तौ कुण्डबदरयोर्व्यभिचारः इति विशिष्टहेतुः। व्यतिरेकव्याप्तिं दर्शयति—**तादात्म्याभावे होति**। अप्रयोजकतामाह—**तादात्म्यविरहेऽपीति**। इष्टापत्त्यादिना अवस्थातद्वतोर्भेदस्यैवोपपादनादिति भावः। इतश्च न पटस्तन्तुभ्यो भिद्यते गुरुत्वान्तरकार्यादर्शनादित्यनुमानान्तरं दूषयति—**गुरुत्वान्तरेति**। द्रव्यस्यैव गुरुत्वा-श्रयत्वादिति भावः।

ननूत्पत्तिवादिभिरपि अभिव्यक्तिरेव नामान्तरेणाभ्युपगता। अन्यथा पदगताविति शाब्दस्मृतिविरोधः। गतिर्हि ज्ञानमभिव्यक्तिः; अतस्तद्दूषणं स्वमतदूषणमेव स्यादिति शङ्कते—**नन्विति**। परिहरति—**पाठोऽपीति**। धातुपाठोऽपीत्यर्थः। ननु जन्मनोऽभिव्यक्तित्वे निर्वर्त्यं च विकार्यं च प्राप्यं चेति भेदेन कथनमनुपपन्नं स्यादित्याह—**निर्वर्त्येति**।

ननु जनीप्रादुर्भावे इत्यत्र प्रादुर्भावशब्दः कथमित्यत्राह—**अभूतेति**। पूर्वमविद्यमानं यत् तद्भावः तादृशावस्थावत्त्वमित्यर्थः। तथाच असत उत्पत्ति-

स्मृतिबलाल्लक्षणेति भावः। अस्तु वा प्रादुर्भावशब्दो मुख्यः; तथाऽपि तस्यासत्त्वात् असत उत्पत्तिरिति न ते विवक्षितसिद्धिरित्याह—**भवति वेति**। अभिव्यक्तिः किमुपलब्धिरेव उत तद्योग्यत्वं? नाद्य इत्याह—**दृष्टादृष्टदशान्वयादिति**। उत्पत्तिरभिव्यक्तिश्चेत् सोपलब्धिरिति घटस्य यावद्विनाशमभिव्यक्तिमत्त्वात् दृष्टत्वादृष्टत्वरूपदशान्वयो न स्यात्। उत्पत्त्यनन्तरं विद्यमान एव घटः कदाचिद्दृश्यते कदाचिन्न दृश्यते चेति भावः। न द्वितीय इत्याह—**अथेति**। अथेन्द्रियाणामुत्पत्तिरस्ति; तन्न स्यात्; उपलब्धियोग्यत्वरूपाभिव्यक्तेरभावादित्यर्थः। **सत्स्वलक्षणेति**—सतो विद्यमानस्य स्वलक्षणस्य वस्तुस्वरूपस्य पूर्णता अभिव्यक्तिः। सा कारकव्यापाराद्भवतीत्यर्थः। पूर्तिरपि पूर्वमस्ति नवेति विकल्प्य आद्यं दूषयति—**साऽपि प्राक्तनीति**। कारकव्यापारवैयर्थ्यमित्यर्थः द्वितीयं दूषयति—**नो चेदिति**। असतस्सर्वदा असत्त्वात् पूर्तिर्न सिध्येदित्यर्थः। **हेतुरप्यसन्निति**—कार्यपूर्वसत्त्वसाधकस्सत्स्वलक्षणपूर्तिरूपाभिव्यक्तौ व्यभिचारादसन्नित्यर्थः।

असत उत्पत्तिपक्षे दूषणानां स्वव्यापकत्वाज्जातित्वमित्याह—**किञ्चेति**। **हेतुविरोधं चेति**—सतः कृतकत्वायोगात् कृतकत्वे (वा) प्रागसत्त्वनियमात् **असदकरणादिति** हेतुविरोध इत्यर्थः। **कार्यव्यक्तौ** कार्यस्याभिव्यक्तौ। **कःप्रद्वेषः**—कृतितुल्यत्वादित्यर्थं तुल्यतामेवोपपादयति—**कृतिरपीति**। कृतिर्हि कृतैव। नचानवस्था; सिद्धानवस्थारूपतया मूलक्षयकरत्वाभावात् बीजाङ्कुरस्थल इव न दोष इति परिहरति—**कृतिर्हीति**। अभिव्यञ्जकव्यापारे त्वयाऽपि दृश्यानवस्था वक्तव्ये (स्थाङ्गीकार्ये) त्याह—**त्वयापीति**।

ननु अभिव्यक्त्युत्पत्तिपक्षयोस्तुल्यत्वेऽभि (त्वादभि) व्यक्तिपक्षे कः प्रद्वेषः? इति चेन्न; अभिव्यक्तिवादिनस्तव सर्वनित्यत्वाङ्गीकारादीदृशावस्थयाऽप्यभिव्यक्तिकादाचित्कत्वादिसमर्थनं दुर्घटं (मत्त्वा) आगन्त्ववस्थावादिनस्तादृशव्यापाराङ्गीकारात्सुलभमित्युत्पत्तिपक्ष एव श्रेयानिति द्रष्ट (मन्त) व्यम्।

नन्वभिव्यक्तेर्नाभिव्यक्तयन्तरमपेक्षितं; तथा च नानवस्थेति त्वदुक्तप्रतिबन्ध्यवकशो नेति शङ्कते—**नन्विति**। ननु परस्यापि कारकव्यापारवैयर्थ्यमिति प्रतिबन्दीमाशङ्कते—**नन्विति**। **सत्ता**—सत्ताजातिः। **चर्चा**—विचारः। **अस्मच्छब्देति**—षष्ठीबहुवचनान्तस्य विहितान्वादेशास्थेन नश्शब्देनेत्यर्थः। **अन्यधर्मं इति**। कृतिरात्मधर्मः कथ घटधर्मरूपोत्पत्तिस्स्यादित्यर्थः। यद्वा कृतिर्व्यापारः कारकधर्मः। **तादर्थ्यनेति**। ज्ञातो घट इत्यादौ ज्ञाततोऽनभ्युपगन्तुर्ज्ञानस्येव घटधर्मत्वमित्यर्थः।

कृतेरुत्पत्तित्वे लोकव्यवहारं प्रमाणयति—**यदा होति**। व्याप्रियन्ते—कृतिविषया भवन्ति। व्यापारावस्थावत्त्वयोरुत्पत्तित्वे भाष्यं प्रमाणयति—**संवेति**।

तदभिप्रायमिति। आद्यक्षणावच्छिन्नाभिप्रायं कृत्यभिप्रायं चेत्यर्थः। एतेन उत्पत्तिर्न तावत् स्वरूपं घट उत्पन्न इति सह प्रयोगानुपपत्तेः इति सांख्योक्तंदूषणं निरस्तमित्याह—**अत एवेति** ननु उत्पत्तिरुत्पद्यते न वा? आद्येऽनवस्था; अन्त्ये उत्पत्तावुत्पत्तिव्यवहारो न स्यादित्यत आह—**नचेदृश्या इति**।

भवतु वा मा वेति। उत्पत्तिशब्दस्योपचारोऽस्तु वा मा वा; प्रागसिद्धस्वरूपत्वादुत्पत्तिः तदर्थं कारकव्यापार इति न वैयर्थ्यमित्यर्थः। **स एवेति**—कारकव्यापार एवोत्पत्तिरित्यर्थः। ननु तर्हि कारकव्यापारस्यैवोत्पत्ति (शब्दार्थ) त्वे कार्यस्यैवोत्पत्त्यर्थं कारकव्यापार इति लोकव्यवहारोऽनुपपन्नः षष्ठ्यर्थाभावादित्यत आह—तदा **कार्यार्थं इति**। अन्यथेति—कार्यस्योत्पत्त्यर्थे व्यवहार इत्यर्थः।

ननु तर्हि कार्यमुत्पन्नमित्यत्र पौनरुक्त्यप्रसङ्गः? कृतिविषयत्वप्रागसत्स्वरूपलाभाकारेण शब्दबोध्याकारभेदान्न प्रसङ्गः। नन्वभिव्यक्तिवादिनोऽपि क्रियार्थत्वेन कारकव्यापारसार्थक्यमित्याशङ्क्य तद्दूषयति-**क्रियैवेति**। **प्रागिति**। **तस्यां**-क्रियायां। ननु क्रियाया अपि प्राक्सत्त्वमस्तु क्रियावद्भिः कारकैः पटादेः कार्यस्य प्रधाने—उपादाने भोग्यांशस्य निष्पत्त्या तादृगन्वयस्साध्यसाधनभावान्वयोस्तु; तथा च न कारकव्यापारवैयर्थ्यं भागिनोऽशिन उपादानस्य भागैरंशैरैक्यात्सर्वभावानां प्राक्सत्त्वमन्योन्यमैक्यं चेति शङ्कते—**क्रियावद्भिरिति**। भेदः प्राक्सन्न वेति विकल्पमभिप्रेत्य आद्यं दूषयति—**भिन्नांशेति**। **नाभिन्नादिति**। भेदस्यापि पूर्वसिद्धत्वान्न कारकैः (कव्यापारसाध्यत्व) सम्भव इत्यर्थः।

नन्वेकमेव वस्तु भिन्नं चाभिन्नं च। तत्र कारकैर्भेदस्याभिव्यक्तिः करिष्यत इति शङ्कते—**भिन्नाभिन्नादोति**। तस्मादभिव्यक्तेरेव प्राक्तन्या न साध्यत्वमिति साऽपि न साध्येति दूषयति—**प्राक्तनीति**। द्वितीयं दूषयति—**एकस्येति**। **अस्मदिष्टवत्**। अस्मदिष्टमस्मिन् वर्तत इत्यर्थः। इष्टयदिति पाठान्तरं। इष्टं करोतीत्यर्थः॥ २४॥

इति साख्योक्तसत्कार्यवादनिरासः

अक्ष०। एतादृशसत्कार्यवादेऽप्यलब्धतृप्तेस्सांख्यस्य नित्यैकान्तवादानुगुणान् प्रयोगाननुवदति- **सन्तीति**। **प्रागपि**। कुलाल तन्तुवायादि कारकव्यापारात्पूर्वमित्यर्थः। **अवस्थाः**—घटत्वपटत्वादयः। **सन्तीति**। यथा द्रव्यस्य प्राक् सत्वं भवन्मते न विरुद्धयते तथाऽवस्थानामपीति। कुत इत्यत्राह—**मदितरेति**। तदस्माभिरिष्यत इति भावः। अनेन पदेन सांख्योक्तहेतुषु प्राथमिकहेतुद्वयानुवादः। यदाहुः—

"असदकरणादुपादानग्रहणात्सर्वसंभवाभावात्।
शक्तस्य शक्यकरणात् कारण भावाच्च सत्कार्यमिति"॥

तत्र असदकरणादित्यस्य असतः करणादृष्टेरित्यर्थः। नहि शशशृङ्गादिकं किञ्चित्क्रियमाणं दृश्यत इति भावः। अस्यानुवादः सदितरकरणादृष्टेरिति। उपादानग्रहणादित्यस्य उपादानस्य करणस्य ग्रहणात् कार्यसम्बन्धनियमादित्यर्थः। असंबद्धस्य कारणत्वादर्शनेन कार्यसंबद्धस्यैव कारणत्वे सम्बन्धस्य च द्विनिष्ठतया कारण तत्कार्यमपि पूर्वं सदेवेति वक्तुमुचितमिति भावः। अस्यैव व्यतिरेकमुखेनानुवादः **अप्राप्तनिष्पत्यदृष्टेरिति**—असंबद्धेन हेतुना असंबद्धकार्यनिष्पत्यदृष्टेरित्यर्थः। एवं हेतुद्वयमनूद्य तृतीयादिहेतूनप्यन्वाह—**शक्तेति**—शक्तस्य शक्यकरणादित्युक्तहेत्वभिप्रायेण शक्ताशक्तेति वचनं। असतोप्यसंबद्धस्यापि कार्यस्य हेतुशक्तिनियमान्निष्पत्तिस्स्यादित्यस्योत्तरमेतत्। तिलेभ्यस्तैलमुत्पद्यते न सिकताभ्य इत्यत्र तिला एव तैलोपादानशक्ता न सिकता इति वक्तव्यम्। तत्र तिलेषु तैलातिरिक्तशक्त्यदर्शनात्कार्यस्य सूक्ष्मावस्थैव शक्तिरिति सिद्धौ पूर्वमेव कारणे कार्यस्य सत्ता सिद्धचतीति भावः। आदिशब्देन कारणभावात् सर्वसम्भवाभावादिति हेतुद्वयग्रहणम्। कारणभावादित्यस्य कार्यस्य कारणात्मकत्वादित्यर्थः। मृदयं घटः इत्यादिव्यवहारादिति भावः। **सर्वसंभवाभावात्**—सर्वेभ्यः सर्वोत्पत्यभावादित्यर्थः। पूर्वोक्तहेतूनामप्रयोजकत्वशङ्काद्यां प्रसङ्गः विपर्ययाभ्यां प्रतिवचन मिदं सर्वस्मात्सर्वसम्भवस्स्यात् नचासावस्तीति।

उक्तानां पञ्चानामपि हेतूनामाभासत्वाभिप्रायेण प्रत्याह—**नेति**। प्रथमस्य प्रतिक्षेपहेतुः—**कार्यदृष्टेरिति**। पूर्वमसत एव कार्यस्य करणदृष्टेरित्यर्थः। पूर्वं घटो नासीत् इदानीमेव क्रियत इति लोकदृष्टेः प्रथमहेतोरसिद्धिरिति भावः। शेषाणान्तु स्वोचितादिति विशेषितः। कार्यदृष्टेरित्ययमेव प्रतिक्षेपकः स्वोचितादित्यत्र स्वपदं कार्यपरं तत्तत्कार्योचितात्कारकचक्रादित्यर्थः। तत्तत्कार्योचितत्वञ्च तत्तदुत्पादकस्वभावत्वं। तत्तन्नियतपूर्ववृत्तितावच्छेदकधर्मवत्वमेव नतु तदतिरिक्तं सम्बन्धसामान्यं कार्यस्याधारत्वं तादात्म्यं वा एषामभावेऽपि नियतपूर्ववृत्ति मात्रेण कार्यस्य दर्शनादिति भावः।

यदुक्तं कार्यानुकूलशक्तिमत्वमेव कारकत्वं शक्तिश्च कार्यस्य सूक्ष्मावस्थैव अत एव तिलेभ्य एव तैलं न सिकताभ्य इति दर्शनमुपपद्यत इति। तत् प्रतिबन्द्या समाधत्ते—**तस्मिन्निति**। तच्छब्दद्वयेन स्वोचितादित्युक्तस्य परामर्शः। **सत्येवेति**। स्वोचितात्कारकात्। **जनिः**—स्वस्योत्पत्तिः। स्वोचितकारके सत्येवेत्यर्थः। स्वोत्पत्तौ स्वकारकसद्भाव एवापेक्षितः नतु कारके स्वसद्भावोऽपि। मृत्तन्त्वादिषु घटपटाद्यदर्शनात्—अन्यथा मृत्पिण्डे तन्तु तूलादावपि घटपटादिसत्वप्रसङ्गः। इष्टापत्तौ अदृष्टकल्पने मानाभाव इति भावः। प्रतिबन्ध्यन्तराभिप्रायेणाह—**तन्निमित्तादीति**।

भवन्मते निमित्तकारणस्यापि कारकत्वोपगमात्तत्रापि कार्यसत्वप्रसङ्गः—

इष्टापत्तावपसिद्धान्तस्स्यात् । उपादानमात्रे हि वः तत्सत्वाङ्गीकारः । दर्शनानुरोधेन कार्यगर्भत्वाऽभावेऽपि निमित्तादीनां कारकत्वोपगमे तन्न्यायः उपादानेऽपि तुल्य इति भावः । अत्र आदिशब्देन तन्नाशकादि गृह्यते । यथा नाशके नाश्यसद्भावानङ्गीकारेऽपि नाशकत्वव्यवस्था तथा कारके कार्यसद्भावाभावेऽपि कारकत्वव्यवस्था भवत्येव अन्यथा नाशकेऽपि अग्न्यादौ तूलादिसत्वप्रसङ्गेन विरोधो दुर्निवारस्स्यादिति भावः ।

किञ्च पूर्वसिद्धायाः अवस्थायाः अभिव्यक्त्यर्थं कारकव्यापार इति पक्षे अभिव्यक्तेरभिव्यक्त्यर्थं वा उत्पत्यर्थं वा कारकव्यापार इति विकल्पे आद्ये दोषमाह—**व्यक्तिरिति**—अभिव्यक्तिरित्यर्थः । **व्यक्तेति**—अभिव्यक्तेत्यर्थः । यदीति शेषः । अनवस्थां भजतीत्यनेनान्वयः । अभिव्यक्तेरभिव्यक्तिरितिकल्पने तुल्यन्यायेन तस्यापि तथेत्यप्रामाणिकाभिव्यक्तिपरम्पराकल्पनायाः विश्रान्तिरेव न स्यादिति भावः ।

उत्पत्तिकल्पन्तु नित्यैकान्तवादभङ्गभिया त्वमेव वक्तुं नार्हसीत्याह—**नचेति**—ननु कार्यं क्रियत इति पक्षेऽपि कार्यस्वरूपातिरिक्तायाः कृतेः किं कृतिरुताभिव्यक्तिरिति विकल्पे कल्पद्वयेऽपि अनवस्था तदवस्था स्यादित्यत्राह—**नैवमिति**—क्रियत इत्यत्र कृतेः कारकव्यापाररूपतया तदौपयिककारकान्तर व्यापारपरम्पराभ्युपगमावश्यम्भावेऽपि बीजाङ्कुरपरम्परावत्प्रामाणिकत्वेन सिद्धानवस्थाया न दोषत्वमितिभावः ।

एवं वा । तस्मिन्सत्येवेत्यत्र तच्छब्दः कार्यपरः । तस्मिन् तैलादिरूपे कार्ये सत्येव । कारण इति शेषः । तिलादिरूपे कारणे । **सत्येव**—विद्यमानएव । **तस्मात्** । स्वोचितात्तिलादिरूपकारणात् । **जनिः**—स्वस्येति शेषः । स्वस्य कार्यस्योत्पत्तिरित्यपि । **नियता**—तन्मात्रनियता नतु मृद्घटादिसर्वकार्यकारणसाधारणीत्यर्थः । ततश्च तत्कार्यजननशक्तिमत्तायाः तत्कार्यवत्वरूपत्वे घटाद्युत्पत्तेः प्रागपि मृदादीनां घटादिकार्यवत्वप्रसङ्गः । नचेष्टापत्तिः उपलम्भविरोधादिति भावः । स्वाभ्युपगमविरोधप्रसंगमपि व्यञ्जयति—**तन्निमित्तेति** । कार्यगर्भतयाऽनभ्युपगतेषु निमित्तकारणादिष्वपि कार्यजननशक्तेरभ्युपगन्तव्यत्वात् कार्यशक्तिमत्वं न कार्यगर्भत्वमिति भावः । आदिना कालादिसाधारणकारणसंग्रहः ॥

एवं कार्यमुत्पद्यत इति सह प्रयोगेन कार्यस्वरूपातिरिक्ताया उत्पत्तेस्सत्तासमवायरूपतया समवायस्य च नित्यत्वेन कारकव्यापारवैयर्थ्यमिति शङ्कायामपि परिहाराभिप्रायेण नः इत्युक्तम् । सिद्धान्तिना समवायानभ्युपगमेन तदतिरिक्तायाः कृतेराद्यक्षणावच्छिन्नघटत्वाद्यवस्थाया वा उत्पत्तिरूपतया तस्याः अनित्यतया न कारकव्यापारवैयर्थ्यप्रसक्तिरिति भावः ॥ २४ ॥

वस्तुस्थैर्यं विरुद्धानुपहितविषया साधयेत् प्रत्यभिज्ञा
नैकस्मिञ् शक्त्यशक्तौ कृतितदितरयोः साह्यभेदे सिद्धेः ।
एकस्मिन् कालभेदाद्भवति च सहकार्यन्वयानन्वयादि-
र्नोचेन्नो देशभेदादपि सुपरिहरस्तेन नैकं क्वचित्स्यात् ॥ २५ ॥

सर्वा० । अर्धवैनाशिकनिरासाय सत्कार्यवादे साधिते तुल्यन्यायतया सर्वनित्यत्ववादेन समुत्थितः **सांख्यो** निरस्तः । अथ पक्षत्रयप्रतिपक्षं **वैनाशिक**मतं निरस्यति—**वस्तुस्थैर्यमिति ॥** वस्तुशब्देन सत्त्वानुमानसूचनम् । यथाऽऽहुः—क्षयत्सत् तत्क्षणिकं यथा जलधरः सन्तश्च भावा इति । यदक्षणिकं तदवस्तु यथा खसूनम् । अक्षणिकत्वे चामीषां तद्वदसत्त्वप्रसङ्ग इति भावः । **विरुद्धानुपहित-विषयेति**— विरुद्धधर्मासंसृष्टविषयेत्यर्थः । दीपस्रोतःप्रभृतिषु अनन्यथासिद्धभेदक-बलात् बाधः । विप्रतिपन्नैकत्वधीः प्रमा विरुद्धधर्मासंसृष्टविषयत्वात् संमतैकत्व-धीवत् । न हि स्वलक्षणानां प्रत्येकमेकत्वं नास्ति; तथा सत्येकानेकसर्वविकल्प-लोपेन माध्यमिकविजयप्रसङ्गात् । रूपादिधीवदित्येव वोदाहर्तव्यम् ।

तदियं प्रमितिः सती प्रत्यभिज्ञा पूर्वापरकालवर्तिविषयं साधयति । दीपनदी-प्रवाहकृत्तपुनःप्ररूढकेशादिषु तु संप्रतिपन्नसामग्रीभेदादिबाधकबलात् तस्या न साधकत्वम् । ननु स इति धीः स्मृतिः, अयमित्यनुभवः, निरन्तरोत्पत्तेः ज्वाला-क्षणेष्विव तयोर्भेदाग्रह इति, तन्न; समानाधिकरणबोधात् । यद्यपि सोऽयमिति व्यवहारे तादृशधीभेदेन वैयधिकरण्यशङ्का; तथाऽपि तमिमं पश्यामीत्यादिषु उभयाकारविशिष्टस्यैकस्य दृशिकर्मत्वदृष्टेर्बुद्धयैक्यं दुरपह्नवम् । अत एव ग्रहण-स्मरणात्मकमिदं ज्ञानमिति वदन्तः प्रत्युक्ताः ।

ननु कथमिन्द्रियासंबद्धः तदंश इदानीमिन्द्रियेण गृह्येत ? मनोसंबद्धोऽनु-भूतविषयः कथं मनसा ? तदनुभवजन्यसंस्कारसहकारादिति चेत्, समानमत्रापि । दृष्टत्वात् तथैव तत्रेति चेत्, अत्राऽपि तथैव । वेद्याकारैकदेशादुत्पन्नस्य प्रत्यक्षत्वे शुक्तिरजतधीरपि मानं स्यादिति चेन्न; आरोपानारोपाभ्यां विशेषात् । किं च संस्कारोपनीतरजताद्यारोपे च इदं रजतमिति चाक्षुषबुद्धिरेका । न हि तत्र रजता-दबुद्धयुत्पत्तिः, तस्यासन्निहितत्वात्; अर्थजत्वेन त्वदुक्ताविसंवादित्वप्रसङ्गाच्च । इन्द्रियजन्यतया प्रत्यक्षत्ववत् संस्कारजन्यतया स्मृतित्वमपि दुर्निवारमिति चेन्न, तमेतमनुभवामि पश्यामीत्यादिप्रत्यक्षविरोधादेव । अत एव संस्कारप्राधान्यमुत्प्रेक्ष्य केवलस्मृतित्वशङ्काऽपि निरस्ता ।

भवतु वा स्मृतित्वमपि; तथाऽपि स्मृत्यनुभवात्मकमेकं ज्ञानं स्वविषयस्य स्थिरत्वं साधयत्येव । कथमप्रमा स्मृतिरर्थं व्यवस्थापयेदिति चेत्; किमत्राप्रमात्वं ज्ञानव्यतिरिक्तत्वं वा ? अनुभवव्यतिरिक्तत्वं वा ? अयथार्थत्वं वा ? नाद्यः,

असिद्धेः। न द्वितीयः, त्रितयप्रकाशवादिभिः स्मृतेरप्यात्मस्वात्मविषयेऽनुभवत्व-स्वीकारात्, त्वया च स्वसंवेदनांशेऽपि। विषयांशेऽनुभवव्यतिरिक्तत्वं स्मृतेरिति चेत्, तथाभूताऽपि स्वकारणानुभवात् स्वविषयमबाधितं व्यवस्थापयेत्। अस्वातन्त्र्यादिविचारस्त्वत्र प्रकृतानुपयुक्तः। न तृतीयः, यथार्थस्मृतौ विरोधाभावात्। सर्वाऽपि स्मृतिरयथार्था अतीतस्य वर्तमानतया अवभासादिति चेन्न; अतीततयाऽपि प्रायशः स्मृतिभिरर्थोल्लेखात्। प्रच्युततदाकारस्य तद्वत्तया भासनादयाथार्थ्यमिति चेन्न; स्मृतिप्रमोषे तदभावात्, अतीतादिविषयानुमानानामपि तत्प्रसङ्गाच्च। तर्हि पाकरक्तेऽपि श्यामत्वधीर्यथार्था स्यादिति च मन्दम्; प्राचीनश्यामताबुद्धौ विरोधाभावात्। एतेन स्मृतिर्न बाह्यविषया नष्टेऽप्यर्थे स्मृतिदर्शनादिति वदन्तोऽपि निरस्ताः।

एवं प्रत्यभिज्ञा स्थिरविषयेति सिद्धे सोऽहमिति धीश्चात्मनः स्थिरत्व-मुल्लेढि। तदहं स्मरामीति स्मृतिमात्रेण चैतत्सिद्धम्। ननु विरुद्धानुपहितविषये-त्यसिद्धम्, कुर्वदकुर्वत्क्षणयोः शक्त्यशक्तिभ्यां वैजात्यादित्यत्राह—**नकस्मिन्निति**। कुर्वतोऽकुर्वतश्चैकत्वेऽङ्गीक्रियमाणेऽपि शक्त्यशक्तिरूपविरुद्धधर्माध्यासो न स्यादित्यर्थः। शक्तश्चेत्कुर्यादेव, न करोति चेदं कुसूलनिहितं बीजमिति प्रसङ्गतद्विपर्याभ्यां शक्त्यशक्तिसिद्धिरिति चेन्न; शक्तस्यापि करणाकरणयोः सहकारिसन्निध्यसन्निधिप्रयुक्तत्वात्। तदाह—**कृतितादितरयोरिति**। साह्यं—सहभावः। कदाचित्पुष्कलैः सहकारिभिः साह्यं कदाचिद्विकलैरिति प्रयोजकभेदेनेत्यर्थः। अकुर्वत्स्वभावस्य कथं सहकारिभिरपि कुर्वत्ता, कुर्वत्स्वभावस्य वा कथम्? तद्विरहात्तदभाव इति चेन्न; सहकारिसन्निधौ कुर्वत्तया तदभावे चाकुर्वत्तया स्वभावव्यवस्थासिद्धेः। परसापेक्षः कथं स्वभाव इति चेन्न; स्वहेतुसापेक्षत्वव-दुपपत्तेः, अधिपतिसहकार्यालम्बनसमनन्तरप्रत्ययाश्चत्वारो विज्ञानोत्पत्तौ कारण-मिति युष्मदुक्तिविरोधात्। अर्थजत्वं च प्रामाण्यं ब्रूषे। उपच्छन्दनार्थमुत्तानवाक्य-मिति चेन्न; अतिप्रसक्त्या सिद्धान्तस्थितेर्दुर्निरूपत्वप्रसङ्गात्। शक्तं चेदन्त्यतन्तु-संयोगादिवदवश्यसिद्धसहकारिचक्रं स्वकार्यं कुर्यादिति चेन्न; स्वकारणादापततां सहकारिणामेतदधीनत्वाभावात्। पराधीनत्वेऽप्यवर्जनीयं तत्सन्निधानमिति चेन्न; अन्यथाऽपि दृष्टेः।

अस्तु सहकारिसंबन्धासंबन्धादिकमेव विरुद्धत्वाद्भेदकमित्यत्राह—**एकस्मि-न्निति**। आदिशब्देन प्रस्तुतकरणाकरणादिसंग्रहः। कालभेदाद्विरुद्धस्वीकारे किम्, कुत्र, नासीत्, न स्याद्वेति सर्वत्राव्यवस्थितिरिति चेन्न; दर्शनादर्शननियमा-भ्यामेव संभवासंभवस्थितेः। एवमनभ्युपगममनुवदन्प्रतिबन्दिमाह—**नो चेदिति**। अत्रास्ति करोति च, अन्यत्र नास्ति न करोति चेत्यादिनिर्देशभेदेन सत्त्वासत्त्वा-दिसमुच्चयः सुदुष्परिहरः स्यात्। अपिर्विषयभेदाद्यनुक्तसमुच्चये। विषयादिभेदादपि हि विरोधः परिह्रियते। क्वचिच्छक्तं क्वचिदशक्तं केनचिज्जन्यते व्यज्यते

बाध्यते वा नान्येन, कस्यचित् प्रतियोगी व्याप्यः व्यापकः पूर्वः परो वा नान्यस्येत्यादि। एवं विषयभेदादिभिरपि विरोधस्ते दुष्परिहरः। ततः किमित्यत्राह—**तेनेति**। विरुद्धानां देशकालाद्यसमाहितविरोधत्वेन स्वलक्षणस्यापि विरुद्धशतक्षुण्णतया नानात्वे तत्क्षोदानां च तथातथा क्षोदे किंचिदप्येकं न सिध्येत्, तदभावे च कुतोऽनेकमिति **माध्यमिकमतापातः**। सैव तर्हि सुगतमतकाष्ठेति तत्र तिष्ठाम इति चेत्; तन्निष्ठेन त्वयाऽस्मन्मतबाधकानुपन्यासे विवादाभावः। तदुपन्यासे तु तत्रतत्र तद्बाधाबाधविकल्पदौस्थ्यं दुष्परिहरमिति भावः॥ २५॥

आनन्द० सांख्यनिरसनानन्तरमेव वैनाशिकनिरसने संगतिमाह—**अर्धवैनाशिकेति**। अर्धवैनाशिको—वैशेषिकः। **वैनाशिको बौद्धः**। विनाशं व्यवहरतीति ठक्।

वस्तुशब्देनेति। तस्य सत्त्व (वस्तु) वाचित्वादिति भावः।

अवस्तु—असदित्यर्थः। **विरुद्धेति**—कथञ्चिदपि परस्परसामानाधिकरण्यानर्हधर्मा (संसृष्ट) नाश्रयविषयेत्यर्थः। **भेदकं**—सामग्रीभेदादि। **तथा सतीति**—स्वलक्षणं किञ्चिदपि एकं वा भिन्नं वा ? भिन्नमपि किञ्चिदेकं वा भिन्नं वा ? इति विकल्पेन स्वलक्षणसर्ववस्तुविलोपप्रसङ्गेन माध्यमिकमतप्रसङ्ग इत्यर्थः। सर्वस्याप्येवं विकल्पे कुत्रापि विश्रमाभावात् स्वलक्षणं विद्यमानस्वरूपमेव यादवमुसलनीत्या न भवेदिति भावः।

ननु तेषां धर्मधर्मिभावाभावात् कथभेकत्वबुद्धिर्दृष्टान्तः ? इत्यत आह—**रूपादिधीवदिति**। तथा च एकत्वधीः—अभेदधीरित्यर्थः। प्रत्यभिज्ञाया ऐक्यसाधकत्वे अतिप्रसङ्गं परिहरति—**नदीप्रवाहेति**। **सम्प्रतिपन्नेति**। तथा च न तुल्यबलत्वमिति भावः। आद्यदीपज्वालोत्पत्तौ अग्निवर्त्यवयवसंयोगो हेतुत्वेन निश्चितः। तथाऽन्त्यवर्तिसंयोगनाशो ज्वालानाशहेतुत्वेनावगतः। ततः प्रतिक्षणं अग्निवर्त्यवयवसंयोगतन्नाशानां भिन्नभिन्नानामुत्पद्यमानानां प्रतिक्षणं ज्वालातन्नाशोत्पादकत्वात् तत्र प्रत्यभिज्ञा बाधिता न साधिकेत्यर्थः। एतेन विप्रतिपन्नैकत्वधीः न प्रमा प्रत्यभिज्ञात्वात् नद्यादिप्रत्यभिज्ञावदिति प्रतिरोधः। तथा पूर्वानुमाने नदीप्रत्यभिज्ञायां व्यभिचारश्च परिहृतः। प्रतिपक्षे बाधितत्वमुपाधिरिति न तुल्यबलता। विरुद्धानुपहितविषयत्वाभावाद्व्यभिचाराभावश्चेति ध्येयम्।

ननु प्रत्यभिज्ञाया ऐक्यसाधकत्वमनुपपन्नं ज्ञानद्वयात्मकत्वेन तस्याः पूर्वापरकालवर्तिवस्तुविषयकत्वस्य प्रत्येकमभावात्। न च तदुभयगोचरज्ञानद्वयादैक्यसिद्धिः; उभयत्रोभयगोचरत्वाभावे तदैक्यगोचरत्वासम्भवादिति शङ्कते—**नन्विति**। तर्हि बुद्धावैक्यगोचरबुद्धिः कथमित्यत्राह—**निरन्तरोत्पत्तेरिति**। **ज्वालाक्षणेषु**—ज्वालारूपवस्तुषु। परिहरति—**तन्नेति**। ऐक्यरूपसामानाधिकर-

ण्यविषयव्यवहारहेतुबोधस्य बाधकाभावे सामानाधिकरण्यविषयत्वनियमादिति भावः। **उभयाकारेति**—पूर्वकालिकत्ववर्तमानकालिकत्वविशिष्टस्यैवेत्यर्थः। उभयधर्मविशिष्टस्यैकस्य दृक्कर्मत्वं बुद्धचैक्यमापादय (माक्षिप) तीति भावः। अन्यथा दृशिप्रयोगवत् अधीगर्थप्रयोगोऽपि स्यादित्यर्थः।

केचित्तु दृशिकर्मत्वदृष्टेः—प्रत्यक्षमात्रकर्मत्वस्य द्वितीयाप्रयोगे दर्शनात्। अन्यथा तमित्यत्र अधीगर्थसम्बन्धेन षष्ठीप्रसङ्गादित्याहुः।

ननु स्मृतिकर्मदृक्कर्मभेदाग्रहादुभयकर्मत्वविशिष्टे कर्मत्वव्यवहार इति चेत्; अत्र वदन्ति—बाधकाभावेन भेदाग्रहादैक्यव्यवहारस्य वक्तुमयुक्तत्वात्। न च सत्त्वानुमानं बाधकं; तस्यास्मात्प्रत्यक्षाद्दुर्बलतया बाधितत्वेन स्वरूपालाभादिति।

अत एवेति—ज्ञानस्यैक्ये सिद्धे तस्य च प्रत्यक्षत्वे विरोधिपरोक्षत्वव्याप्यस्य स्मृतित्वस्य प्रत्यक्षे विरोधादिति भावः। **वदन्तः**—मीमांसकाः। ज्ञानद्वयवादी ग्रहणस्मरणात्मकज्ञानवादी च शङ्कते—**नन्विति**—**वेद्याकारो** विषय इत्यर्थः। **प्रत्यक्षत्वे**—प्रत्यक्षप्रमात्वे। **शुक्तिरजतेति**—तस्या अपि वेद्याकारैकदेशेदमंशजन्यत्वादिति भावः। अर्थजन्यत्वाभावे किं प्रमात्वं न स्यादिति विवक्षितम्? उत तदैक्यं न स्यादिति? इति विकल्पमभिप्रेत्य आद्यं परिहरति—**आरोपेति**। अर्थजत्वाभावेऽपि बाधितेतरविषयत्वेन अनुमितिवत् प्रामाण्यसम्भवादिति भावः। द्वितीयं परिहरति—**किञ्चेति**। यथाच व्यभिचारादर्थजत्वं तदैक्यस्याप्रयोजकमित्यर्थः। **तमेतमिति**—संस्कारजन्यत्वं स्मृतित्वप्रयोजकं न भवतीत्यर्थः।

नन्विन्द्रियस्येव संस्कारस्य प्राधान्यात् केवलस्मृतित्वमस्तु विनिगमकाभावात् इति शङ्कां बाह्येन्द्रियसन्निकर्षनिरपेक्षसंस्कारजन्यत्वं स्मृतित्वप्रयोजकमिति परिहरति—**अतएवेति**। उक्तरी (ग) त्या प्रत्यक्षत्वस्य सिद्धत्वादित्यर्थः। **स्वसंवेदनांशे**—स्वात्मांशे इत्यर्थः; बौद्धैरपि स्वप्रकाशत्वस्वीकारादिति भावः। शङ्कते—**विषयांशे इति**। **तथाभूताऽपीति**—अनुभवव्यतिरिक्ताऽपि कारणरूपानुभवमाक्षिप्य तद्द्वरा अबाधितं विषयं साधयतीत्यर्थः। **स्वकारणानुभवादिति**—ल्यब्लोपे पञ्चमी। ननु स्मृतित्वेऽस्वातन्त्र्यं न स्यादिति शङ्कां परिहरति—**अस्वातन्त्र्येति**। स्वातन्त्र्यास्वातन्त्र्ययोरर्थव्यवस्थापनादावनुपयोगादित्यर्थः।

ननु ज्ञानं स्वसमानकालिकत्वेन स्वविषयावभासनस्वभावं। तथाच स्मृतिरपि स्वविषयमतीतदेशकालादिकं वर्तमानतया गृह्णती बाधितवियत्वादप्रमेति शङ्कते—**सर्वापीति**। तादृशस्वभावोऽसिद्ध इति परिहरति—**नेति**। **प्रच्युततदाकारस्य**—अवगतपूर्वकालादिसम्बन्धस्य। **स्मृतिप्रमोषः**—तत्तानवगाहिस्मृतिः। यथा **ज्ञानद्वयं भ्रम इति पक्षे इदं रजतमित्यत्र रजतस्मृतिः**। यदि ज्ञानस्यातीतादिविषयकस्याप्रामाण्यनियमः तदा दोषमाह—**अतीतेति**। **प्राचीनश्यामतावुद्धौ**—प्राचीनतया श्यामतावुद्धौ श्यामतामात्रबुद्धौ चेत्यर्थः। बाह्यार्थे स्थैर्यं साधयित्वा

आत्मनोऽपि स्थैर्यं साधयति—**एवमिति**। **कुर्वदकुर्वदिति**—कार्यजनने वर्तमान-व्यापारवत्तदभाववद्दण्डादिक्षणयोर्वस्तुनोरित्यर्थः। **शक्त्यशक्ती**—शक्तितदभावौ।

ननु स्थायित्वपक्षेऽङ्कुरोत्पादकमेव बीजं कुसूलस्थमिति प्रत्यभिज्ञया साधनीयं। तत्र अङ्कुरोत्पादनशक्तिश्चेत् कुर्यादेव; न करोतीति (शक्त्यभावः कुसूलस्थस्य; केदारस्थस्य शक्तत्वं करणादिति) विरुद्धधर्माध्यास इति शङ्कते—**शक्तश्चेदिति**। **शक्तस्यापीति**—करणाकरणयोः शक्तितदभावप्रयुक्तत्वाभावान्न शक्त्यशक्तिरूपविरुद्धधर्माध्यासप्रसङ्ग इति भावः। सहशब्दस्य धर्म्यवाचकत्वात् तत्र भवप्रत्यय; कथमित्यत्राह—**साह्यमिति**। सहशब्दः सहितपरः; तस्य भाव-स्साह्यं। यद्वा त्रैलोक्यादिवत् स्वार्थिकः। तदेवाह—**कदाचिदिति**। पुष्कलसह-कारिसान्निध्यमपुष्कलसहकारिसान्निध्यं चेत्यर्थः। **भेदो**—विशेषः।

सहकारिसन्निधाविति—दर्शनादित्यर्थः। **स्वहेत्विति**—कुर्वत्स्वभाव (स्व) लक्षणस्यापि स्वहेतुपरसापेक्षतया स्वभावत्वाभावप्रसङ्गादिति भावः।

ननु क्षणानां हेतुसापेक्षत्वमेव नास्तीत्यत आह—**अधिपतीति**—अधिपति-रिन्द्रियं चक्षुरादि। प्रतीयते अनेनेति प्रत्ययः—कारणं। उदितस्य ज्ञानस्य रसादि-साधारण्याद्रू (ण्ये रू) पादिविशेषनियमनादिन्द्रियस्याधिपतित्वं। नियामकस्या-धिपतित्वात्। सहकारी—आलोकादिः। ततो जातस्य ज्ञानस्य स्पष्टता भवति। समनन्तरप्रत्ययः—संस्कारः। तस्मात् प्राचीनज्ञानोद्बोधः। आलम्बनप्रत्ययः—नीलानीलाद्यर्थाकारः प्रत्ययः। ज्ञानपदवेदनीयस्य चित्तस्य समनन्तरप्रत्ययसहिता-दधिपत्यादिविषयनियामकस्पष्टताप्रयोज (जन) कसहितान्नीलाकारज्ञानाच्चि-त्ताख्यं ज्ञानं नीलोऽहमित्याद्याकारसन्ततिं भजत इति चत्वारः प्रत्ययाः, इति बोधि-चित्तविवरणे दर्शनादित्यर्थः **प्रामाण्यमिति**—प्रामाण्यप्रयोजकमित्यर्थः। **उपच्छ-न्दनं**—वञ्चनं। **उत्तानं**—अहृदयं **अतिप्रसक्तयेति**—त्वदुक्ताविदमुपच्छन्दनार्थ-मुत्तानं इदं नेति निर्णयनियामकाभावात्सन्देहादयं सिद्धान्त इति व्यवस्था न स्यादित्यर्थः।

ननु शक्तस्य सहकारिसम्पत्तिनियमात् अन्त्यतन्तुसंयोगादिवत् स्वकार्यका (क) रणं न स्यादिति शङ्कामनूद्य सहकारिसंपत्तेश्शक्त्यधीनत्वाभावेन तथा नियम एव नास्तीति परिहरति—**शक्तं चेदिति अन्यथाऽपि**—सहकारिसान्निध्या-भाववत्तयापीत्यर्थः। दर्शनानुसारेण व्याप्तिर्वाच्येति भावः। करणाकरणादीत्यादि-शब्देन शक्तश्शक्त्यादिकं गृह्यते। **अव्यवस्थितिरिति**—कालभेदेन सर्वं सर्वत्र स्यात् विरोधाभावादिति भावः। तथाच असाधारणधर्मव्यवस्था न सिध्येदिति ध्येयम्।

सम्भवासम्भवौ—इदमत्रासीदिदमत्र भविष्यति इदमत्र नासीदिदमत्र न भविष्यतीति सद्भावासद्भावौ। यदि करणाकरणादीनां कालभेदेन समुच्चयेऽप्य

व्यवस्थादोषः; तदा क्षणेऽपि देशभेदेन सत्त्वासत्त्वकरणाकरणादिसमुच्चयस्य दुष्परिहरत्वात् स दोषस्तवापि स्यादित्याह—**अत्रास्ति करोति चेति**। **विषयादिभेदादपीति**—शक्तयशक्तयादीनां विषयादिभेदादपि विरोधाभावेन तत्प्रयुक्तो भेदः परिह्रियते इत्यर्थः। तदेव दर्शयति—**क्वचिच्छक्तमिति**। दण्डो घटे शक्तः पटोत्पादने शक्तयभाववान् घटः क्वचिदधिकरणे जायते क्वचिद्व्यज्यते क्वचिद्बाध्यते; एवं केनचिज्जन्यते व्यज्यते बाध्यते च नान्येन; तथा कस्यचित्प्रतियोगी कस्यचिद्व्याप्यः कस्यचिद्व्यापकः इति शक्तत्वाशक्तत्वादीनामविरोध इत्यर्थः। आदिशब्देन कुत्रचित्संयोगतदभावादीनां ग्रहः। परः पूर्व इत्यादौ कस्यचिदित्यस्य तस्मादिति विभक्तिविपरिणामेन कस्माच्चिदित्यन्वयः।

केचित्तु—'अन्यारादितरर्ते' इत्यादिना दिक्छब्दयोगे पञ्चम्याः 'तस्य परमाम्रेडितम्' इति निर्देशेन अनित्यत्वज्ञापनात् कस्यचिदित्यनुषङ्गः। भवत्पक्षे भिन्नविषयकत्वादिभिरपि विरोधपरिहारो न सम्भवति भिन्नविषयकत्वादेरपि विरुद्धत्वादित्याह—**एवमिति**। विषयभेदो भिन्नविषयत्वं। आदिशब्देन करणभेदादिसंग्रहः। **तत्क्षोदानां**—क्षणिकस्वलक्षणाद्भिन्नानां भागानां। **तथातथा**—जन्यत्वाजन्यत्वादिप्रकारेण। तदभावे इति—तथाच वस्तुनः पारमार्थिकत्वे तस्यैव किञ्चित्प्रति कुर्वत्त्वं किञ्चित्प्रत्यकुर्वत्त्वमित्यादि विरुद्धधर्माध्यासस्यावश्यकत्वात्; तादृशस्यासम्भवात्॥

कुर्वतोऽकुर्वतो नैक्यं सतश्चाप्यसतस्तथा।
अजन्यस्य च जन्यस्य तथाभातमतो मृषा॥

इति माध्यमिकमतापात इत्यर्थः। **सैवेति**—माध्यमिकमतमेवेत्यर्थः। शैत्यं हीत्यादिवत् स्त्रीत्वं। **तदुपन्यास इति**—बाधकोपन्यासे उपन्यस्तं प्रमाणं बाधितं न वा? आद्ये अस्मन्मतबाधो न स्यात्। द्वितीये बाधस्याबाधितत्वान्माध्यमिकमतं न स्यादिति माध्यमिकमतस्य दुस्थत्वादित्यर्थः॥ २५॥

अक्ष०। वैशेषिकादिमतनिरासाय सत्कार्यवादे बाधिते तुल्यन्यायादव स्थानामपि नित्यत्वं साधनीयमिति प्रत्याशया समुत्थितस्सांख्यपक्षो निरस्तः। अथ उक्तपक्षत्रयप्रतिपक्षं सर्वानित्यत्ववादि वैनाशिकमतन्निरस्यति **वस्तुस्थैर्यमिति**। अत्र वस्तुशब्देन परोक्तं सत्वानुमानं सूच्यते-यथोक्तं तैः—

"यत्सत् तत्क्षणिकं" यथा जलधरः सन्तश्च भावा अमी इति। यदक्षणिकं तदवस्तु—यथा खपुष्पमिति व्यतिरेकव्याप्त्या अक्षणिकत्वे अवस्तुत्वमापाद्यते। तस्यानुमानस्य संप्रति सोऽयं घट इत्यादि प्रत्यभिज्ञाप्रत्यक्षेण बाध उच्यते एकस्यैव विषयस्य पूर्वापरकालवृत्तितयाऽवगाहनात्।

दीपज्वालाप्रभृतिष्वीदृशप्रत्यभिज्ञासत्वेऽपि न तावदैक्यमङ्गीकृतमित्यत्राह—**विरुद्धानुपहितविषयेति**। विरुद्ध धर्मासंसृष्टविषयेत्यर्थः। दीपज्वालादिषु

विभिन्न सामग्री जन्यत्वादि विरुद्ध धर्माध्यासादैक्यस्य बाधेन सा प्रत्यभिज्ञा अप्रमा भवति ततो नैक्यसिद्धिः। इयन्तु प्रत्यभिज्ञा प्रमा—विरुद्धधर्मासंसृष्टविषय(क) त्वात् रूपादिधीवत्—इति प्रमात्वसिद्धौ विषयैक्यं साधयतीति भावः।

अत्र स्मृत्यनुभवात्मकं ज्ञानद्वयमिति पक्षस्य "तमिमं पश्यामी"ति उभयाकारविशिष्टस्यैकस्य दृशि कर्मत्वदृष्ट्या निरासो भाव्यः। इदानीमिन्द्रिया संबद्धस्याऽपि तत्तांशस्य पूर्वतन–तदनुभवजन्यसंस्कारसहकारादिन्द्रियेण ग्रहणं यथा मनसा तदसंबद्धस्य बाह्यार्थस्येति दर्शनानुरोधादुपगम्यते। संस्कारजन्यत्वेऽपि तमेतमनुभवामि पश्यामी"ति प्रत्यक्ष बुध्युद्बुदयान्न स्मृतित्वप्रसक्तिरिति बोध्यम्।

ननु विरुद्धानुपहितविषयेत्यसिद्धं कुसूलक्षेत्रयोर्वर्तमानस्य बीजस्य अङ्कुरशक्त्यशक्तिरूपविरुद्धधर्मदर्शनादित्यत्राह—**नैकस्मिन्निति**। क्षेत्रस्थस्य देश भेदेन कुर्वतः अकुर्वतश्च बीजस्यैकत्वेऽपि तत्र शक्त्यशक्तिरूपविरुद्धधर्माध्यासो नास्ति कुसूलस्थतादशायामपि शक्तेरुपगमादिति भावः। शक्तिसत्वे तदानीमप्यङ्कुरादिकरणप्रसक्तिरित्यत्राह—**कृतितदितरयोरिति**। देशभेदेन अङ्कुरकरणाकरणयोरित्यर्थः। **साह्यभेदेनेति**। साहचं सहभावः। पुष्कलैस्सहकारिभिः सहभावे सति करणं विकलैः सहकारिभिस्सहभावे अकरणमिति (भावः) शक्तिसत्वेऽपि करणाकरणयोस्सहकारिसम्बन्धासम्बन्धाभ्यामेव सिद्धिरिति भावः।

तर्हि सहकारि सम्बन्धासम्बन्धादिकमेव विरुद्धत्वाद्भेदकमस्तु इत्यत्राह—**एकस्मिन्निति। अन्वयानन्वयादिः**। सम्बन्धासम्बन्धादिः। आदिशब्देन प्रकृत करणाकरणसंग्रहः। **कालभेदादिति**। कालभेदेन विरुद्धसमावेशो न भेदक इति भावः। एवमनभ्युपगमे प्रतिबन्दीमाह—नोचेदित्यादिना।

कालभेदेनाऽपि विरुद्धसमावेशो नैकत्र स्यादिति चेत् तर्हि—देशभेदेनाऽपि सचैकत्र न संभवत्येवेति वक्तव्यम्—स तु दुष्परिहरः, नहचेकत्र क्षेत्रे अङ्कुरमुत्पादयन्बीजव्यक्तिविशेषः क्षेत्रान्तरेऽपि अङ्कुरमुत्पादयति तथा सर्वत्रैकैकत्र बीजविशेषे क्षेत्रभेदेन करणाकरणयोस्समावेशस्समापतन् कथं परिहर्तुं शक्यः।

एवं विषयभेदादपि दुष्परिहरत्वं अपिशब्देन सूच्यते। कलमबीजं कलमाङ्कुरमेवोत्पादयति – ननु कोद्रवाङ्कुरमिति भिन्नविषयकरणाकरणयोरेकत्र दुर्निवारत्वात्। ततः किमित्यत्राह—**तेनेति**। देशकालादिभेदेनाप्यसमाधेयविरोधानां करणाकरण सत्वासत्वादीनामेकैकत्र स्वलक्षणे दुष्परिहरत्वेन न किञ्चिदप्येकमनिर्भिन्नं वस्तु सिद्धयेदितिभावः॥ २५॥

तत्त्वेदं हि कालान्तरघटनमये नैककाले घटेतां
कालद्वैतेऽनवस्थाद्यत इह न मितिः प्रत्यभिज्ञेति चेन्न।
स्वस्य स्वाभावकाले विहतिनियमनात्स्वेन चात्रैककाल्यात्
काले कालानपेक्षे कथमपि सुवचौ नानवस्थाविरोधौ॥ २६॥

सर्वा०—पुनरपि प्रकारान्तरेण प्रत्यभिज्ञाबाधकं विरुद्धधर्माध्यासं प्रतिबन्दिविशेषमप्याशङ्कते—**तत्त्वेदंत्वे हीति** ॥ अतीतकालसम्बन्धस्तत्त्वम्, वर्तमानकालसम्बन्ध इदंत्वम्, न ह्यतीतं वर्तत इति सम्भवति सर्वेषां नित्यत्वप्रसङ्गात्; वर्तमानं च यद्यतीतं कथमस्मदादिप्रत्यक्षेण गृह्येत ? किं च कालद्वयान्वयरूपयोः तत्त्वेदन्त्वयोरेकवस्तुसम्बन्ध एकस्मिन्काले भिन्ने वा ? पूर्वत्र विरोधः; तस्मिन्नेतस्मिंस्तदुभयपूर्वापरे वा क्वचिदपि काले कालान्तरसंभेदायोगात्, अन्यथा त्रैकाल्ययोगपद्यप्रसङ्गात्। एतेन विरुद्धानुपहितविषयेति विशेषणं चासिद्धम्। उत्तरत्र कालद्वयनिर्वाहककालभेदाश्रयणे तयोरपि तथेत्यनवस्थापातः; न चैवं दृष्टमिष्टं वा। न च देशद्वयप्रतिबन्दिः, अस्माभिस्तदनभ्युपगमात्। तस्मात्कालद्वयविशिष्टे वस्तुनि प्रवृत्ता कृत्स्ना प्रत्यभिज्ञा न प्रमितिः विरुद्धविषयत्वात् शुक्तिरूप्यधीवत्, प्रत्यभिज्ञात्वादेव वा दीपादिप्रत्यभिज्ञावदिति चेत्, अत्र न कालद्वयंमात्र वस्तुनि विरुद्धं, विरुद्धकालान्वयस्तु नास्तीत्यभिप्रायेण प्रतिवक्ति—**नेति**।

अतत्तामनिदन्तां च तत्त्वेदन्त्वे निरस्यतः।
अन्योन्यप्रतिषेधस्तु न ततः सेद्धुमर्हति ॥
एकस्य भिन्नकालाभ्यां वैशिष्टयं विहतं यदि।
तथा स्याद्भिन्नदेशाभ्यां पुञ्जबुद्धिस्ततो न ते ॥

तर्हि कालद्वयविरोधः कुत्रेत्यत्राह—**स्वस्येति**। नियमनात्—यथाप्रमाणं व्यवस्थापनादित्यर्थः। अत एवातीतस्य वर्तमानत्वं वर्तमानस्य वाऽतीतत्वमिह न प्रवर्तनीयम्। ननु तत्त्वेदन्त्वे तावत् विरुद्धे, अन्यथा यौगपद्ये विरोधाभावप्रसङ्गात्, तत एव कालद्वयमप्येकस्य विरुद्धमिति तत्राह—**स्वेनेति**। पूर्वापरकालयोगो हि विरुद्धः। स्वेनोपाधिनाऽवच्छिन्नस्यैकस्य कालस्यावान्तरोपाधिभिर्नानात्वेऽपि तत्तदुपाधीनामेव तत्तदवान्तरकालद्वयान्वयविरोधः। अन्यापेक्षया पूर्वापरकालयोरन्यस्य विरुद्धत्वे क्षणकालस्याप्यन्यापेक्षया पौर्वापर्यात्तत्कालवर्तित्वमपि वस्तुनो विरुध्येत। क्षणकालसम्बन्धो वस्तुनः काल्पनिक इति चेत्, ततोऽपि माध्यमिकोत्थानम्।

ननु स्वरूपसत्यता क्षणसम्बन्धित्वं च साध्यते। न केवलं क्षणकालमात्रसंबन्धित्वम्। अतस्तुर्यबौद्धात् त्रयाणां विशेष इति। तर्हि सिद्धसाधनम्। अतः क्षणिकपक्षे स्थिरपक्षे वा स्वाभावकाले वृत्तिविरोधाद्वारणीया न तु स्वकालवृत्तिरिति भावः। अत्र च विरोधानवस्थयोः शङ्काऽपि नास्तीत्याह—**काल इति**। न ह्ययमपि काल एतस्मिन्काले किमुत कालान्तरम् ? तत्कालोऽपि न तस्मिन्काले किमुतायम् ? अत एतत्कालतत्कालौ वा कालान्तरं वाऽनपेक्ष्य एकस्मिन्वस्तुनि कालद्वयं संबध्यत इति स्थिते कथंचिदप्यनवस्थाविरोधयोर्नावकाशः। तथाऽपि कालद्वयं परस्पराभावनान्तरीयकं तदात्मकं वा कथमेकत्र स्यादिति चेन्न; कालद्वय-

स्यान्योन्यस्मिन्नभावेऽपि तदुभयसंबन्धिनि वस्तुन्यभावाभावात् । यस्तु तस्मिन्वस्तुन्यसंबद्धः कालः तस्य तत्र सद्भावं न ब्रूमः । न हि वयं नित्यानित्यविभागं निराकुर्मः ॥ २६ ॥

आनन्द०—ननु पूर्वमेव प्रत्यभिज्ञायां विरुद्धधर्माध्यासदोषमाशङ्क्य परिहृतत्वात् उत्तरपद्ये पुनस्तदेवोच्यत इति पौनरुक्त्यमित्यत आह—**पुनरपीति** । पूर्वशेषत्वान्न पृथक्संगतिरिति भावः । **वर्तमानं चेति**—वर्तमानस्य तत्ताश्रय (यातीतादि) भिन्नत्वेन संप्रतिपन्नवदिन्द्रियसम्बन्धाभावादिति भावः । **तस्मिन्**—अतीतकाले । **एतस्मिन्**—वर्तमानकाले । **तदुभयपूर्वापरे**—अतीतवर्तमानकालात्पूर्वापरयोरित्यर्थः । पूर्वश्चापरश्च—**पूर्वापरं**; एकवद्भावः । क्वचिदपि काले तदन्यकालसम्बन्धस्यासम्भवादिति भावः **त्रैकाल्येति**—भूतभविष्यद्वर्तमानकालानामित्यर्थः । समाहारद्विगोः स्वार्थे ष्यञ् त्रैलोक्यमितिवत् । **उत्तरत्रेति**—भिन्नकाले वेति द्वितीयपक्षे । **तयोरपि**—निर्वाहककालयोरपि कालभेदमादाय सम्बन्धइत्यनवस्थेत्यर्थः । **कालद्वयमात्रं**—कालद्वयसम्बन्धमात्रं ।

ननु तत्तेदन्तयोरन्योन्यप्रतिक्षेपकत्वात् कथमेकत्रेत्यत्राह—**अतत्तामिति** । तत्ता स्वाभावं इदन्ता च स्वाभावं तत्तेदन्ते च प्रतिक्षिपत इत्यर्थः । **ततः**—तस्मात् । तत्तेदन्तयोः प्रतिक्षेपकत्वं **सेद्धुं (सोढुं) भवितुं** नाहतीत्यर्थः । **तथा स्यादिति**—नन्वस्माभिर्देशद्वयसम्बन्धानङ्गीकारान्न प्रतिबन्दिरित्युक्तमिति चेत्; किं तदा देशानभ्युपगमात् ? तत्सत्वेऽपि तत्सम्बन्धानभ्युपगमाद्वा ? उभयथाऽपि पुञ्जबुद्धिर्न स्यात् । नानादेशस्थानामेकदेशसम्बन्धः पुञ्ज इति भावः । न **प्रवर्तनीयं**—न प्रसञ्जनीयं । **अन्यथेति**—विरुद्धयो रूपरसयोर्यौगपद्यदर्शनादिति भावः । तत एवेति—तत्तेदन्तयोर्विरोधात्तद्घटकीभूतकालद्वयमप्येकस्य विरुद्धमित्यर्थः । **क्षणकालस्येति**—अविशेषादिति भावः । **ततोऽपीति**—क्षणकालसम्बन्धाभावे कालासम्बन्धिनो वस्तुनः कदाऽप्यभावाच्च शशशृङ्गवदिति भावः । **स्वरूपसत्यतेति**—स्वरूपसत्यत्वसाधनात्तत्क्षणसम्बन्धस्य काल्पनिकत्वेऽपि तुर्याद्भेद इति भावः । स्वरूपसत्यत्वस्य सिद्धत्वात् क्षणमात्रसम्बन्धस्य (काल्पनिकत्वे वस्तुतः) मिथ्यात्वाच्च क्षणिकत्वाभा (वात्) वेन सिद्धसाधनमित्यर्थः । **एतस्मिन्निति** । न वर्तत इति शेषः । **किमुतेति**—अयमेव काल एतस्मिन् न वर्तते चेत् भूतकालादौ तद्वृत्तिताशङ्का दूरे इत्यर्थः । **परस्पराभावनान्तरीयकमिति**—परस्पराभावव्याप्तमित्यर्थः । **कालद्वयस्येति**—परस्पराभावनान्तरीयकत्वे परस्पराभावरूपत्वेऽपि वा कालिकविरोधितया नैकस्मिन् काले तद्द्वयं सम्बध्नाति । एकस्मिन् वस्तुनि सम्बन्धे न विरोध इत्यर्थः । नन्वेवं सति सर्वकालानां वस्तुसम्बन्धे विरोधाभावात् सर्वं वस्तु सर्वकालसम्बन्धीति सर्वं नित्यं स्यात् । तथा च नित्यानित्यविभागो न स्यादित्यत्राह—**यस्त्विति** । न हि वयं तत्रासम्बद्धकालसम्बन्धमपि ब्रूमः ! येन नित्यानित्यविभागं निराकुर्म इत्यर्थः ॥ २६ ॥

अक्ष०। पुनरपि प्रकारान्तरेण प्रत्यभिज्ञायाः बाधं शङ्कते—**तत्त्वेदन्त्वे इति। कालान्तरघटनमये इति**। विभिन्न काल सम्बन्धरूपे इत्यर्थः। अतीतकाल-संबन्धः तत्वं वर्तमानकालसंबन्ध इदन्त्वं, इति हि निर्वक्तव्यमिति भावः। एवंरूपे तत्वेदन्त्वे नैकस्मिन् वस्तुनि सम्भवेतां(म्) नह्यतीतं वर्तत इति संभवति—सर्व-नित्यत्वप्रसङ्गात्।

किञ्च तस्मिन्नस्मिन्वा—तदुभयपूर्वापरे वा कस्मिन्नप्येकस्मिन् काले कालान्तरसंबन्धाभावेन विरोधात्तदवच्छेदेन कालद्वयसंबन्धः नोपपादयितुं शक्य इत्याह—**नैककाल इति**। कालभेदेनोपपाद्यत इत्यत्राह—**कालद्वैत इति**। कालद्वयसम्बन्ध-निर्वाहककालयुगलावलम्बन इत्यर्थः। **अनवस्थादीति**। निर्वाहककालयोरपि एकत्र सम्बन्धार्थं निर्वाहकान्तरकल्पने अनवस्था अन्यथा विरोध एवेत्यर्थः। एवं विरुद्धविषयत्वादुक्तप्रत्यभिज्ञा दीपप्रत्यभिज्ञावद्वस्तुस्थैर्ये न प्रमाणमित्याह—**अत इति**।

अत्र कालद्वयसम्बन्धमात्रं न वस्तुनि विरुद्ध मित्याशयेन प्रत्याह—**नेति**। तर्हि कालद्वयविरोधः कुत्रेत्यत्राह—**स्वस्येति**। स्वाभावाधिकरण काल एव स्वस्य सम्बन्धोविरुद्ध इति प्रमाणतो व्यवस्थापनादित्यर्थः। स्वाधिकरणकाल स्वाभावा-धिकरणकालोभयसम्बन्धवत्ता एकत्र विरुद्धेत्युक्तं भवति। अत्र अतीतकाल इत्युक्तः स्वाभावकालः किं न स्यादित्यत्राह—**स्वेनेति**। स्वाधिकरण पक्षमासादि स्थूलकाल एक एवात्रातीतकाल इत्युच्यते नतु स्वाभावकालः स्वाधिकरणस्थूल-कालस्य स्वाभावानधिकरणत्वेऽपि स्वावान्तर दिन क्षणादि कालमात्रवृत्तिवस्तु प्रागभावाधिकरणतयाऽतीतत्वसंभवादिति भावः।

एवं स्वाभावकाले वृत्तिरेव विरुद्धा नतु स्वकालेऽपीत्युक्त्या तत्वेदन्त्वयोः विरोधाभावात् विरोधपरिहाराय कालभेदापेक्षाऽभावात्पूर्वपक्षोक्तरीत्या अनव-स्थाविरोधयोश्शङ्काऽपि न स्यादित्याह—**काल इति। कालानपेक्षे इति**। विरोध-स्यैवाऽभावेन अविरोधनिर्वाहक कालान्तरापेक्षाया अभावेनेत्यर्थः। अतो विरुद्ध-विषयकत्वाऽभावात्प्रत्यभिज्ञायाः प्रामाण्यं दुरपह्नवमिति भावः॥ २६॥

प्रत्यक्षं वर्तमानं प्रथयति यदिहावर्तमानाद्विभक्तं
तस्मात्तेनैव सिद्धं क्षणिकमिति न सत्तावदित्यप्रतीतेः।
तत्कालासत्त्वमेव ह्यपनयति सतो वर्तमानत्वबोधः
कालेऽन्यत्रापि सत्त्वं प्रमितमिति कथं तद्विरोधप्रसङ्गः॥ २७॥

सर्वा०—अथ प्रत्यक्षेणैव प्रत्यभिज्ञाप्रत्यक्षस्य विरोधं भावानां क्षणिकत्व-सिद्धिं च शङ्कते—**प्रत्यक्षमिति**॥ अस्मदादिप्रत्यक्षं तावद्वर्तमानमात्रविषयमिति सर्वसंमतम्। अन्यथा दृश्यमानानां पदार्थानां तत्क्षणापेक्षया पूर्वापरविशेषाणामपि

प्रत्यक्षत्वप्रसङ्गात् । तस्मादगृहीतपूर्वापरविशेषं वर्तमानग्राहि प्रत्यक्षमवर्तमानाघ्वावृत्तमेव स्वविषयं गृह्णाति । एतदेव च क्षणिकत्वं वस्तूनां यदपूर्वोत्तरत्वम् । अतस्संस्कारनिरपेक्षप्रत्यक्षबाधिता प्रत्यभिज्ञा देशान्तरस्थग्राहिशुक्तिरूप्यधीवत् संस्कारोपनीतकालान्तरस्थभेदसंवृत्त्या तस्मिन्निदन्त्वमस्मिन्वा तत्त्वमारोप्य कल्पितैक्यविषयेति । अत्र प्रत्यक्षवृत्तान्तानभिज्ञोक्तिरियमित्यभिप्रायेण प्रतिवदति—**न सदिति** । प्रत्यक्षस्य कालान्तरसंबन्धप्रतिक्षेपकत्वाभावमाह—**तावदिति** । वर्तमानत्वविधिरेवावर्तमानत्वनिषेधात्मा तावन्मात्रकालवर्तित्वं नियच्छदित्यत्राह—**तत्कालेति** । तत्कालसत्त्वविधिर्हि तदानीमसत्तां निरुन्ध्यात्, न तु कालान्तरसत्तामित्यर्थः । तथाऽपि इदंकारवता प्रत्यक्षेण कालान्तरसत्त्वस्यानालम्बनात् तत्प्रतिक्षेप इति चेत्तत्राह—**कालेऽन्यत्रापीति** ।

अयं भावः—यथेदमिति तत्कालसत्ता गृह्यते, तथा तदिदमिति कालद्वयसत्त्वमपि प्रत्यक्षेणैव गृहीतम् । एवं सति न्यूनाधिकविषयतामात्रमिह प्रत्यक्षयोर्न विरुद्धविषयत्वम्; अन्यथाऽतिप्रसङ्गादिति । अल्पविषयस्य प्राबल्यमालम्भविधौ दृष्टमिति; चेन्न विरोधे सत्येव बलाबलविमर्शात् । इह तु विरोध एव न समस्ति । अपि च प्रत्यक्षं किं वर्तमानत्वेन स्वविषयं गृह्णाति, उत वस्तुवृत्त्या वर्तमानम् ? नाद्यः; त्वन्मते प्रत्यक्षतयाऽभिमतस्य निर्विकल्पकस्य वि[कल्प]शिष्टबोधनाशक्तेः, सविकल्पकस्य तु प्रत्यक्षत्वानभ्युपगमात् । न द्वितीयः, इन्द्रियसंयुक्तक्षणस्य तज्जन्यज्ञानकालेऽतीतत्वात्, तदुत्तरक्षणस्य स्वपूर्वक्षणेन्द्रियसंप्रयोगायोगेन तज्जन्यधीविषयत्वासंभवात्; तदातनाक्षिसंप्रयोगस्य तु तात्कालिकबुद्धिहेतुत्वासिद्धेः । अतस्ते कथं प्रत्यक्षं वर्तमानग्राहि ? अस्मन्मते त्विन्द्रियसंप्रयोगस्य तद्विशिष्टवस्तुनस्तदुपहितकलांशस्य च स्थायित्वेन धीक्षणानुवृत्तौ तद्विषयतया प्रत्यक्षोदयात् । संप्रयोगानन्तरक्षणे धीरपि निर्वर्त्यते । अतो नासंप्रयुक्तं नास्थिरं नावर्तमानं वा प्रत्यक्षमिति ।

पूर्वापरबहुव्यक्तिव्याप्तिग्रहणसंभवा ।
न काचिदपि युक्तिः स्यात् सर्वक्षणिकवादिनः ॥ २७ ॥

आनन्द० । पूर्वसंगतिमभिप्रेत्याह—**अथेति** । **प्रत्यभिज्ञाप्रत्यक्षविरोधं**–प्रत्यभिज्ञा (या) बाधमित्यर्थः । **पूर्वापरेति**—तत्क्षणापेक्षया पूर्वापरकालिकरूपादि (कत्वादि रूप) विशेषाणामित्यर्थः । **अवर्तमानाद्यावृत्तं**—वर्तमानाभिन्नं । **एतदेव चेति**—एतत्क्षणकालवर्तिनः पूर्वापरक्षणवर्तिभिन्नत्वे तत्क्षणमात्रावृत्तित्वमि (त्तित्वंवे) त्यर्थः **अपूर्वोत्तरत्वं**—पूर्वोत्तरकालावर्तित्वं तत्क्षणमात्रवृत्तित्वमिति यावत् । **संस्कारनिरपेक्षेति**—संस्कारसापेक्षप्रत्यभिज्ञातो बलवदिदन्त्वमात्रग्राहिप्रत्यक्षमित्यर्थः ।

ननु **भिन्नत्वे** पूर्वापरयोः कथं वर्तमानाद्भेदधीरित्यत्राह—**देशान्तरस्थेति** ।

यथा देशान्तरस्थस्मृत्युपनीतरूपतद्भे (रजतभे) दसंवृत्या शुक्तौ तदैक्यधीः तथेदंवस्तुनि तस्मिन् वा स्मृत्युपनीते भेदज्ञानप्रतिबन्धकदोषेणाभेदधीरित्यर्थः। प्रत्यक्षवृत्तान्तानभिज्ञतां दर्शयतीत्याह—**प्रत्यक्षेति**। **अवर्तमानत्वनिषेधात्मा**—कालान्तरसत्त्वनिषेधात्मा। **तत्कालेति**—वर्तमानकालसम्बन्धो न कालान्तरसम्बन्धाभाव इति भावः। तथा च सोऽपि तत्काले असंबन्धं निरुन्ध्यात् न तु तस्य कालान्तरसम्बन्धमन्यकाले निरुन्ध्यादित्यर्थः। **तथाऽपीति**—साधकाभावादिति भावः।

ननु प्रत्यभिज्ञायाः प्रामाण्यसंदेहात् अन्यस्य च साधकस्याभावात् कथं प्रमितत्वमित्यत्राह—**अयं भाव** इति। इदमिति वर्तमानत्वात्प्रत्यक्षत्वबाधात् प्रत्यभिज्ञाया अप्रामाण्यं वाच्यं। तत्रेदमिति प्रत्यक्षस्य विरोधिविषयत्वाद्बाधकत्वं उत न्यूनविषयत्वाद्वा ? इति विकल्पमभिप्रेत्य आद्ये आह—**यथेदमिति**। द्वितीय आह—**अन्यथेति**। विरोधिविषयत्वाभावेऽपि न्यूनाधिकविषयतामात्रेण बाध्यबाधकभावे घटप्रत्यक्षात् घटपटसमूहालम्बनबाधप्रसङ्गादित्यर्थः। **विरोधे सत्येवेति**—यद्यपि न हिंस्यादग्नीषोमीयवाक्ययोर्वैयर्थ्यपरिहारायान्यतरसंकोचे (कोचरूपबाधे) कर्तव्ये सामान्यस्य (अधिकविषयस्य) संकोचो युक्तः। उभयसाफल्यसिद्धेः; रजतभ्रमस्य न्यूनविषयस्याप्यधिकविषयशुक्तित्वनीलपृष्ठत्वरजतत्वाभावाद्यनेकविषयेणापि बाधदर्शनात् बाध्यबाधकभावे न न्यूनाधिकविषयत्वादि प्रयोजकं; तथाऽपि तदभ्युपगम्यैतदु (प्रौढवादेनो) क्तमिति द्रष्टव्यं।

किञ्च वर्तमानविषयकतया क्षणिकत्वप्रत्यभिज्ञाबाधश्च त्वन्मतानुसारेण ? उत अस्मन्मतानुसारेण इति विकल्पाभिप्रायेणाह—**अपिचेति**। यद्वा वर्तमानज्ञानस्य (भूतादिविषय) प्रत्यभिज्ञाबाधकत्वं वर्तमानत्वरूपविरुद्धधर्मविषयत्वेन उत स्वरूपविषयत्वेन ? इति विकल्प्य दूषयति—अपिचेति। आद्येऽपि किं निर्विकल्पकं सविकल्पकं वा ? इति विकल्पमभिप्रेत्य आद्यं दूषयति—**त्वन्मते** इति। **प्रत्यक्षतयाऽभिमतस्य**—प्रमाणतयाऽभिमतस्य। द्वितीयं दूषयति—**सविकल्पकस्येति**। तथा च अप्रमाणत्वान्न तेन प्रत्यभिज्ञाबाध इत्यर्थः।

यद्यपि प्रत्यभिज्ञा प्रमाणं तन्मते; तथाऽपि विनिगमकाभावात् प्रत्यक्षतः क्षणिकत्वसिद्धिवत् स्थायित्वमपि सिध्यतीति भावः। वर्तमानविषयत्वमिन्द्रियसम्प्रयुक्तक्षणविषयतया उत तदुत्तरक्षणविषयतया ? इति विकल्पमभिप्रेत्य आद्यं दूषयति— **इन्द्रियसम्प्रयुक्तेति**। क्षणिकवादिनो ज्ञानोत्पत्तिकाले तस्याभावादिति भावः। द्वितीयं दूषयति— **तदुत्तरक्षणस्येति**। प्रत्यक्षस्य सन्निकृष्टार्थगोचरत्वादिति भावः। **तदात (नोन्त) नेति**—पौर्वापर्याभावादिति भावः। आद्यद्वितीये आह— **अस्मन्मते त्विति**। **पूर्वापरेति**—पौर्वकालिकीनामापरकालिकीनां व्यक्तीनां क्षणिकवादिमते ग्राहकः कर्ता नैकोऽस्ति। तस्मात्तद्ग्रहापेक्षो व्याप्तिग्रहः तन्मूलश्च तर्कोऽनुमानं च न सम्भवतीत्यर्थः॥ २७॥

अक्ष० अथ प्रत्यक्षबाधात्प्रत्यभिज्ञाया अप्रामाण्यं तत एव च भावानां क्षणिकत्वसिद्धिश्च शङ्कतेप्रत्यक्षमिति। वर्तमानमात्रग्राहीति सम्प्रतिपन्नमित्याह—**वर्तमानमिति**—वर्तमानग्राहित्वेऽपि न तन्मात्रग्राहित्वं संप्रतिपन्नमित्यत्राह—**यदिहेति**। यतः अवर्तमानाद्विलक्षणमेव वर्तमानं गृह्णाति-अन्यथा पूर्वापरक्षणकालीन रूपादि विशेषाणामपि ग्रहणप्रसङ्गात्, अतो वर्तमानमात्रग्राहीति भावः। ततःकिमितिचेदाह—**तस्मादिति**। क्षणिकत्वं सिद्धयति एतदेवहि क्षणिकत्वं वस्तूनां यदपूर्वोत्तरत्वम्। संस्कारनिरपेक्षप्रत्यक्षविरुद्धायाः संस्कारोपनीतदेशकालान्तरस्थग्राहि प्रत्यभिज्ञायाः शुक्तिरूप्यादिधीवत् भेदाग्रहादारोपात्मकत्वेन न प्रामाण्यमिति भावः। तदेतन्निराकरोति—**इति न सदिति**। कुत इत्यत्राह—**तावदिति**। प्रत्यक्षेण वर्तमानकाल सम्बन्धग्रहणेऽपि अवर्तमानकालसम्बन्धनिषेधाप्रतीतेरिति भावः।

तर्हि वर्तमानत्वावगाहिना प्रत्यक्षेण किन्तावद्व्यावर्त्यत इत्यत्राह—**तत्कालासत्वमिति**—तत्कालसम्बन्धविधिस्तत्कालासम्बन्धस्यैव विरोधी, नतु कालान्तरसम्बन्धस्याऽपीति भावः। तथाऽपि अयमिति प्रत्यक्षे तत्कालसम्बन्धभानेऽपि कालान्तर सम्बन्धस्य भाने प्रमाणाभावादेव तत्प्रतिषेधसिद्धिरित्यत्राह—**काल इति**। **प्रमितमिति**। सोऽयमिति प्रत्यभिज्ञायामिति भावः। एककालावलम्बिप्रत्यक्षस्य कालद्वयावलम्बिप्रत्यभिज्ञायाश्चपरस्परविरोधाभावेन पूर्वोक्तबलाबलविचारस्याऽत्राऽनवकाश इति ध्येयम्। अत एवाल्पविषयस्य प्राबल्यमालम्भविधौ दृष्टमित्यपि प्रत्युक्तम्।

उत्पन्नानां विनाशे ध्रुवभवितृतया हेत्वपेक्षाविहीने
जन्मन्येवोपरोधात्क्षणिकमिह जगत्सर्वमित्यप्यसारम्।
लिङ्गं ह्योप्यत्त्वमात्रं जननविधुरता तत्क्षणानुक्षणत्वे
तत्त्वं तज्जन्यता वा तदिदमनियमासिद्धिबाधाविदूष्यम्॥ २८॥

सर्वा०—ननु * जातस्य हि ध्रुवो मृत्युरिति प्रसिद्धम्। अतस्सतां सत्तानुबन्धी विनाशः स्वरूपवन्न हेतुसापेक्षः झटित्येवापतेत्। तस्मात् सर्वं क्षणिकमित्यनूद्य परिहरति—**उत्पन्नानामिति**॥ असारं—न्याय्यादन्यदित्यर्थः। तत्रं हेतुं विकल्पयति—**लिङ्गमिति**। एवं विकल्पिते यथासंभवं दोषानाह—**तदिदमिति**।

तथा हि। तत्राद्ये तावद्यत् यस्य ध्रुवं भविष्यति न तत्तस्य हेतुसापेक्षं, नाशश्च जातानां ध्रुवभावीत्युक्तं स्यात्। तदा कस्यचिदङ्कुरस्य सामग्रीप्रवाहवशात् ध्रुवं भविष्यद्भिः पत्रपुष्पादिभिर्घटादीनां कपालादिभिरप्यनैकान्त्यम्, सर्वत्र चैकसन्तानोत्तरक्षणैः। नहि ते तन्निरपेक्षाः; तथा सति प्रागेवोपनिपाते कथं तत्र सन्तानत्वमपि? पूर्वक्षणानामर्थक्रियाविरहात् असत्त्वं च स्यात् [इति?] **चार्वाक**वादः।

द्वितीये तु यद्यस्यानुत्पन्नमनुबन्धि न तद्धेत्वपेक्षम्, यथा गोरश्वापोहः इति

स्यात्। तथा च हेत्वसिद्धिः प्रतियोगिवत्स्वोचितहेतुजन्यत्वात्। मुद्गरादयोऽपि सभागसन्तानमात्रारम्भकाः, नतु नाशजनका इति चेन्नः दीपादिसन्ताना [नाम]-न्तिमध्वंसकेषु तदसिद्धेः। न हि तत्र विभक्तसूक्ष्मावस्थान्तरापत्तिमिच्छसि; अन्वयव्यतिरेकाविशेषे व्यवस्थापकाभावात्। निस्वभावतया तुच्छस्य हेत्वपेक्षाविरहो व्यवस्थापक इति चेन्न; प्रतियोगिवदेव नियतकालतया प्रमितस्यात्यन्ततच्छत्वायोगात्, खपुष्पवच्चानादित्वप्रसङ्गेन सर्वभावासिद्धिप्रसङ्गात्। ध्वंसस्य च तुच्छत्वे तत्कालेऽपि स्वकाल इव भावानां सत्त्वप्रसङ्गाच्च। तथा च क्षणभङ्गं प्रतिज्ञाय स्थिरवादं साधयसि। कीदृशं च ध्वंसस्य निस्स्वभावत्वम्? यदि यत्किंचित्स्वभावविरहः, तत्स्वलक्षणेऽपि समानम्। सर्वस्वभावविरहस्तु ध्वंसेऽप्यसिद्धः। अन्यथा कथमस्य पक्षीकारः? ध्वंसरूपतया सिद्धस्येति चेत्, तर्हि तत्स्वभावस्य कथं सर्वस्वभावविरहः? अपि चास्य प्रागसत्त्वे हेत्वपेक्षा दुर्वारा; प्राक्सत्त्वे तु भावापह्नवः। तत एवाभावस्याप्यभाव इति सर्वाभावः स्यात्।

तृतीये च स एव क्षणो यस्य स तत्क्षणः तस्य भावस्तत्क्षणत्वं तदा ध्रुवभावि सहभावीत्यर्थः। अयमपि हेतुरसिद्ध एव। न च प्रध्वंसप्रतियोगिनोर्यौगपद्यसंभवः, संभवे वा भावः पश्चादपि किं न स्यात्? अनुक्षणशब्दोपचरितस्तु हेतुरनन्तरक्षणवर्तित्वम्, तत्रापि भावोत्पत्त्यपेक्षयाऽऽनन्तर्यविवक्षायामसिद्धिः। भावस्वरूपापेक्षया त्वानन्तर्यनियमे भाव एव हेतुः स्यादिति कथं हेतुनैरपेक्ष्यम्? तदतिरिक्तनैरपेक्ष्यं विवक्षितमिति चेन्न; तद्वदेव सहकारिणामप्यवर्जनीयत्वादिति। पञ्चमे त्वसिद्धिर्व्याघातश्च।

ननु कथं ध्रुवभाविशब्देन तत्त्वविवक्षा शङ्क्यते? इत्थम्—यद्यतो भिद्यते न तत्तस्य ध्वंसः, यथा रूपस्य रसः। ध्वंसस्तु कस्यचिदेव भवतीति तदात्मकः। अतः स्वोत्पत्तावेव स्वात्मनि ध्वंसे सन्निहिते कथं क्षणान्तरं प्राप्नुयादिति।

तत्रेदं ब्रूमः—ततो भिन्नस्यापि तत्प्रध्वंसत्वं यथादर्शनं स्यात्। अन्यथा भिन्नस्य भिन्नकालस्य च कारणत्वादिकमपि हीयेत; अविशेषात्। स्वात्मन एव स्वनाशात्मकत्वे पश्चादिव स्वकालेऽपि स्वाभावसिद्धेः। स एव सर्वापह्नवस्यादिति। तज्यन्यत्वे हेतौ प्रतिज्ञाविरोधः। तज्जन्यत्वं हि तद्धेतुकत्वम्; तेन कथं हेतुनैरपेक्ष्यसाधनम्? हेत्वन्तरनैरपेक्ष्यमपि च दुर्वचमित्युक्तम्। अतः क्रमभावि-सहकारिविशेषात् कार्यान्तरमिव स्वनाशमपि स्वयमुत्पादयतु नाम। न ततः क्षणिकत्वं सिध्येदिति। बाधश्चामीषां प्रागुक्तप्रत्यभिज्ञया स्पष्टः। आदिशब्दः प्रदर्शितयोरपसिद्धान्तप्रतिज्ञाविरोधयोः संग्रहार्थः॥ २८॥

आनन्द० पूर्वशेषतया न पृथक्संगतिरित्यभिप्रायेणाह—**नन्विति**। केचिदाक्षेपसंगतिमाह नन्वितीत्याहुः। मृत्युः—विनाशः। जननं—सत्ता। तथा च विनाशः भावानामुत्पत्तिक्षणानन्तरभावी अहेतुकस्वे सति भावानामवश्यम्भावित्वात्।

य (द्य)दहेतुकत्वे सति यस्यावश्यम्भावि तत्तदनन्तरक्षणभावि **यथा** घटस्यान्यापोह इति प्रयोगे हेत्वसिद्धिशङ्कापरिहाराय ध्वंसो (भावस्य) हेतुनिरपेक्षः तस्य ध्रुवभावित्वात् अपोहवदिति प्रयोगो द्रष्टव्यः । झटित्येव—उत्पत्त्यनन्तरमेव ।

मूलस्यायमर्थः—उत्पन्नानां भावानां विनाशस्य ध्रुवभवितृतया हेत्वपेक्षारहितत्वात् जन्मन्येवोपरोधात्सम्बन्धात् सर्वं जगत् क्षणिकमिति । तत्र किं ध्रुवभवितृत्वम् ? इति विकल्पयती (विकल्पपरत्वयभिप्रे) त्याह—**तत्रेति**। **एष**यत्त्वमवश्यम्भावित्वमात्रं । **जननविधुरता** - उत्पत्त्यभावः । **तत्क्षणत्वं**—भावकालत्वं । अनन्तरक्षणवर्तित्वमनुक्षणत्वं । **तत्त्वं**- प्रतियोगिस्वरूपत्वं । **तज्जन्यत्वं**- प्रतियोगिजन्यत्वं । ध्रुवभवितृ (ध्रुवभावित्व) शब्देन एतेषां लाभो यथा सम्भवति तथोत्तरत्र स्वयमेव दर्शयिष्यति । तेषां समुच्चित्य प्रत्येकम (प्रत्येकं प्राप्तच) भावादाह—**यथासंभवमिति** । तत्र क्रमेण दूषणानि वक्तुं प्रतिजानीते— **तथाहीति** । **अनियमो**—व्याप्तचभावः । **असिद्धिः** हेत्वसिद्धिः । **बाधः**—साध्याभावनिश्चयः । **कस्यचिदिति** - व्यभिचारेण व्याप्तचभावादित्यर्थः । **सर्वत्रचेति**—तत्तदुत्तरक्षणानां ध्रुवभावित्वात् पूर्वपूर्वक्षणहेतुकत्वाच्चेति भावः ।

क्षणः-स्वलक्षणं वस्तु । **तथासतीति**-तथाच सर्वेषामेकक्षणोत्पत्तिसमय एव विनिगम (का) नाभावेनोत्पत्तौ पूर्वापरभावापन्नसंतानसिद्धिर्न स्यादित्यर्थः । **असत्त्वं च स्यादिति**—उत्तरोत्तरेषां क्षणानां पूर्वपूर्वजन्यत्वाभावेन अर्थक्रियाकारित्वाभावादिति भावः । **चार्वाकवादः** - निर्हे (अहे) तुक (त्वं ।) त्ववादः । **द्वितीयेत्विति**—जननविधुरतेत्यस्मिन् पक्षे इत्यर्थः । हेत्वसिद्धिमेवोपपादयति- **प्रतियोगिवदिति** । **स्वोचितहेतवो** मुद्गरादयः । अग्नि(द्धि परिहरति) द्धिपरिहारं शङ्कते—**मुग्दरादय इति** । **सभागः**—विभक्तावयवः । तथाच मुद्गरा (दण्डा) द्यन्वयव्यतिरेकयोरन्यार्थत्वात् ध्वंसस्य न तज्जन्यत्वमिति भावः ।

दीपेति—तत्रा (न्यथासिद्धेः) न्यार्थत्वस्य वक्तुमशक्यतया ध्वंसस्य तज्जन्यत्वासम्भवादित्यर्थः । तत्राप्यन्यथासिद्धिमाशङ्क्य परिहरति - **नहीति** । तत्र प्रमाणाभावादिति भावः । अन्वयव्यतिरेकाविशेषेऽपि व्यवस्थापकं शङ्कते— **निस्स्वभावतयेति** । तत्र किं स्व (य) मेव भावः स्वभाव इति स्वरूपं विवक्षितं ? आहोस्वित् स्वस्य भावः स्वभाव इति धर्मो वा ? इति विकल्पमभिप्रेत्य आद्यं दूषयति—**प्रतियोगिवदिति** । **अत्यन्ततुच्छत्वायोगादिति**—शशशृङ्ग (ङ्गादि)वत् निस्स्वरूप (निस्स्वरस) त्वासम्भवादित्यर्थः । **खपुष्पवदिति**—ध्वंसप्रतियोगिनोर्विरोधादुत्तरकालमिव पूर्वमपि भावानां सत्त्वं न स्यादिति; तथाच माध्यमिकमतापात इति भावः ॥

ननु तुच्छत्वान्न प्रतियोगिविरोध इत्यत आह—**ध्वंसस्य चेति** । द्वितीये दूषणमाह—**कीदृशं चेति** । **तर्हीति** -तद्ध्वंसत्वस्यैव स्वभावत्वादित्यर्थः । **अस्येति**—

ध्वंसस्येत्यर्थः। भावापह्नव इति—ध्वंसकाले प्रतियोगिनोऽसम्भवादिति भावः। **तत एवेति**—यत एव प्रतियोगिनोऽभावः ततः प्रतियोग्यप्रसिद्धया भावोऽपि न स्यादिति माध्यमिकमतप्रसङ्ग इति भावः। **न (हो) चेति**—विरोधादिति भावः। **सम्भवे (वे) चेति**—विरोधाभावादिति भावः। **उपचरितस्त्विति**—अनुशब्दस्य 'प्रादयो गताद्यर्थे' इति अनुयातः क्षण इति समासे कालवाचि (त्वात्) त्वेन बहुव्रीहिसमासे चान्यपदार्थलक्ष(णकतया) कत्वात् तत्स्थवाचि (त्वमुपचारेणेत्यर्थः) त्वाभावात् तेनोपचरितो लक्षित इति भावः।

भाव एवेति—अनन्यथासिद्धनियतपूर्ववृत्तित्वादिति भावः। **कथमिति**—तथाच बाध इति भावः। **तद्वदेवेति**—प्रतियोगिन इव मुद्गरादेरप्यन्वयव्यतिरेकसत्त्वादिति भावः। **पञ्चम इति**—ध्वंसप्रतियोगिनोरैक्यानभ्युपगमात् भावाभावयोः परस्परविरोधिनोरैक्यस्य विरुद्धत्वादित्यर्थः। अन्यथा भावस्सर्वदा स्यान्न स्याद्वेति न क्षणिकत्वसिद्धिरिति भावः। नन्वस्याः कोटेरुत्थितिरेव न सम्भवति; शब्दस्य तद्बोधनासामर्थ्यात्। तथाच असम्भवद्विकल्पदोषः। तथा भावानां सहेतुकत्वात् तद्(भेदे अ) हेतुकत्वं वा कथं ? ततः क्षणिकत्वं वा कथं सिध्येत् ? इति शङ्कामाशङ्क्य परिहरति—**नन्वित्यादिना**। **अन्यथेति**—पूर्वक्षणानामप्युत्तरक्षणहेतुत्वं न स्यादित्यर्थः। **प्रतिज्ञाविरोध इति**—हेतुसाध्ययो (साध्येनहेतो) र्विरुद्धत्वादित्यर्थः।

यद्वा प्रतिज्ञावाक्यस्य हेतुवाक्येन विरुद्धत्वादित्यर्थः। विरोधपरिहारमाशङ्क्य परिहरति—**हेत्वन्तरेति**। तद्वदेव सहकारिणामित्यर्थः। ननु सहकारिसापेक्षत्वेऽप्युत्पत्त्यनन्तरमेव ध्वंससम्भवात् क्षणिकत्वं स्यादित्यत्राह—**क्रमभावीति**। ध्वंसजनने सहकारिणामाद्यक्षण एव भावित्वमित्यत्र नियामकाभावात्; यदा कदाचित्सहकारिलाभे प्रतियोगिनो ध्वंसजनकत्वेऽपि न क्षणिकत्वसिद्धिरित्यर्थः॥ २८॥

अक्ष० अथ "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य चे"ति प्रसिद्धया जातानां सतां विनाशस्य हेतुनिरपेक्षत्वसिद्धया अनन्तरक्षण एव नाशसम्भवात्क्षणिकत्वसिद्धिरित्यनूद्य परिहरति—**उत्पन्नानामिति** उत्पन्नानां भावानां विनाशो हेतुनिरपेक्षः ध्रुवभावित्वादिति प्रयोग इह दर्शितः। ततः किमित्यत्राह **जन्मनीति**। उत्पत्तावेव उत्पत्त्यनन्तरमेवेत्यर्थः। **उपरोधात्**—विनाशात्। हेत्वपेक्षाविरहादिति भावः। **क्षणिकमिति**। द्वितीयक्षण एव विनाशेन—"सर्वं जगत् क्षणिक" मिति सिद्धयतीति भावः।

प्रयोगोऽयमाभास इत्याह—**असारमिति**। आभासतामुपपादयितुं लिङ्गं विकल्पयति—**लिङ्गमिति**। **एष्यत्वमात्रम्**—अवश्यम्भावित्वमात्रम्। **जननविधुरता अनुत्पन्नत्वं**। **तत्क्षणानुक्षणत्वे** प्रतियोगिपरोऽत्रतच्छब्दः प्रतियोगिकालवृत्तित्व प्रतियोग्यनन्तरकालवृत्तित्वे इत्यर्थः। **तत्वं**-प्रतियोगिस्वरूपत्वं **तज्जन्यता**—

प्रतियोगिजन्यता। एवं ध्रुवभावित्वरूपहेतुं षोडा विकलप्य तत्र यथासम्भवं दोषानाह–**तदिदमिति**। तत्राद्ये कस्यचिदङ्कुरस्य सामग्री प्रवाहवशात् ध्रुवं भविष्यति पत्र पुष्पादिभिः **अनियमः**–व्यभिचारः। तत्र हेतुसत्वेऽपि साध्याभावात्। द्वितीये घटादिनाशे मुद्गरादिजन्ये अनुत्पन्नत्वरूपहेतोरभावादसिद्धिः। तृतीयेऽपि प्रतियोगिध्वंसयोः यौगपद्यासम्भवादसिद्धिरेव। चतुर्थे प्रतियोग्यनन्तर कालनियमोपगमे प्रतियोगिन एव नियत पूर्ववृत्तितया हेतुत्वात् साध्यबाधः। पञ्चमे व्याघातः–प्रतियोगि ध्वंसयोरैक्यायोगात्। षष्ठे तु प्रतिज्ञाविरोधः–प्रतियोगिजन्यत्वे निर्हेतुकत्वायोगात् दोषोऽयमादिशब्देन जिघृक्षितः। इत्यादिदोषसद्भावादुक्तप्रयोगस्य आभासत्वान्न क्षणिकत्व सिद्धिरिति भावः।

कालानन्तर्यसाम्ये क्षणिकवपुषि ते देशकालाद्युपाधौ
सर्वे पूर्वे भवेयुस्तदुपरि भवतां कारणानि क्षणानाम्।
सन्तानैक्यव्यवस्था निजफलनियतिर्वासनानां च न स्यात्
कार्पासे रक्तताद्यिक्रमविपरिणमत्संस्कृतद्रव्यतस्स्यात्॥ २९॥

सर्वा० प्रतिकूलतर्कप्रतिहतिमप्याह–**कालानन्तर्येति**॥ आदिशब्देन दिक्संग्रहः। अयमर्थः—सर्वं क्षणिकमिति वदतस्ते कस्यचित्किञ्चित्प्रति कार्यत्वं किमनन्तरकालभावित्वमात्रात्? उत तद्विशेषात्? आद्ये त्रैलोक्योदरवर्तिनः पूर्वक्षणास्सर्वे तदनन्तरभाविनां सर्वेषां क्षणानां कारणानि स्युः। द्वितीयेऽप्यसौ विशेषः किं देशाद्युपाधिनिरपेक्षः? तत्सापेक्षो वा? नाद्यः, अतीन्द्रियस्य तु तस्यादर्शनात्, दृश्यस्य तु वह्निधूमत्वादेरतिप्रसङ्गित्वात्। न द्वितीयः, यस्मिन्देशादौ यद्वर्तते तस्मिन् जायमानस्य तत्कारणमिति नियमो न संभवति। कार्यक्षणस्य कारणदेशादिवर्तित्वे कारणदेशादेः क्षणद्वयापत्तेः; तथा चानन्तरक्षणयोगेऽपि को बाधः? अतः स्थिरदेशादिकमनभ्युपगच्छतस्तत्प्रयुक्तनियमायोगात् अतिप्रसङ्गस्तदवस्थ एव।

ननु यद्देशादिक्षणवर्ती कारणक्षणः तत्कार्यदेशादिक्षणे स्वकार्यमारभत इति नियम इति चेन्न; देशादिक्षणद्वयेऽपि कार्यकारणव्यवस्थाया दुःस्थ साधत्वात्। तदेतदभिप्रेत्याह—**सन्तानैक्यव्यवस्था न स्यादिति**। यदप्याहुः—

* यस्मिन्येव हि सन्तान आहिता कर्मवासना।
फलं तत्रैव बध्नाति कार्पासे रक्तता यथा॥ इति।

कर्मवासनेत्यनुभववासनाया उपलक्षणम्। तदपि दूषयति—**निजफलनियतिर्वासनानां न स्यादिति**। सन्तानैक्ये सिद्धे हि यस्मिन् तस्मिन्निति निर्देशः स्यादिति भावः। दृष्टान्तस्तर्हि कथमित्यत्राह—**कार्पास इति**। रञ्जकद्रव्यविशेषसंस्कृतबीजावयवानुवृत्त्या कार्यस्रोतोविशेषनियमे यथादर्शनं तत्र तादृशफलसिद्धिर्युक्ता। त्वन्मते तु तदेतत् संततिव्यवस्थापकाभावात्, तत्रैव फलं बध्नातीति दुश्शको नियम इति भावः॥ २९॥

आ०–पूर्वशेषत्वान्न पृथकसंगतिरित्यभिप्रायेणाह–**प्रतिकूलेति** ननु क्षणिकत्वपक्षेऽपि वीचीतरङ्गन्यायेन शब्दसंतानानामिव व्यवस्थापककार्यकारणभावस्स्यात् इत्यत आह—**अयमर्थ इति। देशाद्यपाधिनिरपेक्षः**—तदघटितः कारणकार्यधर्म इत्यर्थः। **तत्सापेक्षः**—एकदेश एव पूर्वापरकालवर्तित्व(त्वादि)रूपः। **तस्येति**—विशेषस्य कार्यकारणयोरदर्शनादित्यर्थः। **अतिप्रसङ्गित्वादिति**—तेन रूपेण पूर्वक्षणापेक्षाया पूर्वापरभावित्वादित्यर्थः। **तदिति**—तद्देशे तत्पूर्ववर्तीत्यर्थः। **क्षणद्वयापत्तेः**—कार्यकारणद्वयाधिकरणक्षणद्वयकालवर्तित्वापत्तेरित्यर्थः। **तथाचेति**—

एतावन्तं स्थितं कालं कः पश्चान्नाशयिष्यति।

इति न्यायादिति भावः। ननु कार्यकारणयोरेकदेशवर्तित्वं मास्तु; अपि तु एकदेशसन्तानवर्तित्वं; तथा च नातिप्रसङ्ग इति शङ्कते—**नन्विति। देशादीति**—तथाच पूर्वदेशलक्षणस्य (स्व) पश्चाद्भाविसर्वदेशक्षणसन्तानजनकत्वात् सर्वे सर्व-(स्यापि)स्य सन्ताना इति पूर्ववद(वैत) देतद्देशसन्तानैक्यनियमो नास्तीति भावः।

ननु क्षणिकत्वपक्षे पाकेषुविक्षेपादौ वासनाश्रयस्य नाशादुत्तरो(नाशात्तदु)त्तरक्षणेषु विक्लृत्तिदेशान्तरगमनहेतुक्रिया न स्यादित्याशङ्क्य सन्तानैक्यान्न दोष इति सिद्धान्तदीपिकोक्तमनुवदति—**यदप्याहुरिति**। कर्मवासना—वेगादिसंस्कारः। यदा पाकादिक्रियाशक्तिः तत्रैव तण्डुलादिसन्ताने विक्लृत्यादिक्रियां जनयतीत्यर्थः। **रञ्जकद्रव्येति**—स्थिरवादे कार्पाससन्तानव्यवस्थासम्भवाद्युज्यते; क्षणिकवादे तन्नियमो न स्यादिति दृष्टान्तासिद्धेश्चेति भावः॥ २९॥

अक्ष० अथ क्षणिकत्वबाधनस्य प्रतितर्कपराहतिमाह—**कालानन्तर्यति**। सर्वेषामपिकार्याणां पूर्वक्षणानन्तर्यस्य समानत्व इत्यर्थः। ते—क्षणिकत्ववादिनस्तव। **देशकालाद्युपाधाविति। क्षणिक**—'**वपुषि**—क्षणिकस्वरूपइत्यर्थः। तथासति अनिष्टप्रसङ्गमाह—**सर्व इति**—त्रिलोकान्तर्गतास्सर्वे। **पूर्वे**—क्षणाः—**तदुपरीति**—तदनन्तरभाविनां सर्वेषामपि क्षणानां। **कारणानिस्युरित्यर्थः**। घटादिरूपपूर्वक्षणानां विसदृशपटादिरूपोत्तरक्षणं प्रत्यपि कारणत्वापत्तिरिति यावत् नचैवमिष्यते।

नच देशाद्यैक्यान्नियमस्सुवचः क्षणिकवादे देशकालदिशामपि क्षणिकत्वोपगमेन क्रमिककार्यं कारण उभयाधिकरणदेशाद्यभावेन तद्देशादि वृत्तिपूर्वक्षणस्य तद्देशादिवृत्युत्तरक्षणरूपकार्यं प्रत्येव कारणत्वमिति व्यवस्थापनायोगादिति भावः। एवं विसदृशकार्योत्पत्तिप्रसंगे दुर्निवारे सन्तानैक्यस्य दुर्वचतया—

"यस्मिनेव हि सन्ताने आहिता कर्मवासना।
फलं तत्रैव बध्नाति कार्पासे रक्तता यथा"॥ इति।

त्वदीयोक्तमपि न घटत इत्याह—**सन्तानेति**। विसदृशोत्पादे सन्तानैक्यव्यवस्था

न स्यात्—तदभावे च **वासनानां** वेगापूर्वाद्यात्मककर्मवासनानां अनुभवाधीन-संस्कारात्मकवासनानाञ्च। **निजफलनियतिः** तत्फलव्यवस्थासु एकसन्तान एव पतनस्मरणादिफलनियतिश्च न स्यादित्यर्थः। दृष्टान्ते तर्हि कथमित्य-त्राह—**कार्पास इति**। स्थिरवादे रञ्जकजपादिद्रव्यसंस्कृतकार्पासबीजावय-वानामेव कार्पासरूपेण परिणामाद्रागसंक्रम उपपद्येत क्षणिकवादे तु रञ्जक-द्रव्यसंस्कृतद्रव्यस्य तत्सन्तानस्य वा स्थितेरभावेन तत्रैव फलं बध्नातीति नियमस्य दुर्वचतया दृष्टान्तस्यैवासिद्धिरिति भावः।

मेयत्वाद्यैर्विगीतं क्षणिकमिह जगत्स्यात्क्षणोपाधिवच्चेद्
बाधो दृष्टान्तहानिः स्थिर इति विदितो यत्क्षणस्याप्युपाधिः॥
सामग्रो कार्यशून्या क्षण इयमपि तद्धेतुसंघो न चासौ
हेतुर्नान्यः स्थिरास्ते क्रमवदुपधिवत्स्यात्क्षणत्वं स्थिरेऽपि॥३०॥

क्षणभङ्गसाधानान्तरं दूषयितुमनुवक्ति—**मेयत्वाद्यैरिति**॥ इह— पक्षदृष्टान्त-विकल्पार्हे वस्तुजाते; विगीतं क्षणिकं मेयत्वात् सत्त्वात् भासमानत्वाद्वा। अत्र स्यादित्यनेनाक्षणिकतायामसत्त्वप्रसङ्गः सूच्यते। अर्थक्रियाकारित्वं हि सत्त्वम्; तच्च कुर्वत्क्षणस्यैवास्ति। अकुर्वत्क्षणस्य तु तदभावादसत्त्वं प्राप्तमिति, घटजल-धरादौ दृष्टान्तिते साध्यवैकल्यं क्रमेण कथंचित्परिहर्तव्यम्। इह तु तथेत्यभिप्रायेण क्षणोपाधिवचनम्। इति रौचित्यादाक्रष्टव्यः। अत्र बाधोक्तिस्साध्यविकल्पेन बहुधा भाव्या।

तथा हि क्षणिकत्वं नाम क्षणसंभवत्त्वं वा, क्षणकालसंबन्धित्वं वा, क्षण-मात्रवर्तित्वं वा, क्षणद्वयसंबन्धशून्यत्वं वा, क्षणकालत्वं वा, तदुपाधित्वं वा? नाद्यः, सिद्धसाधनात्, स्थिरमपि नस्सामग्र्या क्षणे संभवतीति। न द्वितीयः, तत एव। कालमेवानिच्छतस्ते कोऽसौ क्षणकालः? कश्च तत्संबन्धः? तदभ्युपगमे सिद्धान्तबाधः। अत एव न तृतीयोऽपि; प्रत्यभिज्ञया च बाधः प्रागुक्तः। न चतुर्थः, उक्तबाधादेव; क्षणेतरस्य तथात्वे खपुष्पवदसत्त्वप्रसङ्गस्य दुर्वारत्वात्। त्वन्मते च खपुष्पनिदर्शनेन प्रसञ्जनं युक्तम्। एवमपि हि ब्रूथ—

* तस्माद्वैधर्म्यदृष्टान्ते नेष्टोऽवश्यमिहाश्रयः।
तदभावे च तन्नेति वचनादेव तद्गतेः॥ इति।

अन्येऽपि केचिदाहुः—

* यस्मिन्ननित्यता नास्ति कार्यताऽपि न विद्यते।
तस्मिन्यथा खपुष्पादाविति शक्यं हि भाषितुम्॥ इति।

न पञ्चमः, तद्देशतद्वर्तिनोरिव कालतद्वर्तिनोरैक्यस्य प्रत्यक्षेण वाधात्। तत एव न षष्ठः; यदा हि घटादयः स्वरूपेण क्षणोपाधयः स्युः कालतारतम्यधीः

कुत्रापि न भवेत्। तथा च स्थिरशङ्काया एवानुदयात् निर्विषयमनुमानं स्यात्। सर्वस्य च त्रिलोकस्य स्वप्रयोजनेच्छया हि प्रवृत्तिः। सा फलार्थिनः फलिनश्च भेदे बाध्यते।

न च त्वमपि कृत्येषु निरन्वयविनाशवत्।
मत्सन्तानसमृद्ध्यर्थमिति मत्वा प्रवर्तसे॥

तदिह स्वाभिप्रायादिबाधश्च। आत्मदृष्टान्तेन च प्रत्युमानबाधः। तत्र साध्यवैकल्यं च घटादीन्निदर्शयद्भिः युष्मामिरिव क्रमात्प्रशमनीयम्। अस्ति च सोऽहमिति प्रत्यभिज्ञयाऽस्माकं तत्सिद्धिः। आलयविज्ञानसन्ततिविषयेयमिति चेत्, इदमपि परिभाषामात्रम्, प्रमाणाभावात्। *नान्यदृष्टं स्मरत्यन्य इति परिभाषाया निर्बाधित्वाच्च। निरर्थकं चेदमालयविज्ञानसन्ततिकल्पनम्; तस्य प्रवृत्तिविज्ञानेन सह सर्वप्रकारसंबन्धायोगादिति। अथ क्षणोपाधिवदित्युक्तं प्रतिवक्ति—**दृष्टान्तहानिरिति**। अक्षणिकत्वे कथं क्षणोपाधिरित्यत्र गूढ़ाभिप्राय आह—**सामग्रीति**। कार्यशून्या—कार्यप्रागभावसमन्वितेत्यर्थः। क्षणः—क्षणोपाधिरिति यावत्। तयाऽपि तस्य क्षणिकत्वं न प्रतिक्षिप्तमित्याह—**इयमपीति**।

ननु हेतूनां संघोऽपि हेत्वनतिरिक्तश्चेत् तेषां भवत्पक्षे स्थिरत्वान्न क्षणोपाधित्वम्। अतिरिक्तोऽप्यक्षणिकः क्षणोपाधिर्न स्यादित्यत्राह—**न चेति**। अयं भावः—संघशब्दो न संबन्धमात्रवाचकः, संबन्धशब्दपर्यायत्वाप्रसिद्धेः। न च तत्तत्संबन्धिस्वरूपवाचकः, प्रत्येकमप्रयोगात्। अतः केनचिदुपाधिना संगृहीतास्त एव संघशब्दार्थः। तत्र यदि त एव क्षणोपाधितया दृष्टान्तीक्रियन्ते तथा सति स्थिरास्त इति। ननु तत्संहतिहेतुरुपाधिदृष्टान्तः स्यात्। मैवम्; न हि नः केवलनित्यात् केवलानित्याद्वा कस्यचिदपि कार्यस्योत्पत्तिः; किंतु तत्समुदायात्। तत्र नित्यांशे तावत्क्षणिक(त्व)शङ्काऽपि नास्ति, अनित्येऽपि यतश्चिरोत्पन्नाद्धेतोस्संघभावः सोऽपि स्थिरः।

यस्तु चरमस्सहकारी स च स्थिर एव सन् स्वकार्यप्रागभावोपहितरूपः कालमवच्छिन्दन् क्षणोपाधिरित्युच्यते, तदुपधानं च तस्य प्रत्यक्षादिसिद्धम्। न चात्र क्षणिकं किंचित्सिध्यति अनवच्छिन्नस्य कालतत्त्वस्य कालपरिच्छेदलक्षणानित्यताभावात्।

क्रियादिश्च स्थिरोऽप्येवं क्षणोपाधिर्विशेषकैः।
तत्प्रकर्षनिकर्षैस्तु तत्तत्कालप्रकल्पना॥

इयं तावत्सर्वलोकसाक्षिकी, क्षणकालावच्छेदकयोः प्रागूर्ध्वव्यापिनोरक्षणिकत्वात्, तदवच्छिन्नस्य कालस्य तु क्षणत्वादेव न क्षणिकत्वमिति वस्तुस्थितिः। त्वत्पक्षेतु क्षणोपाधिरसिद्धः कालस्यैवाभावात्। न चासिद्धोऽपि साध्यः स्वमतविरोधात्। यथाऽऽहुः—

* योऽपि तावत्परासिद्धः स्वयं सिद्धोऽभिधीयते।
भवेत्तत्र प्रतीकारः स्वतोऽसिद्धे तु का क्रिया॥ इति।

अनन्यावच्छेदार्थेन स्वरूपणैव कश्चित्क्षणशब्दवाच्य इति चेत्, तर्हि क्षणभङ्ग-साधनात्पूर्वमसिद्धः कथं दृष्टान्तः स्यात् ?

उत्तरप्रागभावाप्तपूर्वध्वंसैककालतः ।
मध्यमक्षणतादृक्त्वं व्यवस्थाप्यं त्वयाऽप्यतः॥

ननु क्षणक्षरणस्वभावा प्रकृतिरिति हि भवत्सिद्धान्तः। अत्र प्रतिक्षणमुदयविलियिनो विकाराः क्षणिका एवेति तद्दृष्टान्तेनान्येषां युष्माभिः किं नानुमीयत इति चेत्, अशक्यत्वादयं सुहृदुपदेशस्त्यज्यते। सर्वक्षणिकत्वं साधयितुमुपक्रम्य स्थिरद्रव्य वृत्तिक्षणिकविकारवदिति कथं दृष्टान्तयेम ? तेषु च न त्वदभिमतं क्षणिकत्वम्, प्रदीपादिवदाशुतरवद्विनाशित्वमात्रेण क्षणिकतोक्तेः। तदेतदभिप्रेत्याह—**क्रमवदति**। क्षणत्वं—क्षणोपाधित्वमित्यर्थः।

द्वयोरयुगपद्दृष्टिर्युगपच्च यथायथम् ।
अशक्यापह्नवा तस्मादस्मदुक्तैव पद्धतिः॥ ३०॥

आनन्द० ननु क्षणिकत्वानुमानं पूर्वं दूषित(मिति)मेव पुनस्तद्दूषणे पौनरुक्त्यमित्याशङ्क्यावतारयति—**क्षणभङ्गे**ति। इहेत्यस्य जगत्परत्वेऽनन्वयमाशङ्क्य तस्या (इहशब्दा)र्थमाह—**पक्षदृष्टान्तेति—विगीतं**—क्षणिकत्वेन विप्रतिपन्नं। प्रयोगदर्शनमिदं तन्मते उदाहरणोपनययोरेव प्रयोक्तव्यत्वात्। आदिशब्दार्थमाह—**भासमानत्वाद्वेति**। **स्यादित्यनेनेति**—स्यादित्यस्य सत्त्ववाचित्वात् क्षणिकं स्यादिति समभिव्याहारेण सत्त्वव्यापकं क्षणिकत्वमिति गम्य (मानत्वादिति)त इति भावः। क्षणिकत्वस्य सत्त्वव्यापकत्वे अनुकूलतर्कमाह—**अर्थक्रियाकारित्वमिति**। क्षणिकत्वाभावे कुसूलस्थानां बीजानामङ्कुरादिरूपकार्यजनकत्वरूपकुर्वत्त्वाभावात् सत्त्वं न स्यात्; क्षणिकत्वे तु पूर्वपूर्वेषां क्षणानां उत्तरोत्तरक्षणजनकत्वात् कुर्वत्त्वं सिध्यतीति भावः। **इतिरिति**—तथाचक्षणोपाधिवदितीति मूले सम्बन्धः बाधोक्तिरति—विशेषानुपादानादिति भावः। यद्यपि क्वचित्क्वचिद्विकल्पे बाधो न प्रदर्श्यत इति बाधबहुत्वोपपादनार्थं साध्यविकल्प इति न संगच्छत इति मन्दधियां प्रतिभाति; तथाऽपि सर्वविकल्पकोटिष्वपि बाधप्रदर्शनं न प्रतिज्ञार्थः। किंतु विकल्पितकोटिषु यथासम्भवं तत्प्रदर्शनं प्रतिज्ञार्थ इति द्रष्टव्यम्।

क्षणिकत्वं नामेति—क्षणे भवः क्षणे जातः क्षणोऽस्यास्तीत्यर्थविवक्षायां कुमुदादित्वात् ठच्। अत इनिठनाविति वा ठनि क्षणिकशब्दस्य निष्पत्तेः। विनयादित्वाद्वा स्वार्थिकठकि संज्ञापूर्वकपरिभाषया वृद्धचभावाद्वा व्युत्पत्तिसम्भवात् अवधारणविवक्षातदभावाद्यार्थिकार्थविवक्षानुसारेण विकल्पसम्भवात् **नासम्भावितविकल्पदोष इति द्रष्टव्यं**।

तत एवेति—स्थिरस्यापि सामग्रीक्षणे सम्बन्धसम्भवेन सिद्धसाधनादित्यर्थः। व्याप्तिग्राहकाभावाद्वचाप्यत्वासिद्धिरिति चाह— **कालमेवेति सिद्धान्तबाधः**—अपसिद्धान्तः। 'निराधारा निर्धर्मकाश्च रूपादयश्चत्वारः पदार्थाः।'

वात्सीपुत्रास्तु शब्दादीन् पञ्च वैभाषिका विदुः।
शब्दात्मानश्चतुर्ष्वेव केचिदित्यपरेऽब्रुवन्॥

इति परिगणनेन कालानङ्गीकारादिति भावः। **अतएव**—अपसिद्धान्तादिप्रसङ्गादेव। अक्षणिकत्वे सत्त्वं न स्यादिति तदीयतर्कस्य प्रतिहतिमाह— **क्षणेतरस्येति**। विवादाध्यासितमसत् क्षणेतरत्वे सति क्षणद्वयसम्बन्धशून्यत्वात् इत्यर्थः।

ननु सर्वत्र प्रामाणिकस्यैव दृष्टान्तत्वात् खपुष्पनिदर्शनेन प्रतिरोधो न युक्त इत्यत्राह—**त्वन्मते चेति**। क्षणिकत्वसाधने असतो विपर्ययदृष्टान्तकरणादिति भावः। तदीयसंमतिमाह—**एवमपीति**। ननु व्यतिरेकव्याप्तिः कथं गृह्यते? यदक्षणिकं तदसत् यथा खपुष्पमिति व्याप्तिग्रहाधिकरणस्याप्रामाणिकत्वात् प्रामाणिकस्यैव सर्वत्र दृष्टान्तत्वादिति शङ्कायां 'तदभावे च तन्न' इति वचनादपि व्यतिरेकव्याप्तेरवगमो यस्मात्तस्माद्वैधर्म्यदृष्टान्ते व्यतिरेकव्याप्तिग्रहे आश्रयापेक्षानियमो नास्तीत्यपि ब्रूथेत्यर्थः। तथाच प्रतिरोधो न(सम्भवति) युक्त इति भावः।

अन्येऽपि—सौगतैकदेशिनोऽपि। **अनित्यता**—क्षणिकत्वं। **अन्ये** नैयायिकैकदेशिन इत्य(परेऽ)प्याहुः। **बाधादिति**—अस्मिन् क्षणे अयं वर्तत इति भेदग्राहित्वात्प्रत्यक्षस्येति भावः। **तत एवेति**-क्षणोपाधेश्च भेदग्राहिप्रमाणबाधादेवेत्यर्थः। भेदग्रहमेवोपपादयति—**य(दि)दा हीति**। सर्वपदार्थानां स्वरूपेणोपाधित्वे स्वस्वावच्छिन्नकालस्यैव क्षणत्वात् सर्वेषां च स्वावछिन्नकाल एव वृत्तेः कालतारतम्यं न स्यात्। स्वकालातिरिक्तकालवृत्तित्व(रूप)स्य वैषम्यस्यासम्भवात्। नन्विष्टापत्तिः; क्षणिकवादिनः सर्वस्यापि क्षणकालवृत्तित्वादित्यत्राह— **तथाचेति**।

स्वावच्छिन्नकालमात्रस्य क्षणकालत्वात् तदतिरिक्तिवृत्तित्वं हि स्थिरत्वं भवन्मते निरस्यं! नचेदं कस्यचिदपि सम्भाव्यते! स्वकालवृत्तित्वस्य स्थैर्यवादिभिरप्यङ्गीकारात्; अतिरिक्तवृत्तित्वे सन्देहाभावात् एतादृशक्षणिकत्वसाधने सिद्धसाधनता स्यात्। तथा च सन्दिग्धे न्यायः प्रवर्तत इति अनुमानमपि निर्विषयं स्यादित्यर्थः। क्षणिकत्वसाधकानुमानस्य तर्कबाधमप्याह— **सर्वस्यचेति त्रिलोकस्येति**—पात्रादित्वात्साधुः। बहुलग्रहणात् स्त्रीत्वाभावः।

यद्वा लोकशब्दो भुवनपरः। त्रयो लोका यस्येति बहुव्रीहिः। तथा च कस्यापि प्रवृत्तस्य फलप्राप्तयभावात् प्रवृत्तिर्न स्यादिति भावः। ननु सन्तानैक्यात् प्रवृत्तिस्सम्भवतीत्यत्राह— **नचेति**। तथाच स्वानुभवबाध इति भावः। आदि-

शब्देन इच्छादिर्गृह्यते। विमतं स्थिरं वस्तुत्वात् आत्मवत् इति प्रतिरोधश्चेत्याह—**आत्मदृष्टान्तेनेति**। **बाधः**—प्रतिबन्धः। उक्ततर्कानुगृहीतत्वादस्याधिकबलतया बाध एवेत्यर्थः। व्याप्यत्वासिद्धिं परिहरति—**घटादीनिति**। प्रशमनप्रकारमाह—**अस्ति चेति**। दीपादिविषयप्रत्यभिज्ञावदन्यथासिद्धिमाशङ्कते—**आलयेति**। आलयः—प्रवृत्तिविज्ञानाश्रयः। प्रवृत्तिविज्ञानं—प्रवर्तकं घटादिविज्ञानं। विज्ञानं—विज्ञानस्वरूपमात्रमेति सौगतपरिभाषा। तथाच आलयविज्ञानसन्ततिविषयतया न स्थिरत्वसाधिकेति न दृष्टान्तासिद्धिरित्यर्थः। **प्रमाणाभावादिति**—क्षणिकत्वसाधकानुमानात्प्रागालयविज्ञानसन्ततिकल्पने प्रमाणाभावान्निष्प्रतिपक्षा प्रत्यभिज्ञा स्थिरत्वं साधयेदिति भावः।

प्रत्यभिज्ञायाः स्थिरविषयत्वेऽनुकूलतर्कमप्याह— **नान्यदृष्टमिति**। परिभाषा व्याप्तिः। तथाच नातिप्रसङ्ग इति भावः। आलयविज्ञानस्यास्थिरत्वे बाधकतर्कान्तरमप्याह—**निरर्थकं चेदमिति**। आलयविज्ञानाङ्गीकारे प्रवृत्तिज्ञानस्य किञ्चित्सम्बन्धित्वाभावात्प्रवृत्तिः कस्यापि न स्यात् सर्वस्य वा स्यात् अविशेषात्। तदङ्गीकारे तु यदालयविज्ञानसम्बन्धि प्रवृत्तिज्ञानं तस्यैव प्रवृत्तिं जनयतीति नियमस्सिध्यतीति तदङ्गीक्रियते तस्य चेत् क्षणिकत्वमभ्युपैषि तदा प्रवृत्तिज्ञानेन सम्बन्धाभावान्नियमासिद्धेस्सर्वस्य प्रवृत्त्यप्रवृत्तिप्रसङ्गतादवस्थ्यात्तदङ्गीकारो व्यर्थ इत्यर्थः।

ननु जन्यजनकभावसम्बन्धान्नियमोऽस्तु इत्यत्राह— **सर्वप्रकारेति**। इन्द्रियसम्प्रयोगजन्ये ज्ञाने आलयविज्ञानस्याश्रयतया जनकत्वं वाच्यम्; तच्च क्षणिकत्वे न सम्भवति; ततोऽतिरिक्तश्च सम्बन्धोऽनतिप्रसक्तो दुर्वच इति सर्वप्रकारेणापीत्युक्तमिति भावः। ननु कार्यशून्या सामग्री क्षणोपाधिश्चेत् सामग्र्याः क्षणिकत्वमावश्यकं; अन्यथा क्षणोपाधित्वायोगादिति शङ्कायास्तादवस्थ्यादिति कथं दृष्टान्तहान्युपपादनमित्यत्राह—**गूढाभिप्राय इति**। गूढाभिप्रायमेवावतारिकामुखेन व्यनक्ति—**तथाऽपीत्यादिना**। अभिसन्धिं प्रकाशयति—**अयं भाव इति**। **संबन्धशब्देति**—संयोगादौ (गादिमात्रे) संघशब्दाव्यवहारादिति भावः। **अत इति**। **केन चित्** देशाद्युपाधिना प्रयोजकेन **संगृहीताः** अवच्छिन्नाः। **त एव**—संघातिन एव संघशब्दवाच्या इति नियमतस्तत्रैव व्यवहारादिति भावः—**स्थिरा इति**। तथा च दृष्टान्तासिद्धिरितिभावः। **नन्विति**—संहतिहेतूपाधेः क्षणिकत्वाभावे तदवच्छिन्नस्याक्षणिकतया क्षणोपाधित्वं न स्यादिति संहतिहेतूपाधिः क्षणिको वाच्यः। तथाच स दृष्टान्तस्स्यादिति भावः। **मैवमिति**—सङ्घातप्रयोजकं कारणेषु किमिति विचारे तत्र प्राप्ताप्राप्तविवेचने चरमकारणमेव। तच्च उत्तरकालस्थायित्वात् स्थिरमेव।

न च क्षणोपाधित्वानुपपत्तिः स्वकार्यप्रागभावसहितस्य क्षणावच्छेदकत्वात्। तयोः स्थिरत्वान्न कस्यापि दृष्टान्ततेत्यर्थः। तथाच यत्किञ्चित्कार्यचरमकारण-

तत्प्रागभावावच्छिन्नकालत्वं क्षणत्वमिति पर्यवसितोऽर्थः। **तदुपधानं**—तत्प्रागभावोपधानं। **तस्य**—चरमकारणस्य।

ननु क्षणकाल एव दृष्टान्त इत्याह **अनवच्छिन्नस्येति**। तत्र किमवच्छिन्नः क्षणो विवक्षतः उत कालस्वरूपमात्रं? नाद्यः क्षणश्च कालः उपाधिस्तत्संबन्धश्चेति त्रयमेव। तत्र प्रागभावचरमकारणयोः स्थिरत्वात् तत्संबन्धोऽपि स्थिर एव। तत्र कालस्वरूपं च स्थिरमेव। न द्वितीयः; अवच्छिन्नस्य कालस्वरूपमात्रतया तस्य नित्यत्वादिति भावः। ननु काले कालसम्बन्धाभावात् कथं तस्य नित्यत्वं? इत्यत्राह—**कालपरिच्छेदेति**। वस्तुनो ह्यनित्यत्वाभावे नित्यत्वभावः। एवं सामग्रीवत् क्रियाऽपि किञ्चिदवच्छिन्ना क्षणोपाधिरित्याह—**क्रियादिश्चेति**। आदिशब्देन अवस्थाऽपि विवक्षिता। **तत्प्रकर्षनिकर्षैः**—क्रियारूपक्षणोपाधिप्रकर्षनिकर्षैः—अधिकन्यूनभावैः।

यद्वा—क्षणप्रकर्षनिकर्षैः दिवसमासवत्सरादिकल्पनेत्यर्थः। **क्षणकालावच्छेदकयोः**—कार्यप्रागभावचरमकारणयोः। **प्रागूर्ध्वेति**—प्राक्कालव्यापी प्रागभावः ऊर्ध्वव्यापि चरमकारणमित्यर्थः। तथाच तदवच्छिन्नकालस्य क्षणत्वेऽपि तयोर्न क्षणिकत्वमित्याह—**तदवच्छिन्नस्येति**। तथाच सिद्धान्तिमतानुसारेण दृष्टान्तासिद्धिरिति भावः। ननु सिद्धान्तिमते कालः क्षणलवादिपरिणामवानित्युक्तत्वात् स्वरूपेण क्षणरूपपरिणामोऽङ्गीकृतः। न च तस्योपाध्यवच्छिन्नकालत्वं; येनोक्तरीत्या स्थिराणामवच्छेदकत्वमुच्येत। अत एव सिद्धान्त्यभिमतदशावत्त्वेन द्रव्यलक्षणवत्त्वात्कालस्य द्रव्यत्वं। तथाच तादृशलक्षणावस्था दृष्टान्तस्स्यादिति कथं दृष्टान्तासिद्धिरिति चेत्;।

अत्र केचित्- कालस्वरूपस्य न परिणामः। न च क्षणलवादिपरिणामवानित्युक्तिविरोधः उपाध्यवच्छेदस्यैव परिणामशब्दार्थत्वात्। न च द्रव्यलक्षणानुपपत्तिः; संयोगादिसम्बन्धस्यैवावस्थाशब्दार्थत्वात्। तथाच दृष्टान्तासिद्धिरित्याहुः। अन्ये तु—कालस्यास्तु परिणामः तथाऽपि क्षणिकत्वसाधकानुमाने कालोपाधित्वस्योपाधित्वात् सोपाधिकतया न सत्त्वहेतोः साध्यसाधकत्वमित्याहुः।

पूर्वपक्ष्यनुसारेणापि दृष्टान्तहानि (दृष्टान्तासिद्धि) माह— **त्वत्पक्षे त्विति**। **स्वमतविरोधः**—अपसिद्धान्त इत्यर्थः। यद्वा स्वोक्तिविरोध इत्यर्थः। तत्र तदुक्तिमाह—**यथाऽऽहुरिति**। वादिप्रतिवादिनोर्मध्ये प्रतिवाद्यसिद्धं **स्वयंसिद्धं** स्वमतसिद्धं पक्षदृष्टान्तादिरूपेणाभिधातुं शक्यं। तत्र प्रतिवाद्यसिद्धिशङ्कायां तत्सा (द्धिशङ्काभावात्सा) धनमुखेन प्रतिक्रिया परिहारश्च संभवति। **स्वतोऽसि(द्धौ)द्धे** स्वमत एवासि (द्धौ)द्धे। **का प्रतिक्रिया**—कः प्रतीकारः? स्वमतासिद्धस्याप्यभ्युपगमे अपसिद्धान्ता(पाता)दित्यर्थः—**स्वत इति**। सार्वविभक्तिकष्षष्ठ्यर्थे तसिः।

अनन्यावच्छेदेनेत्यस्य विवरणं--**स्वरूपेणैवेति**। कालस्वरूपवस्त्वपि मास्तु; तस्य कश्चिदुपाधिरपि माभूत; किन्तु स्वरूपेणैव सिद्धेषु कश्चित् क्षणो भवतु--स एव क्षणिको दृष्टान्तोऽस्त्वित्यर्थः। तर्हीति--तादृशक्षणिकः क्षणशब्दवाच्योऽनुमानात्साधनीय इति भावः। क्षणिकत्वसिद्धयनन्तरमेव तादृशक्षणसिद्धिमुपपादयति--**उत्तरेति**। क्षणसन्ततीनां मध्ये मध्यमः क्षणः पूर्वक्षणध्वंसोत्तरक्षणप्रागभावाभ्यामेककालो भवति। तदेककालत्वमेव क्षणत्वं अतिप्रसङ्गाभावादिति त्वयाऽपि वाच्यं। तच्च क्षणिकसन्तानसिद्धयपेक्षं क्षणिकत्वसाधकानुमानादेव सिद्धयतीति न ततः पूर्वं सिद्धयतीत्यर्थः। **मध्यमक्षणस्य तादृ(त्वं)** शत्वं **क्षण(णिक)त्वं**। 'तदशिष्यं संज्ञाप्रमाणत्वादिति' ज्ञापकात् षष्ठीसमासः। **नन्विति**—'नित्या सततविक्रिया' इत्यङ्गीकारात् पूर्वपूर्वविकाराणामुत्तोत्तरविकारसमये नाशादिति भावः। **सर्वेति**—तथाचैकदेशबाधो व्यभिचारश्चेति भावः। **दृष्टान्तयेमेति**—दृष्टान्तं कुर्याम इत्यर्थः। तेषु--प्रकृतिगतविकारेषु। **न त्वदभिमतमिति**--उत्पत्त्यनन्तरक्षणविनाशित्वरूपं क्षणिकत्वमित्यर्थः। तथाच दृष्टान्तस्य साध्यवैकल्यमिति भावः!

प्रदीपादिवदिति—ननु तादृशं क्षणिकत्वं साध्यमस्तु; प्रदीपादीनामेव दृष्टान्तानां सत्त्वादिति चेन्न; प्रदीपादीनां वर्त्ययवयवाग्निसंयोगादुत्पत्तिः ततो वर्त्ययवस्य रूपपरावृत्तिलक्षणो दाहः ततो भस्मीभावलक्षणो नाशः ततो दीपनाश इति सहेतुको नाशो नाशकारणसन्निधानापेक्ष इति नाशकारणानां प्रदीपवत् सर्वत्र नियतकालसन्निधिनियमस्य प्रत्यक्षबाधितत्वान्न तादृशंक्षणिकत्वमपि साधयितुं शक्यमिति भावः। तथाच तत्साधने नियतकालविनाशसामग्रीकत्वमुपाधिरिति द्रष्टव्यं। **तदेतदिति**--स्थिरतराणामेव पूर्वोत्तरकालव्यापिनां क्रमोत्पन्नानां प्रागभावचरमकारणादीनां क्षणोपाधित्वं न कस्यापि क्षणिकत्व मित्येतदभिप्रेत्येत्यर्थः।

ननु क्रमवन्तौ पदार्थौ न समानकालिकौ भिन्नकालिकत्वात् संप्रतिपन्नवत्। तथाच नैककालिकतया क्षणोपाधित्वमित्यत आह—**द्वयोरिति**। **अयुगपत्**—भिन्नकाले। **युगपत्**—समानकाले। **यथायथमिति**—येषां येन प्रकारेण न्यूनाधिकभावरूपेण संभवति तेन प्रकारेण दर्शनादनुमानस्य बाध इति भावः। यथाशब्दः प्रथमः पदार्थानतिवृत्तिवचनः। द्वितीयः प्रकारवचनः 'यथाऽसादृश्ये' इत्यव्ययीभावः। क्षणिकत्वानुमानात्पूर्वं त्वदुक्तस्यासंभवान्मदुक्त एव क्षणोपाधिः स्वीकार्य इत्या (त्य तआ)ह **तस्मादिति**। नन्वनुमानान्तरं मदुक्तमस्त्विति चेत्; न; व्याप्तिग्राहकप्रमाणाभावेन अनुमानप्रवृत्तेरेवासंभवादिति भावः॥ ३०॥

अक्ष० मेयत्वाद्यैर्विगीतमिति। क्षणभङ्गानुमानान्तरं दूषयितुमनुवदति। **इह**—वस्तु जाते। विगीतं जगत् क्षणिकं मेयत्वात् सत्वात्-भासमानत्वाद्वा-क्षणोपाधिवत्-

इति प्रयोगो दर्शितः। अग्रेतनमितिशब्दमनुकृष्य इति चेदित्यन्वयो बोध्यः। अत्र प्रसङ्गसूचकेन स्यादितिशब्देन क्षणिकत्वानुपगमे असत्वप्रसङ्गस्सूच्यते। अर्थक्रियाकारित्वरूपस्य सत्वस्य क्षणिकत्व एव उत्तरोत्तरक्षणोत्पादकतया सम्भव इत्यभिमानः। घटजलधरादौ साध्यस्य बाधनिघ्नतया सम्प्रतिपत्यभावात्क्षणोपाधेर्दृष्टान्तीकरणं। अस्य क्षणिकत्वानुपगमे क्षणोपाधित्वं न सम्भवतीत्यभिमानः। अत्र दूषणमाह—**बाधइति** स्थैर्यग्राहिकया प्रत्यभिज्ञया क्षणिकस्य बाध इत्यर्थः। एवं स्वप्रयोजनेच्छयैव सर्वस्य प्रवृत्तिदर्शनात्फलार्थिनः फलिनश्च क्षणिकत्वेन भेदे सर्वप्रवृत्तिबाधस्स्यादित्यपि गम्यते।

तथा विगीतं जगत् स्थिरंवस्तुत्वादात्मवदिति प्रत्यनुमानेनाऽपि बाधो विभावनीयः। नान्यदृष्टं स्मरत्यन्य इति नियमानुगृहीतया सोऽहमिति प्रत्यभिज्ञया आत्मस्थैर्यस्य प्रामाणिकत्वेन सम्प्रतिपत्यवश्यम्भावादुक्तप्रत्यनुमानस्याधिकबलत्वेन बाधकत्वमिति भावः।

परोक्तानुमाने दृष्टान्ते साध्यवैकल्यमाह—**दृष्टान्तहानिरिति**। तदुपपादयति—**स्थिर इति**—क्षणोपाधिः यतः स्थिरो विदितः तत इत्यर्थः। स्थिरत्वे कथं क्षणोपाधित्वमित्यत्राह—**सामग्रीति**—कार्यप्रागभावसहिता सामग्री क्षणोपाधिरित्यर्थः। तस्याः क्षणिकत्वमक्षतमेवेत्यत्राह—**इयमपीति**—कार्यप्रागभावान्विता सामग्र्यपीत्यर्थः। **तद्धेतुसंघ इति**। कार्यहेतुसमुदाय इत्यर्थः। अत्र संघशब्दः न केवलहेतुपरः एकैकस्मिन्नप्रयोगात्-नापि हेत्वतिरिक्तपरस्परहेतुसम्बन्धपरः सङ्घशब्दस्य सम्बन्धपर्यायत्वाभावादित्याह—**नचासौ हेतुरित्यादिना**। न केवलहेतुः, नापि हेत्वतिरिक्तः किन्तु समानदेशकालाद्युपाध्यन्विता हेतव एव हेतुसंघ इत्युच्यन्ते। तेच स्थिरा एव। स्थिराणामपि तेषां क्षणोपाधित्वं कथमित्यत्राह—**क्रमवदिति**। पौर्वापर्यविशिष्टयोः उत्तरसंयोगप्रागभाव—पूर्वसंयोगनाशयोरिव स्थिरेऽपि क्षणोपाधित्वं स्यादेवेत्याशयः।

दीपादीनां कदाचित्सदृशविसदृशाशेषसन्तत्यपेते
ध्वंसे दृष्टेऽप्यशक्या तदितरविषयेऽनन्वयध्वंसकल्पिः।
बाधादेर्दर्शितत्वादपि च दृढमिते सान्वयेऽस्मिन्घटादौ
दुर्दर्शावस्थया स्युः पयसि लवणवल्लीनदीपादिभागाः ॥३१॥

इह च प्रतिसंख्याप्रतिसंख्यानिरोधयोः निरन्वयविनाशित्वे परोक्तं निदर्शनं दूषयति—**दीपादीनामिति** ॥ आदिशब्देन क्षणरुचिबुद्बुदादिसंग्रहः।

स निरन्वयनाशस्स्याद्धर्मो धर्म्यपि वा पुनः।
पूर्वसंघातभागो वा यद्भावेनानुवर्तते ॥
उत्पत्तिश्च तथाभूता निरन्वयसमुद्भवा।
तावुभौ सर्वभावानां नियताविति सौगताः ॥

यो विनाशस्स निरन्वयः, यथाऽन्त्यदीपस्य, अस्ति च विनाशो जातनाम्; अतस्सोऽपि निरन्वय इति निरन्वयध्वंसक्लप्तिर्न शक्या। तदुपपादयति-**बाधादेरिति**। प्रत्यभिज्ञाबाधस्य प्रवृत्त्याद्यनुपपत्तीनां च दर्शितत्वात्। विपरिवर्तश्च युक्त इत्याह—**अपि चेति**। अन्त्यदीपविनाशस्सान्वयः विनाशत्वात् पटादिविनाशवत्। साध्यविकलो दृष्टान्त इति चेन्न; सङ्घातांशानां वा गन्धादिधर्माणां वा वा श्यामरक्तादिधर्मिणां वा यथासम्भवमनुवृत्तेर्दृढोपलब्धत्वात्। प्रत्यक्षबाधपरिहाराय दुर्दशावस्थत्वोक्तिः। स्युरित्यनेन दृश्यावस्थानिवृत्तावपि स्वरूपसत्त्वं सूच्यते।

ननु पयसि लवणवदित्ययुक्तं, तत्रापि निरन्वयविनाशात्। तन्न; रसेन सूक्ष्मावयवानुमानात्। दीपावयवेषु लिङ्गमपि नास्तीति चेन्न; दीपोर्ध्वदेशिनां किञ्चिदौष्ण्योपलब्ध्या दीपावयवसंक्रान्तेस्सुगमत्वात्। प्रभूतदीपपार्श्ववर्तिनां च तापस्वेदादिस्तत एव। एवमन्त्यदीपनाशेऽप्यदृश्यावयवविसर्पस्सिद्धः। अतो विनष्टदीपभागानुपलब्धेरदृश्यावस्थानिबन्धनत्वादनन्यथासिद्धप्रत्यक्षसिद्धःसान्वयविनाशदृष्टान्त एव साधीयान्। अन्त्यदीपादेश्च यदि न किञ्चिदुपादेयं ततोऽर्थक्रियाविरहादसत्त्वं स्यात्। बुद्ध्यादिरर्थक्रियाऽस्त्विति चेन्न, तस्यानियतत्वात्। विनाशस्तर्ह्यर्थक्रियाऽस्त्विति चेन्न, तस्य ते तुच्छत्वात् ध्रुवभावित्वेन अहेतुकत्वाभ्युपगमाच्च। एवमन्त्यदीपासत्त्वे च तत्कारणपरम्पराया अपि तथात्वं स्यादिति॥ ३१॥

आनन्द०। प्रसङ्गसङ्गतिमाह—**इह चेति**। क्षणिकत्वसाधने बाधकपरिहारं परोक्तं दूषयति—इहेति इति केचिदाहुः। **प्रतिसङ्ख्याप्रतिसङ्ख्यानिरोधयोरिति**—निरन्वयविनाशः प्रतिसंख्यानिरोधः अप्रतिसंख्यानिरोधः सान्वयनाश इत्यर्थः। मुद्गरादिजन्यः प्रत्यक्षसिद्धो घटादेर्नाशः प्रतिसंख्यानिरोधः अस्फुटरूपदीपादिनाशोऽप्रतिसंख्यानिरोध इत्याहुः। अक्षणविनाश इति केचित्।

इह—जगति। विप्रतिपत्ताविति शेषः। ननु क्षणिकत्वसाधनमयुक्तं विनाशस्य सान्वयत्वात् अनुवृत्तांशस्य स्थिरत्वेन बाधादित्याशङ्क्य सर्वत्र निरन्वयविनाश एव न तु कस्यचिदंशस्यान्वयो येन बाधो देश्येतेति सौगतोक्तं संवादयति—**स निरन्वयनाशस्स्यादिति**। **धर्मो**—गन्धादिः। **धर्मी**—पाकरक्तस्थले घटादिः। **पूर्वसंघातभागः**—घटादिसंघातस्यावयवः तन्त्वादिर्वा **यद्भावेन** यत्स्वरूपेणानुवर्तते इत्युच्यते; तन्न; कुतः? स निरन्वयनाशस्स्यात्—निरवशेषं नश्यति; तथाच नानुवर्तत इति न क्षणिकत्वसाधने बाध इत्यर्थः। **उत्पत्तिश्च**। **तथाभूता**—द्रव्यादेरुत्पत्तिरपि विनाशवदेव। तथाशब्दार्थमेवाह—**निरन्वयेति**। पूर्वमवयवाद्यभावेऽपि द्रव्यसमुत्पाद इत्यर्थः **सर्वभावानां**—सर्वपदार्थानां। **सौगताः** न्यायचन्द्रिकायां प्रतिपादितवन्त इति शेषः। तदुक्तप्रयोगं दर्शयति—**यो विनाश इति**।

प्रत्यभिज्ञाबाधस्येत्यादि—यद्यपि न निरन्वयविनाशसाधने प्रत्यभिज्ञाबाधादिदर्शितः तथाऽपि निरन्वयविनाशसाधनस्य क्षणिकत्वसाधनार्थत्वात् तत्र बाधादिर्दर्शित इति भावः।

ननु माभूत् क्षणिकत्वसाधनार्थता; निरन्वयविनाशमात्रं साध्यतामिति चेन्न; घटादिनाशस्थले कपालमालाद्यनुवृत्तिदर्शनात्तथाऽपि बाध एव। अत एव बाधादेरिति सामान्योक्तिरिति ध्येयम्। प्रवृत्त्याद्यनुपपत्तिश्च आत्मनो विनाशित्वादिति भावः। **विपरिवर्तश्चेति**। प्रत्युत अन्त्यदीपविनाशस्थल एव सान्वयनाशसाधनं स्यादित्यर्थः। **गन्धादीति**—आदिशब्देन रसादिर्गृह्यते। **प्रत्यक्षबाधेति**। योग्यानुपलब्ध्यभावान्नानुपलम्भमात्रं बाधकमिति भावः **विसर्पः**–प्रसरः व्यापनमिति यावत्। ननु विनिगमकाभावात् को निर्णय इत्याह—**अतो विनष्टेति** विनष्टदीप-(दीपादि) स्थले निरन्वयविनाशस्सन्दिग्धः सूक्ष्मत(क्ष्मावस्य) याऽप्यनुपलब्धिसंभवात्। तथाच निरन्वयव्याप्तिग्रहो न शक्यः। सान्वयस्य तु घटादिनाशस्थले सन्देहाभावाद्व्याप्तिस्सुग्रहेति भावः। विपक्षबाधकबलादपि निश्चय इत्याह—**अन्त्यदीपादेश्चेति**। निरन्वयविनाशाङ्गीकारात् तज्जन्यस्य कस्यचिदभावादिति भावः। **बुद्ध्यादिरिति**– विषयप्रकाशतया विषतया वा बुद्ध्यादिजनकत्वाभावादिति भावः। आदिशब्देन तमोनिरसनादिर्गृह्यते। नन्वन्त्यदीपस्य सत्त्वं माभूदित्यत्राह—**एवमन्त्यदीपादिसत्त्वे** इति। (तथाच) उपान्त्यस्यान्त्यदीपजनकत्वेन सत्त्वं वाच्यं; अन्त्यस्यासत्त्वे तुच्छतयोपान्त्यजनकत्वमेव न स्यात्: तथा चोपान्त्यस्याप्यर्थक्रियाविरहात्तुच्छता; तथा पूर्वपूर्वेषामपीति दीपपरम्परावत्सर्वक्षणपरम्पराणामपीति चरमबौद्धपक्ष (पात) स्स्यादित्यर्थः॥ ३१ ॥

अक्ष० मुद्गराद्यभिघातानन्तरं उपलब्धियोग्यः यः घटादिनाशः सः प्रतिसंख्यानिरोधः-विनैव मुद्गराद्यभिघातं प्रतिक्षणभावी उपलब्ध्यनर्हः विनाशश्च-अप्रतिसंख्यानिरोधः। उभयोरपि निरन्वयत्वं सौगता वदन्ति। विनाशस्य सान्वयत्वे अनुवृत्तांशस्य स्थिरत्वसिद्धया क्षणिकत्वानुमानस्य बाधस्स्यात्। एवं प्रतिक्षण विनाशे अन्वयादर्शनात्क्षणभंगोऽपि न सिद्धयेत् इति तेषामाशयः। तत्र निरन्वयत्वसाधने दीपादीन्निदर्शयन्ति। आदिशब्देन विद्युदादयो। [बुद्बुदादयो] विवक्षिताः। **कदाचित्** महावर्त्यादिप्रसक्तौ। **सदृशसन्ततिः**—वर्तिभागान्तरोत्पन्नदीपपरम्परा। **विसदृशसन्ततिः** भस्मादिरूपा। तदुभयरहिते। **ध्वंसे-दृष्टेऽपि**–तादृशध्वंसो दृश्यत इत्यभ्युपगमेऽपीत्यर्थः। वस्तुतस्तादृशध्वंसो नेत्याशयः। ततस्तथाऽभ्युपगमेऽपि तद्दृष्टान्तेन अन्यत्र मुद्गराद्यभिघातजन्यघटादिनाशेऽपि निरन्वयकल्पितर्नशक्येत्याह—अशक्येत्यादिना। कुत इत्यत्राह—**बाधादेरिति**। प्रत्यभिज्ञाबाधो दर्शितः। कपालादिदर्शनेनापि बाधो द्रष्टव्यः। आदिशब्देन प्रवृत्त्यनुपपत्तिर्ग्राह्या। अतो यो-विनाशस्स-निरन्वय इति साधनं न सम्भवतीति

भावः। प्रत्युत विपरिवर्त एव युक्तस्स्यादित्याह—**अपिचेति**। **दृढमिते**—प्रत्यक्ष सिद्धेऽस्मिन्विनाशे। **घटादौ**—घटादिविषये घटादिप्रतियोगिकइति यावत्। घटादिनाशे कपालाद्यन्वयस्य प्रत्यक्षसिद्धत्वादिति भावः। अत्र अन्त्यदीप-विनाशोऽपि-सान्वयः विनाशत्वात् घटादिविनाशवदिति विपरिवर्तप्रसङ्गो विवक्षितः। अनुपलब्ध्या बाधस्स्यादित्यत्राह—**दुर्दशावस्थयेति**। **स्युरिति**। दृश्यावस्थानिवृत्तावपि स्वरूपसत्वं सूचितम्। तत्र दृष्टान्तमाह—**पयसीति**—तत्र रूपरूपिदर्शनाभावेऽपि रसोपलब्धिसत्वाद्धर्मिस्वरूपं नापह्नोतुं शक्यं-तद्वदत्र दीपोर्ध्वदेशे दीपनाशानन्तरमपि किञ्चिदौष्ण्योपलम्भात् दीपावयवसद्भावो दुरपह्नव इति भावः।

"निरन्वय विनाशस्स्यात् धर्मो धर्म्यपि वा पुनः
पूर्वसङ्गतभावो वा यद्भावे नानुवर्तते" ॥ इति हि सौगताः।

क्षणभङ्गनिरासः ॥

सत्त्वेऽसत्त्वेऽपि पूर्वं किमपि गगनतत्पुष्पवन्नैव साध्यं
हेतुप्राप्तिर्न पश्चाद्भवितुरघटितोत्पादनेऽतिप्रसङ्गः।
जन्यं जन्माऽन्यथा वा द्वयमसदनवस्थानकार्यक्षतिभ्या-
मित्याद्यैर्हेतुसाध्यं न किमपि यदि न स्वक्रियादेर्विरोधात् ॥ ३२ ॥

सर्वा० ननु साध्यसाधनभावे सिद्धे हि प्रस्तुतं पक्षचतुष्टयं सिध्येत्; स एव नास्तीति **चार्वाक** उत्तिष्ठते—**सत्त्वेऽसत्त्व इति**॥ यदि कार्यं कारकव्यापारात्पूर्वमस्ति तदा पूर्वसिद्धगगनादिवत्किमपि न कार्यं स्यात्। अथ तदा नास्ति, तदाऽपि खपुष्पवन्न कार्यम्; न चासतः सत्त्वापादानसंभवः। न हि नीलं शिल्पिसहस्रेणापि सितीकर्तुं शक्यमिति। कार्यं च कारणेन सह पूर्वं पश्चाद्वा जायते? आद्ये किं कस्य कारणं कार्यं वा स्यात्? द्वितीयेऽपि ततः पूर्वस्य कथं तज्जन्यत्वम्? वैपरीत्यापातश्च लोकव्यवहारानुरोधात्। तृतीये हेतुः स्वेन प्राप्तं साध्येत् अप्राप्तं वा? आद्ये प्राप्तत्वादेव पूर्वसिद्धेर्न साध्यत्वम्, न चोत्तरकालीनस्य पूर्वकालीनेन प्राप्तिः; उभयस्वरूपसिद्ध्यपेक्षत्वात्तस्याः। तदिदमाह—**हेतुप्राप्तिरिति**।

द्वितीयमपि दूषयति—**अघटितेति**। अप्राप्तोत्पादने सर्वस्मात् सर्वमुत्पद्येत; प्रकाश्यमप्राप्य वा दीपः प्रकाशयेत्; दाह्यमप्राप्य वा दहनो दहेत्। पुनर्विकल्पान्तरेण विहतिमाह—**जन्यमिति**। घटो जायत इत्येतौ तावन्न पर्यायौ, सहप्रयोगात्, यावद्विनाशं जायत इति प्रयोगप्रसङ्गाच्च। पटो जायत इति प्रयोगश्च न स्यात्; घटपटशब्दयोरपर्यायत्वात्। अतः कार्यस्वरूपातिरिक्तं जन्म। तच्च जन्यमजन्यं वेति विकल्प्य द्वयप्ययुक्तमित्याह—**द्वयमसदिति**। क्रमात् बाधकमाह—**अनवस्थानकार्यक्षतिभ्यामिति**। जन्मनो जन्यत्वं हि जननकर्मतया; अतस्तस्यापि जन्म स्वीकर्तव्यम्, एवं तस्यापीत्यनवस्था। अजन्यत्वे तज्जन्मनोऽ-

नादित्वात् तद्वतो घटादेरपि तथात्वं स्यात्। तथा च कार्यत्वक्षतिः स्यादिति। आदिशब्दनेन भिन्नाभिन्नत्वादिविकल्पक्षोभसंग्रहः। हेतुश्च साध्यं च हेतुसाध्यं, हेतुना साध्यं वा। ईदृशानां तर्काणां युक्ताङ्गहान्यादिकमभिप्रेत्याह—**नेति**। साधारणदुष्टत्वमाह—**स्वक्रियादेरिति**। इह तावदनिष्टकोटिभङ्गो न प्रत्याख्येयः। अन्यत्रैवमुत्तरगतिः—

यदत्र पूर्वमसत्त्वे कार्यत्वं न स्यादिति तद्विरुद्धभाषितं, प्रागसत्त्वविशेषितं सत्त्वमेव हि कार्यत्वम्। तत्र च प्रागसत्त्वे प्रागसत्त्वमेव न स्यादिति वा, तद्विशिष्टं न स्यादिति वा, सत्त्वमात्रं न स्यादिति वा प्रसङ्गार्थस्स्यात्? तत्र न प्रथमः, कस्यापि स्वाभावेन व्याप्त्यभावात्। अन्यथा शून्यवाद एव स्यात्; अनेकान्तवादो वा। द्वितीयः तदसत्त्व एव तद्विशिष्टशिद्धेः; न हि विशेषणसत्त्वं विशिष्टविरोधि। न तृतीयः, असत्त्वस्य स्वकालसत्त्वेन विरोधग्रहणात्, अन्यथा देशान्तरसत्त्वेऽपि विरोधप्रसङ्गेन स एवान्त्यबौद्धपक्षस्स्यात्।

यत्तु पश्चाद्भाविनः कारणप्राप्तिर्नास्तीति, तत्र पौर्वापर्यनियमलक्षणा प्राप्तिर्दृष्टत्वादनिवार्या। संयोगादिलक्षणा तु मा भूदनङ्गत्वात्। ततश्च नातिप्रसङ्गः, नियामकस्य सिद्धत्वात्। प्रकाश्यदाह्यादिषु च यथादर्शनं कार[काणां]णानां मिथः प्राप्तिरेवाङ्गम्, न तु कार्येण ज्ञानेन सह, भस्मादिना वा। यस्तु जन्मनो जन्यत्वाजन्यत्वविकल्पेनातिप्रसङ्ग उक्तः, नासावस्मत्पक्षे युक्तदोषः। न हि वयमभिव्यक्तिं वा कारणसमवायादिकं वा जन्मेति ब्रूमः, किन्तूपादानावस्थाविशेषम्। तस्य कार्यावस्थासामानाधिकरण्यव्यपदेशः तादात्म्येन तदाश्रयवृत्तेः; एवं ध्वंसादिसामानाधिकरण्यमपि यथायथमूह्यम्। ईदृशस्य जन्मन उपादानावस्थान्तरसाध्यत्वे कारणानवस्थामात्रमापतति; सा च न दोष इति सर्वाविगीतम्। यच्च भिन्नत्वे गवाश्वयोरिव कार्यकारणता न स्यात्, अभिन्नत्वे च कथं सिद्धस्य साध्यत्वमिति, तन्न; कारणात्कार्यस्य भिन्नस्यैवोत्पत्तिदर्शनात्।

अन्यथा बुद्धिबोध्यादौ भिन्नत्वादिविकल्पतः।
बोध्यत्वादिक्षतेर्नं स्यात् स्वमतस्थापनाऽपि वः॥

अथ किंचित्कारेणाकिंचित्कारेण वा कारणत्वम्, पूर्वत्र हेतूनां किंचित्कारजननेऽपि किंचित्कारान्तरापेक्षयाऽनवस्था, किंचित्कारस्यापि किंचित्कारजननापेक्षया उत्तरत्रातिप्रसङ्ग इति। अत्रापि ब्रूमः—यत्र किंचित्कारेण हेतुत्वं दृष्टम्, यथा काष्ठादेर्ज्वालादिना, तत्र तथा। न चानवस्था हेतुसंपत्तिपरम्पराया दोषत्वाभावात्; अतिरिक्तस्यात्रानिरूपणात्। यत्र तु द्वारनिरपेक्षं हेतुत्वं तत्रापि दर्शनबलात् किंचित्कारान्तरं न जनयितव्यम्, यतोऽनवस्था स्यात्। न चातिप्रसङ्गः, नियतपूर्वत्वग्राहिणा प्रत्यक्षेणैव तन्निवारणात्। अन्यथा तदपि ते प्रमाणं न स्यादिति विश्वापह्नवः।

यच्च कार्यं कुर्वतोऽकुर्वतो वा कारणत्वम्, आद्ये कार्यस्यापि पूर्वसिद्धिप्रसक्त्या कार्यत्वाभावः। द्वितीये विरोधातिप्रङ्गाविति; तदप्यपष्ठु, भाविकार्यानुगुणव्यापारवत्त्वमेव कारणस्य कुर्वत्त्वम्। तत्र कथं कार्यस्य स्वस्मात् पूर्वसिद्धिः? कुर्वत्त्वनिरूपणं तु भाविनाऽपि कार्येण बुद्ध्यारोहिणा सिध्येत्। एतेन निर्व्यापारस्सव्यापारो वा हेतुरित्याद्यपि दत्तोत्तरम्। कार्यकारणत्वयोः स्वभावत्वे पटत्वनीलत्वादिवत् सर्वं प्रत्यपि स्याताम्; अस्वभावत्वे कस्यचिदपि न स्याताम्इत्यपि नियतप्रतिसंबन्धिकस्वभावत एव तदुभयसिद्धेर्निरस्तम्। दण्डादिकार्यत्वं घटादिकारणत्वं वा नीलादिवदेव पुरुषभेदेऽप्यविपर्यस्तमेव।

अथ स्यात्, कार्यकारणभावस्य द्विष्ठत्वे द्वयोरपि द्वैरूप्यादविशेषविरोधभेदापत्तयस्युः, एकस्थत्वेऽपि यत्रैकस्मिंस्तत्रैवमिति; तत्र ब्रूमः – कार्यं कार्यत्वं कारणे कारणत्वं च वर्तते; तथाऽप्यन्योन्यनिरूप्यतया संबन्धव्यवहारादिसिद्धिरिति। स्यादेतत्, न तावद्दण्डादयो मृदाद्यवयवाश्च प्रत्येकं घटाद्युत्पादनशक्ताः; अदर्शनात्। अत एव न समुदिता अपि, न हि नद्यस्समेत्यापि दहेयुः। न च सिकतास्संभूय तैलं जनयेयुः। शक्तानामेव संभूय करणे सर्वे कृतकारास्युः। शक्तस्य कुर्वतोऽप्यन्याकाङ्क्षायां सर्वैरपि स्यात्। तथा च देशादिव्यवहितानामसन्निधेः कथं कार्यारम्भः? न हि कार्ये कारणानां साध्यांशभेदः; विभक्तदशायां समुदाये वा तस्यादृष्टेः; निरंशे गुणादौ च दुर्वचमेतदिति।

अत्रोच्यते—समुदितानां कार्यकरत्वमेव हि प्रत्येकमपि[हि] शक्तिः; कथमत्र वियुक्तैः कार्यकरणं कथं च समेतेषु कृतकरता? अतश्शक्तस्यापि सहकार्याकाङ्क्षायामतिप्रसङ्गश्च निरस्तः, यावत्कार्यसिद्धिनियतविषयत्वात्तस्या इति।

ननु पूर्वं कारणमित्युक्ते नष्टं कारणमित्युक्तं स्यात्। दृष्टा च मृदिते मृत्पिण्डे घटोत्पत्तिः, तथा च स्वात्मानमलभमानस्य कथं परसाधकत्वम्? अन्यथा चिरातिक्रान्तस्य च स्यादेव कारणत्वम्। तुच्छस्य च कारणत्वे कार्यमपि तुच्छं स्यात्, नित्यं वेति; तदपि न, पूर्वक्षणसत्त्वमेव हि कारणस्य कार्योपयोगि; न च तत्तदा नास्ति। कार्यक्षणे तु कस्यचिदसत्त्वं न कारणत्वविरोधि। पूर्वं नष्टमित्यप्यसाधु; स्थिरवादे तदयोगात्। पिण्डस्य तु न साक्षात्कारणत्वम् न च पिण्डस्तत्प्रध्वंसो वाऽत्यन्ततुच्छः, स्वकाले सद्भावात्। कालान्तरासत्त्वेन तुच्छत्वे प्रत्यक्षविषयोऽपि तथा स्यात्। तथा चेयं माध्यमिकगतिः।

अथ ब्रूषे पूर्वत्वमेव कारणस्य दुर्निरूपम्, पूर्वकालवृत्तित्वं हि तत्; काले च पूर्वत्वमुपाधिकृतम्; स चोपाधिर्यद्ययमेव, तदा तदधीनं कालस्य पूर्वत्वं कालाधीनं चोपाधेरित्यन्योन्याश्रयः; अन्यापेक्षायां चक्रकम्, अनवस्थाऽपि। कालस्य क्रमवदुपाधिसंबन्धभेदाद्भेदश्च कृत्स्नैकदेशविकल्पदुःस्थ इति। एवं ब्रुवता किं पौर्वापर्यमेव न दृष्टम्? दृष्टमपि वा बाधितम्? नाद्यः, स्वाभ्युपेतलोक-

व्यवहारविरोधात्। न द्वितीयः, सर्वेषां नित्यत्वतुच्छत्वयोरन्यतरप्रसङ्गात्। अतः काले सत्यसति वा क्रमस्तावद् दुरपह्नवः।

क्रमेणोपाधिभिर्योगस्साकल्येनांशतोऽपि वा ।
कालस्य न घटेतेति स्थिरवादी कथं वदेत् ॥

प्रत्यक्षप्रतिरुद्धश्च क्षणभङ्गपरिग्रहः ।
अपसिद्धान्तमादध्यान्मानमन्यदनिच्छतः ॥

अथ लोकायतान्तस्थमनुमानं च मन्यसे ।
आगमोऽप्यविसंवादी तदन्तस्स्थातुमर्हति ॥

यत्र प्रवृत्तिसामर्थ्यं न लोकादुपलभ्यते ।
अनुमीयेत तत्रापि प्रामाण्यमविशेषतः ॥

अस्त्वेवम्; तस्य नियमो न शक्यः अस्मादेवेदमनन्तरमिति। तदेतन्नियत-पूर्वत्वं हि न जातेर्जातिमपेक्ष्य, द्वयोरपि त्रैकालिकत्वात्। न च जातेर्व्यक्तिमपेक्ष्य, सर्वासां जातीनां पूर्वत्वेन कारणनियमासिद्धेः। जात्यन्तरापेक्षया कार्यत्वं न दृष्टमिति चेत्; किमतः; पूर्वमेतज्जातिकार्यत्वमपि दृष्टम् ? एकव्यक्तेश्च नियमो दुर्ग्रहः, अननुवृत्तेः; कृत्तिकारोहिण्योरपि हृदयभेदेष्वेव व्याप्तिर्गृह्यते। एतेन व्यक्तेर्जात्यपेक्षया वा व्यक्त्यपेक्षया पूर्वत्वनियमोऽपि प्रत्युक्त इति। अयमप्यनुक्तोपालम्भः।

एतद्धर्मकादेतद्धर्मकमुपजातमिति जात्युपाधिक्रोडीकृतरूपेण व्यक्तिषु नियमसिद्धेः। यथादर्शनं चेयत्तानियमरहितनिरुपाधिनिर्व्यभिचारभूयोदर्शनबलेन व्याप्तिसिद्धिश्चानुमाने वक्ष्यते। न च सर्वस्मात्तादृशात्तादृशं सर्वमनियतं वा स्यादिति शङ्कनीयम्। तथा व्याप्तेरग्रहणात्, तद्विरुद्धा च ते प्रार्थना मोघैव। तृणारणिमण्यादिषु च वह्न्याद्युत्पत्तौ सामान्यतो विशेषतश्च हेतुकार्यभावो मन्तव्यः। तत्र कार्यवैजात्यं न दृश्यत इति चेन्न; अनुपलब्धवैषम्याणामप्यायुर्वेदादिषु शक्तिभेदसिद्धेरवान्तरवैजात्यस्य स्वीकार्यत्वादिति।

सांख्यसौगतचार्वाकैरन्येऽप्येवमुपप्लवाः ।
प्रयुक्ताः प्रतिवक्तव्याः प्रतिष्ठितनयस्थितैः ॥

यदत्र माध्यमिकमतस्थैरुच्यते—

* पूर्वसंबन्धनियमे हेतुत्वे तुल्य एव नौ।
हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा ॥ इति,

तत्रोच्यते—प्राक्कालनियतत्वेन कारणं प्रमितं न वा ।
आद्ये तदेव तत्सत्त्वमन्यथा नियमोऽपि न ॥

अन्यदपि यदुक्तम्—

* अन्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः ।
नान्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः ॥

अत्र तदसत्तत इत्यत्र स्थाने सदिदं तत इति पाठ्यं विशेषणतयोपलक्षणतया वा सत्तासंबन्धिनि नासत्त्वारोपश्शक्त इति ।

सत्त्वं च सदसद्वेति विकल्प्यानिष्टकल्पने ।
असत्त्वं सदसद्वेति विकल्प्योत्तरमूह्यताम् ॥

स्वक्रियादिविरोधश्च सूत्रप्रभृतिदुस्तरः ।
गुरुशिष्यादिवाक्यानां परबोधार्थता यतः ॥

तेभ्यश्चैतन्यमित्यादि वदता गुरुणा स्वयम् ।
किण्वादिभ्यः प्रसिध्यन्ती मदशक्तिर्निदर्शिता ॥

प्रत्यक्षाल्लोकशब्दोक्तादधिकं च तदायतम् ।
अभाष्यत भवत्पूर्वैः प्रत्यक्षं चार्थसाधकम् ॥

अर्थकामौ पुमर्थौ च दृष्टेपायैरुदीरितौ ।
प्रीयसे दूयसे च त्वं बिभेषि च ततस्ततः ॥

इष्टं प्राप्तुमनिष्टं च निवर्तयितुमुद्यतः ।
तत्सिद्धौ चरितार्थस्त्वं लोकवत्किं न मन्यसे ॥

बुभुक्षुरन्नमादत्से श्वभक्ष्यादि जहासि च ।
परोक्त्या प्रतिपद्यार्थं प्रतिब्रूषे जिगीषया ॥

तत्त्वावधारणार्थं वा वादे किं न प्रवर्तसे ।
स्वयं वा मानतर्काभ्यां किं न किञ्चित्परीक्षसे ॥ ३२ ॥

आनन्द० कार्यकारणभावसमर्थनार्थमाक्षेपसंगतिमाह—**नन्विति** । पक्षचतुष्टयमिति—**वैनाशिकार्हतवैनाशिकसाङ्ख्यचसिद्धान्तिपक्षचतुष्टयमित्यर्थः** । अथ **तदेति**—कारकव्यापारात्पूर्वस्मिन् काले इत्यर्थः । किं कारणेन सह जायते पूर्वं वा पश्चाद्वा जायते ? इति विकल्पक्रमः । **आद्ये** इति—सव्येतरविषाणवद्विनिगमकाभावा(वात्कार्यकारणव्यवस्था न स्या) दिति भावः । **लोकेति**—पूर्ववर्तिन एव लोके कारणत्वव्यवहारादित्यर्थः पूर्वसिद्धत्वमेवोपपादयति—**नचोत्तरेति** । तत्र हेतुमाह—**उभयेति** । तस्याः—प्राप्तेः सम्बन्धतया सम्बन्धिद्वयपूर्वकत्वादिति । भावः । **अप्राप्तोत्पादने** इति—अविशेषादिति भावः । **यावद्विनाशमिति**—घटस्य—जनिधात्वर्थ(र्थत्वे)त्वात् तस्य वर्तमानत्वात् धात्वर्थवर्तमानकाले वर्तमानप्रयोगस्योचितत्वादिति भावः । **पटो जायत इति**—घट(स्वरूप)स्यैव जन्म-(नि)त्वे तस्य पटस्वरूपत्वाभावादित्यर्थः तस्याऽपि जन्मत्वेऽननुगम इति भावः ।

किञ्च घटस्वरूपस्यैव जन्मत्वे पटो जायते इति प्रयोगात् पटस्यैव घटात्मकत्वं वाच्यं; तथाच घटपटशब्दयोः पर्यायत्वं च स्यादित्याह—**घटपटशब्दयोरिति**। **भिन्नाभिन्नत्वादीति**—कार्यं कारणाद्भिन्नमभिन्नं वेति (विकल्पे) इति-(त्यर्थः) भावः। कारणं किञ्चित्कारेण कार्यं जनयति उत तद्विनेत्यादिविकल्प आदिशब्दर्थः। समाहारद्वन्द्व इत्याह—**हेतुश्चेति**। 'तृतीया तत्कृतार्थेन' 'कर्तृकरणे कृता' इति वा समास इत्याह—**हेतुनेति**। **युक्ताङ्गं**—प्रागसत्त्वं अयुक्ताङ्गस्वीकार **आदि**शब्दार्थः। अयुक्ताङ्गं च प्राक्सत्त्वकारणसंयोगादिः। दुष्टत्वं दोषः। **अनिष्टकोटीति**- प्राक्सत्वकारणप्राप्त्यादिरित्यर्थः। **अन्यत्र** प्रागसतोऽप्राप्तस्योत्पादने। वक्ष्यमाणा उत्तरगतिः। उत्तरगतिमेवोपपादयति—**यदत्रेत्यादिना**। चार्वाकोऽपि घटपटादि नित्यतया तुच्छतया वा नाङ्गीकरोति। किं तु निर्हेतुकं। तत्र (तथाच) प्रागसत्त्वमनुमतमेवेति स्वमतविरुद्धभाषणमित्यर्थः।

प्रकारान्तरेणापि विरुद्धतामाह—**प्रागसत्त्वविशेषितमित्यादिना**। प्रागसत्त्वे कार्यत्वं न स्यादित्यत्र प्रसङ्गे कार्यत्वस्य प्रागसत्त्वविशिष्टसत्त्वस्वरूपस्य विशेषणं न स्यादिति वा विशेषणविशेष्योभयं न स्यादिति वेति विकल्पार्थः। **कस्यापीति**—विशेषणस्य प्रागसत्त्वस्याभावः सत्त्वमेव। तथाच स्वाभावकाले स्वसत्त्वं स्यादिति प्रसङ्गार्थः। तथाच विरोधेन व्याप्त्यभावः इत्यर्थः। **अन्यथा**—प्रतियोगिनः स्वाभावकालिकत्वे। एकावच्छेदेन स्वाधारसंबन्धारोप्यकतदधि(स्वाधिकरणत्वाभिमताधि) करणकव्यासज्यवृत्तिधर्मेतरधर्मावच्छिन्नस्वसमानकालिकाद्यभावप्रतियोगित्वादेः शून्यताप्रयोजकत्वादिति भावः। **अनेकान्तेति**—शून्यत्वानङ्गीकारे सत्त्वासत्त्वरूपेणानेकान्तवाद इत्यर्थः। **तदसत्त्व एवेति**—प्रागसत्त्वरूपविशेषणसत्त्व एव प्रागसत्त्वे सति सत्त्वरूपविशिष्टसिद्धेरित्यर्थः। **न होति**—विशेषणसत्त्वस्य विशिष्टसिद्ध्यनुकूलत्वात् प्रागसत्त्वरूपविशेषणं तद्विशिष्टत्वस्य न विरोधीत्यर्थः। **अन्यथेति**—असत्त्वस्य सत्त्वमात्रविरोधित्वे इत्यर्थः। कार्यस्य कारणप्राप्तिर्वक्तव्येत्यत्र यथाकथञ्चित्प्राप्तिर्वक्तव्येति उत संयोगादिलक्षणेति विकल्पमभिप्रेत्य आद्य आह—**पौर्वापर्येति**। द्वितीये आह—**संयोगेति**। **प्रकाश्यदाह्यादावपि** कार्यप्राप्तिर्नास्ति किंतु कारणानामेव यथादर्शनं मिथः प्राप्तिरिति नातिप्रसङ्ग इत्याह **प्रकाश्येति**। **नासाविति**—चार्वाकोपि घटपटादिवस्तुनो न नित्यतामभ्युपैति। किंतु तस्य सादितां निर्हेतुकं जन्म च। तत्रोक्तो दोषः स्वस्यैव दोषो नास्मत्पक्ष इति(त्यर्थः) भावः।

ननु त्वपक्षेऽप्यभिव्यक्त्यादिकमुत्पत्तिश्चेद्दोषस्समान इत्याह—**न हि वयमिति**। अभिव्यक्तिपक्षे अभिव्यक्तिरभिव्यज्यते न वेत्यादिविकल्पदोषस्स्यात्। कारणसमवायपक्षेऽपि स सिद्धो न वेत्यादिविकल्पदोषस्स्यादित्यर्थः। **उपादानावस्थाविशेषमिति**—उपादाननिष्ठो यो घटाद्यवस्थाव्यवहितप्राक्कालावस्थाविशेषः तमित्यर्थः। **यद्वा** आद्यक्षणावच्छिन्ना घटाद्यवस्थैवेत्यर्थः। ननूपादानावस्था

मृदादिनिष्ठतया घटादिकार्यनिष्ठत्वाभावात् कथं घटो जायत इति सामानाधिकरण्यव्यपदेश इत्यत्राह—**कार्यावस्थेति**। उत्पत्त्यवस्थाश्रयवृत्तित्वाद्घपदेश इत्यर्थः। तदेव तु कुत इत्यत आह—**तादात्म्येनेति**। उत्पत्त्यवस्थाश्रयस्य कार्यावस्थाश्रयस्य च तादात्म्यादित्यर्थः। **एवमिति**—यदवस्थाश्रयवृत्तित्वं यस्य तस्य तत्सामानाधिकरण्यव्यवहारप्रयोजकत्वमित्यङ्गीकारात् ध्वंसावस्थासामानाधिकरण्येन ध्वस्तो घट इति व्यपदेश इत्यर्थः। ननूपादानावस्थाया जन्मत्वेऽपि प्रागसत्त्वेन साध्यत्वादनवस्था स्यादित्यत आह—**ईदृशस्येति**। **सर्वाविगीतमिति**—बीजाङ्कुरादौ तथा दर्शनादिति भावः **अन्यथेति**—दर्शनस्यानियामकत्वे इत्यर्थः।

घटबुद्धिर्घटाद्भिन्ना न वा ? आद्ये पटवत् तद्विषया न स्यात्। द्वितीयेऽपि स्वयं तद्विषया न स्यात्। बोध्यं बुद्धिसंबद्धं प्रकाशते असंबद्धं वा ? आद्येऽपि स संबन्धस्संबद्धोऽसंबद्धो वा ? प्रथमेऽनवस्था; द्वितीये संबन्धस्यासंबद्धत्वे तन्मूलकबोध्यसंबन्धस्याप्यभावेन प्रकाशाभावादिति प्रसङ्गयोः प्रसङ्गः; अत एवाद्यद्वितीयोऽपि नेत्यादि (त्याद्य) विकल्पसंभवादिति भावः। किञ्चित्कारः—व्यापारविशेषः। प्रकारान्तरेणाप्यनवस्थामाह—**किञ्चित्कारस्यापीति**। किञ्चित्कारस्यापि कार्यजननार्थं किञ्चित्कारापेक्षायां द्वितीयाऽनवस्थेत्यर्थः। **उत्तरत्रेति**—अकिञ्चित्कुर्वतोऽपि जनकत्वे विशेषाभावात्तन्तुभिरपि घट उत्पद्येतेत्यर्थः। **अतिरिक्तस्येति**- हेतुसम्पत्तिपरम्परातिरिक्तस्येत्यर्थः। **अन्यथेति**—प्रत्यक्षस्य नियामकत्वाभावे प्रत्यक्षमात्रप्रमाणवादिनस्तवार्थसिद्धिरेव न स्यादित्यर्थः। **आद्ये कार्यस्यापीति** कृतिनिरूपकस्य कर्मणोपि प्राक्सत्त्वनियमादिति भावः। **द्वितीये इति**—अकुर्वतो जनकत्वरूपकुर्वत्त्वं विरुद्धं कृतिमत्त्वाभावेऽपि जनकत्वे सर्वं सर्वस्य कारणमित्यतिप्रसङ्गश्चेत्यर्थः। **अपष्ठु**—असारं।

एतेनेति—पूर्वत्र कृतिरूपव्यापारविशेषः अत्र क्रिया (कृति) रूप साधारणव्यापारमात्रमिति भेदो ज्ञेयः। **स्वभावत्वे इति**—न हि घटस्वभावः कस्यचित् कस्यचिन्नेति सम्भवति। स्वभावत्वव्याघातादिति भावः। **अस्वभावत्वे इति**—तद्धर्मत्वाभाव इत्यर्थः। **नियतप्रतिसम्बन्धिकेति**—कार्यकारणत्वे स्वभावावेव। नचातिप्रसङ्गः; संयोगादिवत्प्रतिसम्बन्धिनियमादित्यर्थः। स्वभावत्वमेवोपपादयति—**दण्डादीति**। यथा नीलादिकं धर्मिविशेषनियतमपि तस्य स्वभावः पुरुषविशेषनियतं च न भवति तद्वदित्यर्थः। **विपर्यस्तं**—विपरीतं तदन्यदिति यावत्। **अविशेषेति**—कार्यस्यापि कारणत्वं कारणस्य कार्यत्वं कार्यकारणयोस्स्वस्वापेक्षया पूर्वभावित्वपश्चाद्भावित्वरूपविरोध एकस्यैव कार्यकारणरूपेण भेदश्च स्युरि (स्यादि) त्यर्थः। **एकस्थत्वेऽपि**—कार्यकारणयोरन्यतरमात्रवृत्तित्वेऽपि। **यत्रेति**—यत्र कार्यकारणभाववै (भावाद्वै) रूप्यं तत्र उक्तदोषाः स्युरित्यर्थः।

ननु मृदादयश्शक्ताः कार्यं जनयन्त्यशक्ता वेति विकल्पमभिप्रेत्य द्वितीयं दूषयति—**न तावदिति**। अशक्तानां जनकत्वं व्याहतमिति भावः। आद्यं दूषयति-**शक्तानामिति**। एकस्यापि शक्तत्वेन कार्यस्य करणादितरैरपि तस्य करणे कुतः करणत्वमितीतर (कृतकरत्वमिति सहकारि) वैयर्थ्यमिति भावः। **सर्वैरपि स्यादिति**—अविशेषादिति भावः। अस्तु को दोष इत्यत्राह—**तथाचेति**। एकघट-व्यक्त्युत्पत्तौ दण्डादिकारणताव (त्पत्ति)स्थदण्डत्वादिकारणत्वावच्छेदकावच्छिन्न-यावद्भिर्भवितव्यमिति देशादिव्यवहितानां सन्निध्यसंभवादुत्पत्तिरेव न स्यादि-त्यर्थः। ननु सन्निहितं कारणं कार्ये कञ्चिदंशं जनयति; असन्निहितं च यदा सन्निधा-स्यति तदेतरांशं जनयतु कथं कार्यानारम्भ इत्यत्राह—**नहि कार्यं** इति। **एतदिति** जन्यजनकत्वमित्यर्थः। **यावत्कार्यसिद्धीति**—एककार्यनिरूपितानि यावन्ति कारण-तावच्छेदकानि प्रत्येकं तावदवच्छिन्नयत्किञ्चित्सत्त्व एव कार्यदर्शनादिति भावः। **नन्विति**—पूर्वकाल इत्यादौ पूर्वपदस्यातीतार्थकत्वादर्शनादित्यर्थः। **अन्यथेति**—स्वरूपाभावस्योभयत्र तुल्यत्वादिति भावः। **तुच्छस्येति**—उपादानसमानस्वभाव-त्वादिति भावः। तुच्छस्य सार्वकालिकत्वात् कार्योत्पादे विलम्बात् तुच्छकारणा-नन्तरक्षणवर्तिप्रागभावप्रतियोगित्वं न स्यादित्यर्थः।

अन्ये तु—तुच्छस्य सार्वकालिकतया सार्वकालिककार्यपरम्परा स्यादित्यर्थं इत्याहुः।

किं कारणमात्रस्य स्वकार्यकालसत्त्वं वक्तव्यं कारणविशेषस्य वा? इति विकल्प्य आद्यं प्रतिवक्ति—**पूर्वक्षणसत्त्वमिति**। द्वितीयं प्रतिवक्ति—**कार्यक्षण इति**। निमित्तस्यासत्त्वं न विरोधि उपादानस्यासत्त्वं विरोध्यप्यत्र नास्तीति भावः। तदेवोपपादयति—**पूर्व(मिति)मेवेति**। पिण्डत्वावस्थानाशेऽपि मृद उपा-दानस्य सत्त्वादित्यर्थः। पिण्डस्येति—पिण्डावस्थाया इत्यर्थः। **न साक्षादिति**—परिचायकत्व(मात्र) मित्यर्थः। **स्वकाले** इति - सार्वकालिकासत्त्वमेव हि तुच्छत्व-मिति भावः। असत्त्वमात्रमेव तुच्छत्व प्रयोजकं लाघवादित्यत्राह—**कालान्तरेति**। प्रत्यक्षविषयस्यापि कालान्तरासत्त्वादिति भावः।

कृत्स्नैकदेशेति—कालः क्रमादुपाधिभिः कात्स्न्र्येन सम्बध्यते अथैक(थवैक) देशेन? न प्रथमः; सर्वोऽपि कालः पूर्वो वा परो(रोऽपि)वेति पूर्वापरविभागो न स्यात्। न द्वितीयः; एकदेशाभावादिति विकल्पदुःस्थत्वादित्यर्थः। **स्वाभ्युपेतेति**—स्वाभ्युपेतव्यवहारविरोधो लोकव्यवहारविरोधश्चेत्यर्थः। **पूर्वः पर इति** व्यवहार-स्य सर्वसिद्धत्वादहेतुकस्य नोत्पत्तिः। 'पूर्वं नैव स्वभावतः' इति चार्वाकव्यवहा-राच्चेति भावः। **सर्वेषामिति**। इदं पूर्वमिदं परमिति पौर्वापर्यविशिष्टप्रतीति-र्दृश्यते; तत्र विशेषणीभूतपूर्वत्वमात्रबाधे नित्यत्वं; विशेष्यबाधे विशिष्टबाधे च **तुच्छत्वं स्यादित्यर्थः**। ननु कालानभ्युपगन्तुः कथमित्यत्राह—**अतः काल इति**।

कालशब्दवाच्यस्य कस्य चित् तैरप्यभ्युपगन्तव्यत्वादिति भावः। कृत्स्नैकदेशविकल्पं परिहरति—**क्रमेणेति**। तस्यैकस्य कालस्य क्रमेणोपाधियोगो वक्तुं शक्यः। क्षणिकत्वपक्ष एव परं वक्तुं न शक्यते। एकेनानेकेषामानन्तर्येण योगः क्रमवदुपाधिसम्बन्धः।

न च कृत्स्नैकदेशविकल्पदोषः उभयथाऽपि दोषाभावात्। न च सर्वस्यापि पूर्वपरत्वयोः प्रसङ्गेन विभागाभावः; तत्तत्पूर्वोपाधिकाले सर्वस्य पूर्वत्वात् तत्तत्परो(तत्तदप)पाधिकाले सर्वस्य परत्वाच्च। नचैकदेशासम्भवः; सततपरिणामवादिभिरस्माभिस्तद(स्या)ङ्गीकारे विरोधाभावाच्चेत्यर्थः। ननु क्षणभङ्गाङ्गीकारात् क्रमवदुपाधियोगो न घटते इत्याशङ्क्य किं प्रत्यक्षेण क्षणभङ्गस्वीकार उतानुमानेन ? इति विकल्पमभिप्रेत्य आद्यं दूषयति—**प्रत्यक्षेणेति**। प्रत्यभिज्ञारूपप्रत्यक्षेण स्थैर्यगोचरेणेत्यर्थः। द्वितीयं दूषयति—**अपसिद्धान्तमिति**। तव प्रत्यक्षादन्यस्याप्रमाणत्वादिति भावः। **लोकायतान्तस्स्थमिति**—लोकायतं—चार्वाकशास्त्रं तत्रानुमानमप्यन्तर्गतं तथाच नापसिद्धान्त इति भावः।

केचित्तु(अन्येतु) लोकायतान्तस्स्थं—(लोकायतं तटस्थं) प्रत्यक्षान्तर्गतमित्यर्थं इत्याहुः।

आगमोऽपीति—तुल्यत्वादिति भावः। किञ्च अनुमानप्रामाण्यमावश्यकमित्याह—**यत** इति। यतो लोकात् प्रत्यक्षात्। प्रवृत्तिसामर्थ्यं—प्रवृत्तिजनकता। प्रामाण्यसंदेहादिना नोपलभ्यते तत्राप्यविसंवादिप्रत्यक्षाविशेषात्प्रामाण्यमनुमीयेत ततः प्रवृत्तिः अन्यथा प्रवृत्तिर्न स्यादिति भावः। **अस्त्वेवमिति**—अस्मादेवेदमनन्तरमिति तस्य कारणस्य नियमो ग्रहीतुं न शक्य इत्यर्थः। तदेवोपपादयति—**तदेतदिति**। **कारणनियमासिद्धेरिति**—तन्तुजातिः पटकारणमिति नियमो न सिद्धयेदित्यर्थः। **एतज्जातीति**—तन्तुजातीत्यर्थः। **एकव्यक्तेरिति** रासभादितुल्यत्वादिति भावः। ननु कृत्तिकारोहिण्यादावेकव्यक्तिकत्वेऽपि व्याप्तिग्रहो दृष्ट इत्यत्राह—**कृत्तिकेति**। तत्राप्यनयोरुदयानां भिन्नभिन्नानामनेकेषामेव व्याप्तिर्गृह्यत इत्यर्थः। **एतेनेति**—एकव्यक्तौ (क्तेः)नियमस्य(मेन) दुर्ग्रहत्वादि(त्वेने)त्यर्थः। **अनुक्तोपालम्भ इति**—जात्याद्यपेक्षया जन्यजनकभावस्यानुक्तेरिति भावः।

तर्हि किमुक्तमित्यत्राह—**एतद्धर्मकादिति**। दण्डत्वादिधर्मकात् घटत्वादिधर्मकं जातमित्यर्थः। **जात्युपाधीति**—तथाच यद्धर्मावच्छिन्नं प्रति यद्धर्मावच्छिन्नमनन्यथासिद्धनियतपूर्वं तद्धर्मावच्छिन्नं तद्धर्मावच्छिन्नाज्जातमिति जात्युपाधिक्रोडीकारेण व्याप्तिग्रहसम्भवादित्यर्थः। ननु सहचारदर्शनोपाध्यभावनिश्चयव्यभिचारज्ञानविरहाणां व्याप्तिग्राहकत्वं वाच्यं; सहचारदर्शनमात्रस्य व्यभिचारिसाधारण्यात् भूयोदर्शनानां त्रिचतुरादिभावेनाननुगतत्वात् उपाधेर्योग्यायोग्यरूपत्वेन

तदभावस्य दुरवधारणत्वात् भूतभाव्यसन्निकृष्टव्यक्ति (वस्तु)षु व्यभिचारसंदेहेन व्यभिचारज्ञानविरहस्याप्ययोगा न्न (तैः) व्याप्तिग्रह इत्यत्राह—**यथादर्शनं चेति**। **निरुपाधिः**—उपाध्यभावनिश्चयः। **निर्व्यभिचारः**—व्यभिचारज्ञानविरहः। **भूयोदर्शनं**—भूयस्सहचारदर्शनमित्यर्थः **अनुमान इति**—अनुमाननिरूपणावसरे इत्यर्थः। सर्वस्मात्—दण्डचक्रादितः। सर्वं—घटपटादिकमुत्पद्येत। यद्येका सामग्रीति न्यायादेकमेवोत्पद्यते तथासति अनियतो घटः पटो वा जायेतेत्यतिप्रसङ्गश्च नास्तीत्याह—**नचेति**। **तद्विरुद्धा चेति**। एतज्जातीयादेतज्जातीयमुत्पद्यत इति व्याप्तिग्रहविरुद्धा सर्वानियतोत्पत्तिप्रार्थनेत्यर्थः। नन्वेतज्जतीयादेतज्जातीयमुत्पद्यत इति व्याप्तिग्रहो नोपपद्यते; तृणजातीयाद्वह्निजातीयमिति व्याप्तेरभावात् तदभावेऽपि वह्नि (मण्यादेरपि वह्निजातीय) दर्शनात्। एवं मण्यादिजातीयादपीति चोद्यं परिहरति—**तृणारणीति**। एक (जातीय) शक्तिमत्त्वेन त्रयाणां वह्निजातीये कारणत्वं।

यद्वा—वह्निफूत्कारादिसमवधानस्थले यज्जातीये (तीयसमवधाने) सति वह्निजाती (यकार्यं) यो (यस्यो) त्पत्तिः यज्जातीयाभावे वह्निजाती (याभावः) योत्पत्त्यभावः इति सामान्यकार्यकारणभावः, वह्नित्वावान्तरजातिविशेषावच्छेदेन विशेषकार्यकारणभावश्चेत्यर्थः।

अनुपलब्धेति। तृणादिजन्येषु वैषम्यमुपलभ्यत एव; तथाऽप्यनुपलम्भमात्रान्नाभाव इति भावः। **साङ्ग्येति**—कार्यकारणभावस्यानतिप्रसक्तस्य दुर्वचत्वात् ग्राहकस्यापि दुर्निरूपत्वात् पूर्ववृत्तं च कारणं वाच्यम्; पूर्वत्वं च कार्यप्रागभावावच्छिन्नकालत्वम्। प्रागभावत्वं च प्रतियोगिजनकाभावत्वम्; तथाचात्माश्रय इत्याद्यन्येऽप्युपप्लवाः प्रतिष्ठितनय**स्थितैः**—सम्यगभ्यस्तन्यायैः पुरुषैः प्रतिवक्तव्याः परिहरणीया इत्यर्थः। तत्प्र(त्परिहारप्र)कारस्तु—न च लक्षणस्यानिर्वचनमात्रेण वस्तुनोऽभावः, इक्षुक्षीरादिमाधुर्यवैजात्यविलोप(त्याभाव) प्रसङ्गात्। प्रतियोगित्वादिवत् स्वरूपसंबन्धविशेषत्वेनाप्यन्तत उपपत्तेः। अनन्यथासिद्धनियतपूर्ववृत्तित्वा (सत्त्वा) दिना निर्वच (चनसंभवाच्च) नोपपत्तेश्च। नापि ग्राहकाभावः; अनन्यथासिद्धान्वयव्यतिरेकाग्राहकत्वात्। नापि पूर्वत्वनिर्वचनप्रयुक्तदोषः; विनाश्यभावावच्छिन्न (श्यभाव) त्वादिना निर्वचनसंभवादिति। ननु सतः कार्यकारणभावो नोपपद्यते कार्यकारणभावस्य सत्त्वाधीनत्वाभावेन असत्त्वनियतत्वादिति खण्डनोक्तिमनुवदति—**यदत्रेति**।

अन्ये तु ननु सर्वशून्यवादे कार्यकारणभाव एव न संभवति; शून्यस्य किञ्चिदपेक्षया पूर्वसत्त्वाभावात्। तथाच भ्रान्तिसिद्धस्यापि कालविशेषे उत्पत्तिः कालविशेषे प्रतीतिरित्याद्यनुपपन्नमित्याशङ्क्य पूर्वकालसत्त्वमात्रमतिप्रसक्तं; नियतसत्त्वविवक्षायां पूर्वकालनियतत्वमेव लाघवादस्तु; तच्च वादिप्रतिवादिनोस्समान-

मेव। सत्त्वं तु गौरवादनन्तर्भूतम्। तथाच कारणत्वानन्तर्गतसत्त्वासत्त्वविचारो व्यर्थ इति माध्यमिकमतस्थो (मतैकदेश्यु)क्तं दुरुक्तमिति प्रसङ्गाद्दूषयितुमनुभाषते—यदत्र माध्यमिकमतस्थैरिति इत्याहुः। अस्मिन् पक्षे माध्यमिकग्रन्थ एव किञ्चिद्विषमं खण्डनेनानूदित इति ध्येयं।

माध्यमिकमतस्थत्वं माध्यमिकमतानुसरणात्। यद्यपि खण्डने—

अन्तर्भूतबहिर्भूतसत्त्वासत्त्वकथा वृथा।

इति किञ्चिद्विकृतं पठ्यते; तथाऽपि उत्तरत्र अन्तर्भावितेति तदग्रन्थोपादानात् लेखकाधीनं तद्वैषम्यमिति केचिदाहुः।

अन्येतु - माध्यमिकमतस्थः खण्डनकार उच्यते। उत्तरत्रान्यदपीति खण्डनग्रन्थानुवादादित्याहुः।

तदेव प्रमितत्वमेव। **प्रमितत्वं**—अबाधितमानविषयत्वम्। नियतत्वम् च नियमेन सत्त्वं। तथाच सत्त्वघटितं कारणत्वमिति सत्त्वशून्यमते कारणत्वं दुर्वचमित्यर्थः। तदुक्तमन्यदपि दूषयितुमनुभाषते—**अन्यदपीति**। (अद्वैतमतं दूषयितुमनुभाषते)—**अन्तर्भावितस(त्त्वं)त्तं चेत्कारणमिति**। सत्त्वविशिष्टं चेत्—सत्त्वस्यापि कारणकोटिप्रवेशश्चेदिति यावत्। पूर्वसत्त्वं सत्त्वविशेष्ये विशेषणीभूतसत्त्वे वा नास्तीत्यसतः कारणत्वमायातमित्याह—**तदसदिति**। न हि स्वविशिष्टे स्वस्मिन् वा स्वस्य वृत्तिर्युज्यते; न च सत्त्वान्तरं; तस्यासत्त्वे तद्विशिष्टस्याप्यसत्त्वं स्यात्। **नान्तर्भावितेति**—अन्तर्भावितसत्तं न भवतीति नसमासः। तथा सत्त्वस्याप्रवेशादसतः कारणत्वं तत एवायातमित्यर्थः। त्वदुक्तमेव 'तदसत्ततः' इत्यत्र तदसदिति स्थाने सदिदमिति पदप्रक्षेपेण तव दूषणं भवतीत्याह-अत्रेति। इदं (कारणं) तत् सदेवेत्यर्थः। तदेवोपपादयति—**विशेषणतयेति**। उभयथाऽपि सत्ताश्रयत्वात्कारणस्येति भावः।

ननु सत्तायास्सत्ताश्रयत्वेऽनवस्था। तदनाश्रयत्वे तस्या असत्त्वे(न) कारणस्याप्यसत्त्वमित्यत्राह—**सत्त्वं चेति**। **सदसद्वेति**—कारणस्यासत्त्वं सन्न वा? आद्येऽनवस्था, सत्त्वान्तरापत्तिश्च। असत्त्वस्यासत्त्वे सत्त्वाश्रयत्वेनाभिमतस्यासत्त्वशून्यतया सर्वसत्त्वं स्यात्। द्वितीये तु असत्त्वस्यैवासत्त्वाभावरूपसत्त्वाश्रयतया (त्वात्) सत्त्वं; अवर्जनीयतया तद्वदेव सर्वस्यासत्त्वमिति भावः। पूर्वोक्तं स्वक्रियाव्याघातं विशदमाह—**स्वक्रियादीति**। **सूत्रप्रभृति**—त्वदीयशास्त्रभूतसूत्रमारभ्येत्यर्थः। तत्र हेतुमाह—**गुरुशिष्येति**। परबोधनार्थत्वं परप्रतिपत्तिप्रयोजनकत्वं; तच्च साध्यसाधनभावनिबन्धनमिति भावः। त्वयैव लोकसिद्धकार्यकारणभावस्य दृष्टान्तीकरणादपि विरोध इत्याह—**किण्वादिभ्य** इति। तदीयभाष्यविरोधमप्याह—**प्रत्यक्षादिति**। **अधिकं**—अधिरुपरिभावार्थः। प्रत्यक्षस्यो (क्षादु)

परिभूतं—फलभूतमित्यर्थः। **दृष्टोपाधी**—अन्वयव्यतिरेकसिद्धकारणकौ। **ततस्तत इति**—प्रीतिदुःखभयहेतुभ्य इत्यर्थः। **उद्यतः**—यत्नवान्। **तत्सिद्धौ**—इष्टप्राप्त्यनिष्टपरिहारसिद्धौ। **चरितार्थः**—प्राप्तप्रयोजनकः। ततः किमित्यत आह—**लोकवदिति**। पूर्वोक्तानां सर्वेषां साध्यसाधनभावप्रतिपत्तिनिबन्धनत्वात् लोकवत् किमर्थं तन्नाभ्युपगच्छसीत्यर्थः। **बुभुक्षुरिति**-क्षुन्निवर्तनसाधनत्वाभावे ह्यविशेषात् सर्वमुपादीयेत परित्यज्येत वा। तथा न क्रियते (इति)। ततश्च स्वक्रियाविरोध इति भावः॥ ३२॥

अक्ष० अथ चार्वाकस्य कार्यकारणभावाक्षेपं निराकर्तुमनुवदति—**सत्वेऽसत्वेऽपीति**। **पूर्वं**—कारकव्यापारात्पूर्वं कार्यस्य सत्वे **गगनवत्** तदपि कारकव्यापारसाध्यं न स्यात् असत्वे तु गगनकुसुमवत् तत्साध्यां न स्यादित्यर्थः। एवमनन्तरभाविनः कार्यस्य पूर्वभाविना कारणेन सम्बन्धोऽपि न भवतीत्याह—**हेतुप्राप्तिरिति**। उभयसम्बन्धिस्वरूपसिद्धयपेक्षत्वात्सम्बन्धसिद्धेरिति भावः। असम्बद्धोत्पादने दोषमाह—**अघटितेति**—असम्बद्धत्वाविशेषात्सर्वस्मात्सर्वोत्पत्ति प्रसङ्ग इत्यर्थः।

अथ उत्पत्तेरुत्पत्तिविकल्पेन कार्यस्य विहतिमाह—**जन्यमिति**। उत्पत्तेरुत्पत्तिमत्वेऽनवस्थानात् अनुत्पत्तिमत्वे उत्पत्तिमतः कार्यत्वक्षतेश्च कल्पद्वयमप्ययुक्तमेवेत्यर्थः। आद्यशब्देन कार्यं कारणाद्भिन्नमभिन्नं वेत्यादिविकल्पक्षोभसंग्रहः। **हेतुसाध्यम्**—हेतुना साध्यम्। **न किमपि यदीति**। किमपि न स्याच्चेदित्यर्थः। उक्तशङ्कां निरस्यति—**नेति**। **स्वक्रियादेरिति**—स्वशास्त्रप्रणयनादेरित्यर्थः। **विरोधादिति**—बोधकत्वाभावेन वैयर्थ्यादिति भावः॥ ३२॥

कादाचित्कस्य कालावधिनियतिकरं पूर्वसत्कारणं स्यात्
भावोपष्टम्भशून्यो न खलु तदवधिं प्रागभावेऽपि कुर्यात्।
कार्यं निर्हेतुकं चेत्कथमिव न भवेन्नित्यता तुच्छता वा
कादाचित्कस्वभावाद्यदि न नियमनादन्यथाऽतिप्रसङ्गात्॥ ३३॥

सर्वा०—ननु परिवेषादिषु नियतपूर्वसत्किञ्चिन्न दृश्यते। न च घटादिदृष्टान्तेन तदनुमेयम्, विपरिवर्तस्य दुर्वारत्वात्। अतो दृश्यमाना अप्यवधयः केषुचिद्रसोत्पत्तौ रूपादिवद्यदृच्छासिद्धा इत्यत्राह—**कादाचित्कस्येति**॥ अयं भावः—**यदि** परिवेषादीनामपि कादाचित्कत्वं दृष्टं निपुणं तत्र निरूपयतां देशकालदृष्टविशेषादातपादिकारणविशेषसिद्धः। तदनुपलम्भेऽपि सन्दिग्धपरिवेषादिदृष्टान्तेन नान्यत्र हेत्वभावश्शक्योऽनुमातुम्, अनिश्चितसाध्यस्य दृष्टान्तत्वायोगात्, निश्चितसाध्यविपर्ययस्य पक्षत्वाद्यतिपातात्, निश्चितनिदर्शनादनिश्चिता-

नुमानं युक्तमेव। न च त्वद्विवादमात्रेण घटादिषु सर्वलोकसंमतः कारणसद्भावस्सन्दिह्यते।

एतेनाहेतुतो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् इत्यादि च प्रत्युक्तम्। अस्तु हेतुनिरपेक्षो नियतकालः प्रागभाव एव कार्यस्य पूर्वावधिः। स हि स्वभावविरुद्धतया कार्यकालमनश्नुवानस्तत्पूर्व एवेति सिद्धम्। अतः किमन्यैरित्यत्राह—**भावोपष्टम्भेति**। भावान्तरमभाव इति स्थापयिष्यते। इह त्वपिना पक्षान्तरान्वारोहस्सूच्यते। अयं भावः—यदि कार्येण प्रागभाव एव केवलोऽपेक्षणीयस्तद्वदेतेनाप्यानादिना भाव्यम्। अतः प्रागवधिः सन्नप्यभावस्तत्तद्भावशेखरित एव स्वात्मानमवधित्वेन नियच्छेदिति। नित्यस्वभाववत् कादाचित्कस्वभावस्यापि हेतुनैरपेक्ष्यं स्यादित्यत्राह—**कार्यं निर्हेतुकं चेदिति**। विषमं निदर्शनमित्याकूतम्। तदेवानिष्टप्रसङ्गेन व्यनक्ति—**कथमिति**। निरवधित्वे गत्यन्तरं न संभवतीति भावः। कार्यस्य निर्हेतुकत्वं सतोऽसतो वेति विकल्पे पूर्वत्र नित्यता, अन्यत्र तुच्छता स्यादिति विभाज्यम्, पूर्वावधिवदुत्तरावधेरप्यसत्कल्पत्वान्नित्यत्वम्। न होतःपरं न भवितव्यमनेनेत्यपि नियमोऽस्ति।

ननु कादाचित्कत्वं स्वभावो न वा? आद्ये नित्यस्वभाववन्निरपेक्ष एव स्यात्। द्वितीये कथमतत्स्वभावः कारणसहस्रेणापि तत्स्वभावतां नेतुं शक्यः? स्वभावस्य च हेतुमत्त्वे निर्हेतुकमिति किञ्चिन्न स्यात्। अतो नित्यस्वभाववन्नियतकालस्वभावता स्यादिति शङ्कते—**कादाचित्केति**। कादाचित्कस्वभावत्वेऽपि हेत्वधीनतां तत एव नित्यस्वभाववैषम्यं चाभिप्रेत्याह—**न नियमनादिति**। न हि यतः कुतश्चिदनन्तरमनेन भवितव्यमिति कादाचित्कत्वम्, अनियमादृष्टेः; अस्मादनन्तरमेवेदमिति कालविशेषव्यवस्थादृष्टेरित्यर्थः। उक्तनियमानभ्युपगमे सर्वत्र सर्वदा सर्वतः कार्यं स्यादिति तर्कबाधं व्यनक्ति - **अन्यथेति**। न हि धूमादिना यदा कदाचिद्भवितव्यमित्यस्य कादाचित्कत्वं नियम्यते; तथा सति गर्दभादेरनन्तरं तदुपलब्धिर्वा सामग्र्यनन्तरमनुपलब्धिर्वा स्यादिति ॥ ३३ ॥

आनन्द०—आक्षेपिकी संगतिमाह—**नन्विति**। आदिशब्देन क्षणरुच्यादिसंग्रहः। **नियतपूर्वमिति**—यद्यपि सूर्याम्बुदादयस्सन्त्येव, तथाऽपि न तेषामवधित्वं, तत्सत्त्वेऽपि तदभावादिति भावः। **विपरिवर्तस्येत्यादि**—तद्दृष्टान्तेन घटादावेवावधिनैरपेक्ष्यानुमानस्य संभवादिति भावः **यदृच्छासिद्धा इति**—अकारणमिति भावः। प्रतिज्ञामात्रं नार्थसाधकमित्यत्राह—**अयं भाव इति**। आतपादीत्यादिशब्देन पृथिवीपीतभागादिपरिग्रहः। **तदनुपलम्भेऽपीति**—नच योग्यानुपलम्भादभावनिर्णयः भर्जनकपालस्थवह्निक(कार)णानामिव तेजःक(कार)णानामप्यनुपलम्भसंभवादिति भावः। विपरिवर्तप्रसङ्गं परिहरति—**अनिश्चितेति निश्चितसाध्यविपर्ययस्येति**—

ननु घटादावपि मृदादेर्यदृच्छासिद्धत्वमुक्तमिति चेत्; मैवम्; परिवेषादौ कारणभावनिश्चये हि तद्व्याप्तया घटादावपि मृदादेर्यदृच्छासिद्धता। परिवेषादौ संदेहेन तद्बलाद्यदृच्छासिद्धत्वकल्पनायोगात्। तथा च घटादौ सकारणकत्वव्याप्ति-ग्रहस्संभवत्येव। परिवेषादौ तत्संदेहश्च व्यभिचारसंदेहतया न प्रतिबन्धक इति साध्यविपर्ययनिश्चयात् न पक्षत्वमिति भावः। विपरिवर्तप्रसङ्गं परिहरति--**एतेनेति**। निश्चितसाध्यदृष्टान्तेन (तत्रापि) कारणविशेषानुमानसंभवादिति भावः। नन्वस्तु पूर्वावध्यनुमानम्। तथाऽपि प्रागभाव एव पूर्वावधिः कारणमस्तु। न च प्रागभावस्यपि यत्कारणं तदेव कारणम(तदेवावधिर)स्तु, न तु प्रागभावः, तद्धेतो-रेवेति न्यायादिति वाच्यं; तस्य हेतुनिरपेक्षत्वात्। तथा च भावरूपकारणनिरपेक्ष-त्वमेव निर्हेतुकत्वमित्या(मस्तित्वत्या) शङ्कते—**अस्तु हेतुनिरपेक्ष इति**। **स्वभाव-विरुद्धतया**—भावाभावयोः स्वरूपेण विरुद्धतया। **तत्पूर्व एव—अतः किमन्यैरिति** सिद्धमित्यत्रा(मित्याहेत्य)न्वयः। **अन्यैः**—भावरूपैः। **भावान्तरमिति**—तथाच प्रागभावमात्रहेतुकत्वेऽपि भावरूपकारणजन्यत्वं सहेतुकत्वं सिद्धमिति भावः। **अन्वारोहोऽङ्गीकारः**।

ननु भावोपष्टम्भ एव मास्तु मानाभावादित्यत्राह—**अयं भाव इति**। **तद्वदेवेति**--ननु जन्यत्वस्यानादित्वविरुद्धतया तव्याप्यप्रागभावजन्यत्वस्यापि विरोधितया कथं ततोऽनादित्वसादित्वसाधनमिति चेन्न; कार्यं प्रागभावमात्रजन्यं चेत् प्रागभावाधिकरणक्षणोत्तरत्वाधिकरणक्षणवर्तिप्रागभावप्रतियोगि न स्यात्; यत्त(यद्य)दधिकरणक्षणोत्तरत्वाधिकरणक्षणवर्तिप्रागभावप्रतियोगि तन्न तन्मात्र-जन्यं यथा घटो दण्डमात्रजन्यः इत्यापादनेनानादित्वसिद्धेरिति भावः।

अन्ये तु प्रागभावमात्रजन्यत्वे प्रागपि प्रागभावसत्त्वेन कार्योत्पत्तेर्विलम्बा-योगात् अतीतका(लेऽपि)ले (कार्यस्यावश्यकतया) कार्याभावस्यासंभवात् अनादित्व (मर्थात्प्राप्त)मित्याहुः। कार्यस्याद्यजातस्य पूर्वकालसत्त्वमेवानादित्वमित्यप्याहुः।

तत्तद्भाव शेखरित इति-मूर्ति(मृत्त)त्वादिविशिष्टः। **नित्यस्वभाववदिति**—अन्यथा नित्यस्वभावस्यापि तत्सापेक्षता स्यादिति भावः। **तदेवेति**—निदर्शन-वैषम्यमेवेत्यर्थः। कार्यस्य नित्यत्वं विभाज्यमित्यन्वयः। **विभाज्यं**—विवेचनीयम्। नन्वेतावता पूर्वावधिराहित्यमस्तु; उत्तरावधिवैधुर्यरूपनित्यत्वं कुत इत्यत्राह—**पूर्वावधिवदिति**। **असत्कल्पत्वमविरोधित्वमित्यर्थः**। असत्कल्पत्वमेवोपपादयति—**न हीति**। उत्तरावधित्वाभावे सर्वस्याप्युत्तरावधिवैधुर्ये(ण)तदनन्तरमित्यभावादि-त्यर्थः।

यद्वा ननु ध्वंस उत्तरावधिरस्त्वित्यत्राह—न हीति। ध्वंसस्याप्युक्तरीत्या उत्तरावधिवैधुर्येणानादित्वात्सर्वस्याप्युत्तरावधित्वानुपपत्तेरित्यर्थः। **नित्यस्वभाव-वदिति**—पूर्वत्र स्वभावत्वाविशेषादहेतुकत्वशङ्का; संप्रति स्वभावत्वव्याघाताधी-

नेति वैषम्यम्। **स्व(स्व)भावस्य चेति**—सर्वस्यापि सहेतुकत्वप्रसङ्गात्; नचेष्टापत्तिः भवद्भिर्नित्यानित्यव्यवस्थाकरणादिति भावः। स्वभावत्वेऽपि कार्यस्य हेत्वधीनता दर्शनबलादभ्युपेयते न तु नित्यस्य; तदभावात्; अन्यथा कार्यस्य धूमादेर्यतः कुतश्चिद्गर्दभादिजातीयादनन्तरमप्युपलब्धिरुत्पत्तिस्स्यात्। वह्न्यादिघटितसामग्र्यनन्तरमपि कदाचिदनुपलब्धिस्स्यात्; नचेष्टापत्तिः; धूमादेर्वह्न्याद्यनन्तरमेव नियतोपलम्भविरोधात्। तदर्थिनो नियमेन तत्रैव प्रवृत्तेः। स्वक्रियाव्याघातादेरपि प्रसङ्गान्नियतावधिकत्वमङ्गीकरणीयमित्याह—**स्वभावत्वेऽपि** इत्यादिना। नहीति—(धूमादिना) यदाकदाचिद्भवितव्यमित्येतावता नियतकारणानङ्गीकारे तस्मादनन्तरमनेन भाव्यमिति कादाचित्कत्वमुत्पत्ति(त्तिर्न)न नियन्तुं शक्यमित्यर्थः॥ ३३ ॥

अक्ष० परिवेषविद्युदादि कार्यविशेषेषु नियतपूर्ववृत्तेः कस्यचिददर्शनादन्यत्रापि कार्यस्य कारणपूर्वकत्वनियम एव न स्यादित्यत्राह—**कादाचित्कस्येति**। कदाचिदेवोत्पत्तिमन्यमानस्य **कालावधिनियतिकरं**—देशकालादिसहकृतं आतपबलाहकादिकं पूर्वत्र विद्यमानमेव कारणं स्यादित्यर्थः। क्वचित्तदनुपलम्भेन सन्देहेऽपि। तद्दृष्टान्तेन अन्यत्र कारणपूर्वकत्वनिषेधः न बाधयितुं शक्य इति भावः। तर्हि तत्तत्प्रागभाव एव 'तत्तद्धेतुरास्तां' किमन्येनापीत्यत्राह—**भावोपष्टम्भशून्य इति**। भावरूपकारणान्तरवैशिष्टयमन्तरा केवलस्य प्रागभावस्य कार्यावधिकत्वं न संभवतीत्यर्थः। प्रागभाव मात्रावधिकत्वे तस्यानादित्वेन कार्यस्याप्यनादित्वमेवस्यात् नतु कादाचित्कत्वमिति भावः।

नित्यस्वभावस्येव कादाचित्कस्वभावस्यापि हेतुनैरपेक्ष्यं स्यादित्याशंकायामाह—**कार्यं निर्हेतुकं चेदिति**। निर्हेतुकत्वे गगनतत्कुसुमादिवत् नित्यत्वतुच्छत्वयोरन्यतरावश्यम्भावेन कादाचित्कत्वमेव न स्यादिति भावः।

ननु स्वभावो नाम स्वतस्सिद्धो धर्मः तस्य सहेतुकत्वे स्वभावत्वमेव हीयेत अतो निर्हेतुकेत्वेऽपि यथा गगनादेः खपुष्पवन्न तुच्छत्वं खपुष्पस्य वा गगनादिवन्न नित्यत्वं तद्वत्कादाचित्कस्वभावस्यापि न नित्यत्वं तुच्छत्वं वा प्रसञ्जयितुं युक्तमित्यत्राह—**कादाचित्कस्वभावाद्यदीति**। **नेति**। कादाचित्कस्वभावो निर्हेतुको न भवतीत्यर्थः। कुत इत्यत्राह—**नियमनादिति**। कस्यचिदनन्तरमेव नियमेन जननादित्यर्थः। विना हेतुविशेषं तदनुपपत्तेरितिभावः। उक्त नियमानभ्युपगमे सर्वदा सर्वत्र सर्वोत्पत्तिप्रसङ्ग इत्याह—**अन्यथेति**।

इति त्रिगुणपरीक्षायां कार्यकारणभावभङ्गनिरासः।

नेत्रादेर्दीपिकादेरिव नियमयुतं तैजसत्वादिसाध्ये
रूपादिग्राहकत्वं यदि करणतया स्यादसाधारणत्वम्।
तत्साहाय्यं त्वसिद्धं भवति गमकतामात्रमप्यञ्जनादा-
वक्षाहङ्कारिकत्वं श्रुतिपथनिपुणैर्घोषितं नैव बाध्यम् ॥ ३४ ॥

सर्वा०—प्रकृतस्य प्रकृत्यादिकारणवादस्य प्रतिपक्षा निरस्ताः। तत्र देहादिवदिन्द्रियाणामपि भौतिकत्वं वदतः प्रतिवक्ति—**नेत्रादेरिति**॥ नियमयुतं सावधारणम्, रूपादिषु मध्ये रसाद्यग्राहकत्वेन विशेषमित्यर्थः। चक्षुस्तैजसं रसाद्यग्राहत्वे सति रूपग्राहकद्रव्यत्वात् दीपवदति। एवं त्वगिन्द्रियं वायवीयं स्पर्शादिषु मध्ये स्पर्शस्यैव ग्राहकद्रव्यत्वात् अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकवायुवत्। रसनस्याप्यत्वे रसस्यैवेति दन्तान्तस्तोयदृष्टान्तः। घ्राणस्य पार्थिवत्वे गन्धस्यैवेति चन्दनकुङ्कुमादिगन्धाभिव्यञ्जकनिम्बत्वगादिनिदर्शनम्। श्रोत्रस्य तु नभस्त्वे श्रोत्रं गुणावान्तरजात्या स्वगुणसजातीयगुणग्राहकम् बाह्येन्द्रियत्वात् चक्षुरादिवदिति। शब्दो गुणावान्तरजात्या सजातीयगुणवतेन्द्रियेण गृह्यते बहिरिन्द्रियव्यवस्थापकगुणत्वाद्रूपादिवत्। शब्दो भूतेन्द्रियग्राह्य इति वा। बहिरिन्द्रियव्यवस्थापकत्वादित्येव हेतुः। तथा श्रोत्रं भौतिकम्, बाह्येन्द्रियत्वात् चक्षुरादिवत्। आकाश इन्द्रियारम्भकः, भूतत्वात् भूतान्तरवदिति। शब्दोपलब्धिर्वा भूतेन्द्रियकरणिका बाह्येन्द्रियव्यवस्थापकोपलब्धित्वात्, रूपोपलब्धिवत्। तत्राद्येषु चतुर्ष्वनुमानेषु हेतुविकल्पमनूद्य दूषयति—**यदिकारणतयेत्यादिभिः**। यस्मिन्सति कार्यं भवत्येव तत्करणम्; तच्च सन्निकर्षविशेषविशिष्टतयेन्द्रियाणाम्। ननु—

उद्विग्नो ह्यन्धकारेण कश्चिदेवं ब्रवीत्यपि।
किं चक्षुषा ममैतेन दृष्टं दीपेन यन्मया॥

इति दीपादिषु साधकत्वं कश्चिद् ब्रूयात्, अतस्सपक्षवृत्तेर्हेतोः कथमसाधारणत्वम्? इत्थम्—आलोकेन विनाऽपि जन्तुभेदेषु चक्षुषो रूपादिग्राहकत्वं सिद्धम्। अन्धकारे च मनुष्यादीनां तत्त्वतोऽन्यथा वा। अत ईदृशं प्राधान्यमपेक्ष्य इन्द्रियेषु करणत्वं दीपादिषु सहकारित्वं च प्रख्यातमनुरुध्य विकल्पप्रवृत्तेरविरोधः। कोटयन्तरं दूषयति—**तत्साहाय्यं त्वसिद्धमिति**। करणभूतेन्द्रियापेक्षया तेषामेव दीपादिवत्सहकारित्वमनुपपन्नमित्यर्थः। दीपादीन्प्रति सहकारित्वान्नासिद्धिरिति चेत्तर्हि प्रमातृप्रमेययोरपि तथात्वात्तत्सिद्धिः स्यात्। तयोः सतोरपि कदाचित्कार्यं नास्तीति चेत्तावता करणत्वं माभूत् तत्सहकारित्वं तु सिद्धमेव। दीपे च सति भाव एवेति नियमो नास्ति। संप्रयोगविशेषसाहित्यात्स्यादिति चेत्तर्हि तयोरपि ततस्स्यादेवेत्यनैकान्त्यम्। एतेन करणत्वादिविकल्पानादरेण रूपादिबोधकद्रव्यत्वमात्रं हेतुरित्यपि निरस्तम्। तद्व्यनक्ति—**भवतीत्यादिना**। आदिशब्देन प्रमात्रादिसंग्रहः।

अञ्जनस्य शक्ये प्रतिबन्धकनिवर्तकत्वमात्रमिति चेन्न; अशक्ये गूढ़निदर्शनादौ शक्त्याधानेन सहकारित्वदृष्टेः। शक्त्याधानं हि सहकारीति चेन्न; दीपादावपि तथा क्लृप्तिप्रसङ्गात्। सत्तयैव हेतुत्वं तत्र दृष्टमिति चेदत्रापि तथास्तु; अविशेषात्। ये च तत्तदिन्द्रियदोषैरपि रूपादिधीरस्तीति मत्वा * शरीरयोगे सत्येव साक्षात्प्रमितिसाधनमिति लक्षयन्ति; तन्मते तत्तद्दोषैरप्यनैकान्त्यम्। तेषां तैजसत्वानभ्युपगमात्। दन्तान्तस्तोयदृष्टान्तश्चायुक्तः; विषयसंस्कारस्य व्यञ्कत्वायोगात्। न हि ग्रस्यमानं किंचिदसंस्कृत्य दन्तान्तस्तोयस्योपकारत्वम्; तावता च रसव्यञ्जकत्वे रसगन्धाद्युद्भवहेतोरग्न्यादेरपि किं तन्न स्यात्? वायुश्च वेगेनाभिघ्नन् सूक्ष्मान्सलिलकणानन्तश्शरीरं प्रवेशयति। शैत्यं तु तेषां त्वगिन्द्रियप्रवेशवैषम्याद्विशदमनुभूयते। तावता स्पर्शव्यञ्जकत्वे गन्धोपकारस्य तस्य तव्यञ्जकत्वमपि किं नेष्यते? तथा च घ्राणपार्थिवत्वानुमानं दुःस्थमिति।

एवं चतुर्णां भौतिकत्वासिद्धौ तदृष्टान्तेन श्रोत्रभौतिकत्वानुमानान्यपि च्छिन्नमूलानि। आकाश इन्द्रियारम्भक इति चायुक्तम्। श्रोत्रस्य त्वन्मते तदारब्धत्वाभावात्। भूतत्वादिति च घटादिभिरनैकान्तिकम्। किंचात्र लोकसिद्धनयनबुद्बुदादिपक्षीकारे रूपादिविशेषैस्तेषां पार्थिवत्वसिद्धेः कालात्ययापदेशः। अनुमानतस्त्विन्द्रियसिद्धिरशक्येति वक्ष्यते। सामान्यतो दृष्टादधिष्ठानातिरिक्तेन्द्रियसिद्धावपि तदाहङ्कारिकत्वं श्रौतमबाध्यम्। इन्द्रियाण्यहङ्कारविशेषा इति हैरण्यगर्भोक्तिरपि तदाहङ्कारिकत्वानुगुणा; अतः श्रुतिसिद्धपक्षीकारेऽपि बाध एव। प्रतिप्रयोगाश्च—बाह्येन्द्रियाण्यभौतिकानि इन्द्रियत्वात्, मनोवत्। प्रत्येकपक्षीकारेण वा चक्षुरतैजसमित्यादि; तावेव हेतुदृष्टान्तौ; परस्परं वा घ्राणादयो दृष्टान्ताः। विपक्षे बाधकसदसद्भावश्च समः, यत्किंचिद्दृष्टान्तमात्रानुसारेण प्रसङ्गस्य सुलभत्वादिति। परोक्तानुमानानामागमबाधमभिप्रेत्याह—**अक्षाहङ्कारिकत्वमिति**। श्रुतिपथनिपुणैः—मनुपराशरपाराशर्यादिभिः। घोषितं—बहुषु प्रदेशेषु स्पष्टोक्तं नैव बाध्यम् अशक्तैरनुमानैरन्यपरैश्च वाक्यैरिति शेषः॥ ३४॥

आनन्द०—अवसरसंगतिमाह—**प्रकृत्येति**। **रसाद्यग्राहकत्व इति**—आत्मनि व्यभिचारवारणाय **रसाद्यग्राहकत्व** इति। परमाणौ व्यभिचारवारणाय **रूपग्राहकत्वादिति**। सन्निकर्षादौ व्यभिचारवारणाय **द्रव्यत्वादिति**। घटादिग्राहकतयाऽसिद्धिप्रसङ्गादत्रापि रूपादिष्विति बोध्यम्। तदर्थश्च—रूपादिषु पञ्चसु मध्ये इति। अत्र ग्राहकत्वं लौकिकप्रत्यक्षजनकत्वं; तेनोपनयादिवशाद्र(दिना र)सादिग्राहकतया नासिद्धिः। एवमुत्तरानुमानेष्वपि द्रष्टव्यम्। **रसस्यैवेति**—रसस्यैव ग्राहकत्वं हेतुरित्यर्थः। एवं गन्धस्यैवेत्यादावपि बोध्यम्। **निदर्शनं**—दृष्टान्तः।

बहिरिन्द्रियेति—इन्द्रियपञ्चके स्वग्राहकेन्द्रियेतरेन्द्रियनिरूपितस्वग्राहकेन्द्रियनिष्ठभेदानुमितिहेतुसाक्षात्कारविषयगुणत्वादित्यर्थः। तेन 'इन्द्रियव्यवस्थापकत्वं इन्द्रियसाधकत्वं; न च शब्दजन्यत्वमिन्द्रियस्य ! इन्द्रियानुमापकत्वं चेत् द्रव्यत्वादौ व्यभिचारः' इत्यपास्तम्। गुणत्वादिति शब्दत्वादौ व्यभिचारवारणाय। असिद्धिवारणाय साक्षात्कारविषयेति। सुखादौ व्यभिचारवारणाय बहिरिन्द्रियेति। द्रव्यत्वादौ व्यभिचारवारणाय इन्द्रियपञ्चकेति विशेषणमिति ध्येयम्।

बहिरिन्द्रियव्यवस्थापकत्वादिति—पूर्ववदेवार्थः। शब्दत्वादौ साध्यसत्त्वात् न व्यभिचार इति गुणत्वस्यानुपादानम्। **शब्दोपलब्धिरिति**—उपलब्धित्वं शाब्दोपलब्धौ व्यभिचारीतीन्द्रियेति विशेषणम्। सुखाद्युपलब्धौ व्यभिचारवारणाय बाह्येति विशेषणम्। **हेतुविकल्पमभिप्रेत्येति**—अभिव्यञ्जकादित्यत्र हेतावभिव्यञ्जकत्वं किं क(का)रणत्वं ? यद्वा क(का)रणसहकारित्वं ? अथवा बोधकत्वमात्रमिति विकल्पमभिप्रेत्येत्यर्थः। **तच्चेति** इन्द्रियाणामेव तथात्वात् पक्षमात्रवृत्तित्वेन असाधारण्यमिति(त्यर्थः) भावः। **अन्धकारेणोद्विग्नः**—भीतः। **साधकतमत्वं**—करणत्वम्। कश्चित् इत्यनेन लौकिकव्यवहा(र विरहस्सूच्यते)रापरिज्ञानादिरुच्यते। **सपक्षवृत्तेरिति**—दीपादीनां सपक्षत्वमिति भावः। किं दीपादीनां रूपादिसाक्षात्कारमात्रे करणत्वम् ? उत मनुष्यकर्तृकरूपादिसाक्षात्कारे इति विकल्पमभिप्रेत्य आद्ये दूषणमाह-? **आलोकेन विनापीति**। द्वितीये दूषणमाह—**अन्धकारे चेति**। ननु तर्हि व्यभिचाराद्दीपादेस्सहकारितापि न स्यात्। यदि तद्विशेषे विशदज्ञानादौ सहकारिता; तत्र करणताऽप्यस्तित्वत्यत्राह—**ईदृशेति**। रूपोपलब्धिमात्रे चक्षुषो यस्मिन् सति भवत्येवेति **रूपं** प्राधान्यमभिप्रेत्येत्यर्थः। न च विशदज्ञानं प्रत्यपि करणत्वम्; अन्यत्र क्लृप्तचक्षुष एव करणस्य सत्त्वेन सहकारितामात्रत्वात् ? अन्यथा गौरवात्। **कोटयन्तरमिति**—सहकारित्वमित्यर्थः। सहकारित्वं किं करणं प्रति ? उत कारणमात्रं प्रति ? इति विकल्प्य आद्ये आह—**करणेति**। **तेषामेव**—इद्रियाणामेव। **अनुपपन्नमिति**—सहकारिसहकारिमतोर्भेदाधीनत्वादिति भावः। द्वितीयमाशङ्क्य च दूषयति—**दीपादीनित्यादिना**। **तथात्वात्**—सहकारित्वात्। **तत्सिद्धिस्स्यात्**—तैजसत्वसिद्धिस्स्यात्। तदभावात्तत्र व्यभिचार (इति मावः)स्स्यादित्यर्थः।

ननु करणत्वमेव सहकारित्वेन विवक्षितमिति चेत्; तत्राह—**दीपे चेति**। तथा च असाधारण्यं तदवस्थमिति भावः। **तयोरपीति**—प्रमातृप्रमेययोरप्युक्तविधया नियमरूपकरणत्वसंभवेनानैकान्त्यमित्यर्थः। तृतीय आह—**एतेनेति**। **आदिशब्देनेति**—ननु प्रमातृप्रमेययोर्न स्वरूपमात्रग्रहसहकारित्वं; रसादिग्रहं प्रत्यपि सहकारित्वात्। रसादिग्रहासहकारित्वे सति रूपग्रहसहकारित्वस्य विवक्षितत्वात्; तथाच न व्यभिचार इति चेन्न; दृष्टान्तासिद्ध्या तथा विवक्षाया

असंभवात्। तेषामपि सन्निकर्षतया स्वनिष्ठस्पर्शादिव्यञ्जकत्वादिति भावः। इदञ्च अवधारणाविवक्षायां। तद्विवक्षायां त्वञ्जनादिद्रव्यसंस्कारकद्रव्ये दोषविशेषे च व्यभिचारो बोध्यः। **अञ्जनस्येति**-तथाच उपलब्धिसाधकत्वाभावान्न व्यभिचार इति भावः। **दीपादावपीति**-तस्य शक्त्याधायकत्वेन सहकारित्वाभावप्रसङ्गादित्यर्थः। **सत्तयेवेति**—दीपादीनां चक्षुरादौ शक्त्याधायकता नास्ति (स्तीत्यर्थः।) स्वरूपेण हेतुत्वादिति भावः। **अत्रापीति**—अञ्जनादावपि स्वरूपेण हेतुताक्लृप्तिरस्तीत्यर्थः।

ये चेति—नयनगतपित्तद्रव्येण शङ्खे पित्तरूपस्योपलम्भात् रसनगतदोषेण क्षीरादौ तिक्तताया उपलम्भात् तव्यावर्तनाय इन्द्रियलक्षणे प्रमितिविशेषणं तार्किकर (क्षणकृदादयः प्रतिक्षिपन्ति) क्षादावुक्तमित्यर्थः। अनैकान्त्यमेवोपपादयति—**तेषामिति। विषयसंस्कारकः**—विषये (द्रव्ये) ग्रस्यमाने रसाद्युत्पादकः। विषयसंस्कारकत्वमुपपादयति—**नहीति।** ननु रसाभिव्यञ्जकत्वं रसाभिव्यक्तिप्रयोजकत्वम्; **तच्च** रसोत्पादोपलम्भजनकसाधारणमिति नासिद्धिरित्यत आह—**तावता चेति।** तथाच पार्थिवत्वसाधकहेतोस्तत्र व्यभिचार इति भावः। त्वचो वायवीयत्वसाधकहेतावपि दृष्टान्तवैषम्यमाह—**वायुश्चेति।** उपलब्धि (मात्र) प्रयोजकत्व (मात्र) विवक्षायां दोषमाह—**तावता स्पर्शव्यञ्जकत्वे इति।** त(त्र)स्य वायोस्तत्र पार्थिवत्वसाधकहेतोर्व्यभिचार इति भावः। श्रोत्रस्य भौतिकत्वसाधकानुमानानां व्याप्यत्वासिद्धिरूपं साधारणं दोषमाह—**एवं चतुर्णामिति।** आकाश इन्द्रियारम्भकः इत्यनुमाने श्रोत्रस्य तन्मते नित्यतया बाधो व्यभिचारोऽपि दोष इत्याह—आकाश इति। किञ्च चक्षुराद्यनुमानेषु प्रत्यक्षसिद्धस्य पक्षत्वमुतानुमानसिद्धस्य आहोस्वित् श्रुतिसिद्धस्य इति विकल्पमभिप्रेत्य आद्ये दोषमाह—**लोकसिद्धेति।** द्वितीय आह—**अनुमानत इति।** वक्ष्यते—इन्द्रियाणामेकादशत्वसाधनावसर इत्यर्थः। **सामान्य इति**—रूपादिज्ञानं पक्षीकृत्य क्रिया क(का)रणजन्या इति सामान्यतो दृष्टादित्यर्थः। अपिशब्देनाधिष्ठानातिरिक्ततया सिद्धिर्न शक्येति सूच्यते। **तदिति**—तथाच आहङ्कारिकत्व(विरोधी न भवतीत्यर्थः) श्रुत्या तैजसत्वाद्यनुमानबाध इति भावः। योगशास्त्रे अहङ्कारत्वमिन्द्रियाणामुक्तमिति तदाहङ्कारिकत्वकथनं तेन विरुद्धमित्यत आह—**इन्द्रियाणीति।** कार्यकारणयोस्तन्तवः पट इत्यभेदव्यपदेशदर्शनादाहङ्कारिकत्वविरोधी तव्यपदेशो न भवतीत्यर्थः। तृतीयं दूषयति—**अत इति।** धर्मिग्राहकमानबाध इत्यर्थः। **परस्परमिति**—**चक्षुःपक्षकानुमाने घ्राणं घ्राणपक्षके चक्षुरादिक्रमेण परस्परपक्षकानुमाने परस्परं दृष्टान्ता इत्यर्थः। अन्यपरैरिति**—भूताप्यायितत्वमात्रपरैरित्यर्थः॥ ३४॥

अक्ष० अथेन्द्रियाणां भौतिकत्ववादं निरस्यति—**नेत्रादेरिति**। [1]"चक्षुः तैजसं रूपादिषुमध्ये रूपस्यैव ग्राहकत्वात् अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत्" "[2]रसनं आप्यं रसस्यैव ग्राहकत्वात् दन्तान्तस्तोयवत्" "[3] घ्राणं पार्थिवं गन्धस्यैव ग्राहकत्वात् कुङ्कुमगन्धाभिव्यञ्जकगोघृतवत्" इति तार्किका वदन्ति। तत्र हेतुशरीरविकल्पेन दूषणमाह—**रूपादिग्राहकत्वमिति। नियमयुतमिति। सावधारणमित्यर्थः**। रसाद्यग्राहकत्वेन विशेषमिति यावत्। ग्राहकत्वं ग्रहकरणत्वं, तत्सहकारित्वं, ग्रहकजनकत्वमात्रं, वेति विकल्प्याद्ये दूषणमाह—**स्यादसाधारणत्वमिति**। यस्मिन्सति यत्कार्यं भवत्येव तद्धि तत्कार्यकरणं दीपे सत्यप्यचक्षुष्मतो रूपग्रहाजननात् रूपग्रहकरणत्वं सपक्षतयाऽभिमते दीपे नास्तीति भावः।

द्वितीये दूषणमाह—**तत्साहाय्यंत्वसिद्धमिति**। करणभूतस्य चक्षुषः करणानुग्राहकत्वरूपं तत्सहकारित्वं न संभवति स्वस्यैव स्वानुग्राहकत्वाभावादिति स्वरूपासिद्धिस्स्यादिति भावः। तृतीये व्यभिचारमाह—**भवतीति**। अञ्जनादावतैजसे गूढनिधिदर्शनसाधनतायाः सत्वादिति भावः। आदिना भ्रमजनकेन्द्रियदोषाश्रयतया ज्ञानसामान्यसाधनचेतनादिपरिग्रहः। अपि च चक्षुर्गोलस्य पक्षीकरणे—तस्य पार्थिवत्वेन प्रत्यक्षसिद्धेन तैजसत्वस्य बाधः। तदतिरिक्तस्या प्रत्यक्षादनुपलब्ध्या आश्रयासिद्धिश्च स्यात् अनुमानतस्त्विन्द्रियसिद्धिरशक्येति वक्ष्यतेतदेकादशत्वसाधनावसरे। सामान्यतोदृष्टात् रूपादिग्रहः सकरणकः कार्यत्वादित्याद्यनुमानात् अधिष्ठानातिरिक्तेन्द्रियमेवेत्याह—**अक्षाहंकारिकत्वमिति**। **श्रुतिपथनिपुणः**। मनु पराशर पाराशर्यादिभिः। **घोषितम्**—स्पष्टोक्तं। **नचबाध्यमिति**—त्वदुक्तैरनुमानैरितिशेषः। त्वदुक्तानुमानानामागमबाधादिति भावः ॥३४॥

तन्मात्रेष्विन्द्रियाणां श्रुतिरिह न लयं वक्ति किंतु प्रवेशं
नो चेत्पृथ्व्यादिवाक्येष्विव हि लयपदं व्योम्नि चाक्षेषु च स्यात्।
भूतैराप्यायितत्वात्क्वचिदुपचरिता भौतिकत्वोक्तिरेषा-
मन्नाप्तेजोमयत्वं श्रुतिरपि हि मनःप्राणवाचामुवाच ॥ ३५ ॥

सर्वा० ननु *इन्द्रियाणि तन्मात्रेष्विति श्रुत्या भौतिकत्वममीषां भातीत्यत्राह—**तन्मात्रेष्विति** ॥ पूर्वापरपर्यायेष्विव आकाशेन्द्रियादिपर्याययोर्लयो न पठ्यते। न चात्रानुषङ्गः कार्यः; सति गत्यन्तरेऽध्याहारवत्तस्याप्ययोगात्। अन्यथा द्वितीयादिषु सर्वेषु पर्यायेष्वप्यनुषङ्गेण भाव्यम्; वैरूप्यायोगात्। इन्द्रियाणामाकाशप्रकृतित्वं च सर्वोपबृंहणविरुद्धम्। अस्यां चोपनिषदि भूतादेराकाश आकाशाद्वायुरित्यादिः सृष्टिक्रम उक्तः। *षोडश विकारा इति श्रुतेश्चासामञ्जस्यं स्यात्।

अतो वरमधिकरणत्वोक्तिमात्रानुसारादाकाशस्येन्द्रियेषु, तेषां चाकाशारम्भकतन्मात्रेषु प्रवेशविशेषाभिधानमित्यभिप्रायेणाह—किंतु प्रवेशमिति।

अयं भावः—यद्यप्याकाशस्येन्द्रियैः प्रागपि संबन्धः, तथाऽपि तत्तदिन्द्रियाप्यायकभूतांशानां स्वकारणलयक्रमात् आकाशदशापन्नत्वात्तदानीमिन्द्रियेष्वाकाशस्यैव संसर्गः। अनन्तरमाकाशे च शब्दतन्मात्रावस्थे तानीन्द्रियाणि शब्दतन्मात्रसंसर्गीणि भवन्ति। अतस्तन्मात्रान्तराणामपि तदवस्थापत्त्या तत्तदंशभेदविवक्षया बहुवचनोपपत्तिः। अतः *तन्मात्राणि भूतादौ लीयन्त इत्यपि बहुवचनं गतार्थम्। [अत्रैवं व्याख्यातम्-इन्द्रियाप्यायकभूतांशानां सर्वेषामाकाशतापन्नत्वादाकाशस्यैव इन्द्रियसंसर्ग आसीत्; पञ्चानामपि भूतानां शब्दतन्मात्रापन्नत्वादिन्द्रियाणि शब्दतन्मात्रांशभेदेषु संसृष्टान्यासन्निति।] एवमनभ्युपगमे वाक्यवैरूप्यदोषं व्यनक्ति—**नो चेदिति।**

ननु *श्रोत्रं नभो घ्राणमुक्तं पृथिव्या इत्यारभ्य *वाय्वात्मकं स्पर्शनमामनन्ति इत्युच्यते; *नभः श्रोत्रं च तन्मयम् इत्यादि च। अत आहङ्कारिकत्ववाक्यं परम्परया नेयमित्यत्राह—**भूतैरिति।** तदिदं व्यवस्थापितं **वेदार्थसंग्रहे**—*भूतैस्त्वाप्यायनं महाभारत उच्यते इति। इममेव न्यायम् *अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक् इत्यादिष्वपि योजयितुमाह—**अन्नाप्तेजोमयत्वमिति।** न खलु हैतुकैरपि मनसः पार्थिवत्वं कल्प्यते; वायुरूपस्य प्राणस्याप्यत्वम्; तस्मादाप्यायनपरत्वमेव तत्र वाच्यम्, एवमन्यत्रापि। *अग्निर्वाग्भूत्वा मुखं प्राविशत्, आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशदित्यादिषु तत्तद्देवताधिष्ठाने तात्पर्यम्; *अग्निं वागप्येति इत्यप्ययश्रुतिश्चाधिष्ठातृदेवतांशापक्रमणपरेत्यभाष्यत। *ओषधीर्लोमानीत्यादिना अनपियद्भिर्लोमादिभिस्सह पाठात्॥ ३५॥

आनन्द०—आक्षेपिकी संगतिमाह—**नन्विति। तन्मात्रेष्विति श्रुत्येति।** कार्यस्योपादान एव लयनियमादिति भावः—**पूर्वापरेति।** 'पृथिव्यप्सु लीयते' इत्यारभ्य 'वायुराकाशे प्रलीयते' इति पठित्वा अनन्तरं आकाश इन्द्रियेषु इन्द्रियाणि तन्मात्रेषु, तन्मात्राणि भूतादौ लीयन्ते इति पठ्यते; सर्वत्र लयपदं पठित्वा मध्ययोराकाशेन्द्रियपर्याययोर्लयपदं न पठ्यत इत्यर्थः। **अन्यथेति**—अत्र प्रकरणे **अनुषङ्गस्याभिप्रेतत्वे इत्यर्थः।** ननु श्रूयमाणस्थले अनुषङ्गासम्भवात् यत्र न श्रूयते तत्रानुषङ्गोऽस्तु वैरूप्यं च सोढव्यमिति चेत्; अनुषङ्गं विनाप्यर्थबोधकत्वेन वाक्यपरिसमाप्तौ वैरूप्यमभ्युपगम्य तत्कल्पनायोगात्। सोपबृंहणैतदुपनिषद्विरोधाच्चानुषङ्गो न युक्त इत्याह-**इन्द्रियाणामिति। भूतादिः**—तामसाहङ्कारः। **षोडशेति**—विकाराणां न्यूनत्वप्रसङ्गादिति भावः। नन्वनुषङ्गाभावे कथं वाक्यपरिसमाप्तिरित्यत्राह—**अतो वरमिति।** नन्वेवमपि प्रवेशनक्रियाया अश्रवणात् तदध्याहारादनु-

षङ्ग एव वरमित्यत्राह—**अयं भाव इति**। संसर्ग एव प्रवेशः; स च सप्तम्यर्थ इति नाध्याहार इति भावः।

ननु सर्वेषामाप्यायकभूतानां तत्तन्मात्राणां च लयक्रमेण आकाशदशापत्तिः तस्यापि लयक्रमाच्छब्दतन्मात्रतापत्तिरिति तन्मात्रसंसर्गे इन्द्रियाणि तन्मात्रेष्विति सप्तमीबहुवचनमनुपपन्नं; शब्दतन्मात्रस्यैकत्वात् इत्यत आह–**अत इति**। लयक्रमतः तन्मात्रान्तराणामपि शब्दतन्मात्रतापत्तौ तत्तदंशभेदस्य तत्र सत्त्वादित्यर्थः। **एवं प्रथमाबहुवचनमप्यनुपपन्नमित्याह—अतस्तन्मात्राणीति**। अंशभेदविवक्षात इत्यर्थः। ननु आकाशस्य प्राक्तनसम्बन्धापेक्षया इन्द्रियैस्सम्बन्धान्तरं वाच्यं; नचाप्यायकभूतानामाकाशतापत्तिमात्रेण तत्सम्भवतीत्याह–**अत्रैवमिति**। भाष्ये **इति शेषः**। 'आप्यायकानां भूतानामिन्द्रियैस्संबन्धविशेषोऽस्ति। इन्द्रियसम्बन्धविशेषवतां भूतानामाकाशतापन्नत्वे तत्र तत्सम्बन्धोऽप्याकाशे पर्यवसितः तथा तत्सम्बन्धापन्नस्यैवाकाशस्य तन्मात्रतापन्नत्वे तत्सम्बन्धाश्रयतन्मात्रसं(तत्सं)बन्ध इन्द्रियाणामासीदित्यर्थः' इति व्याख्यातमित्यर्थः।

यद्वा उक्तार्थे अभियुक्तसंमतिमाह—अत्रैवमिति। आहङ्कारिकत्वेऽप्युपबृंहणविरोधमाशङ्कच परिहरति—**ननु श्रोत्रं नभ इति**। परिहारप्रकारमाह—**तदिदमिति**। ननु महाभारतवचनादाप्यायनमस्तु; उपबृंहणान्तराद्भौतिकत्वं चास्त्विति चेत्; न; भौतिकत्वोपबृंहणस्य आहङ्कारिकत्वश्रुतेश्चान्यतरस्यान्यथासिद्धौ वाच्यायां श्रुतेः प्राबल्यात् तदनुरोधादुपबृंहणं व्यवस्थाप्यम्। किंच 'स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्' इत्यादिन्यायेनापि महाभारतवचनानुसारित्वमिति भावः। तत्र युक्तिमाह—**न खल्विति**। अन्यपरत्वस्य परेणावश्यं वाच्यत्वादित्यर्थः। ननु 'अग्निर्वाग्भूत्वा' इत्यादिना उत्पत्तिः 'अग्निं वागप्येति इति लयश्च श्रूयते इत्याह—**अन्यत्रापीति**। देवताप्रवेशाक्रमणपरत्वात् नोत्पत्तिलयपरत्वमित्यर्थः॥ ३५॥

अक्ष०"पृथिव्यप्सु प्रलीयते" इत्युपक्रम्य प्रवृत्तया "ननु" इन्द्रियाणि तन्मात्रेषु" इतिश्रुत्या भूतसूक्ष्मतन्मात्रेषु इन्द्रियाणां लयाभिधानेन तत्कार्यत्वावगमात् भौतिकत्वसिद्धिरित्यत्राह—**तन्मात्रेष्विति**। न लय वक्तीति—अस्मिन्पर्याये लीयत इत्यनाम्नानादिति भावः। तर्हि किमत्रोच्यत इत्यत्राह—**किन्त्विति**। **प्रवेशमिति**। संबन्धमात्रमित्यर्थः। तत्तदिन्द्रियाप्यायकतत्तद्भूतांशानां पृथिव्यादिलयक्रमेण आकाशतापत्तौ आकाशस्यैवेन्द्रियेषु संबन्धोस्तीति "आकाशमिन्द्रयेषु" **इतिपूर्वपर्याये उक्तमिति** संप्रतिपत्तव्यं। आकाशस्यापि तन्मात्रे लये तन्मात्र[illegible]भूतांतेषु केवलेन्द्रियाणां संसर्गमात्रमस्मिन्पर्याये अधिकरणत्वमात्रानवाच्या "तन्मात्रे ष्विति" सप्तम्या उच्यत इति भावः। अन्यथा

वाक्यवैरू प्यदोषो दुर्निवार इत्याह—**नोचेदिति**। पृथिव्यादिपर्यायेष्विव आकाशेन्द्रियपर्याययोरपि लयविवक्षायां 'पृथिव्यप्सु प्रलीयते आपस्तेजसिलीयते" इत्यादिवत् पृथक्-पृथक् लीयत इति पदं प्रयुक्तं श्रूयेत नचैवमस्ति नचानुषङ्गात्तत्सिद्धिः अबादिपर्यायेषु पृथक्पृथगेव लयपदश्रवणेनानुषङ्गनिरोधादिति। भावः। एवं सति "श्रोत्रं नभो घ्राणमुक्तं पृथिव्या" इत्यारभ्य वाग्व्यात्मकं स्पर्शनमामनन्ती" त्याद्युपबृंहणविरोधस्स्यादित्यत्राह—**भूतैरिति**। एषामिन्द्रियाणां भूतैराप्यायितत्वात् भारतादिषु भौतिकत्वोक्तिरौपचारिकीत्यर्थः। आहङ्कारिकत्वश्रुतेर्बलीयस्त्वादिति भावः। "अन्नमयं हि सौम्य मनः आपोमयः प्राणः तेजोमयी वाक्" इत्यादावप्ययमेव न्यायोऽवगन्तव्य इत्याह **अन्नेति**। मन आदौ पार्थिवत्वादेः केनाप्यनभ्युपगमादिति भावः।

अथवा तदाप्यायनमात्रेण तदात्मकत्वोपचारः कुत्रापि न दृष्ट इत्यत्राह—**अन्नेति**। मन आदेः अन्नादिमयत्वं आप्यायनमन्तरा अन्यादृशं दुर्वचमिति भावः। अपिना औपचारिकोक्तोपबृंहण समुच्चयः॥ ३५॥

इतिइन्द्रियाणां भौतिकत्वाहङ्कारिकत्वनिरासः।

रूपादिज्ञानसिद्धौ यदि करणतया कल्पनं धीन्द्रियाणां
तद्वद्गत्यादिकर्मस्वपि करणतया सन्तु कर्मेन्द्रियाणि।
कर्मज्ञानाक्षहेत्वोस्समपरिहरणा ह्यन्यथासिद्धिशङ्का
तस्मादेकादशाक्षाण्यपि निगमविदो मन्वते न्यायपूर्वम्॥ ३६॥

अथ मनष्षष्ठान्येवेन्द्रियाणि, वागादिष्विन्द्रियशब्दो भाक्त इति वदतः प्रतिबन्दिपूर्वकेण प्रमाणेन प्रतिक्षिपति—**रूपादीति**॥ अयं भावः—यद्यागमः प्रधानीक्रियेत तदा *इन्द्रियाणि दशैकं चेति व्यवतिष्ठेत। यदा तु क्रिया करणपूर्विकेति व्याप्त्या रूपादेः सुखादेश्चोपलब्धिः, स्मृतिश्च क्रियात्वात्करणपूर्विकेति कल्प्येत; तदा वचनादानादिक्रियाऽपि तत्पूर्विका कल्प्या स्यात्। अथ तावताऽधिष्ठानातिरिक्तं न सिध्यतीति मन्यसे, ज्ञानेन्द्रियेष्वपि तथैवालोकादिभिरधिष्ठानैश्च सिद्ध साध्यता। गोलकादिसद्भावेऽपि कदाचित् कार्यं न जायते इत्यतिरिक्तसिद्धिरितिचेत्; समं वागादावपि। सामग्रीवैकल्यात् प्रतिबन्धकाच्च तत्र तथेति चेत्; चक्षुरादावपि तथैव। सत्यप्यालोकादौ दोषादर्शनेऽपि गोलकादितः कदाचित्कार्यं न जायत इति चेत्, तदपि समम्। दोषस्सूक्ष्मस्तत्रेति चेत्; अत्राप्येवमस्तु। ज्वालाघ्रातबीजन्यायेन विशेषादर्शनेऽपि दोषस्य कल्प्यत्वात्, कल्पितेऽपि ह्यतीन्द्रिये तदानीं तद्भ्रंशहेतुस्सूक्ष्मो दोषस्त्वयाऽप्यङ्गीकार्यः। अन्यथा कथं कर्मेन्द्रियकल्प्तेरन्यथासिद्धिः?

ननु च यदि चक्षुर्गोलक एवेन्द्रियम्, कथं तर्हि दूरस्थं व्यवहितं वा न प्रकाशयति ? इत्थम्—यथाऽयस्कान्तादेरव्यवहितानतिविप्रकृष्टाकर्षकत्वं, तथेह प्रकाशकत्वम्। आभिमुख्यविशेष एव च बाह्यैरुक्तस्संबन्धोऽस्तु। नन्वयस्कान्तादिवदाभिमुख्याभावेऽपि दर्पणादिभिः स्वमुखादेः पश्चाद्भागवर्तिनां च दर्शनं कथं स्यात् ? भवतो वा कथम् ? चाक्षुषस्य तेजसः प्रतिलोमवृत्त्येति चेत्; सा कुड्यपाषाणादौ कथं न जायते ? मणिसलिलदर्पणादिषु च कथं भवति ? अपर्यनुयोज्यतत्तद्वस्तुस्वभावविशेषादिति चेत्; अस्तु तर्हि स एव सन्निधिविशेषसामर्थ्यादनभिमुखवस्तुनिदर्शनस्य हेतुः। द्रव्यान्तरकल्पनाद्वरं सिद्धद्रव्यसामर्थ्यविशेषस्य प्रतिफलनादौ संमन्तव्यस्य कार्यान्तरयोजनामात्रम्। अतो धीन्द्रियाणां कल्प्यत्वे कर्मेन्द्रियाणामपि क्लृप्तिरनिवार्या; अन्यथासिद्धिशङ्कापरिहारौ च समाविति। तदेतत्सर्वमभिप्रेत्याह—**कर्मेति**। त्यज्यतां तर्हि वर्गद्वयमिति **चार्वाकोत्थानं प्रतिरुणद्धि—तस्मादिति**। अतीन्द्रियेन्द्रियकल्प्यत्वासंभवादप्राप्ते च शास्त्रस्यार्थवत्त्वादिति भावः। निगमविद इत्यनेन श्रुतिस्मृत्यनुविधानसूचनम्। *एका कन्या दशेन्द्रियाणि इत्यादेर्न हि कश्चिद्बाधो दृश्यते। नच **कणभक्षाक्षपादाद्यनुसारेण** षट्कावच्छिन्नेन्द्रियलक्षणक्लृप्तिर्युक्ता। यथाऽऽहुः—

सिद्धानुगममात्रं हि कर्तुं युक्तं परीक्षकैः।
न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम्॥ इति॥

वक्ष्यते चानुवृत्तं तल्लक्षणं सात्त्विकाहङ्कारोपात्तत्वम्। न च कर्मेन्द्रियाणां तन्त्रान्तरसिद्धं राजसत्वमनुमन्तव्यम्; शब्दप्रमाणके यथाशब्दं व्यवस्थापनात्। **साङ्ख्यं** रप्यत्र शास्त्रमेवानुसृतम्—*सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारादिति। साधितं च **सप्तगत्यधिकरण**सिद्धान्ते हस्तादीनामपि तादृशमिन्द्रियत्वं न्यायपूर्वम्। *क्रिया करणपूर्विकेति व्याप्त्यनुसारेण तत्तत्करणमात्रानुमानेऽपि अलौकिकविशेषप्रतिपत्तिश्शास्त्रत एवेति भावः। एवं च शास्त्रयोन्यधिकरणे **भाष्यम्**—*अतीन्द्रियेऽर्थे शास्त्रमेव प्रमाणमिति। चन्द्रबिम्बपरभागादिषु व्यवधानविप्रकर्षादिभिरस्मदादीन्द्रियग्रहणानर्हेषु नानुमानम्; तस्य पक्षाश्रयहेतुधर्मव्यापकान्वयमात्रातिरिक्तेषु प्रवृत्त्ययोगात्, साध्यसामान्यस्य तु विवक्षितविशेषविरुद्धव्याप्तत्वेन तदाकर्षकत्वायोगात्। अतोऽतीन्द्रियध [मि] र्मकल्पनाद्वरं दृष्टेषु केषुचिद्वैषम्यमात्रस्वीकार इति तात्पर्यम्॥ ३६॥

आनन्द०—प्रसङ्गसंगतिमाह-**अथेति**। अवसरसङ्गतिरित्यन्ये। नन्वनुमानात्सिद्धिश्चान्यथासिद्धिश्च समे इत्युक्तं; तावता न सङ्ख्याविशेषसमर्थनं उभयथाऽपि व्याप्तत्वभावात् इत्यत्राह—**अयं भाव** इति। इन्द्रियाणामतीन्द्रियत्वेन तत्रानुमानागमयोरेव प्रमाणतया पर्यवसानात् प्रथममागमपक्षे स्वपक्षसिद्धि(र्नस्य)